CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. 371





मकारो चक्षुर्दीप्ता च विश्वभागमरेश्वरः।

महाकालं महामाया गलमुण्डी विषं विदुः

विषशब्देन मकार उच्यते-

अंकुशश्च क्रियामूर्धा पद्मनाभस्तिपञ्चमः।

चेतनासुमनामूर्द्ध्वा कथ्यते कविभिस्तथा।

चेतनाशब्देन बिन्दुरुच्यते- पर्यायनामान्यक्षराणां क्रमेण मन्त्र-व्यानि अर्द्धाब्जं अर्द्धचन्द्रः तदूर्ध्वं तदुपरिदण्डेनादः परत-स्तदुपरि शक्तिः अर्द्धेन्दुपित्तहलाकृतिः कला अपरा उन्मना कला ज्ञेया एवं प्रकारेण शक्तिकला ज्ञेया शक्तिशब्देन वामादि नवकात्मत्वान्नसंख्या लक्ष्यते - तत्संख्याभिः कलाभियुक्त-शिवो वाच्यः - उक्तप्रकारेण वाच्यः नव कलाशिव कल इति भावः - तथागमः - 'सान्तं मेधा च षष्ठश्च भान्तं बिन्द्वर्धचंद्रकं।

नादस्तदूर्ध्वगश्शक्तिरुन्मना नवधा शिव।'

इति वक्ष्यमाणप्रकारेण शक्तिकलः षोडशकला प्रासादशिवोऽपि वाच्यः। एवं वक्ष्यमाण प्रकारेण विश्वस्वरकलः द्वादशकला प्रासाद शिवोऽपि वाच्य इत्यर्थः न्वयः। अस्मिन् प्रासादे कलाभेदमाह-

~~सकलो निष्कलश्शून्य कलाढ्यः कमलं कृतः।~~

क्षपणक्षायमन्दस्थः

विंशति षोडशश्चैव द्वादशां नवांया नव।

अष्टम षष्ठमः पञ्च कलाभेदाः प्रकीर्तिता इति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रासादोऽष्टविधः। अष्टविधः प्रासादभेदस्स्यात्
शिवमन्त्रं सदा जपेत्। इत्थमुक्त अष्टविधप्रासादमेवेदं
प्रासादतत्त्वं प्रस्तुतम्। एवं कला भेदमुक्त्वा नामभेदमाह

सकलो निष्कलश्शून्य कलाढ्यः कमलं कृतः।
क्षपणक्षयमन्दस्थः कण्ठोष्ठ्य इति कीर्तितः।

इत्येवमष्टविधप्रासादतत्त्वस्वरूप विनियोगादिकम् उत्तरत्र ग्रन्थकर एव वक्ष्यति तत्र एव वक्ष्यामः। ततः द्वादशकला प्रासाद मन्त्रोद्धारविधिमाह -

शून्ये चण्डांशु योगे पशुरपि च ततो लंघनो द्वाब्जरोधी-
दण्डो दण्डान्तशक्तिस्तदुपरि च समना सोन्मना व्यापिकाख्या।
अर्कांशो व्यापिकान्ते वियदपि च घनानन्तसंज्ञाख्य
नाधा प्रासादेनाश्रिता वा प्रागिव स समना षोडशांशे तथाख्या॥

इत्यादि श्लोकचतुष्टयं स्यात् - धरावृत्तम् - शून्येति शून्ये हकारे तथोक्तं - शुद्धाख्यायां - नादं गुह्यं परोजीवो देही भूतश्च मध्यमम्। सोऽन्तं तत्त्वान्त भूतान्तं शिवार्णं शून्यमव्ययम्॥

एते पर्यायनामानि हकारस्य विधीयते।
वाङ्मनातीत भावत्वात् शून्यश्चेति प्रकीर्तितम्।

अन्येषां निर्वचनन्तत्रैवोक्तं अत्र ग्रन्थ विस्तरभयात् न लिख्यते। चण्डांशुः आदित्यः। अनेन अकाराक्षर उच्यते तथा निघण्टुः- 'अकारो विष्णुरादित्यो वासुदेवो महाबलः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



श्रीकण्ठो नरकादिस्तत् प्राक्षीपूर्णोदराकृतिः। इति कोणम् - ऊकारः - दीर्घकोणस्य ऊकारस्य ह्रस्वकोणतया कोणशब्दवाच्यत्वं तथा निघण्टुः - 'पशु आत्मा मकारः' तथा निघण्टुः - देहान्यो नश्वरो व्यापी भिन्नस्समलो जडः।

स्वकर्मफलभुक्कर्ता किञ्चिज्ञस्सेश्वरः पशुरिति ॥

अनन्तरं लंबनाबिन्दुरर्द्धाब्ज-चन्द्रखण्डः रोधिरोधिनी - दण्डो नादः - दण्डान्तो नादान्तः शक्तिः वामपार्श्वबिन्दुयुक्तसीराकृतिः तदुपरिशक्तेरूर्ध्वं समनासोन्मना अन्या व्यापिकाद्धिमनासहितं व्यापिकाख्या शक्तिः व्यापिका समना उन्मना चेत्यर्थः। इत्थमकारो द्वादशकला प्रासादे शिवो वाच्य इत्यनुषंगः। तथोक्तं सिद्धान्तरहस्ये

अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्द्धचन्द्रा निरोधी च नादो नादान्त एव च ॥
शक्तिश्च व्यापिनी चैव समना चोन्मना तथा।
समनान्तं पाशजालमुन्मन्यन्ते परश्शिव इति।

अथ षोडशकला प्रस्तारस्य विधिमाह - व्यापिकान्ते व्यापि-
४२८ कायामन्ते अकाराक्षरमारभ्य व्यापिकाशक्त्यन्त द्वादशकला ग्रहणम् - तदुपरि धनान्ध्यन्द्व्योम् यशा अनन्ता अनाथा अनाश्रिता इतचतुष्टयग्रहणं मध्ये प्रागिवतदुपरिसमना सहिता अन्या उन्मना च द्वादशकला प्रासादवत्। उपान्ते

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्विम्मनाया अन्ते उन्मनेत्यर्थः । इत्थं षोडशांशे प्रासादे शिवोवाच्यः । इत्यनुषंगः तथोक्तं सिद्धान्तरहस्ये समना-व्यापिकान्तके व्योमांगानन्तसंज्ञके । अनाथानाश्रितेत्वेवं ज्ञेयो द्व्यष्टकलाशिवः ॥ तत्सर्वमुक्तम् ।

अकारश्च उकारश्च मकारश्च बिन्दुरेव च ॥
अर्धचन्द्रो निरोधी च नादो नादान्त एव च ॥
शक्तिश्च व्यापिनी चैव व्यामरूपात्वनन्तका ।
अनाथानाश्रितेत्वेवं समनोन्मना तथा ॥
समनान्तं पाशजालमुन्मन्यन्ते परशिवः ।
एवं षोडशधा भेदः कलाप्रास उच्यते ॥

इत्यत्र चण्डांशुशब्देन तत्प्रवेशं न लक्षणया वह्निशिखाप्रभवमेधा भूतस्य औकारस्य ग्रहणे कोणपदेन दीर्घकोणभूतस्य ऊकारस्य ग्रहणे सति औकार ऊकारादि प्रासादो सूचितः । तदुक्तं प्रासादोपनिषदि —

पञ्चदीर्घमृत्युरूपं भूषणं बिन्दुरेव च ।
चन्द्रखण्डो निरोधी च नादो नादान्तमेव च ॥
शक्तिश्च व्यापिनी सूक्ष्मा समना उन्मना तथा ।
समानव्यापिकान्तस्थे व्योमांगानन्त संज्ञके ॥
अनाथानाश्रिता देवी कलारूपात्मकं शिवम् ॥

अथ कलानां क्रमेण मातालक्षणं निरूपयति —

Center for Shaiva Studies, Pondicherry Collection

मात्रा द्व्येकार्द्धार्द्धे तद्दलकला इन्द्वाग्निवेदा द्विषड्भि-
स्सर्पाक्षीन्दुकलात्मबाणयुगलैर्मात्रैर्मनोमात्रया ।
युक्तैत्वर्क्कांशकैस्तिकयुतविरहादन्तरेषु त्रिशून्यम्
भूयस्त्वेकैकहानैरिति खलु गुरुभिर्ज्ञायते शून्यषट्कम् ॥

इति त्रिः - द्वि - एकः एकसंख्या मात्रा इति शेषः - अर्द्धं एकार्द्धं पादः तद्दलं पादार्द्धं कला षोडशांशमित्यर्थः । इन्द्वाग्नि इन्दुद्वयमेकस्थानं अग्नित्रयं दशस्थानं द्वात्रिंशांशमित्यर्थः । वेदा द्विषड्भिर्वेदाश्चत्वार अध्वानष्षट् - चतुष्षष्ठि संख्याकमित्यर्थः । सर्पाक्षीन्दुक - सर्पा अनन्ताद्यष्टनागाः एकस्थानं अक्षिद्वयं दशस्थानं इन्दुरेकः शतस्थानमिदमनेन अष्टाविंशत्याधिक शतांशमित्यर्थः । आत्मबाणयुगलैः - आत्म षडध्वा बाण कामबाणः पञ्चयुगलं द्वयं अनेन षट्पञ्चाशदधिक द्विशतांशमित्यर्थः । इत्थं क्रमेण संख्यातैः प्रथमकलामारभ्य समनान्तैः मात्रैः मनोमात्रया मन्मनागतया अव्यपेक्षमात्रया उक्ते सतीत्यर्कांशैः द्वादशकलाप्रासादे अयं मात्राक्रमः औकार ऊकारादि प्रासाद एव औकार ऊकारादौ तु चन्द्रयुग्मतदर्द्धे त्यादिना पूजास्तव व्याख्याने ज्ञानशिवाचार्यैरुक्तं तद्यथा -

"चन्द्रयुग्मगुणार्द्धमात्रतदर्द्धतद्दलषोडशद्युत्तरत्रिदशा-
ब्धिषष्ठिभुजंगमश्रवणक्षमा । दर्शनेषु कलांशभावमितोन्मनी
परमासनं यस्य तं प्रणतोऽस्मि निष्कलमव्ययं परमं शिवम् ॥"

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्यार्थः- चन्द्रः एकं युग्मं द्वयं गुणास्त्रयः अर्धं स्पष्टं तदर्धं पादः। तद्दल एवं पूर्वसंख्याक्रमेण षोडशांशं पादार्धस्यार्धः- द्व्युत्तरतिदशाभिर्युतं द्वाविंशत्- आब्धिषष्टि अब्धयश्चतुस्समुद्राः षष्टि-चतुष्षष्टिरित्यर्थः भुजंगमश्रवणक्ष्मा भुजंगमा अष्टमहा नागाः ८ श्रवणद्वयं दशस्थानत्वाद्विंशति क्ष्मा- एकं। तृतीयस्थानत्वात् शतं अष्टाविंशत्यधिकशतांशमित्यर्थः दर्शनेषु करांगदर्शनं समयानिवत् इषुकामबाणत्वात् पञ्च इति पञ्चाशत् करौ द्वयमिति द्विशतं षट्पञ्चाशदधिकं द्विशतांशमित्यर्थः समना इति यावत् अस्य द्वादशकला प्रासादस्य औंकारादि प्रासाद इति वदन्ति- तदुक्तं मन्त्र रत्नाकरे –

प्रासादं द्विविधा प्रोक्तं षष्ठादिमनुरादि चेति।

प्रागिवात्रापि संमतिरन्तरतन्त्रग्रन्थे प्रदर्शयिष्यते। औंकारं- मात्रे-नु ऊकारं-उ मकारं-त बिन्दु-ग अर्धचन्द्रः-च निरोधिं- ल नादं- श नादान्तं- अ शक्तिम्-म्ना-व्यापिनी अतीग- समनं- म्नश्च- उन्मना- तीगणु- अस्य मनो मातेति केचिद्वदन्ति। तदुपरि शून्यं अस्मिन् प्रासादे षट्शून्यमाह त्रिकत्रिक विरहः। उक्तेषु औंकार ऊकार मकार त्रिक त्यागादेकमयशून्यं बिन्द्वर्धचन्द्रनिरोधित्या-गाद्वितीयं मध्यशून्यं नादनादान्तशक्तित्यागात्तितयमूर्ध्व-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शून्यं - ऽध्वन्तरेषु त्रिशून्यं शून्यतयं भुवः । ऽर्केकहाने रेकेकस्य हानेरुपरि त्रिशून्यं व्यापिनी विरहादेकश्चतुर्थशून्यं समनाविरहात् पञ्चमं शून्यं - उन्मनात्यागात् षष्ठं शून्यं ऽवं शून्यमुक्तं ऽभिस्सर्वैरुपाधिभिश्च शून्यत्वात् परम-शिवः कलाहीन इति यावत् - इदं शून्यषट्कं गुरुभिराचार्यै र्ज्ञायते - अनेन प्रासादपरिज्ञानवतामाचार्याणान्दोष श्रवणात् योग्यत्वमेव नास्तीति कथितं भवति । शून्यषट्क ज्ञानेन गुरुणा शिष्यं शून्यषट्कस्यान्ते सप्तमे अन्ये भाव-क्षयगते शुद्धेयोजयेदिति भावः तथोक्तं सिद्धतन्त्रे -

मेधादि काककाख्यस्य कलासुमध्ये त्रिकात्रिकाणां विरहात्त्रिशून्यं - ऽर्केकहारे रुपरि त्रिशून्यं शून्यात्परं योजय धामशैवमिति - तथा ललितभेदे -

ऊर्ध्वशून्यमधश्शून्यं मध्यशून्यं तृतीयकम् ।
शून्यरूपश्चलद्ध्येत तदधोमध्य ऊर्ध्वतः ॥
चतुर्थं व्यापिनीशून्यं समनायान्तु पञ्चमम् ।
उन्मनायान्तथा षष्ठं ऽते शून्यगास्मृताः ॥
तत्वेनाविष्टितास्सर्वे स्वाश्रया अपि सिद्धिदाः ।
षट्शून्यानीति संत्यज्य सप्तमे तु लयं कुरु ।
अशून्यं शून्यमित्युक्तं शून्यं चाभावमुच्यते ।
अभावस्तु ततो दिष्टो यत भावक्षयं गतः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सत्तामात्रं द्वयं शुद्धं त्वपरं किमपि स्थितमिति ।

कालोत्तरे -

83a स्वरूपस्यान्यं तदिति शिवमेव सदा भवेत्

समाधिरेतद्विज्ञेयं शास्त्रविद्भिरुदाहृतम् ।

शिष्या - तेन ज्ञानेन संज्ञोऽपि दीक्षानुग्रहकृद्भवेत् ।

अन्यथा तु गुरोर्ज्ञेयो न दीक्षा न च मुक्तयः ॥

तदनु द्वादशकलाप्रासादानां प्रस्तारविधिमाह -

धीशो मेधा क्षमाख्यो विषमय च ततश्चेतनाश्चन्द्रखण्ड

त्र्यश्र त्रिध्य श्चन्द्र वृत्त सुरेरण किरण हलसेन्दु बिन्दु क्रमेण ।

वृत्तार्क त्रिशिख द्विबिंब कलिता रेखाद्विगुच्छजान्मना

साकारमनास्मरेदपि कला प्रत्येक मका शिवे धीश ॥

धीशाः शिवबीजो हकारः मेधा औकारः क्षमाख्य ऊकार

विषं मकारः अथ च ततः चेतना बिन्दु चन्द्रखण्ड

अर्धचन्द्रः त्र्यश्रान्तिकोणं निरोधि हक वृत्त सीरः

हक चन्द्रः अतिनेतजः द्विपार्श्व बिन्दुरिति वृत्तम् तदुक्तो

हलः - नादः - दक्षिणपार्श्व बिन्दुयुक्तो हल इत्यनेन नादान्त

ग्रहणं - सेन्दुसीरः वामपार्श्व बिन्दुर्युक्त सीर इत्यनेन

शक्ति कलादार्शितः वृत्तार्क त्रिशिखं दक्षिणपार्श्व बिन्दु युक्त

त्रिदण्डं त्रिशूलं वा द्विबिंबकलिता रेखा दक्षिणवाम बिन्दु-

युक्त द्विगुच्छरेखा समना ~~द्विगुणपार्श्व बिन्दुयुक्तो हल~~ -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्यनेन नादान्तग्रहणं द्विगुमरुजात्मना द्विपार्श्वबिन्दुयुक्त द्विवक्ररेखा उन्मना कला एवं क्रमेण अकारो द्वादशकला प्रसादे मेधाधिकाः- शाकारन्तत्तदुक्ताकार सहितं यथा भवति तथा मनसा स्मरेत्- उक्तप्रस्तारक्रमेण कलानामाकृत-यः स्मर्या इत्यर्थः । पञ्चम उकारमृत्युः कालबीजत्वान्मकारः-भूषणं बिन्दुचन्द्रखण्ड अर्द्धचन्द्रः - - - निरोधि हग्भानु-गध्वनि हक्-चन्द्रः वामपार्श्व बिन्दुः भानुः दक्षिणपार्श्वबिन्दु-स्तन्मध्यगो ध्वनिर्नादः तद्दण्डाभ इति केचित्- सोराभ इत्यन्ये - नादं द्विगुणपञ्च रुजकमिति वचनात् स्वन्येभग्नसीरोदे. भुजंग कुटिलाकृतिरिति वचनाच्च भुजंगकुटिलाभं द्विगरुजकमेव सीरे भास्करः सीरो हलः भास्करो दक्षिणपार्श्वबिन्दुः अभा-स्करसंनिधेस्स अस्यापि दक्षिणवामक्रमश्च सूचितः । सेन्दु वृत्तहलाकृति इन्दुवृत्तं वामपार्श्व बिन्दुः हलाकृतिस्सीराकृतिः इन्दुसंनिधानात् हलोपि वामक्रम इति शक्तिः सांशुमति शिव अंशुमा*नादित्यः त्रिशिखः शिवेतिमि शिवेदिति दण्डाकारः त्रिशिखः त्रिदण्डः व्यापिनी व्यापिनी बिन्दु-विलसत्त्रिकोणाकारतां गतेति बिन्दुर्दण्डाकाररेखेति केचित् रुजा सवनामित्युक्तत्वात् त्रिशूलाभ इति केचित् उभयोरपि ग्रन्थविरोधेन द्रष्टव्यरूप इति गुरवः सा व्यापिनी । द्वि-बिंबगत द्विगुरुजः द्विबिंबं बिन्दुद्वयं द्विगुब्जं वक्तद्वयम्-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



बिन्दुद्वयान्तरालस्थद्विरेखामपि या पुनः समनेति वचनात् बिन्दु-चक्रयोर्मध्ये दण्डाकाररेखे विद्येते - सा समना उन्मना कलासाता सगर्भित-चुलिकेति केचित् - कुटिलन्तु त्रिधामतमिति वचनात्कुटिलमेवेति केचित् । बिन्दुविलसद्वृत्तु रेखा तथोन्मनेति बिन्दुदण्डाकाररेखेति केचित् स्वर्णा यद्व-पिपीलिकेति केचित् सर्णस्वर्णाकृति नीति केचित् । पिपीलिका-कारमिति केचित् । वक्ष-चतुष्टया नामविरोधेन या रेखा दृश्यते सैवोन्मनीति गुरवः तदुक्तं प्रति तन्त्र विरोधेन -योर्थस्संग्रह्यतेत्यर्थः तद्गुरोर्युक्ति दौर्बल्यात् जोबं वाग्विर्क्कं डंबनमिति - डावं भूतकलायुक्त विशेवो हकारः डावस्सकलो निष्कलः सकलाकल इति त्रिधा सकलः अकारयुक्त हकारः स्वन्वे भग्नाशिरोदेशे भुजंग कुटिलाकृतिरिति वचनात् । अकारवर्जित हल् मातोनिष्कलः अकारपरतो नाभेर्वितास्तिं प्राप्य संस्थित इति वचनात् नाभेर्हृदयान्तस्थितो हकारः । सकलाकलः सकलेति प्रणवयोगात् घोषादिप्राणाख्यमीशान-बीजमेव भवति तदुक्तं स्वच्छन्दे -

अकारश्च उकारश्चेत्यादि तत्रैव हकारस्तु स्मृतिः । प्रणवमस्त्वन्तौ हलाकृतिः । अकारेण वदायुक्तो उकारोच्चार-णेन थकारव्याप्तेनेवर्थः । मकारमात्रया युक्तो मन्त्रो-च्चारो भवेत्स्फुटमिति । अस्यमन्त्रस्यैव डाकद्विमात्रार्ध

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मात्रादयः। तथा स्वच्छन्दे- अकारस्य हकारस्येत्यादिना एकमात्रस्सविज्ञेयो हृदयात्संप्रवर्तते। उकारस्तु द्विमात्रो वै कण्ठस्थाने समुच्चरेत्॥ त्रिमात्रस्तु मकारो वै तालुमध्ये तदुच्चरेत्। बिन्दुश्चैवार्द्धमात्रस्त्वित्यादि सकलाकलः प्रणव सञ्चारमेधारूपतः तदुक्तं सोमशंभुपादैः

हकारे तदिदाकारे षडध्वप्राणरूपिणी।

एव हलमात्राकारः नाभ्यन्तो वास्ते हकारः परतो नाभेर्वितस्तिं प्रव्ययास्थितमिति।

ततः परं मकारस्तु हृदयाच्चतुरंगुलम्।

अस्य मात्राक्रमः एकद्वित्र्यर्द्धादिक्रमेण। तथा तेनैव तत्र तस्याकारसहितस्य हृद्गतस्य प्राणभूतस्य हृदये उच्चार इत्यादि तस्य निष्कलस्य प्रासादसंज्ञात्वं ब्रह्मकला रहितत्वात्। सकला-दियष्टविधप्रासादपक्षे निष्कलप्रासादस्य स्वरूप एव विध-त्वात् प्रणवादि प्रासादानामुपरि सद्यादि वाचकाकार उकार बिन्दुनादानां योगेन वेधार्धेन्दुकला षट्कला भवन्ति। तदुक्तं सकलः अंगरूप प्रणवस्य विद्यते सद्यस्य पृथिवीज्ञेयेत्यादि कालोत्तरे-

सद्यं क्षितिजलं वामो घोरस्तेजो मरुद्वियत्।

ईशः खमिति प्रारभ्य- निवृत्तिः पृथिवीज्ञेयेत्यादि- कालोत्तरे-
४३८ ईशानव्वान्त्यतीतकमित्यादि- निवृत्तं हृदयेनैव प्रतिष्ठा --

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



साङ्कुर । शान्त्यतीतं परं विद्याम प्रासादे न तु होमयेत् ।
हद्बीजं पृथिवीयुक्तं पृथिं धारयेत् क्रमात् ॥
इत्यादि तस्मादंगिनां सद्यादिब्रह्मणां मन्त्र यंगरूप इत्यादि
कवचेन द्वितीय-चतुर्थ षष्ठ द्वादशमन्त्राणां स्थितिर्विद्यमानत्वां-
गरूप प्रणवस्यास्ति - ब्रह्माणि ह्रस्वा प्रोक्तानीत्युक्तत्वात् -
ब्रह्मप्रणवो ह्रस्वः दीर्घात्वंगानि षण्मुख इति अंगप्रणवो दीर्घः ।
ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत् ।
आप्यायतर्पतस्यैति बिन्दुमूर्द्धा प्रख्यापितामिति ॥
कालोत्तर-श्रुत्याप्युत प्रणवो मूलः । अस्तु सन्ध्यक्षराणां
ह्रस्वं नास्तीति कथं ह्रस्वत्वम - छन्दोवत्सूत्राणि सिद्धान्त
वेदसार इति कामिके - तत्रैव शैवं वैदिकमेवोक्तं वैदिकं
शैवमेव -चेति तस्माच्छ्रुत्युक्तत्वात् ह्रस्वत्वं न लोकोक्तिवत्
तदुक्तं अथर्वशिखायां स्थूलमेत ह्रस्वदीर्घ प्लुतमिति - ओं ओं
ओमित्युक्त्वा इति अथांग प्रणवोद्धारः । हृद्बीजस्य द्विधाकृत-
स्य प्रथमाकारशिरो योगादेकारः । प्रयोगश्चास्य तत्र इदं तत्रेदं
तस्य द्वितीयाकार शिरो योगादेकारः प्रयोगश्च तत्र यथा
तत्रैषा अनेनैकारेण शिखा बीजस्य द्विधाकृतस्य प्रथमवर्णस्य
योगाकारत्वम - तस्यै उन्नमस्यैतस्या उन्नत्यै कवचस्य
द्वितीय वर्णयोगादाकारत्वं - प्रयोगः पूर्ववत् - तदा आदौ
भवति उभयोर्द्वितीय स्वरयो स्सावर्णेन -चैक द्वितीयस्वरत्वम-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रयोगं मधुउत्तमेधूत्तमं तदा आदौ इति षष्ठस्वरौ भवतः। तयोर्द्व्यस्तरूप विसर्जनीयस्थितः। प्रयोगस्य वृक्षा ऊपर-स्थिताः इति तस्य विसर्जनीय लोपेन संधिकार्ये प्राप्ते तद्द्वितीय षष्ठयोस्तयोदश स्वरत्वम्- प्रयोगस्थेयं धातुरूपंभोरू इति तस्योपरि नेत्ररूपानुस्वारयोगः मोनुस्वार इति अनुस्वारो मकारव्यादेशत्वात् धातुरूपमकारस्यापिग्रहणेन च ओमिति दीर्घ संज्ञांग प्रणवो भवति- अमसुपुरुषेशान जस्यास्वरेण सद्येन प्रथमस्वरद्वितीयत्वम्- पुरुष लं सकारेण वामदेवेनापि तृतीय स्वरद्वितीयत्वं वर्तते ईशानस्थक्रमेण चाघोरेण च पञ्चमस्वरद्वितीयत्वम्- तृतीयस्वरयोस्सावर्णे न च स्वर-चर्थस्य पञ्चमाकारयोगादेकादशस्वरत्वम्- द्वादश तस्य द्वितीय वर्णयोगा द्वादशस्वरत्वम्- पञ्चमस्वरयोस्सावर्णे षष्ठस्वर-त्वम्- द्वादशस्वरस्य षष्ठयोगादोकारत्वं ~~स्वदीर्घप्लुतप्रणवेषु-अकारत्वमुकारत्वञ्च अत आकारो हकारो योज्यः~~ द्वितीय स्वरयोस्सावर्णेन द्वितीय स्वरत्वं तस्मात् सद्यवामदेवतत्पुरु-षा द्वितीय स्वरेन्तर्भावः- अघोरेशानयोःषष्ठेन्तर्भावः। द्वितीय द्वितीय षष्ठयोगात्त्रयोदश स्वरत्वं - अस्य ह्रस्वप्रणवत्वात्। बिन्दुं न ह्रस्वदीर्घप्लुतप्रणवेषु अकारत्वमुकारत्वञ्च-अत आकारो हकारो योज्यः द्वितीयतृतीय ओकारस्य सावर्णेन द्वितीयत्वं तस्य च हकारयोगान्मेधात्वम्- द्वितीय-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तृतीय पञ्चमयोस्सावर्णेन षष्ठत्वं दीर्घप्रणव बिन्दुजातमिकार-
स्य प्लुतप्रणवं मकारेन्तर्भावः। सकलनिष्कल सकलाकलानां
बिन्द्वाद्यास्साधारणाः। एवं विधः सकल प्रासादः- तथा सार्द्ध
त्रिशत्यां -

षष्ठं तद्बोदशान्तश्च पञ्चमं विनियोजयेत्।
शिवं तन्तु विजानीयान्मन्त्रमूर्तिसदाशिवम्॥
ह्रस्वो दहति पापानि इत्यादि - त्रिमात्रश्च द्विमात्र-
त्यादि - सद्यश्चाष्टकलमित्यादि युक्तमित्यादि

प्रासादं यो न जानाति पञ्चमन्त्रमहामनुम्।
अष्टत्रिंशत्कलोपेतं न स आचार्य उच्यते॥
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
पञ्चधा पञ्चदैवत्यः सकलः परिपठ्यत इति॥

बृहत्कालोत्तरे -

ईशानं रुद्रसंज्ञन्तु प्रोच्चरेच्चांशुसंज्ञकम्।
औषधाक्रान्तशिरसं सहकस्योपरि स्थितम्॥
अर्धचन्द्रोऽथ नादश्च बिन्दुर्द्वितीयमध्यगः।
तदन्ते विश्वरूपन्तु कुटिलन्तु त्रिधामतमिति।

आचार्यैरपि - धोयो मेधाक्षमाख्येत्यादि - निष्कल प्रासादम-
न्त्रस्यांग प्रणवस्योपरि तत्प्रणवाकारयोगादुपादेशः। प्रयोगश्च
यथा अत्र मध्वत - अकारलोपाद्वकारः - तस्यांगतया

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रथमस्वरयोस्सवर्णे दीर्घत्वम् - तस्य प्रकृतिलये ह्रस्वत्वम्।
उद्धारस्थे प्रकृतिह्रस्ववर्णास्युः - विकृतिर्दीर्घ उच्यते ।
इत्येवम्भूतांग प्रणवरूपः प्रथमस्वरस्य संयोगात् षष्ठस्य
संज्ञो भवति । प्रणवयोगान्मेधा मेधा उपरिष्टादयः अत
ब्रह्मराहित्यात् षष्ठस्वरस्य नावकाशः ब्रह्मराहित्यान्निष्कल
डावं त्रिविधाश्शिवा ह्रकारो वः । युष्मान् पातु भोगमोक्षप्रदो
भवतु अभिमत फलप्रदातृत्वमेव पालनं यद्वा कलाक्रमेण
सकलादयः - तदुक्तं प्रासादोपनिषदि षोडशकलो वै पुरुषः
तत्राव्यक्तश्चतुष्कला व्यक्ताव्यक्तमष्टकला अव्यक्तश्चतु-
ष्कलेति - बिन्द्वन्तं व्यक्तं नादाद्युन्मनान्तं व्यक्ताव्यक्तं व्योमा-
द्यनाश्रितान्तमव्यक्तमित्यर्थः । तस्मात् षोडशकला प्रासादो-
पि निष्कलपदेन सूचितः । यद्वा कारणपञ्चक आह -
तान्येव परशिवरूपास्सकलादयो विभात क्रमात् - तदुक्तं
प्रासादोपनिषदि - ब्रह्मविष्णुरुद्रईश्वर सदाशिवरूपं व्यक्ता-
व्यक्तशिवं लिंगरूपं अव्यक्तं परात्परं शिवश्चेति तथागमः

देहस्थस्सकलो ज्ञेयो निष्कलो देहवर्जितः ।

सकलनिष्कलस्वभावो नाहतश्शिवरीशो वेनाबोधिताः ॥

करान्मुष्टि तयान्तावधिक्रमेण डकीद्वीति चतुरंगुला व्यापिनी
शक्तिः शक्तिव्यापिनी समनोन्मनाभिधानाश्चतस्रः कला
इति । यद्वा - अकारादिर्यस्य वर्णस्येत्यादि द्वितीयस्वरम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्य दीर्घस्वरस्यादे पञ्चमो दीर्घः पञ्चमषष्ठ चतुष्टय
४५१ रहितस्य स्वरद्वादशकेषु दीर्घपञ्चमं ऊकार मित्यर्थः।
तदुक्तम् - माता द्वादशकास्सौरा : प्रोक्त षण्ड वर्जिताः।
इत्युक्तत्वान्मृत्युरूकारः - भूषणम्मकारः चन्द्रो बिन्दुः
खण्ड-चन्द्रानन्तरत्वात् चन्द्रखण्डः गुणाश्चादयः पूर्ववत्तदु-
क्तं प्रासादोपनिषदि -

पञ्च दीर्घं मृत्युरेवं भूषणं बिन्दुरेव च।
चन्द्रखण्डो निरोधी च नादो नादान्त एव च॥
शक्तिश्च व्यापिनी सूक्ष्मा समना चोन्मना तथा।
समनाव्यापिकान्तस्थं व्योमगानन्तसूक्ष्मकं।
अनाथानाश्रिता देवी कलारूपात्मकं शिवमिति।

षोडशकलात्मको मूलमन्त्रो द्धृतः। आद्यपूर्वश्लोक विवृत
मन्त्रप्रस्तारस्य कलानां स्वगुरु क्रमायात मन्त्रस्य व्याख्यां
तत्प्रस्तारोच्चारयोर्लक्षणञ्च व्याप्तिञ्चाभिदधाति - निष्कल-
मिति निष्कलं शिवरुद्र पुद्गल भूषणार्द्ध हिमांशु मद्रोधिदण्ड
तदन्त शक्ति चतुष्टयेश्वरयोगिनम्। शंकरं वसुसागारं
कुलचारिणं स्वरन्ध्रकं सर्व मन्त्रपतिं प्रसादमंत्रं नतोऽस्मि
षड्दवगम - निष्कमिति शिव आकारः - रुद्र ऊकारः
परमेश्वरो यतः - पुद्गल आत्मातो - - त्यर्द्धहिमांशुरर्द्ध
चन्द्र तदुक्तं पञ्चाक्षरविवृतौ मकारं सोऽहमिति ब्रवीदिति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नहि निषेधार्थो नकारो अत्र-तमो जीवो लल्लक प्रयोनिविषय
रसग इति पञ्चाक्षरस्तवे - मध्ये शिवस्तदनुशक्तिरथो तदात्मा
तद्बन्धनं प्रथमस्य निवारकञ्चेति भूषणं विदुः अर्धहिमांशु-
रर्धचन्द्रः - रोधिनिरोधिनी - दण्डः नादमन्तः - दण्डान्तो
नादान्तः च शक्तिचतुष्टयं शक्तिव्यापिनी समनोन्मनान्ताभिः
कलाभिश्चेतासां मीश्वरब्रह्माविष्णुरुद्र ईश्वरसदाशिवाहताशिवास्त-
शिष्वैरेष्व योगिनं योक्तं वसुसागराङ्गुलचारिणम् - वस्त्यादि
ब्रह्मरन्ध्रान्तं तालचतुष्टयं तालोर्ध्वं तालमेवं वास्त्यादिब्रह्म-
रन्ध्रान्तं पञ्चतालप्रमाणमित्यर्थः । तन्मार्गे वारिणं तदुक्तं
वस्ति-चतुष्कला पत्रकमलस्तेजसान्तिधीरित्यादि चतुरङ्गुलको-
व्मनान्तमित्यादि तेजोविधानमित्यादि षष्ठश्लोकविवरणे लिखितः ।
तत्रावधेयः - रसशून्यगं षट्शून्यं मेधादिकाकोरस्य
कलासुमध्ये त्रिकातिकाणां विरहात्तोशून्यं - डकैकहानेरुपरि-
शून्यं शून्यात्परं योजय धामशैवमिति - मेधादि द्वादशकलासु
मध्यात्रिकान्तिकाणां विरहात् मेधाविशविषान्ते प्रथमं - बिन्द्वर्ध-
चन्द्र निरोध्यन्ते द्वितीयम् - नादनादान्तशक्त्यन्ते त्रितीयम् -
गकैकहानेरुपरि - व्यापिन्यन्ते चतुर्थं - समनान्तपञ्चमं -
उन्मन्यन्ते षष्ठं शून्यं - शून्यात् षष्ठशून्यात्परं शैवन्धाम -
शिव्ययोजनस्थानमिति सार्द्धत्रिशत्यादौ -

हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखम् ।

ज्ञानरत्नावल्यां -

सर्वन्तद्गुरुवक्त्रन्तु तस्यान्त्रमवलम्बयेदिति ।

प्रशान्तवक्त्रवद्गुरुवक्त्र प्रक्षेपभ्रः विसर्गाख्यं विसर्गातीतश्चेति । समानसे प्रपते प्रमेयचतुष्टमागामिष्यते - व्यापिन्यन्तं प्रशमम्ः प्रशान्त विषुवत्पतेक्रमऊर्ध्व धामप्रवेशकगुरुवक्त्रं अरोपस्य प्रमेय-जातस्य प्रख्यां प्रक्षेपकं विसर्गाख्यकं प्रक्षेपभ्रः विसर्गातीतमिति । आरोहक्रमः - तत्धामरूपं विसर्गाख्यं स्पन्दस्पन्दपद उन्मनाख्यतो ततोनन्तशानन्दे प्रसरमयतया क्रमात् क्रमशुद्धतत्त्वसृष्टिरुन्मुखं गुरुवक्त्रं समनाख्यं ततः - प्रशान्तविषुव्यापिन्याख्यमित्याचार्यैः - अत्र गुरुवक्त्रात् हंसः हंसेति योरूपो हश्यते तद्वर्णान्तररूपो यः - स … यत्रि तदेवशून्यषट्कं बिन्द्वादि शान्त्यं तैः - प्रथमहंसः - आदि मध्यान्त शून्यरूपः - तथा - स्वच्छन्दे —

ऊर्ध्वशून्यमधश्शून्यं मध्यशून्यं न्तृतीयकम् ।
शून्यत्रयञ्च लंध्येत तदधो मध्य ऊर्ध्वत इति ॥

द्वितीय हंसरूपः - व्यापिनी समनोन्मनी शून्यरूपः । तथा स्वच्छन्दे -

तदूर्ध्वं व्यापिनीशून्यं समनायान्तु पञ्चमम् ।
उन्मनायान्तथा षष्ठं बडेते शून्यगा स्मृताः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदुक्तमाजितवृत्तेरपि -

उन्मनान्तमनव्यापिन्या ननस्तन योनये ।

अतिज्वलपदस्थाय तस्मै तद्वपुषे नमः ॥

अत अध्वामन्त्रो विसर्गः - ह सौ हलमन्त्रौ तयोर्योगस्संजात पदरूपायेति - ज्ञानरत्नावल्याम् -

औषधं विश्वरूपन्तु रुद्राख्यस्सुर्यमण्डलम् ।

चन्द्रार्द्धनादसंयोगो विसंज्ञं कुटिलं ततः ॥

तदन्ते श्वतरूपन्तु कुटिलन्तु क्रियामताः ।

निष्कलं परमं मन्त्रं शिवं साक्षात्सदाशिवमिति ॥

सर्वमन्त्रपतिं सर्वेषामाणवशांभवशाक्तानां मन्त्राणां पतिं इक-विंशतिरारव्याताः मन्त्राणामीश्वराः पराः -

आणवाश्शांभवा श्शाक्ता स्तथान्यामन्त्रकोटय

इति । शतकोटिसहस्राणाम्मन्त्राणाममितौजसाम् ।

इष्टेन तु प्रसादेन प्रतादेन सर्व इष्टा नसंशय इति ।

तदुक्तं सोमशंभुभिः -

शौनरुदीरयेन्मूलं षडष्टनप्राणरूपिणी ।

तैशकायाँ षण्णामष्टवनां प्राणवायोश्च स्वरूपिणी महाना-दैति आनाभिवस्ते वरून्यं स्यात ध्रुतं तत्सा च तद्गतः -

तदूर्ध्वं वेदांगुलके -

(द्विमात्रोच विबर्यं विद्यात मायारुद्रोऽष्ट पुरस्तादितं ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सप्तार्णो नरप-तालु-चतुर्वर्णो त्रिमात्रकः।
शिवधोरो बिन्दुरन्ध्रं भ्रूद्दीपं शक्तिरीश्वरः॥ ४७

तारो वा प्रथमस्वरं निवृत्तिं प्रकृतिं ब्रह्मा सद्यो हृत भौतिकाः। पुराः क्षेत्रणि हरपदं यत्तमात्रागोत्रांगुल्योगैस्तेभिः विद्प्रतिष्ठा - हरि वामशीर्षं शिरोधावा-श्रुतिः। गोतार्णे ह्यांगुल्ये के करकर वेपुहगव।

द्विमात्रो थाविष्णुं विद्यात् मायारुद्रोष्टपूर्स्तत्वत्।
सप्तार्णो नरप-तालु चतुर्वर्णो त्रिमात्रकः॥
शिवाधोरो बिन्दुरन्ध्रं भ्रूद्दीपं शक्तिरीश्वरः।
साद्यं पूः कायवत्र्यपर्व नावं मद्ध्यंगुल्येश्वराः।
शान्त्यतीत तत्स्वरा रुधः तोयपूस्त्रीमनुद्भवः॥
बलं सदेशो धेन्वादिना शान्तैकादशांगुलम्।
चन्द्रज्योत्स्ना मणिर्विद्युत् पदानामर्द्धमात्रकाः।
कालभावांगुलारन्ध्रा शक्ताद्याः कोटिसूर्यभाः

६४८ पूर्वतोर्ध्वं न्यूनमात्रा डाव द्वादश षोडश इति कलाक्रम षडध्व व्याप्तेः। अन्यथा स्वच्छन्दे -

अपादमूर्द्धपर्यन्त चिन्तं संवेदनं हि तत्॥
भुवनाद्दीवासविज्ञेयस्तत्वा ... वाच तथैव हि॥
कलाकलित ~~संचरते तदा~~ संचारः प्रणवः संचरते तदा।
निवृत्तेश्च प्रतिष्ठा चात्यथा प्रवृत्तते॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्याशान्तिस्तथाप्यूर्ध्वे शान्त्यतीतात्वधिष्ठिता ॥
तदतीतः परो भावो तदूर्ध्वे परमव्ययम् ॥
एवं बिन्दुकला ज्ञेया नादशक्तेरत्वान्तिकाश्च याः ॥
व्यापिन्या द्यात्मिकाश्च व्याप्यव्यापिकभेदतः ॥
प्राणेकसंस्थिताः सर्वा षट्त्रिंशत् सपुमे प्रभुः ॥
वर्णा शब्दात्मिकास्सर्वे जगत्यस्मिन् चराचरे ॥
स्थिताः पञ्चशतभेदे शास्त्रे ब्वानन्त्यकोटिषु ।
शब्दः प्राणसमास्थातस्तस्माद्वर्णास्तु प्राणतः ॥
उत्पद्यन्ते लयं यान्ति यत्र शब्दो लयं गतः ।
~~प्राणेकस्थितास्सर्वा~~ इकाशीति पदान्येव विद्याराजे स्थिता-
न्यपि ॥ वर्णात्मिकानि तन्यत्र वर्णाः प्राणात्मिकाः पुनः ।
तस्मादेवं पदान्यत्र तानि प्राणे क्रमेण तु ॥
मन्त्रौका दशिकायाश्च ताश्च हंसे व्यवस्थिताः ।
षडैकादशिका सा च प्राणेश्वराति नित्यशः ॥
अकारश्चाप्युकारश्च मकारो बिन्दुरेव च ।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च ॥
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृताः ।
उन्मनातु ततो तीता तदतीतमनामयम् ॥
एवं मन्त्रास्थिताः प्राणा इति - यद्वा षडध्वानः
आध्यात्मिक अदिभौतिक इति द्विधा - उभावपि शब्दार्थ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भेदेन द्विधा - अथ शब्दरूपी आध्यात्मिकः।

आकाशवायुप्रभव शरीरात्समुच्चरन्वक्त्रमुपैति नादः।

स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यस्स शब्दः॥

इत्युक्तत्वात् - प्राणवायौ वर्णा उत्पन्नाः तद्वशात्पदं पदसंघो मन्त्रः। पदसार्धत्वात् भुवनकलाः पदस्थाः कलावस्थानि तत्वानि तत्व-स्थो भुवनव्रज इत्यध्यात्म षडध्वरूपम् - आधिभौतिकस्वोच्यते -

शक्तिबिन्दुनादाक्षरस्थानि बिन्द्वर्धचन्द्र कौटिल्य त्र्यश्राणि शिवे विद्यते - - चतुरश्रमर्धचन्द्रं -च त्रिकोणञ्च षडश्रकम्।

सुवृत्तञ्च पृथिव्यादि मण्डलं क्रियमित्युक्तत्वात् वृत्तर्द्ध-चन्द्र - - आकाश जल वह्नि मण्डलानि वह्निद्वयेन षडश्रं तेन वायुः। त्र्यश्र-चतुष्टयेन सकर्ण-चतुरश्रान्तनिविष्टं सितं व्योमादिकं वृत्तमित्यादि श्रुतत्वात् गन्धादीनि। शिवान्तस्थानि शक्तिस्थानीति तत्वं भुवनान्यपि मण्डलाकृति वस्तुत्वात् शान्त्यादि स्थितानि निवृत्तिः पृथिवी ज्ञेयेत्यादिना पृथिव्यादि मण्डल स्थानि निवृत्यादिकला इत्थं मन्त्ररूपा ध्वा शब्दरूपा नादव स्थानतयः प्रसादिस्थार्द्धचन्द्र कौटिल्य कोण दण्ड हलरूपैः पञ्चदश वर्ण रचन प्रस्तारा द्वर्णाद्यापि प्रासादस्थः। पदाध्वा वर्णस्थः पदस्थो मन्त्राध्वा - किञ्च धारणा लवरयलकारका-स्संप्रकीर्तिता इत्युक्तत्वात् हरः। कलास्तन्मन्त्रा लवाद्याः अत दृश्यन्ते - उभौ स्थूलरूपौ रेफलकार यकाराः सूक्ष्मा व्यंजन

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थानादौ रेफः शक्तीनादबिन्दुभिः लयौ इतिकलाध्वा शान्तिं-नेत्रः तद्भावौ विसर्गश्चेत्यस्त्रं - नादो वामः अतो ऊर्ध्वमुखं नादो रेफः अधोमुख नादो वामः - नादशान्तिभ्यां शिरः अघोरस्यवः। शान्ति -- द्वयाभ्यां पुरुषस्थद्वयेन कवचः - सद्यस्सारात् हृदयं सुरद्धयरूपाशिखाधोशरूपः निष्कल प्रासादस्य शिखाघोरद्धय रूपः प्रासादशिखाघोरद्वयरूपः प्रासादप्रणवाभ्यां तु बान्तरं परिकल्पयेदिति। ईशानाख्यः प्रणवप्रसादरूपः। अकारं दक्षिणे-सस्थादित्यादि शुद्धाख्ये दक्षिणां भवो ब्रह्म हरेर्वामांगसंभवः॥

इदयान्नीलरुद्रस्तु विवस्य शिवसंज्ञक इति॥

शिवपुराणोत्तरे - शाबं समष्टिरूपः मूलः प्रवृद्धः - शावं विद्याध्व-व्याप्तिशाचार्यैरस्वाचितः -

शक्त्यादिशिववर्णान्त कार्यव्याप्ताध्व विस्तरः।
परादि मूलपर्यन्ता विकला धार संश्रया:॥
नादस्तीरूपशास्तोस्मिन् साक्षात्प्रासाद ईरितः।
तत्कार्ये पाङ्क्ते निश्रेण्या व्युत्क्रम व्याहतोन्ततः॥
कारणानां शिवस्साक्षात्क्रियते देशिकादिभिः।
शवानुभूतिस्सूक्ष्मत्वात् अधाकारस्सुरा पुनः॥
शिवादिव्यञ्जकमेधादि योगादेरप्रवर्तते:।
मातोचारयुतौ हेतुः हानोपादानयोरिति॥
दिव्यौवद्यादिमेधार्थेश रुद्रासः प्रासादस्य शिवेरितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



-- लिंगात्कला हेतु सद्यादैर्व्यंग्य संभवात् ।

व्याप्तिर्व्यंग्यैस्समुद्दिष्टा प्रासादस्य शिवागम इति

अस्यार्थः- शक्त्यादिशक्ति नादादि शिववर्णो हकारकः ।

कार्यं आकाराः मण्डलाख्यं वृत्ताद्यं व्याप्त षडध्वाविस्तारः पूर्वोक्तक्रमेण परचि - रहितस्सूक्ष्मरूपः मूलस्थूलशब्दात्म वैखरिस्थूलसूक्ष्मं परं ज्ञात्वेति वचनादेवं त्रिरूपं सकलानीति-बन्धनामाधारवस्तौसंसंश्रय आश्रयः- शिवशास्त्रे शिवागमे नादप्रासाद इतीरितः व्युत्क्रमत्याग अक्षरादि शक्त्यन्तः कार्याणा-तत्कारणो नामकारादीनान्तरतिष्ठातॄणां ब्रह्मादीनां पञ्च दैवका-र्थे शिवस्साक्षात्क्रियते । एवमनुभव सूक्ष्मत्वा दक्षरः शिवादि शिव-वर्णादि शक्त्यन्तास्तेषां व्यंग्यो व्यञ्जकं मेधादिमाधार्थिरि विष-बिन्द्वादयः - - - - आकृतः एकोच्चारणेन हानोपादन हेयोपादेय योर्हेय मकारः- उपादेयमुकारः हेयमुकार उपादेयम्मकारः। एवं बिन्द्वादि उन्मन्यन्तं हेय उपादेयः औषधादि औकारादि शिवे-रितः- शिवेनोक्तः तस्य प्रासादस्यमन्त्रोच्चारस्युत औषधादि कुड्डारो हानोपादानयोरिति शिवेरित इत्यन्वयः- एकार्थवाचक शब्दस्ते ते ते नेवार्थेनारो यो व्यधते स तदर्थव्यंग्यम् । एकार्थवाचकशब्दो व्यान्यार्थवाचकस्योक्तम --च व्यंग्यं तस्मा द्व्यंग्यं ग्रन्थार्थं शब्दस्य च यः प्रकरण प्रतिपाद्य स्य पर्यायः प्रासादो व्यंग्य संभवात् । प्रासादस्य व्यंग्यैः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ऽस्याद्यैरष्टत्रिंशत्कला हेतुभ्यां मेध - व्यापिरागमेषु दिष्टेत्यष्ट -
त्रिंशत्कला हेतुकृते अर्धचन्द्र-श्रृत्य-श्रोत निमहि कलावेकस्थ
बिन्दवः - पञ्चदशाईशारवमित्युक्तत्वादीशानरूपाःशिवाद्यौश्च
नादस्थ मनोन्मनीषु कौटिल्यं सप्त तानिरोमरुद्दिष्टि वचनात्
850 पुरुषरूपाणि शिवनिरोधिव्यापिनीश्रस्थन्तयः। तानि अघोराः-
तेज इति वचनात् अघोरकलारूपाणि शिवमेघाघिरिं शिवार्द्ध-
चन्द्रनादसमनस्थार्द्धचन्द्रानवते सद्य क्षितिरिति वचनात्
विद्यरूपाः - एषां पञ्चदशसप्तत्रय नवसप्तानां समुच्चयः।
एकचत्वारिंशत् तन्मात्रो निष्कलत्वात् हलिस्वरूप वाचकशक्ति
बिन्दुनादत्यागात् ईशान पुरुषवामानां एककलाः। ते त्रिक
कलान्यूनत्वं तदष्टत्रिंशत्कला प्रस्तारेण। सिद्ध्यतीति तत्वं
ह्रस्व प्रणवस्य सद्यवाम घोरे पुरुषैशानस्था कारद्वय तृतीय पञ्चम
घोरेकारस्य प्रथमस्वरेण अष्टत्रिंशत्कला। धारमाधारमधितसुधीः-
आनन्दलतिका काचिदाशिवान्तं प्रकाशत इति इत्थमित्यादेनैव
पषट्कलाः - एवमन्यस्तै द्वाविंशतिः कलाभिन्यन्तैः हृदयोर्ध्व-
स्थमेधादिमेषांश कलाभिरष्टत्रिंश - - - इत्यात्मिकरूपाः। तथा
प्रासादोपनिषदि -

अष्टत्रिंशदिति सद्यादि व्यंग्यत्वमुक्तम्। अलमति
प्रसंगेन प्रकृतमनुसरामः। एवं षडध्वनी शंकरं भोगमोक्षरूप
सुखदुःखात्मनां करोतीति शंकरः तन्निष्कल वस्त्वादिनांश्य-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



घस्थानां रूपं प्रासादं नतास्मीति संबन्धः । प्रासादादिं तु निष्कलं शिवमिति केचि द्व्याख्यापयन्ति । तदयुक्तं प्रासादस्यात व्याप्तिरुच्यमानतया सुसाकगरांगुल चारिणश्च न घटते - निष्कलत्वात् पूर्वश्लोकोक्त सकला कल सकलानां -- परं सूक्ष्मं रूपस्य मन्तस्य सकलनिष्कल मिश्रत्वमुक्तम तथा कालोत्तरे - स्थूलं शब्द इति प्रोक्तं सूक्ष्मं चिन्तमयं भवेत ।

चिन्तया रहितं यत्तु तत्परञ्चेति कीर्तितमिति ॥

यद्वा आदिभौतिका ध्यात्मिक रूपाधिदैविकरूपाः स्थूलं वर्णाकृतिर्विद्यात् सूक्ष्मं तच्छब्दमुच्यते - वर्णाभिमानि तं यत्तु तत्परञ्चेति कीर्तितमिति - रुद्राख्ये तस्मादुभय श्लोकयोर्मन्त्र विषय व्याख्ये युक्ता इति ॥ एवं प्रकारेण औंकार ऊकारादि प्रासादानां स्वरूपलक्षणाधिदैव व्याप्तमन्त्रकलानि च स प्रपञ्चं निरूप्य इदानीं कलाष्ट स्थान प्रदर्शनेन षडध्व व्याप्तिमाह -

वस्तेर्नाधौ च नाभेति पद्य मजगृह्मे हृत कलेव्याकृतानं
विष्णुः कण्ठे कलान्तं रसमपि च पदं तालुनि ग्रन्थिरुद्रौ
विद्येशो बिन्दुन्तभ्रू विसश्रुति कला ब्रह्मरन्ध्रे सदेशा
शक्त्यन्तं शक्तिवेशानुपरि सकलभार्द्धन्वंगुला चाष्टदेशाः ॥

गुह्यप्रदेशमारभ्य नाभेर्नाभिपर्यन्तं नादः हकाराक्षरस्तिष्ठति अजगृहे ब्रह्मस्थाने हृत्कजे हृदयपंकजे दं त्रिमात्रं औकारः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



माता शब्देन एकसंख्या वाचकत्वं तदुक्तं सुप्रभेदे -

एकस्यैव तु संज्ञा स्यात् खेन्दुमोक्षोक्तमार्थतः।

इति यद्वा त्रिपदप्रणवः अकार उकारमकाराः तेषां समाहार
स्त्रिपदं - मेधा इत्यर्थः - आव्याकृतान्तं पृथिवी तत्वमारभ्य
प्रधानतत्वं तिष्ठतीत्यध्याहारः कण्ठे कण्ठस्थाने विष्णुः कारणेश्वरः
कलातत्वान्तं च स्वं उकारस्तिष्ठतीत्यनुषंगः ब्रह्मरन्ध्रे
शिरोबिलस्थाने श्रुतिकला श्रुतिर्वेदः अर्धचन्द्रनिरोधिनाद-
नादान्तरूपाश्चतुष्कलाः सदेशः सदाशिवः कारणेश्वरश्च-
क्त्यन्तं सादाख्यतत्वान्तश्चेत्यनुषंगः उपरिब्रह्मरन्ध्रोपरि भान्वं-
गुलद्वादशांगुलपर्यन्तं शक्तिर्वेदाः शक्तिचतुष्कं शक्ति
व्यापिनि समनामन्मना चेति चतुष्कलाश्चात्तरेशाः। आहतो
नामाकारणेश्वरस्य कर्तव्य इति तदूर्ध्वं तत्वातीतं परं शिवमिति
इन्दुवृत्तवर्जेण कलानां वर्णं क्रमेणाह मेधादधो वह्निशिखा प्रभा-
र्कचन्द्रा विद्युद्यतिदीपभासः अर्द्धे - ओदण्डतदन्तरद्वविद्युत
प्रभोर्ध्वं शतभानुभासः मेधा आदिर्यासां मेधादे। बिन्द्वन्तास्य
तस्याः कलाः क्रमेण वह्निशिखा प्रभाः अर्कचन्द्रप्रभाः
विद्युत्प्रकाशः दीपभासः अर्द्धेन्दुभौ अर्द्धचन्द्राभासौ अर्द्ध
चन्द्रनिरोधिनादौ तदन्तकर्त विद्युत् प्रभा दण्डो नादो वि-
द्युद्रत्नप्रभा शक्तिश्शतभानुप्रभा व्यापिनी सहस्रभानुप्रभा
समना कोटिसूर्यप्रभा उन्मना असंख्य चण्डकिरणमण्डलप्रभा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उन्मनान्ते वर्तमान परमशिवस्तु निर्मला दर्शन समः शरत्काल चारिवत् प्रकाश इति मन्तव्यः। एवं प्रासादमन्त्रमर्द्धमात्रा प्रस्तारव्याप्तरणसहितं ये जानन्ति - मुक्ता भवन्ति येन जानन्ति ते शिवमेव न जानन्ति वस्तेरित्यादि श्लोक द्वयस्य सङ्गति रुक्ता सिद्धान्तरहस्ये -

मात्राभा कारणाख्यान स्थान शून्यां गुलाद्यवसु।
शक्त्या कृतो कला व्यापिं ज्ञात्वा कोवा न मुच्यते ॥

सार्धत्रिशत्यां -

×८प्रासादं ये न जानन्ति ते शिवमेव न जानन्ति।
वस्तेरित्यादि श्लोकद्वयस्य सङ्गतिरुक्ता। सिद्धान्तरहस्ये ×)

प्रासादं ये न जानन्ति ते न बुध्यन्ति शंकरम्।

सिद्धान्तरहस्ये -

वस्तेस्सप्तांगुलान्नाभिरन्ध्रस्थानमुदाहृतम्।
नाभेर्वितस्ति हृदयं घोषस्थानमुदाहृतम् ॥
चतुरंगुलका मेधा कण्ठ धीशोंगुलाष्टके।
युग्मांगुलै र्विषस्थानं भ्रूमध्ये द्व्यंगुले शशी।
प्रत्येकमर्द्धे चन्द्राद्ये दपादो न त्र्यंगुलं श्रुतम्।
शक्त्यादिनां बिलस्योर्ध्वे खत्रिवेदयुक्तांगुलमिति।

तन्त्रसारे - तथोक्त वास्तिश्चतुष्कला पत्रकमलस्तेजसां निधिः।
नाडी बला हितत्वा हि तत्वाहि कुंडली हंस निस्वना।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्मान्नाभ्यान्तमासीनो विश्वरूपस्तटिन्निभः।
नाभेरूर्ध्वं ावतस्त्वन्तं हृदयश्चतुरंगुलम् ॥
85b तदंते संस्थितो मेधा स्वरो वह्निशिखा प्रभः॥
त्रिमात्रः कारणो ब्रह्मा चतुर्विंशति तत्त्व युक्।
कर्णे ष्ट्यंगुलं केशो द्विमातोर्कशशिद्युतिः॥
तत्त्वषट्कयुतो विष्णुस्तालौ तु चतुरंगुलम्।
मायातत्त्वं शिवं रुद्रं डाकमातास्तटिद्युतिः॥
भ्रूमध्ये द्व्यंगुलो दीप निभोवृत्तार्द्धमात्रकः।
तत्त्वद्वययुतो नन्तो ललाटे पातमात्रकः॥
वृत्तार्द्धोर्ध्वे शशिद्योति मात्राष्टांशो निरोधिनी।
उक्तं प्रभाते दण्डे तु षोडशांशो मणिप्रभः॥
द्वात्रिंशांशस्तु दण्डान्तो रन्ध्रे सौदामिनी प्रभः।
ध्रुवोरूर्ध्वं बिलं यावदंगुले कादशोधिकः॥
वृत्तार्द्धादे चतुर्णां स्यात् सद्वेशस्तत्त्वयुग्मकः।
सूर्यकोटिद्युतिश्चोर्ध्वमाहनाख्या शिवो।धिपः॥
चतुष्षष्ट्यंशिका शक्तिर्मूर्धन्येकांगुल स्थितः।
अंगुले व्यापिनी-चाष्टाविंशत्याधिशतांशिका॥
चतुरंगुलकाषट्कपञ्चाशद्विशतांशिका।
तदूर्ध्वं समना ज्ञेया शक्त्यावाहते स्वराः॥
समनोर्ध्वं मनोमाता चतुरंगुलकोन्मना।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शक्त्यादीनां वपुश्चाइव द्वादशादित्य संनिभः ॥
ततः परममात्मास्तु तत्त्वातीतः पराशिवः ।
निर्मलादर्शनप्रख्यः शरद्वारिसमप्रभः ॥
- म्यो नेन क्रमेणैव स्वानुभूत्या महात्मभिरिति ।

पूर्वोक्त प्रासादानुष्ठातॄणां परमशिव तेजोरूपत्वमस्तीति शार्दूल-वृत्तेनाह-

मन्त्रं षट्कलमास्य रन्ध्रमुकुला द्याधारमेशं क्रमात्
तुर्यद्धामविशान्तमेन मसकृद्यस्य प्रासाद्धिया ।
सिक्ता सौधरसैः प्रयान्त्यभिमतान्यन्ते यदीमेह
शंभोस्तस्य नमाश्शिवाय सुमनु जप्यं सतारं सदा ॥

मन्त्रमिति - षट्कलं षट्सु हृदयाद्यंग दीर्घस्वरैर्युक्तं अनेन निष्कल प्रासादस्सूचितः - ईशानादि पञ्च ब्रह्माक्षरैः शिवस्य वपुरुक्तत्वात् तद्वाचकस्य प्रासादस्यापि सकलत्वं तस्मात् सकलप्रासादो ब्रह्मांगाक्षरैर्मिश्री कृत्योद्धार्यः - निष्कल प्रासादो अंगाक्षरैर्वोद्धार्यः । नेत्रमन्त्रराहित्यादेव पञ्चांगत्वं क्वचिदुक्तं तथा कालोत्तरे-

निष्कलं परमं मन्त्रं शिवं साक्षात्सदाशिवम् ।
भुक्तिमुक्तिप्रदं पुंसां पञ्चांगसहितं वपुरिति ॥

अस्य रन्ध्रमुकुलान्तत्र सकारादेशात् - ईश्वरसंबन्धिनमाधारं तुर्यन्धाम - चतुर्थं शुद्धजाग्रापेक्षया तुर्यावस्थास्थानमाख्यं रन्ध्रमुकुलमित्यत्र योजनानन्तरं मुकुलादारभ्य द्वादशान्त-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मित्यर्थः- अस्य मुकुलशब्दस्य तालुवाचकत्वेन तदपेक्षया
द्वादशान्तस्यैव तुर्यत्वा-तद्विशतं श्रंभादिकारणत्यागक्रमेण
प्रविशन्तं मन्त्रशब्देनात्र प्रासादमन्त्रो विवक्षित ऽनमस्कृत-
शब्दवत् धिया बुध्या सौधरसैः ब्रह्मरन्ध्रोपरिस्थित निष्कल
शक्तिक्षोभात् प्रसृतामृतरसैः सिक्ता सेचिता अन्तर्बहिरपि
सिक्ता इत्यर्थः यस्य शंभोः प्रसादादनुग्रहादभिमतानि इष्ट
रुद्र भुवनानि प्रयान्ति गच्छन्त्यन्ते भोगावसाने यदीयं शिव
संबन्धि महस्तेजस्तत्साम्यं प्राप्नुवन्तीति शेषः तस्य शिवस्य
नमश्शिवाय सुमनश्शोभनयुत पंचाक्षरमन्त्रः दीक्षितानां महा-
त्मनां सतारं सप्रणवं तारशब्देन ओंकार उच्यते तथा मन्त्र
निखण्डुः- प्रणवः- ारकन्तारं वेदाद्यं स्तुतिदीपिकम् ।

त्रिपदा ब्रह्मशारबाद्याध्रुवमाधार इत्यपि ॥

तस्मा-त्तारसहितं जप्यं जपयोग्यं परमोक्षप्रदत्वा द्दीक्षितैस्सदा
जपः कार्य इत्यर्थः । तथा कालोन्तरे-

श्रीमत्प्रासादमन्त्रस्तु देवदेवेन भाषितः ।
सकृत्स्मरणमात्रेण सर्वपापक्षयो भवेत् ॥
(*अणिमादिगुणैश्वर्यं षाट्भिर्मासैर्न संशयः ।)

सप्तधा वर्तये यस्तु सर्वतीर्थ फलं भवेत्-।

ब्रह्मचार्य ब्रह्मचारी च अस्नात स्नातकोपि वा ॥
साष्टोत्तरशतं जप्त्वा त्रिसन्ध्यां परिवर्तयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
अक्षयं शिवलोकं तु यान्ति सम्यक् प्रभावतः ॥
एतदर्थं महासेन वांछन्ति शिवयोगिनः ।
प्रासादान्नादमुत्थाप्य जपेद्यस्सततन्नरः ॥
षण्मासात्प्राप्नुयात्सिद्धिं योगयुक्तो न संशयः ।
गमागमस्य जपति सर्वपापक्षयो भवेत् ॥
अणिमादिगुणैश्वर्यं षड्भिर्मासैर्न संशयः ।
तन्मयस्तन्मयो भूत्वा षण्मासात्सिद्धिमाप्नुयात् ॥

शिवधर्मोत्तरे –

मन्त्रं गुरुमुखोच्चार्यं अवोचार्थ प्रसाधकम् ।
प्राहोन्नमश्शिवायेति सर्वज्ञस्सर्व देहिनाम् ॥
सद्बीजं सर्वविद्यानां मन्त्रमाद्यं षडक्षरम् ।
वेदे शिवागमे चाद्यमुभयत्र षडक्षरम् ॥
मन्त्रास्थितस्सदा मुख्ये मुक्त्यै लोके पञ्चाक्षरस्थितः ।

इति । अत्र मन्त्रस्य स्कन्दपुराणे ऋषि छन्दादिः प्रतिपादितः ।
तद्यथा – भरद्वाज उवाच –

इदं त्वेकं रहस्यन्तत्कथयिष्यामि पाण्डव ।
समस्त श्रेयसाम्मूलमखण्डज्ञानमुक्तिदम् ॥
आद्यन्नमस्ततो ज्ञान्ते शिवः पञ्चाक्षरो मनुः ।
तारेण माया बीजेन वा तं स्यात् षडक्षरम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मन्त्रोयं देव देवस्य दिव्य वर्णात्मकं वपुः ।
अस्मिन् सर्वात्मना शश्वत् आस्ते वृषभकेतनः ॥
प्रासादादि प्रभेदेन मन्त्रोयं बहुधा मतः ।
वामदेवो मनुः पाङ्क्तिच्छन्दो देवस्सदा शिवः ॥
कृत्वादौ मातृका न्यासं पञ्चवर्णात्मिनोस्ततः ।
शीर्षे हृदये चैव क्रमाल्लिंगे पदे न्यसेत् ॥
न्यासः षडंगः कर्तव्यो जातियुक्तः परस्परम् ।
सर्वज्ञः शक्तियुक्तं हि तृप्तिसंयुताश्शिरः ॥
अनादिबोध - - - ः शिवा वर्मस्य संयुतम् ।
स्वतन्त्रशक्त्याथोलिप्त शक्तिकं नयनत्रयम् ॥
अनन्तशक्ति सहितमस्त्रमेवं विशारदैः ।
षडंगकमिदं न्यास कृत्वाद्ध्येयो महेश्वरः ॥
प्रासादादिषु भेदेषु ध्यायेद्यत्तत्क्रमोदितमिति ।

प्रासादं षोडश भेदम् –

अज्ञानज्ञानविज्ञेयं त्रिविधं विद्यते क्रमात् ।
अन्धकारवदज्ञानं ज्ञानन्दीपवदुच्यते ॥
ज्ञेयं भास्करवत्प्रोक्तं तस्मात् ज्ञानं विशिष्यते ।
शिवज्ञानात्परं ज्ञानं तत्समञ्च न विद्यते ॥
इतद्धे परमं ज्ञानं प्रासादं चेति कीर्तितम् ।
प्रासादं षोडशं प्रोक्तं षट्भेदं वक्ष्यते क्रमात् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चिच्छक्तिश्च पराशक्तिरादिशक्तिस्तथैव च ।
इच्छाज्ञानक्रियारूपाश्शक्तयश्चविद्विधा स्मृताः ॥
प्राशब्दं स्यात्छिवज्ञानं साशब्दो गतिरुच्यते ।
दम्तत्स्वरूपमेवं तु प्रासादमभिधीयते ॥
46a ज्ञानेन मुक्तिदं यस्मात्तस्मात्प्रासादमुच्यते ।
परशिवः पराशक्तिः कृपयोत्पन्नबैन्दवः ॥
बैन्दवोत्पन्ननादश्च नादोत्पन्नाश्च शक्तयः ।
बिन्दुस्सदाशिवोत्पन्नस्सदाशिवोत्पन्नमीश्वरम् ॥
ईश्वरोत्पन्नविद्येशं पूर्वबिन्दुतयोद्भवम् ।
पराशक्तेस्सहस्रांशादादिशक्तिस्समुद्भवः ॥
आदिशक्तेस्सहस्रांशादिच्छाशक्ति समुद्भवः ।
इच्छाशक्तिस्सहस्रांशात् ज्ञानशक्तिसमुद्भवः ॥
ज्ञानशक्तेस्सहस्रांशात् क्रियाशक्तिस्समुद्भवः ।
अनन्तदेव कृपया अधो माया अध माया समुद्भवः ॥
काल नियति तथा प्रोक्ता कला विद्या समुद्भवः ।
विद्यारागेण जातेन पूर्वबिन्दु तथोद्भवम् ॥
अथ तत्वानि षट्त्रिंशत् पुरुष्यस्तेजो मरुद्वियत् ।
रुद्रदेव कृपोत्पन्नाः प्रकृतिस्त्रिगुणात्मिका ॥
प्रकृतिर्नाम व्यक्तेन चित्तबुद्धि तथोद्भवम् ।
बुद्ध्युत्पन्नमहंकारमहंकारं त्रिगुणं भवेत् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तैजसं वैखरी भूतं तैजसोद्भवमुच्यते ।
सात्विकं गुणयुक्तेन बुद्धीन्द्रियं तथोद्भवम् ॥
अथ तत्वानि षाट्त्रिंशत् पृथिव्यप्तेजो मरुद्वियत् ।
गन्धरसरूपस्पर्शशब्दोपस्थौ च पायुश्च ॥
पादौ पाणी च वाङ्नासा जिह्वा चक्षुःत्वचः श्रुतिः।
मनोऽहंकार बुद्धिश्च प्रकृतिः पुरुषस्तथा ।
रागो नियति विद्ये च कला कालश्च मोहिनी ॥
विद्या चेश्वरसादाख्य शक्ति शिव इति स्मृतः।
चतुरस्रार्द्ध चन्द्रञ्च त्रिकोणञ्च षडस्रकम् ॥
सुवृत्तं च पृथिव्यादि मण्डलकृतयः क्रमात् ।
सुवर्णं श्वेतरक्तं स्यात् कृष्णं धूम्रञ्च वर्णकम् ॥
पृथ्व्याद्याकाशवर्णं स्यात् लवरयहकारकाः ।
गुदमूलतयोर्मध्येतरं लिंगमितिस्मृतम् ॥
सान्तञ्च चतुर्थ बीजञ्च दबीजं शशियुतम् ।
खोनाथस्तथा चैव आदिमध्य इति स्मृतः ॥
ऊर्ध्वमारुतमेधोक्तमव्यक्तमात्मनादकम् ।
मनो मारुतमध्ये तु शक्तिश्शिवमिति स्मृतम् ॥
चैतन्यमूर्ध्वं नूत्तं स्यादहोशतं विचिन्तयेत् ।
अथो मारुतद्रष्टा तत्पुते नूत्तं विचीन्तयेत् ।
गुदमूलस्य मध्यञ्च त्रिकोणमर्द्धचन्द्रकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिकोणमध्यम स्चैव प्रासादं त्रयमेव च ।
चतुरश्रं कुंकुमञ्च अर्धचन्द्रप्रमाणकम् ॥
सिन्दूरञ्च त्रिकोणञ्च त्रिविधं समभूतलम् ।
इदं कालत्रयञ्चैव मूलप्रासादमुच्यते ॥
वाङ्मनोतीत तत्वं हि शिवप्रापमिति स्मृतम् ।
सर्वेषामेव तत्वानां मूलं शिवमिति स्मृतम् ॥

वाङ्मन ——— मन्त्रमूर्तिपराशिवः ।
हकारं देहमित्युक्तं ओकारन्तु भुजन्तथा ।
षष्ठं पादद्वयं विद्यान्मन्त्रमूर्तिरुदाहृतम् ॥
स्थूलसूक्ष्मपरञ्चैव त्रितीयन्तु प्रकीर्तितम् ।
स्थूलं वर्णाकृतिं विद्यात् सूक्ष्मं तत् शक्तिरुच्यते ॥
वर्णाभिमानितं यन्तु परञ्चेति प्रकीर्तितम् ।
मूलं शक्तिञ्च बद्धञ्च कुंडलीनाममेव च ।
तन्मध्ये हंसमुन्नमात्मनादमिति स्मृतम् ॥
आत्मनादे समुत्पन्नं कालसूक्ष्मं तथैव च ।
शान्तिश्च शान्त्यतीतञ्च परात्परमिति स्मृतम् ॥
मूलमन्त्रेण तन्मध्ये सूक्ष्माद्यष्टकलान्वितम् ।
कलाद्वे ह्ययोरूपं व्योमसञ्चारि शक्तिकम् ॥
हंसोज्वालां निरूपेण शिवं सोमप्रकाशकम् ।
शक्तिमत्कप्रकाशेन बिन्दुदीपस्वरूपकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नादं तटिद्द्वयं रूपं नादान्तं व्योमरूपकम् ।
शान्तेन पुष्परागेण शान्त्यादि स्फटिकप्रभम् ॥
देहं भूतांशकं विद्यात् भूतांशं चेन्द्रियावहम् ।
भूतेन्द्रियगुणास्सर्वे शिवांगञ्चेदमिष्यते ॥
ओंकारं पृथिवी ज्ञेयं उकारं सलिलं विदुः ।
तेजो बिन्दुरिति प्रोक्तं नादं वायुगमिष्यते ॥
आकाशं स्याद्वकारस्य पाञ्चभौतिकमिष्यते ।
पञ्चभूतस्य संबन्धाज्जीवाधारमिति स्मृतम् ॥
एवं पञ्चभूतत्वान्मूल प्रासादमुच्यते ।
मूलप्रासादमित्युक्तं पञ्चप्रासादकं शृणु ॥
अकारोकारमकारो बिन्दुनादान्तमेव च ।
निवृत्तिं शान्त्यतीतान्तं पञ्चैतत्कलयो म ॥
अकारं श्वेतबालाग्ने उकारं वृद्धभास्करम् ॥
मकारं नीलवर्णं स्याद्बिन्दुस्सहस्रदीपकम् ॥
नादं तटिद्द्वयरूपं निवृत्त्यादिगर्भमेव च ।
तत्वं हि शिवभावत्वात् चिद्धेव मन्त्रमिति स्मृतम् ॥
षष्ठञ्चै वादिबीजञ्च तत्वान्ते विनियोजयेत् ।
कार्यकारणसंयुक्तं सर्वतत्वात्मकं भवेत् ॥
तत्वप्रासादमाख्यातमादि प्रासादकं शृणु ।
आदिस्तु पूर्वभावत्वा दादिरित्यभिधीयते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रथमञ्च चतुर्थञ्च जीवार्णं विनियोजयेत् ।
आधारं देहसंयुक्तमादिबीजमिहोच्यते ॥
आदिशक्तेस्तु येदेन संयोगादादिरिष्यते ।
डाताच्चैवमयं बीजं सर्वसिद्धिकरं भवेत् ॥
आदिप्रासादमित्युक्तमात्मप्रासादकं शृणु ।
आत्मानञ्जीवमित्युक्तं तस्माज्जीव इति स्मृतम् ॥
तस्मादेताच्चैवार्णत्वाच्चैव मन्त्रमिहोच्यते ।
अतान्तन्तु समुद्धृत्य आदिबीजसमायुतम् ॥
तयोमध्ये युतं शक्तिरात्मबीजमिति स्मृतम् ।
हृत्सरोरुहमध्ये तु संस्थितं सर्वकारणम् ॥
हृत्पंकस्य मध्ये तु पञ्चविंशति कोष्ठकम् ।
मध्ये त्रिकोणमालिख्य तन्मध्ये वृत्तमालिखेत् ॥
वृत्तस्य आत्मबीजेन त्रिकोणं हरबीजकम् ।
तद्बाह्ये षट्कोणे तु आत्मनादं विलिख्य तु ॥
बाह्ये षोडशवर्णेन षट्कोणेषु सुदर्शयेत् ।
आत्मप्रासादमित्युक्तं शुद्धप्रासादकं शृणु ॥
शुद्धं शिवमिति प्रोक्तं तस्माच्छुद्धमिहोच्यते ।
नादाख्यं यत्परं बीजं सर्वभूतेष्ववस्थितम् ॥
शुद्धोयमिति विज्ञेयं सर्वकारणकारणम् ।
मुक्तिदं परमं गुह्यं सर्वसिद्धिप्रदायकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तं विदित्वा महासेन दैशिकः पाशहा भवेत् ।
षडध्वप्राद्रमित्युक्तमष्टप्रासादकं शृणु ॥
आकाशसंभवा रेखा द्वितीयश्चार्द्धचन्द्रकम् ।
तृतीयं कुटिलाकारं चतुर्थं वह्निरुच्यते ॥
पञ्चमन्तु ध्वजाकारं षष्ठमन्तु अधोमुखम् ।
सप्तमं बिन्दुरित्येवमष्टमन्नादमुच्यते ॥
स्तंभं स्फाटिकहेमञ्च अर्द्धेन्दु शुक्लरूपकम् ।
जंबू पक्षस्वरूपञ्च ध्वजमित्याभिधीयते ॥
अधोमुखं कालरूपं बिन्दुर्मरतकप्रभम् ।
नादं धवलरूपञ्च अष्टप्रासादमुच्यते ॥

अवस्थदर्शनम् -

भूतानि कला षट्कं विद्याद्यं षोडशं विना ।
वागाद्यं वचनाद्यञ्च शब्दाद्यं श्रोत्रपञ्चकम् ॥
मनादि दश वायुञ्च पञ्चत्रिंशदिति स्मृतम् ।
ताभिस्तत्त्वैर्ल्ललाटे तु जाग्रावस्था व्यवस्थिता ॥
४६८ मनादि दश वायुञ्च शब्दादिवचनादिकम् ।
प्रकृतिः पञ्चविंशत्या स्वप्नावस्था व्यवस्थिता ॥
शब्दादि वचनादिश्च नव वायु विमुच्यते ।
मनो बुद्धिरहंकार द्वाविंशति विनार्गलम् ॥
प्रकृतिं चित्तं वायुञ्च सुषुम्नी हृदिव्यापकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वायुः प्रकृति नाभिश्च तुर्यस्थानमिति स्मृतम् ।
तुर्यातीतमित्युक्तं मूलार्णव विमोहितम् ॥
इच्छाज्ञानक्रियारूप तिरोधानकरन्तथा ।
जाग्रादिन्तथाक्रमेण समर्थ्य वस्तुनिर्दिशेत ॥
अतीत जाग्रमित्युक्त मध्यावस्था तथैव च ।
अष्टप्रासादमेवोक्तं द्वादशञ्च ततः शृणु ॥
वचनमूलगतस्तालुमूलञ्च नाभिकम् ।
नाभिमूलगतं पीठं पीठमूलञ्च मण्डलम् ॥
मण्डलत्रयमध्ये तु गर्भान्तं सकरो ध्वनिः ।
हंसमध्ये स्थितो नादो नादमध्ये पराशिवः ॥
परमध्ये परानन्दं नित्यंमुक्ति सुखावहम् ।
वचनं पञ्चवर्णन मूलं बालाग्निरूपकम् ॥
तालुं तत्प्रकाशञ्च नाभिन्धवलरूपकम् ।
पीठं गोमेधकञ्चैव अर्कमण्डल इन्दुकम् ॥
चन्द्रस्य तत्प्रकाशेन अग्नेस्तु तत्प्रकाशकः ।
मण्डलत्रयमध्यस्थ मात्मनादञ्च रक्तकम् ॥
कदली कुसुमाभञ्च स्तनमध्ये दलाष्टकम् ।
अन्त्यवर्गे तु संयुक्तं स्फाटिकञ्च दलं स्थितम् ॥
तन्मध्ये षट्सु कोणेषु हृदादिवर्णकं स्मृतम् ।
सूर्यमण्डलमध्यस्थं मायाबीजं तथैव च ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कर्तेतु तत्प्रकाशो च तदूर्ध्वे चतुरंगुलम।
षोडशदलसंश्लेष श्वेतपद्मासनास्थितम ॥
मन्त्रवर्णं समालिख्य मूले हंसवरोस्थित:।
तन्मध्ये कृत्तिका चैव वर्गषट्कादि संयुतम ॥
मण्डले मध्यतास्थित्वा ध्रुवादिश्चन्द्रबीजत:।
चन्द्रमण्डलमित्युक्त तत्प्रकाश्यमिहो च्यते ॥
अतीताच्चतुरंगुल्य अग्निमण्डलास्थित:।
चतुर्दले तु सिन्दूर कालसंख्या चतुष्टयम ॥
पुंसवर्णमिति शेयं तन्मध्ये तु त्रिकोणकम।
वाणिशक्तिसबीजञ्च लक्ष्मीबीजं तदुच्यते ॥
व्योमबीजसमायुक्तं चतुर्णां तस्य तु स्थितम।
कर्णिकामध्यमे न्यस्य आत्मनादे व्यवस्थितम ॥
ज्वालामग्नि प्रकाशेन त्रिमण्डलञ्च विधीयते।
शिवं सहस्रमर्कञ्च नादेन्दु दशपूर्णकम ॥
अन्त: प्रभा परन्नादं द्वादशप्रासादमेव।
प्रासाद द्वादशमुक्तं षोडशञ्च तत शृणु ॥
पश्चिमोत्तरपक्षौ च पूर्वम्मे चैशान्य डाव च।
चतुर्दिक्षु प्रकर्तव्यं तदूर्ध्वे मारुतं तथा ॥
षोडशस्य कलासंख्या अर्धपञ्चकलस्य च।
तदूर्ध्वे चार्द्धचन्द्रञ्च निरोधिनादमेव च ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नादान्तं शक्तिरित्येव कला पञ्च इति स्मृतः ।
भ्रू मध्ये तु मनोन्मन्ये श्रद्धाकारन्तथैव च ॥
ललाटव्यापिनी चैव त्रिपुरीताण्डवस्य च ।
भ्रूरूर्ध्वताण्डवंस्यात्तु चक्षुरसंहार ताण्डवम् ॥
जिह्वानन्त ताण्डवं स्यात् घ्राणमनवरतं विदुः ।
श्रोत्रमनुग्रहं स्यात्तु ज्ञानकार्यमिहोच्यते ॥
ताण्डवं चैकसंयुक्तं बहुभेदं वक्ष्यते क्रमात् ।
मरणं तुर्यकालं स्याज्जनमजाग्रन्तथैव च ॥
इति द्विविधावस्थेन तत्वमेकसमासतः ।
चित्तविकारं विना पश्य शिवानन्दमिदं जगत् ॥
सूर्यश्च सोमवह्नौ त्रिगेतं त्रिदलस्य च ।
तस्मादूर्ध्वं गुरोर्मूलं शक्तिं पश्चशक्तियुतम् ।
अष्टपत्रं द्विपत्रं वा मन्त्रपुष्पमितीरितम् ।
बिन्दुःशिवोरजश्शक्ति बिन्दुरिन्दुरजो रविः ॥
ज्ञेयं गुरुमुखात् क्षिप्रं नेदेयं शास्त्रवर्जितं ।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च ॥
शान्त्यतीतेन्धिका चैव दीपिका रोचिका तथा ।
मोचिका चोर्ध्वगा चैव व्यापिनि व्योमरूपिणी ॥
अनन्ता चानाथा च अनाथा च ततः परा ।
शक्तिश्च व्यापिनी चैव समना चोन्मना तथा ॥-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सम्मनान्तं पाशजालमुन्मन्यन्ते परशिवः।

अकारोकारमकारो बिन्द्वर्धेन्दु निरोधिका॥

ना - - नादान्तशक्तिश्च व्यापिनी व्योमरूपिणी।

अनन्ता च अनाथं च अनाश्रिता समनोन्मना॥

इत्थं षोडशविन्यासः प्रागेव शक्त्यधिपा व वा।

शक्तिश्चतुष्कलापत कमलस्तेजसां निधिः।

नाडीमूलावृतां गाढ्हि कुण्डली हंसनिस्वना॥

तस्मान्नाभ्यन्तमासीनो विश्वरूपस्तटिन्निभः।

नाभेरूर्ध्वं वितस्त्यन्तं हृदयञ्चतुरंगुलम्॥

तदंते संस्थिताबेद मेधा स्वरो वह्निशिखा प्रभः।

तिमात्रः कारणं ब्रह्मा चतुर्विंशति तत्वयुक्॥

कण्ठेऽष्टांगुलधी र्घोशो द्विमात्रोक्त शशिद्युतिः।

तत्वषट्कयुतो विष्णुस्तालौ तु चतुरंगुलम्॥

मायातत्वं विषं रुद्रमेकमात्रस्तटित्द्युति॥

भ्रूमध्ये द्व्यंगुले दीर्घा निभो वृत्ता र्द्ध दीपकः मात्रकः।

तत्वद्वय युतोनन्तो ललाटे पादमात्रकः।

वृत्तार्द्धोर्द्धे शशिर्द्योति र्मात्राष्टांश निरोधिनी॥

उक्त प्रभा ततो दण्ड षोडशांशो मणि प्रभः।

द्वात्रिंशांशस्तु दण्डान्तो रुद्रे सौदामिनी प्रभः॥

ध्रुवोरूर्ध्वं बिलं यावदंगुले कादशांधिपः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वृत्तार्धादि चतुर्णां स्यात् सदेशास्तत्वयुग्मकः।
सूर्यकोटि द्युतिश्चोर्ध्वं मात्तारव्यारशिवोधिपः॥
चतुर्व्वर्ध्यंशिका शक्ति मूर्धन्येक अंगुलेस्थिता।
त्र्यंगुले व्यापिनी चाष्टा विंशत्याधिकशतांशिका॥
समनोर्ध्वं मनो माता चतुरंगुलकोन्मना।
ततः परममानस्तु तत्वातीतः परशिव॥
निर्मलादर्शनप्रख्य शशिरश्मिरि समप्रभः।
गम्योनेन क्रमेणैव स्वानुभूत्यामहात्मना॥
व्यापिका समनन्तास्थे व्योमांगानन्तसंज्ञके।
अनाथानाश्रिता चैतत् ज्ञेयोह्यष्टकलाशिवः॥
निवृत्यादिकलाः पञ्च तत्स्वरूपमिहोच्यते॥
इन्धिकाश्वेतरूपन्तु दीपिकारक्तरूप धृत्।
रोचिकाव्योमसञ्चारं मोचिका हरित प्रभम्॥
ऊर्ध्वगामी च वैडूर्यं व्यापिनी तु तटिन्निभम्।
व्योमरूपि तथार्कञ्च अनन्ता शक्तिरूपकम्॥
अनाथा स्फटिकरूपा च अनाश्रितं कुन्दसमप्रभम्।
समनारूव्यरूपन्तु उन्मनास्फटिक प्रभा॥
पृथिव्यादिमयोस्थञ्च इन्ध्यादि मध्यमं तथा।
व्योमरूपी समनान्तं पाशजालं तदुच्यते॥
उन्मना मध्यसंयुक्तान्निर्मलावस्थमुच्यते।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



केवलं सकलं शुद्धं उन्मन्यन्ते तदुच्यते ।
कण्ठावस्थास्थितश्चैव मोहं केवलमुच्यते ॥
विकारं सकलश्चैव द्वयश्चेष्टं विना तथा ।
केवलं विनाणवश्च सकलं मायया विना ॥
विशुद्धेन विना कर्म मलत्वं विनाध्वम् ।
निर्गुणावस्थामित्युक्तं परावान्त्याश्च दर्शयेत् ॥
मुद्रेमुद्रिस्वरो चैव सन्ध्यानस्य चतुर्विधम् ।
मनो प्रकृति प्राणस्य शक्तिं सूक्ष्म शरीरकम् ।
अव्यक्तं सूर्यसोमस्य नीराञ्जनमेव च ।
प्रासादस्य षडंगेन सूक्ष्माद्यंगेन विन्यसेत् ॥
॥ इति प्रासादविधिः समाप्तः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. 371



87a

॥ आत्मार्थ पूजा पद्धतिः ॥

गण्डतट द्वन्द्वौ स्यन्दमान तिदण्डबुधौ ।
कृतमज्जन लीला — त्काभं कलभाननम् ॥

नतः । एकन्तु तत्वं भुवनेनदीया स्सदाशिव स्वान्त इति निरूपम् ।
तेनोपपन्नः परमो गुरुर्यो निगद्यते प्रत्यहमागमज्ञैः ॥
अनन्तक श्रीगल बौल कन्या कुमारविष्णु ब्रह्माभिदानैः ।
धनस्समौ या पर उच्यते य स्स एव बोधोदय हेतुभूतः ॥

श्री दुर्वासः —

पैंगलाचार्य उग्रज्योतिस्सद्यो ज्योतिरीशागमज्ञाः ।
श्रीकण्ठ श्री विष्णुकण्ठस्सुबोधो विद्याकंठो रामकंठो मनीषी ॥
ज्ञातशेष श्रौढस्वदागमार्थान् पूर्वशैवक्षोणिका हृग्विलासैः ।
जातानन्द द्योतमाना नभो वा नेतान्वन्दे देशिकेन्द्रान्कुलीनान् ॥
क्लिप्ता कौन ज्ञानशिवेन तत्वगुरुणा श्री ज्ञावरत्नावली ।
ज्ञानारण्यादिम शाकरेण च कृता सा बालरत्नावली ॥
अन्यस्सोमशिवेन श्राधुरचिता सत्कर्मकाण्ड-
क्रमेणोत्तुंगेन शिवेन पतिरिवं नामानुकूला कृताः ।
ब्रह्माख्या प्रथमेनुशंभुगुरुणा नामानुरूपा कृता
प्रोक्तावन्ति विलोचनेन विदुषा सिद्धान्तसारावली ॥
श्रेष्ठोयं हरयाख्य देशिक पदा सिद्धान्तदीपः कृतः ।
ख्या वारुण पद्धति वारुणा नाम्नेयं शिवेनोदिता ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अन्यच्चारुतरं क्रियाकरणकं सन्मण्डनं निर्मितम् ।
प्रासादाख्य शिवेन देशिकनटेशेन स्वनामोचितं ।
नाम्ना स्वस्य-चरामनादि विदुषा सानिमिता पद्धति
श्रेष्ठेशान शिवेन नैपुणवता सिद्धान्त सारः कृतः ॥
डाबामद्भुत पद्धति रचनया माचार्य वर्यात्मना
मष्टाविंशतिशैव तन्त्र जलधी आमज्जमां मज्जताम् ।
शैवसारविधान उद्यानवन क्रीडा मृगेन्द्रात्मना
मंघ्रीनंबुज कान्ति कन्दल जुषो वन्दे मतिस्फूर्तये ॥
आत्मार्थ पूजाविधये बुधानामत्यन्त नित्यार्चनलालसानाम् ।
संगृह्य सारांशकमागमेषु सर्वेषु वक्ष्ये प्रकटं सुखेन ।

अथ चतुराश्रम धार्मिणामपि शुचीनां कर्म कर्तव्य-मित्युक्तत्वा दागमोक्त प्रकारेण प्रथमं शौचाचमनादिकं प्रदर्श्यते। सुप्रभेदे-

आथातस्संप्रवक्ष्यामि शौचाचमन लक्षणम् ।
साधकानां हितार्थन्तु चतुराश्रम धर्मिणाम् ॥

ब्राह्मे मुहूर्ते उत्थाय शुचिर्वाप्यशुचि वा मूलमन्त्रं वा मनसा जप्त्वा स्तोत्रै स्तुत्वा प्रणम्य स्नानादि सामग्री हत-दन्तकाष्ठ मृद्दण्ड कमण्डल्वादि सहायो निजालया न्निर्गत्य द्रव्यजात मस्त्रेण शोधिते शुचौ देशे निधाय ग्रामात्प्राच्यामुदीच्यां वा शतदण्डं विसृज्य यथोचितं देशं गत्वा नासाग्रे न्यस्तलोचन

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नन्यमानसस्समलादीनि विसृजेत । तथा सुप्रभेदे-

ब्राह्मे मुहूर्ते विद्वान्वै मनसा चिन्तयेच्छिवम् ।
सतिपादत्तिघटिका गण्यन्ते तु दिने दिने ॥
ब्राह्मं मुहूर्तमाख्यातं संध्योपास्त्वेतिकथ्यते ।

तथा ज्ञानरत्नावल्याम्-

ब्राह्मे मुहूर्ते योगात्मा समुत्थाय समाहितः ।
निरोधं सति तं त्यक्त्वा नो चेत्तत्रैव संस्थितः ॥
यमाद्यष्टांग योगज्ञः स्वप्रकाशं परं शिवम् ।
परं व्योममयं शान्तं व्योमातीतं निरञ्जनम् ॥
भावग्राह्यं भावशून्यं देहालंबन वर्जितम् ।
हृदयांभोरुहस्थं वा ज्योतिरूपं परात्परम् ॥
सूक्ष्मं बिन्दुमयन्देवं परमाक्षरमव्ययम् ।
यद्वा ब्रह्मबिलो नादज्योतिर्लिंगमनाहतम्॥
अंगुष्ठपर्वमात्रं वा स्थूलरूपं सदाशिवम् ।
यथाधिकारं शिवमपि ध्यायेद्भोगापवर्गदम् ॥

सर्वज्ञानोत्तरे-

ध्यानन्तु द्विविधं कुर्यात् स्थूलं सूक्ष्मं सदा बुधः ।
ध्याने न हि परां सिद्धिं प्राप्नुवन्ति हि योगिनः ॥
स्थूलं मन्त्रमयं प्रोक्तं सर्वावयव संयुतम् ।
द्विमार्गावस्थित ध्यायेत् पूजाग्नौ योगवित्तमः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



केवलं शिवबीजन्तु सर्वविग्रहवर्जितम्।
ज्योतिरूपं परं शुद्धन्तत्सूक्ष्मं परिकीर्तितम्॥

शिवबीजमिति प्रासादवाच्यम्-

प्रहरार्धे समुत्थाय ध्यात्वा देवं पिनाकिनम्।
मनसावर्तयेत्तन्तु प्रणवं बिन्दुवर्जितम्॥

अचिन्त्यविश्वसादाख्ये -

मूलमन्त्रमनुस्मृत्य जिह्वाग्रे तु प्रसन्नधीः।
स्थित्वा यावदुषापूर्वं स्तुत्वा स्तोत्रैः प्रणम्य च॥
कर्तव्यं शुभकार्याणि चिन्तयित्वा समाहितः।
उत्थाय च बहिर्गत्वा दण्डपाणिकमण्डलुम्॥

अजिते।

नमश्शिवाय शर्वाय देवाय परमात्मने।
सदेकरूपरूपाय विकल्परहिताय ते॥
स जप्त्वैवं बहिः कुर्यात् निजधाम्नो सहायवान्।

कालोत्तरे -

मृत्कुशकाष्ठगोमयापुष्पन्तिलमामलकं शुभम्।
कुशादूर्ध्वं गृहीत्वा तु नदीं गच्छेत् समुद्रगाम्॥

शिवधर्मोत्तरे -

दक्षो विनीतश्चिन्तज्ञस्तोयदारविदानवित्।
सहायश्शौच कार्येषु - - पात्रेककमण्डलुः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अत प्रसंगाद्दण्डादिलक्षणन्तु प्रदर्श्यते -

४२८ आचिन्त्यविश्वसादाख्ये-

१ मण्डलक्षणकं वक्ष्ये कल्माषेण समान्वितम् ।
मन्त्रास्निग्धत्वक् निर्व्रणं सुषिरं भवेत् ॥
कल्माषेण विहीनं वा तस्य लक्षणमुच्यते ।
एकपर्वमथवा यष्टि वज्रकामा सुखा वहा ॥
द्विपर्वा राक्षसी ज्ञेया मांसशोणित भोजनी ।
त्रिपर्वा पक्षिणी नाम पक्षिणी सा सुखप्रदा ॥
कामिनी न स पर्वन्तु सर्वासिद्धि विवर्द्धिनी ।
मुनिपर्वा विपन्नाम नाशकारमुदा भवेत् ॥
कर्ति पर्वा शिवा नाम अत ऊर्ध्वं न कारयेत् ।
पादाङ्गुलमधोभागे पुत्रनाशाय कल्पते ।
तत्सिद्धि द्व्यंगुले नैव त्रिभिस्तु धनसिद्धिदम् ॥
वेदांगुले नास्ति वृद्धिः पञ्चमं मृत्युदं भवेत् ।
रसांगुलं धान्यवृद्धिस्तन्नाशं सप्तमं भवेत् ॥
अष्टांगुलं हितं प्रोक्तं अत ऊर्ध्वं न कारयेत् ।
मूला तु द्विगुणं पुच्छं गवं दण्डस्य लक्षणम् ॥
अर्द्धान्तन्देशिकस्योक्तं सासकस्य तु ।
-क्तं - शोन्तं पुत्रकस्यानां स्वान्तं समायिनां सदा ॥
नैष्ठिकानां गृहस्थानां हस्तव्यामेन कारयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वता धारणीयन्तु वैणवदण्डमुत्तमम् ।

सुप्रभेदे — विशेषमुक्तम् —:

विप्राणान्तु शिरोत्सेधं क्षत्रियाणां ललाटके ।
वैश्यानां नासिकोत्सेधं शूद्रादीनां तु वर्जयेत् ॥

सर्वज्ञानोत्तरे —:

अतः परं प्रवक्ष्यामि कमण्डलुविधिक्रमम् ।
असहायस्य योगीन्द्र सहायोऽस्य कमण्डलुम् ॥

सुप्रभेदे — सौवर्णं रजतं चापि ताम्रं वा मृण्मयन्तु वा ।
यदुक्तं शिल्पशास्त्रेषु तत्तदुक्त्यामकारयेत् ॥
पूरितश्चाढकं श्रेष्ठं मध्यं त्रिप्रस्थ पूरितम् ।
द्विप्रस्थं पूर्णमधमं मानमेवं कमण्डलोः ॥

षट्सहस्रिकायाम् —:

हेमदारुमयं वास्तं कुलजं चापि पार्थिवम् ।
बीजपूराकृतिं कुर्यात् द्वादशांगुलमुच्छ्रितम् ॥

दीप्ते —: उदरस्य तु विस्तारं भूतानांगुलमिति स्मृतम् ।
अन्तेन पक्षन्तन्नाभं गंभीरं स्याद्व्यंगुलम् ॥
अध्यर्धमास्य विस्तारमोष्ठमध्यांगुलेन तु ।
कर्णोत्सेधं द्व्यंगुलयं कण्ठनाहं षडंगुलम् ॥
पार्श्वे नासिकया युक्तं नास्यायां त्र्यंगुलम् ।
एकांगुल प्रमाणेन पृष्ठे पादं प्रकल्पयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पालाव्येतानि सर्वाणि कुर्यान्मातांगुलेन तु ।

पञ्चसहस्रिकायाम् — :

पूरयेत्तेन मार्गेण यावद्वै गलकावधि ।
पञ्चपानीय संशोध्य पञ्चगव्येन भस्मना ॥
शिवेनाष्टशतं जप्त्वा पूज्य संस्थापयेत्कुचौ ।
निवेदयेदघोराय तत्संप्रार्थ्य धारयेत् ॥
नित्यं लिघटिकायां तु भूमौ भान्य धाचेत् ॥
अथ न स्पर्शयेत्तत्र स्पर्शान्यागो विधीयते ।
अथवा विभवेद्येन मन्त्रयेत्पूर्ववत्क्रमात् ॥
शुचान्तेन स्वयंकुर्यात् न भ्रान्तिं तत्र कारयेत् ।
गृहस्थैः प्रकर्तव्यं शौचं कार्यं स्वयं धाचेत् ॥
कमण्डलुविधानन्तु संक्षेपेण प्रकीर्तितम् ।

सर्वज्ञानोत्तरे —

ताम्रमाम्लेन संशोध्य तथारक्तोदक भस्मना ।
रौप्य हैमौ तु संशोध्यौ लेपगन्धमलान्वितौ ॥
प्रज्वाल्यमग्निमघोरेण अस्त्रेण च विधानवित् ।
प्रातरुत्थाय तान्नीत्वन्देह देवं कमण्डलुम् ॥
ततस्त्वा पूरयेत्पश्चात् वस्त्रपूतेन वारिणा ।
नान्येन सेवितं वस्त्रं न शय्या न कमण्डलुम् ॥
न भस्मना बलापत्यं संसेवे न कदाचन ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोन्तरे — पर्वताग्रे नदीकूलात्पुण्यक्षेत्रात्तथा शुचिस्थलात् ।
ब्रह्मवृक्षात्कुशाधस्तादस्ते धातुरं सुरक्षितम् ॥
तालमानाद्यो मृत्स्नामादाय हृदयेन तु ।
सञ्चयेद्भूतले शुद्धे यावन्मास चतुष्टयम् ॥
वर्षाकालेन सर्वाघात् श्राद्धपक्षे विशेषतः ।
कुशास्सदेशजास्निग्धा नातिरवा न चायतात ॥
छायास्साग्र मूलास्सप्तपर्णा न सप्तजा ।
पथिजाताश्चिता जाता ~~जाल्या~~ जाता श्मशाने पितृतर्पणे ॥
स्तरणासन पिण्डेषु न ग्राह्या सप्त देशजा ।

।चिन्त्यविश्वसादाख्ये —:

उत्थाय च बहिर्गत्वा दण्डपाणि कमण्डलुम् ।
योग्यदेशे समागत्य विन्यसे दण्डकमण्डलुम् ॥

यथा सन्ताने —: दिव्यजातं शुचिस्थाने निधायास्तेन शोधिते ।
४४a गत्वा दूरान्ततो मौनी दक्षकण्ठोपवीतवान् ॥
ग्रामात्प्रतीच्यामुदीच्यां वा शतदण्डं विसृज्य च ।

शिवधर्मोत्तरे —

ग्रामाद्धस्तशतं गत्वा नगरान्तच्चतुर्गुणम् ।
सहि सर्वत्र मेधा स्या निर्लोपा यत्र दृश्यते ॥

कारणे —: ग्रामस्य शानदिग्भागे मलादीनि विसर्जयेत् ।
सहस्रतन्त्रे —: यथेष्टदेशे गन्तव्यमैशान्यां दिशि वर्जयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ज्ञानरत्नावल्याम् —:

नाशद्देभूतले चिन्त्यं शपाधी वाशिणि पिच्छिले।
क्रिमि गोमायुहुर्वासु सस्यक्षेत्रे क्षारोवरे॥
मुनि देवलय धाम वल्मीककूल सन्निधौ।
नदी पुष्करणी वापी तटाकादि जलाश्रये॥
ग्रामचत्वररथ्यासु वृक्षाच्छायासु गोकुले।
पर्वतेश्मनि आगर्ते कुर्याच्चेद्दोषभाक् भवेत्॥
मूत्रोत्सारन्तु यः कुर्यात् एषु स्थानेषु मानवः।
स पच्यते महाघोरे यावदाभूतसंप्लवम्॥

शिवधर्मोत्तरे —:

शिरः प्रवृत्य तत्कुर्यात् दन्तं धा यतृणैर्महीम्।
अन्वत देवता ऋषयस्सर्वे गणा नागास्तथैव च॥
उत्तिष्ठ सर्वतश्चैव वह्निभूमिं करोम्यहम्।

सर्वज्ञानोत्तरे —:

दिवोदङ्मुखतास्तिष्ठेद्रात्रौ वै दक्षिणा मुखः।
अर्धरात्रे तु नैर्ऋत्यां द्वे सन्ध्ये तु यथा दिवा॥

सन्ताने —: पातस्याभिमुखश्चैव न कुर्यात्कदाचन।

ज्ञानरत्नावल्याम् —:

गृत्यदेशे महावाते क्षीणरोगे यादिक्भ्रमे।
छायायाञ्च दिनेरात्रौ अन्धकारे तथा यदि॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यथा सुखमुखो भूत्वा मृगचोरभयेषु च ।
पायुवायुमलं मूत्रं विसृजेत्समुपस्थितम् ॥
अयज्ञांगतृणच्छन्ने भूतले विसृजेन्मलम् ।
कारणे-- स्त्रीणां गोविप्रलिंगानां प्रत्यक्षं चन्द्रसूर्ययोः ।
देवान्तरिक्षवाग्नि सम्मुखञ्च विसर्जयेत् ।
क्रियासंग्रहे-- विश्वलिंगनभो दिक्षु क्षिपेद्दृष्टिं विचक्षणः ॥
कामिके-- नासा पीडन निष्ठीवहस्तोद्धासादिकं त्यजेत् ।
शिवधर्मोत्तरे-- न विण्मूत्रमुदीक्षेत छायाञ्चैवात्मनो न च ॥

ततो लोष्टादिना गुदं प्रमृज्य पिहिते पिहितेन वामकरेण स्वशेफं संगृह्योत्थाय दक्षिण सहस्तेन यथोक्त मातास्तान्नालिकेरफलमात्रमादाय जलतीरं गत्वा । तन्मृता-न्निक्षिप्य तृणमूलादिकं त्यक्त्वा जलेनार्द्रीकृत्यामलकीफल मात्रं सव्येनादाय वामकरे निधाय तेन तेन गुदं दशवारं मेढ्रं त्रिवारं वृषणौ च तथा पुनरन्तरान्तरा वामकरमेक वारं पुनश्च दशवारं करद्वयं सप्तवारं यावद्भावशौचं वा प्रक्षाल स्फिक्शुद्धिं विधाय प्राङ्मुखः । पादौदङ्मुखौ हस्तौ च जान्वोर्पराबसानान्त्रिवारं प्रक्षाल्य ततोन्यत्र जलतीरे गत्वा यथोक्तगण्डूषान् कृत्वा पूर्वन्तूष्णीमाचम्य पश्चान्मन्त्रेणाचमनं विदध्यात् ॥ ज्ञानरत्नावल्याम्--

तृणैः पायुमयज्ञांगैः मृज्जा यन्त्रयोगिभिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मृत्पिण्डेनैव वा कुर्यान्मार्जनं लोष्टकादिना ।
अन्यैर्वा न तु संपन्नत्वत्पत्रकरजः फलैः ॥
अस्थिगोमयपाषाणदारुभिर्गुदमार्जनम् ।

सर्वज्ञानोत्तरे –:

गृहीतबिन्दुश्चोत्थाय मृत्तिकाग्रहणं कुरु ।
वाल्कुकोषरकैर्वर्ज्य वृक्षमूले जलाशये ॥
वल्मीकमृत्तिकाश्चैव तथा वै ग्राममध्यानिकाम् ।
विशुद्धमृत्तिकां गृह्य जलतीरे निधापयेत् ॥

कामिके –: शुद्धामशर्करां गृह्णीतु दंशौ –चार्धमाहरेत् ।

रौरवे –: अथवा पुंसमीपे तु द्वादशांगुल वर्जितम् ।
अर्धा मृत्स्नां समादाय नालिकेर प्रमाणकम् ।

कालोत्तरे –:

नालिकेरफलं मात्रं शौचार्थं मृदमाहरेत् ।

कारणे –: तृणमूलादिकं त्यक्त्वा नाम्ली कृतास्तुताम् ।
आमलीफलमात्रेण सव्येनादाय गामकं ।
निक्षिप्य वामहस्तेन कर्षयेत्पुनः पुनः ॥

कालोत्तरे –: दशकृत्वोम्मदन्दद्यात् गुदं वै गृह मेढ्र कम् ।
मेढ्रे तु मृदं दद्यात् अर्धा वृषणयोस्तथा ॥
दशभिर्वामहस्तन्तु सप्तभिश्चोभयौ करौ ।
डाकेकमन्तरे तीणि डवं शौचं कृतं – डाकं तीणि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



४४८ स्तु पदानौं प्रक्षाल्य कर्ौ च पुनराचरेत् । परास्थे-:
क्रियमाणे यदार्गौ चे विप्रोऽच्चलनं जवेत् ॥

तेन तत्क्षालनार्थन्तु कटिशौचं विधीयते ।
अत क्षालने दिङ्नियमश्चिन्त्यो दर्शितः ॥
प्राङ्मुख क्षालयेत्पादौ वक्त्र हस्तावुदङ्मुखौ ।
जलेन शोधयेत्पश्चात् गण्डूषं षोडशा क्रमात् ॥

शिवधर्मोत्तरे-:

नगरग्रामरथ्यां वा परिक्रम्य गृहाद्बहिः ।
पादौ प्रक्षाल्य हृत्तोये स्नान्तः प्रविशेत्ततः ॥

कारणे-: वामपादं जलेस्थाप्य स्थले दक्षिण पादकम् ।
गात्रमग्नजलं ग्राह्य त्रिर्शोषं त्रिः पिबेद्बुधः ।

ज्ञानरत्नावल्याम्-:

ततोऽन्यत्र समाचम्य तूष्णीं सर्वविवीतवान् ।
पुनर्निर्गत्य समाचम्य दन्तधावनमाचरेत् ॥

तथा शिवधर्मोत्तरे-:

तूष्णीमेव ततो श्रेय शिवमन्त्रेण पूर्ववत् ।
आचमेद्ब्रह्मतीर्थे तु ब्रह्मस्तुती प्रदङ्मुखः ॥

गतच्छौचं गृहस्थ विष-म । उक्तं कारणे-:

गतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
गृहस्थात्त्रिगुणं भिक्षो यतीनां तु चतुर्गुणम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यावन्मात्रं मनश्शुद्धिस्तावदाचौ च मुच्यते ।

शिवधर्मोत्तरे -:

गंगातोयेन सर्वेण मृद्भारैश्च नगोपमैः ।
आमृत्योराचरेच्छौचं भावदुष्टो न शुध्यति ॥
ज्ञानामलाम्भसा पुंसा सवैराग्य मृदा पुनः ।
अविद्या रागविण्मूत्र लेपगन्धविलेपनम् ॥
तदग्रम्मन्त्रित दन्तकाष्ठेन दन्तां धावयेत् ।

कामिके: संगृह्य दन्तकाष्ठन्तु हरेद्दन्तगतं मलम् ॥

दीप्ते -: निर्मलदर्बानं याव-तावद्वै दन्तधावनम् ।
ततः स्थालं विशोध्यन्तु तैरेव प्रतिबोधयेत् ॥

कारणे -: हृदामन्त्रित काष्ठेन दन्तमांसमबाधयन् ।
दन्तानन्तर्बहिश्शोध्य दन्तकाष्ठैरितीर्यते ॥

परारव्ये -: लाला दृक्श्रोत्र नासास्य स्वो विण्मूत्रगात्रजः ।
नवपादगतं यच्च यच्च गन्धादि लेपनम् ॥
नासिका श्रोत्र नेत्रोत्थमुदकेन विशुध्यति ।
वक्त्रजन्दन्तकाष्ठेन केश्याच्चामलकादिभिः ॥
अद्भिश्च शुद्धिं मृद्भिश्च शेष प्रक्षालयेत्तनुम् ।

चिन्त्यविश्वसादाख्ये -:

समच्छेद्यमृदं शुद्ध सार्द्रसत्वगपर्वकम् ।
कनिष्ठानाभ संयुक्तं दन्तकाष्ठस्य लक्षणम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अष्टांगुलनं नैष्ठिकानां भोगिनां द्वादशांगुलम् ।

क्रियाकाण्डक्रमावल्याम् -:

अथवा विप्रराजन्य वैश्यशूद्रान्त्य जातिषु ।
दशांगुलसमुद्दिष्टं क्रमादेकैक मात्हत ः ।

तथा च पुराणे -:

दशांगुलन्तु विप्राणां क्षत्रियाणां नवांगुलम् ।
अष्टांगुलन्तु वैश्यानां शूद्राणां सप्तसम्मितम् ॥
चतुरंगुलमात्रन्तु नारीणां दन्तधावनम् ।

ज्ञानरत्नावल्याम् -:

शिखावत शिवधर्माणां साधकानां द्वयंगुलम् ।
एकैकमंगुलन्यूनञ्चतुर्णां लोकधर्मिणाम् ॥
जम्ब्वाम्र ककुभाशोक कपित्थं बकुलोद्भवम् ।
प्लक्षोदुंबर कुल्लांघ्रि जाति-चंपकशंखजम् ॥
अतिमुक्तकदंबोक्तं अपामार्गन्तु देहिनाम् ।
हितमेतच्चैवारीव चिरिबिल्व करञ्जकम् ॥
श्री पर्णी दारुनिर्गन्धी सारकं खादिरं वचे ।
अक्षक्षीरीय वैरण्ड वटाश्वत्थार्क वेशिजम् ॥
अंगुलिश्च न शस्येत प्रमादाच्चेत्तपक्षय ः ।
मन्त्राश्च मुनयो देवाः पितरस्तत्पराङ्मुखाः ॥
अविध्यन्त्वुदिते भानौ कुर्याच्चोद्धिकृतिं विना ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तरास्यो यतिर्मौनी गृहस्थश्चेत्पुराननः।
उपविश्य शुचिस्थाने विद्धक्रान्त्यज रासभान्॥
श्वानास्ती-श्च पाकास्थि स्नक्रान्नावलोकयेत्।
प्रतिपन्नवमी षष्ठी व्यतीपातादि पर्वसु॥

अत्र प्रतीपातादि व्याघातादि परिगृह्यते।
तथा व्याघातं परिघं वज्रं व्यतीपातश्च वैधृतिः।
गण्डादिगण्डशूलश्च विष्णुं नव वर्जयेत्॥
पौर्णमास्याममावास्यां संक्रान्तौ ग्रहणे गृही।
कृत्वा द्वादश कण्डूषान् संप्रक्षाल्य मुखं शनैः॥
अलाभे दन्तकाष्ठानां प्रतिषिद्धे तथा दिने।
अपां द्वादशकगण्डूषैर्मुख शुद्धिर्भविष्यति॥

अन्यत्र-: मूत्रे पुरीषे भुक्ते च तथा भक्षस्य भक्षणे।
चतुरष्ट द्विरष्टाष्ट गण्डूषेण विशुध्यति॥
अस्यां प्रक्षाल्य गण्डूषैर्वामभागेन शुध्यति।
मोहा द्दक्षिण भागे तु रौरवं नरकं व्रजेत्॥

चिन्त्य विश्वसादाख्ये-:
मुमुक्षोश्च विशेषेण नित्यं वै दन्तधावनम्।

तदनु स्नाया ज्जलस्नानं प्रकर्तव्यं सर्व पापहरं शुभम्॥
बहिरन्तर्द्वि शुद्ध्यर्थं शिवेज्या योग्य कारणम्।
आलस्य दाह निद्राणां शत्रूणाञ्च क्षयं यतः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



४१a सर्वाचारप्रधानत्वात् स्नानमादौ प्रचक्षते ॥

मतङ्गे च :- न्यासार्चनादिकः कृत्स्नो विधिस्नानपुरस्सरम् ।

यस्मात्तस्मात्ससामान्यमादौ स्नानं प्रवक्ष्यते ॥

कामिके :- वारुणञ्च तथाग्नेयं मारुतं मानसमेव च ।

वायव्यं चैव माहेन्द्रं स्नानं षड्विधमीरितम् ॥

स्नानाष्टकं कुत्रचिदुक्तं ।

वरुणाग्नेयमाहेन्द्रं मारुतं मानसं

पार्थ्यगौरवमित्यष्टौ स्नानन्वेदेषु मध्यतः ।

दीक्षितो योऽधिकारी स्यात् योग्य स्नानार्चनादिषु ।

तस्याधिकारयोग्यस्य स्नानमादौ च वारुणम् ॥

नदी नदतटाक पल्वलप्लवनेषु दीक्षितस्य स्नानं श्रेष्ठं मध्यमं जालपुष्करिण्यादिषु कूपदीर्घिका कुण्डोदपानेषु कन्यसं गृहे स्नानं श्रेष्ठम् । तदुक्तं श्रीमत्पौष्करे :-

नदीषु देवखातेषु पल्वलप्लवनेषु च ।

दीक्षितस्योत्तमं स्नानं पुष्करिण्यान्तु मध्यमम् ॥

कूपेयमं स्नानमाहुर्गृहे श्रेष्ठं प्रकल्पितम् ।

नवाष्टपञ्चाभिः कुम्भैः शिवमन्त्रप्रकल्पितैः ॥

स्नानं गृहेऽपि कर्तव्यं लिप्तायां भुवि दीक्षितैः ।

कामिके :- अथवा स्वगृहे तप्तवारिणा शीतलेन वा ।

तत स्वालिप्त भूपृष्ठे पीठस्नानमाचरेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथान्यत्र स्त्रीबालानां - ईशानां रोगिणाञ्च प्रवासिनां

उष्णोदकेन स्नानं वा कण्ठस्नानमथापि वा ।

चिन्त्यविश्वसादाख्ये -:

नद्यां तटाके वाप्यां वा कूपे वापि चतुर्विधम् ।
कूपस्नानं प्रकर्तव्यं यदि नद्याद्यसंभवे ॥
अथवा मद्देशेपि कूपादुद्धृत वारिभिः ।
कुंभे स्नानं प्रकर्तव्यं पूर्वोक्तविधिमन्त्रकैः ॥
मृत्कुम्भात्ताम्रकुंभेन स्नानं शतगुणं भवेत् ।
ताम्राच्छतगुणं रौप्यं राजताद्धैमकं शतम् ॥
कूपाद्दशगुणं वाप्यां वाप्याद्दशगुणं तटम् ।
तटकाद्दशगुणं नद्यां अनन्तफलमुच्यते ॥
पयोधि संगमञ्चैव नदहृदसरांसि च ।
सूर्यस्य पादस्पृष्टन्तु जलमत्यन्तमुत्तमम् ॥
पल्वलप्लवनञ्चैव पुष्करिण्यादि नालकम् ।
तटाकतीर्थ सर्वेशं मद्यमं कन्यसं पुनः ।
कुण्डोदञ्च निपानञ्च वापिस्नानं समं भवेत् ।
अल्पं वा बहुलं वापि शिवालय समीपगाम् ॥
सर्वतीर्थानि शिवगंगाजिदानतः शैवपुराणे ।
देवालयं स्थितं तीर्थं दूषयेन्न कदाचन ॥
नान्यन्तमशुचिस्तत्र स्नानं कुर्यात्तु कर्हिचित् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दीप्ते —: कोटिकोटि गुणं प्रोक्तं समुद्रस्संगमो भवेत् ।
तटाकात्सहस्रगुणितं नद्यां वा स्नानमाचरेत् ॥
सुप्रभेदे —:
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ।
मृतस्य रुधिरं नित्यं स्रुवन्ति निशि निम्नगाः ॥
तस्मात्स्नानञ्च पानञ्च न कुर्वीत कदाचन ।
रात्रौ वारि न गृह्णीयात् दैवात्मञ्चात्मनाञ्च वै ॥
सुवर्णाग्नि समायुक्तं प्राणायामेन वा जलम् ।
प्राणायामत्रयं वापि कारयेद्देशिकोत्तमः ॥
जलशुद्धिर्भवेदेव निशिस्नानाय गम्यते ।
तस्माद्दिवैव स्नीया दैवार्थञ्चात्मनस्तु वै ॥

तत्र स्नानविधिः —
समाचम्य कृतन्यासो दर्भहस्त प्रसन्नधीः ।
प्राणायामत्रयं कृत्वा संहितां प्रणवं वदन् ॥
अद्यामुके रवौ मासेति तिथौ वारे सरिद्वरे ।
स्नानं देव करिष्ये त्वत् पूजार्थं त्वं प्रसीद मे ॥
इति विज्ञाप्य गा मूर्ते शंभौ स्नानमथाचरेत् ।
पूर्वमस्त्रेण संस्नात्य तामृद नमोन्त हृदयेनाशाय नमोन्तशिरसा जलतीरे निक्षिप्य नमोन्त शिखया तृणमूला-दीनुद्धृत्य हुं फडन्तास्त्रेणाभ्युक्ष्य नमोन्तकवचेन त्रिधा-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विभज्य नाभ्यधः पादान्तमेकभागं तु कृत्वा वर्मणा हेति पुनः न प्रक्षालयेत् । ज्ञानरत्नावल्याम् –:

पूर्वोक्त विधानेन धौते तीरे मृदं हृदा ।
आदाय शिरसा धृत्वा चूडयोद्धृत्य शार्करम् ॥
अभ्युद्धृत्यास्त्रेण त्रिः कृत्वा वर्मणा हेति ना पुनः ।
आनाभि क्षालयेत्पादादेकया कायमन्यया ।

द्वितीयभागेन सकृदस्त्रजप्तेन देहगतकल्मषशान्त्यै सर्वांगमालभ्य नाभिजलं प्रविश्य साधनिवृत्त्यै पूर्वास्य षण्मुखीनयनादिकं विधाय प्राणांश्च संयम्य वाचिकभाव शुद्ध्यर्थं संहिताञ्जपन्हृदयेऽस्त्रं कालाग्निप्रभं संस्मरन्जले निमज्ज्य यावच्छक्यमासीनः । ज्ञानरत्नावल्याम् –:

अस्त्राभिजप्तयालभ्य सर्वां – भानुदीप्तया ।
पूर्वास्यो जलमाविश्य शस्त्रेण परिलोड्य तत् ॥
प्राणान्संयम्य पाणिभ्यामिन्द्रियाणि निरुध्य च ।
४१८ अन्यस्ताश्चिन्तयन्नन्तस्तत्तेजःपुञ्जपिञ्जरम् ॥
क — घमर्षणं यावच्छक्यमासीत तज्जले ।

सिद्धान्ते –: अंगुष्ठाभ्यामुभौ कर्णौ तर्जनीभ्यामथाक्षिणी ॥
मध्यमाभ्यामिति दध्याद्यान्नासिकायुगलं दृढम् ।
कंकलीकरणं ह्येतत्स्नानकर्माणि योजयेत् ॥

सा – – वार्तिकायाम् –: सकृज्जप्तेन संगृह्य स्तमस्त्रेण मन्त्रवित् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मलस्नानं सुराकुर्यात सकृज्जपत्वा तु कर्मिचित् संहिताम्।

पराख्ये-: डाकमुद्धृत्य मृद्भागे तेन स्नानमलापहम्।
वारत्तमुच्चार्य कायं स्वमालभ्य शिरसा क्रमात॥
पादान्तं यावत्स्नायादेन सद्यशुद्ध्यते क्षणात।
प्राणायामं पुनं कुर्यादन्तः प्राणनिरोधनम्॥
प्राणवृत्ति निरोधेन मनोवृत्ति निरोधयेत।
मनो वृत्तिनिरोधेन पापं यन्मासं हरेत॥

मतंगे-: ध्यायेदस्त्रं महादीप्त ज्वलद्वह्नि शिखाकुलम्।
आग्नेय धारणा संस्थेत न्तार्चिछेखोत्थानकारिणा।
तत्सा वर्तते तोयं भस्मभूतं समन्ततः॥
तेन विघ्नाः प्रणश्यन्ति यंभसोन्त वहिस्थिताः।
तटस्थश्च प्रणश्यान्ति दह्यमाना भयाकुला॥
ततोंकारपदं ध्यायेदमृतस्यान्दे निर्मलम्।

सुप्रभेदे-: अन्तर्जलेविधानाक्षा सर्वांगं नैव दर्शयेत॥
दर्शयेदेतदच्छार्थ मुखमग्नोथवा पुनः।
मुखमग्नन्तु यप्रोक्तशत ध्यार्धं भवेत्क्रमात॥
अथांगे ध्यर्थ साहस्रं निमग्ने कोटिरुच्यते।
ध्यानयुक्तोपि निष्क्रम्य क्रमेणाचम्य तत्वतः॥

तथा मृगेन्द्रे-: संयतास्सुरूपां मध्ये वक्त्रमादाय चेतसा।
जपेदघौघ विच्छित्यै तारकन्दुःख तारकमिति॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ततो विप्रादिषु त्रिषु वर्णेषु गृहस्थो ब्रह्मचारी वा यः कश्चिच्छिवदीक्षितो प्रथमं स्मार्तोक्त ब्राह्मीं सन्ध्यामुपास्या~~नघौघ विच्छित्त्यै~~ नन्तरमस्त्र सन्ध्या ध्यायन् ओं शिवास्त्राय विद्महे कालानलाय धीमहि तन्न वास्त्र प्रचोदयात् + इत्यस्त्रगायत्रीमन्त्रेण सूर्यमण्डले त्रिजलाञ्जलिं प्रक्षिप्य यथाशक्ति जपं कुर्यात् । विरक्तो वैदिकं विनास्त्रसंध्यामेव कुर्याच्छूद्रस्तु ब्राह्मीं संध्यां विहायास्त्रसंध्यामेवोपासीत तद्ध्यानार्थमस्त्रेण शिरसि त्रिजलबिन्दुं निक्षिप्याचम्याञ्जलित्रयमस्त्रेणैव दत्वा तेनैव यथाशक्ति जपेत् । यद्वास्त्रं हृदि सञ्चिन्तयेत् । मृगेन्द्रे—:

स्नानमाशिरसः कृत्वा समाचम्योदगाननः ।
प्राङ्मुखो वा भजेत् सन्ध्यां वेदसिद्धान्तगाश्रमी ॥

तथांशुमती—: पूर्वस्यामुत्तरस्यां वा समं कुर्याद्विचक्षणः ।
याम्येव पश्चिमे चैव निष्फलं तदवाप्नुयात् ॥

सूक्ष्मे विशेष उक्तः—

स्नानञ्च तर्पणं कृत्वा प्राङ्मुखो वैदिकञ्चरेत् ।
उत्तराभिमुखो भूत्वा शैवसान्ध्यक्रमञ्चरेत् ॥

कामिके—: जले स्नात्वा समुत्तीर्य दीक्षितस्तु त्रिवर्णजः ।
अविरक्तः पुरा ब्राह्मीं सन्ध्यां वन्देत साधकः ।
भजेत्तदन्ते शैवीं तु संक्षेपविधिमाश्रितः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इतरस्तु परागात्मा लौकिकार्थं पराङ्मुखे ।
कुर्याद्ब्राह्मीं न वा कुर्यात् शैवीमेव नियोगतः ॥
आवश्यके वा शौचे वा स्नाने व्याचमनेऽपि वा ।
सन्ध्यायां वन्दने वापि तर्पणे होमकर्मणि ॥

अजिते-: स्नात्वा-तीव पुराब्राह्मीं यजेत्सन्ध्यान्तु भौतिकः ।
नैष्ठिकश्चैव यजेत्सन्ध्यां केवलञ्चास्त्र संज्ञताम् ॥
स्तवनत्यादिकं वान्यद्द्विजानां विहितन्तु यत् ।
कर्तव्यं वा न कर्तव्यं शैवमावश्यकम्मतम् ॥

बृहत्कालोत्तरे-:

वैदिकन्तु पुराकृत्वा ततश्शैवीमसमभ्यसेत् ।
भौतिके ष्ठिकस्तद्वत् ब्राह्मीं कुर्यात्पुरा न वा ॥
शैवीं तु नियमेनैव सेव्यापतनमन्यथा ।
नित्यादिति तथा कार्यं चतुर्भिरविशेषतः ॥
वैश्वदेवं तथा सन्ध्यां रुद्रस्त्यक्त्वा तथोदितम् ।

रामनाथ पद्धत्याम्-:

कुर्यात्सन्ध्यां कृतन्यासस्मृत्वास्त्रं रविमण्डले ।
अर्घ्यं दत्वास्त्रगायत्र्या यथाशक्ति जपन्निति ॥
तथा स्नानमाशिरसः कृत्वा समाचम्योदगाननः ।
प्राणायामत्रयं कृत्वा शिवास्त्राष्टशतं जपेत् ॥
प्राञ्जलिस्तिस्था कृत्वोपस्थानं सम्यगाचरेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अतसन्ध्येति निर्दिष्टा शैव साधारणी मता ॥

अथमन्त्रस्नानमाचरेत् । सुप्रभेदे —:

मलस्नानमिदं प्रोक्तं मन्त्रस्नानमतः शृणु ।

१०a मत्स्यमण्डूकसर्वाद्यैरन्यैश्च जलजन्तुभिः ॥

सेवितन्तु जलं नित्यं तस्मादुष्टं विशेषतः ।

तद्दोषशमनार्थन्तु शिवतीर्थं प्रकल्पयेत् ॥

तदा जाह्नवीयादि महातीर्थं ध्यात्वैकं बिन्दुस्नानं ओं हां हृदयाय वौषडन्तं अंकुशमुद्रया समादाय तेनैवोद्भवमुद्रया पुनस्संस्थाप्यावशिष्टं मृद्भागं संगृह्य जलमध्ये तिष्ठन्नुदङ्मुखो वामकरे त्रिभागं कृत्वा पूर्वमस्त्रजप्तं दक्षिणं ब्रह्मजप्तं उत्तरं शिवजप्तं क्रमेण सप्तवारमेकवारं दशवारं विधायास्त्रजप्तेन दिक्बन्धनं कृत्वा शिवजप्तेन जलमभ्यावर्त्य ब्रह्मजप्तेन सर्वांगमालभ्य कृतषण्मुखीकरणश्शिवं ध्यात्वा स्नायात् ।

चिन्त्यविश्वसादाख्ये —:

जाह्नव्यादि महातीर्थं ध्यात्वाकृष्यां कुशमुद्रया ।

वौषडन्तहृदाबिन्दोस्समादायोद्भवाख्यया ॥

मुद्रया हृदयेनैव नमोन्तेनांभसि न्यसेत् ।

दक्षिणं हस्तमुत्तानान्तर्जन्यां कुञ्चिते तथा ॥

शेषमुष्टिन्तु संबन्धमुद्रेयं स्यांकुशस्य तु ।

कामिके —: अवशिष्टमृदोभागं संगृह्य जलमध्यतः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



~~वामकरे कुर्या~~ ।स्थित्वा वामकरे कुर्यात्त्रिभाग मुद्गानन ः।

सर्वज्ञानोत्तरे -: पूर्वेण दक्षिणेनैव तथा चैवोत्तरेण तु ।
अस्त्रजप्तं जपेत्पूर्वं श्रमजप्तन्तु दक्षिणम् ॥
उत्तरं शिवजप्तन्तु प्रकुर्वीत पृथक् पृथक् ।
अस्त्रजप्तं क्षिपेद्दिक्षु ईशाशास्वपि यथाक्रमम् ॥
नाराच्चास्त्र प्रयोगेन जलमध्ये पुनः क्षिपेत् ।

सुप्रभेदे -: जलसूक्ष्माश्च ये दोषास्तेषामुच्चाटनं भवेत् ॥

वाराख्ये -: उदकस्थेन शिवं तीर्थं कृत्वा बाहुपरिभ्रमात् ।
वक्षःस्थेन निजं कायं शिरस प्रभृति स्पृशेत् ॥
पादान्तं काय पापघ्नं स्नानं कुर्यात्त्वपे वांभसि ।

सुप्रभेदे -: प्राङ्मुखोदङ्मुखो वापि स्नानार्थं विप्रजेद्गुरुः ॥
ततश्शतगुणं पुण्यं स्नानं प्राङ्मुख उच्यते ।
तत्रापि दक्षिणन्तीरमनन्तं फलमावहेत् ॥

सर्वज्ञानोत्तरे -:

शिवतीर्थं भवेदेवं विधिनानेन षण्मुख ।
सर्वतीर्थवरं पुण्यं सर्वपापहरं शुभम् ॥

ततस्सोमसूर्यौ शक्तिशिवौ च वामदक्षिणहस्तयो स्सञ्चिन्त्य वौषडन्तषडंगेनाभिमन्त्र्य कुंभमुद्रया त्रिधा शिरस्यभिषिच्य हुंफडन्तास्त्रेणान्तरायशमनार्थं जलं दिक्षु निक्षिपेत् ।

कामिके -: सूर्यसोमात्मकौ हस्तौ संयोज्य घटमुद्रया ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वौषडन्त षडंगेन जलेन च मुहुर्मुहुः।
साधकस्साधकैर्मन्त्रैस्सेकः कार्यस्सकृत्सकृत ॥

चिन्त्यविश्वसादाख्ये –:

चन्द्रार्करूपहस्ताभ्यां सेचयेत्कुंभ मुद्रया ।
वौषडन्त षडंगेन जलेन च मुहुर्मुहुः ॥
साधकस्सधकैर्मन्त्रै जप्त्वा तु दशसंख्यया ।
अभिषिञ्चेत्क्रमान्नित्यं मूमृतांबु विभावयत ॥

वीरतन्त्रे –: उत्तानं तु करौ कृत्वा मणिबन्धन्तु कारयेत ।
वामहस्तस्य चोर्ध्वे तु दक्षिणं विन्यसेत्ततः ॥
वामांगुष्ठस्य चोर्ध्वे तु दक्षिणांगुष्ठकं न्यसेत ।
मध्यमे सुषिरं कुर्यात शेषांगुल्यश्च बन्धयेत ॥
कलशमुद्रा भवेदेवा स्नानकाले प्रयोजयेत ।
आत्मसंरक्षणार्थाय सर्वविघ्नोपशान्तये ।
अस्त्राभिमान्त्रितं तोय माभितः परिषेचयेत ।

सहस्थस्थे चक्रवर्त्युपचारेण तैलाभ्यंग पूर्वं सुगन्धामलकादिना स्नायात । कामिके –:

सुग० सुगन्धामलकाद्यैस्तु स्नायाद्राजोपचारतः ।
राजवद्धेमपीठादि संस्थितो हेमकुंभकैः ॥
स्नात्वा निमज्जनार्थन्तु कुर्यात्त्वष्टकैस्समंगलैः ।

वीरतन्त्रे –: तैलञ्चामलकं युक्तंमगमालिख्य सर्वशः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गोमयेन पुनश्चैव उपलिप्य च स्नापयेत् ।

तदनु । जलादुत्तीर्य तत्तीर्थं संहारिण्या हृदयेन स्वप्रदानेन वा उपसंहृत्यांगलग्नजलं शुद्धेन शुक्लेन वाससा परिमृज्यार्द्रवस्त्रं परित्यज्य वामदेवेन पञ्चाशत् सुनिर्मितं कटिसूत्रं कौपीनं बध्वा यथाविहितं शुद्धं वासः परिधायाचमनं विदधीत । किरणे :

ततस्तीर्थं समाकृष्य कर्तव्यं हृदये हृदा ॥

सार्द्धत्रिशतिकायाम् :

संहारं तस्य तीर्थस्य प्रासादेनैव कारयेत् ॥

चिन्त्यविश्वसादाख्ये :

पश्चात्कौपीनमुत्सृज्य तालमुद्रासमन्वितः ।
अन्यत्कौपीनमाच्छाद्य वि — चमनं कुरु ॥
नैष्ठिकस्यापि काषायमुत्तमं श्वेतमेव वा ।
१०८ संहरेच्चैव तीर्थन्तु ध्यात्वा संहारमुद्रया ॥
शत ह्रसित्वा वेष्टिश्च वेष्टयित्वा विशेषतः ।
कौपीनलक्षणन्त्वेकहस्तं वापि द्विहस्तकम् ।
आयाममेव विस्तारं दशांगुलमथापि वा ।
कौपीनमेवमुक्तञ्च कार्पासाद्यादिना भवेत् ॥
पञ्चाशत्सूत्रसंयुक्तं मेखलं त्र्यंशलम्बिनम् ।

कामिके : एकद्विहस्तविस्तारन्दीर्घं कौपीनमुच्यते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्विगुणं कटिसूत्रं स्यात् त्रिवृद्‌ग्रन्थानि यद्धृतम् ।

किरणे — षोडशाङ्गुलविस्तीर्णं दीर्घं षट्त्रिंशदङ्गुलम् ॥
धौतं शुक्लं शुभं सूक्ष्मं सितं काषायमेव वा ।
नवोदशाक्षसंकोचं कौपीनं ब्रह्मचारिणाम् ॥
सुदृढः कटिसूत्रञ्च मौञ्जीं सूत्रं वल्कलजः ।
गच्छद्वितीसमाधावलम्ब्यावाब्सरमुत्तमम् ॥
यथाशोभं प्रकुर्वीत वामदेवेन धारयेत् ।

ज्ञानरत्नावल्याम् —:
नैष्ठिकवस्त्रं क्रियां कुर्यात् बद्धकौपीन केवलः ।
स्नाने देवार्चने यागे भोजने च विपश्चिता ॥
धौतवस्त्रद्वयं धार्यमखण्डसन्दशं सितम् ।
कौपीनेऽपि न दोषोऽस्ति नैष्ठिकब्रह्मचारिणाम् ॥

किरणे —: काषायमथवा शुक्लं गृहस्थस्योदितं पुनः ।
यावच्चर्वार्चनं तावत् गृहिणां नियमो भवेत् ॥

ज्ञानरत्नावल्यां —: भुक्तवस्त्रं निशावासं क्षालयेत्प्रतिवासरम् ।
कटिन्वेष्टन कौपीनं शौचामन्तक्षारवारिणा ॥

शिवधर्मोत्तरे —: वस्त्रशौचं प्रवक्ष्यामि तत्त्वशुद्धो शुध्यते यतः ।
वस्त्रशौच विहीनात्मा शुचिरप्यशुचिर्भवेत् ॥
देवकार्योपयोग्यानां प्रत्यहं शौचमिष्यते ।
वाससामितरेषाञ्च कार्यं शौचं मलोद्भवे ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कूर्च
कुञ्चिना तोरणं कुर्याद्दंशादण्डलवेण तु ।
तत वासांसि निर्णिज्य सम्यक्बन्धानि शोधयेत ॥
स्वर्गेरदूषते वृक्षं निर्मले वा शिलातले ।
दुर्वाभाले कुर्चौ वापि क्षालितेषु तृणेषु वा ॥
विण्मूत्रशुक्र दिग्धाना मृत्तोयेन विशोधनम् ।
कार्यमादौ तत क्षारे गोमूत्राद्यैश्च शोधनम् ॥
मृद्वारिलावदा देवं गन्धलेपौ हि तद्गतौ ।
न स्यातान्दूरतो यावत्सर्वासु द्रव्य शुद्धिषु ॥
कौशेय वित्तयोरूषैः क्षौमाणां गौरसर्षपैः ।
श्रीफलैरंशु भट्टानां कुतपानामरीषकैः ॥
वेलादुजजु वेत्ताणां कक्ष-चामरचर्मणाम् ।
वल्कलानाञ्च सर्वेषां शुद्धिः कार्या विजानता ॥
विदलालाबु पात्राणां वस्त्रवच्छुद्धि रिष्यते ।
गोवालैर्घर्षणञ्चैषां विशेष: परिकीर्तित: ॥

अंशुमति- आर्द्रवस्त्रेण संयुक्तः कर्मकुर्याद्वलान्त्रितः ।
वृथा भवति तत्कर्म पुन स्नानेन शुध्यति ॥

स शिरस्कस्नानाशक्तो कण्ठानाभ्यथश्चरणौ वा यथाशक्ति प्रक्षाल्याप्रक्षालितमवशिष्टमंगमार्द्रवाससा परिमृज्य हुंफडन्तेनास्त्रेण पादांगुष्ठोत्थवह्निना कायं दग्धं विचिन्त्य तत शुद्धशक्ति परिस्रुतशुद्धतोयेन प्लावयेदतोपि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्नातो भवति । मतङ्गे -:

हुं फडुकारान्तसंस्थेन ज्योतिर्ज्योति पदेन तु ।
भ्रान्ताग्निप्रदीप्तेन निर्दग्धं कायमादरात् ॥
प्रणवेन ततः पश्चात् स्वजपाहूतवारिणा ।
प्लावयेत्स्वान्तनुम्मन्त्रीयतस्नातो न संशयः ॥

कामिके -:

खरवायसगृध्रान्त्यजनश्वग्रामसूकरैः ।
कुक्कुटप्रेतभूम्यंगशवसूतकपोतकैः ॥
शावदुर्गन्धिनिर्माल्यभोजकैरन्यलिंगिभिः ।
अन्यैश्च निन्दितैः स्पृष्टो यदिस्नानमथाचरेत् ॥

तथा चिन्त्यविश्वसादाख्ये -:

निर्माल्यभोजिभिश्चैव देवद्रव्यापहारिभिः ।
गुरुद्रव्यापहर्ता च तत्द्रव्य विनाशकम् ॥
अदीक्षिताश्च सर्वेपि चैतैस्स्पृष्टे विशेषतः ।
जलस्नानं प्रकुर्वीत वपने वमने तथा ॥
मूत्रविट्रति संपर्कात् नाभेरूर्ध्वं करौ विना ।

वमनाद्यशुचिविषये स्नानविशेषः शिवधर्मोत्तरे प्रदर्शितः । तद्यथा -:

शिरस्नानं प्रकुर्वीत सुवान्तिषु शिवव्रतः ।
मृद्गोमयैस्समुद्धृत्य तच्छरीरं समन्ततः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T371



क्षौमार्थं स्नानवस्त्रं परित्यज्य द्वितीयं परिधाय च ।
तेन स्नात्वा कषायाद्यैर्वस्त्रमन्यत् समावसेत् ॥
सोपवीतस्समाचम्य पानीयमभिमन्त्रयेत् ।
एकविंशति वारास्ते शिवमन्त्रेण आहृतः ॥
ध्यायमानश्शिवं शान्तं शेषैः स्नानं समाचरेत् ।
आचम्यावर्तनं कुर्यात् अभिषेकं ततः पुनः ॥
कुम्भो पर्णपुटं कटकरद्वयपुटेन वा ।
शिवेनैकाय शात्मानं स्वयमन्येन वा पुनः ॥
9/a विघ्ना लक्ष्मी विशुध्यर्थमभिषिञ्चेत् समन्ततः ।
आचम्य प्रोक्षयेद्भूयस्तावदेवात्मन श्शिवः ॥
गृहे च परजप्तेन स्नानं कुंभेन कारयेत् ।
एवं भवन्ति सु स्नातस्सर्वपापविवर्जितः ।
सर्वतीर्थाभिषेकस्य श्रद्दधानः फलं लभेत् ।
वीरतन्त्रे-: श्वमार्जारखरादीनां विलेपे स्नानमाचरेत् ॥
नाभोरूर्ध्वमधस्ताद्वा मृद्भिश्शुध्यति सप्तभिः ।
छर्दिते ह्युदिते सूर्ये श्मश्रुकर्माणि मैथुने ॥
दुस्वप्ने दुर्जनस्पर्शे स्नानं षट्सु विधीयते ।
स्नाने देवार्चने चैव समाधौ तु जपे तथा ॥
भोजने वाग्निकार्ये च मौनं षट्सु विधीयते ।
मतंगे-: एवं सकृद्यथाशक्ति स्नातोऽभ्यासि दिने दिने ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भस्मस्नानेऽधिकारी स्यान्नान्यथा मुनिपुंगवा ।
भस्मस्नानं ततः कार्यं जलस्नानादनन्तरम् ॥
जलस्नानं विनाकार्यमशक्तौ पापनाशनम् ।
मकुटे —: जलस्नानं पुना कृत्वा पश्चादाग्नेयमाचरेत् ॥
\+ स्वायंभुवे —: आग्नेयं स्नानमपरं भस्मस्नानमुदाहृतम् ॥
जलस्नानान्तरन्नित्यं मन्त्रस्नमथापि वा ॥
कामिके —: भस्मस्नानं यथायोग्यं यः कुर्यात्सकृदेव वा ॥
सर्वपापविनिर्मुक्तस्साधयेदीप्सितं फलम् ।
भस्माश्रयो यतो वह्निः तस्मिन्नेव लयं गतः ॥
भस्मस्नातेन तेजस्वी वह्निवद्दृश्यते नघः ।

विधिना गोमया दीपकल्पितं कल्पितं भवति कोशस्थं सव्य-
हस्तेन समादाय वामकरतले विन्यस्य निरीक्षणादिभिस्संशोध्य
कल्पादिसिद्धं भस्म जले समूलसंहितयाभिमन्त्रयेत् । कल्प-
निवृत्यादिभिर्मन्त्रैस्संहिताभिस्संशोध्य अंगुष्ठतर्जन्यग्राभ्यां स्व-
ल्पेन भसितेन नैष्ठिकश्च सन्यासी च पादादिमस्तकान्तं
भौतिकस्समस्तकात । पादान्तं हुं फडन्तास्त्रेण निघर्षणेन
मलस्नानं कुर्यात् । तथा सुप्रभेदे —:

गावश्शिवपुरात्पञ्च क्षितिं प्राप्ताश्शिवेच्छया ।
सुरासुरैर्मथ्यमानात् क्षीरोदात्सागरोत्तमात् ॥
पञ्चगावस्समुत्पन्नास्सर्वलोकस्यमातरः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा शिवधर्मोत्तरे —:

शुद्धस्फटिकसंकाशं स्नानमाद्यमुमापते ।
ततस्ते भगवान्सोम पूज्यमानो गणेश्वरैः ॥
सिद्धैश्च स्थानसम्प्राप्तैः ब्रह्मविष्णवग्नि वायुभिः ।
ईश्वरायतनस्याग्रे श्रीमन्धर्मव्यवस्थितः ॥
यत्र वीरवृषस्तत्र नित्या गोमातरास्थिताः ।
गोलोकश्शिवलोकश्च द्व्येक इव ततस्मृतः ॥
ये गुणारुद्रलोकस्य गोलोकस्यापि ते गुणाः ।
नन्दा भद्रा च सुरभि सुशीलासमनास्तथा ॥
इति गोमातरः पञ्च शिवलोके व्यवस्थिताः ।

सुप्रभेदे —:

कपिला कृष्णा श्वेता च धूम्ररक्ता तथैव च ।
नन्दादिसुमनान्तानां वर्णमेतत्प्रकीर्तितः ॥
सर्वलोकोपकारार्थन्देवानान्तर्पणाय च ।
गोमातरः स्थिता भूमौ स्नानार्थं हि शिवस्य तु ।

स्वायंभुवे —:

गो सावित्रीं सकृज्जप्त्वा गन्धपुष्पञ्च धूपकम् ।
दीपञ्च गोप्रदेशेषु प्रणम्य प्रपादयेत ॥
गोरोचना घृतं क्षीरमन्नं चापि प्रदापयेत ।
तांबूलं दापयित्वा तु गो सावित्रीशतं जपेत ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि ।
तन्नो गावः प्रचोदयात् ।
गां सवत्सामाराध्य गृहीयाद्गोमयं तथा ॥
सन्ताने -- शान्तिकं पौष्टिकञ्चैव कामदञ्च त्रिधा भवेत् ।
गोमयं योनिसंबन्धं यद्धस्ते न तु गृह्यते ॥
ब्राह्ममन्त्रैर्दहित्वा तु तच्छान्तिकमिहोच्यते ।
- ग - योनि विसृतञ्चैव पतितं भूतले तु यत् ॥
अन्तरस्थं गृहीत्वैव बहुँगेन दहेत्ततः ।
पौष्टिकं तत्समाख्यातं कामदन्तु तत शृणु ।
सुशुद्धभूतले चैव पतितं गोमयन्तु यत् ॥
प्रासादेन दहित्वा तु तत्कामदमुच्यते ।
प्रातरुत्थाय देवेशि मौनव्रतसमान्वितः ॥
गवांगोष्ठे तु गत्वा तु नमस्कृत्वा तु गोकुलम् ।
ब्राह्मणस्य तथा श्वेता रक्ता वै क्षत्रियस्य तु ॥
पीतवर्णा तु वैश्यस्य कृष्णा शूद्रस्य चोच्यते ।
[प्रातरुत्थाय देवेशि मौनव्रतसमन्वितः ॥
गवांगोष्ठे तु गत्वा तु नमस्कृत्वा तु गोकुलमं ।
ब्राह्मणस्य तथा श्वेता]
भूमौ हि गोमयं ग्राह्यमन्यथा ग्राह्ये न तु ।
पौर्णमास्याममावास्यां अष्टम्यां ग्रहणे द्वयोः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चिन्त्यविश्वसादाख्ये —:

चतुर्विधन्तु तद्भस्म क - प्रथममुच्यते ।
अनुकल्पं द्वितीयञ्च तृतीयमुपकल्पकम् ॥
अकल्पन्तु चतुर्थं स्यात् पूर्वपूर्वन्तथोत्तमम् ।
वन्ध्या वृद्धा व्याधिताश्च दुर्लक्षणयुता तथा ॥
तर्णकेन विहीना च बालामौरव्यं विना कृता ।
अमेध्याहारभक्षिण्या स्त्याज्या गावश्च गार्भिणी ॥
सलक्षणाश्च कपिला रक्ताशुक्ला सितेतरा ।
ऽतासं गोमयं वस्त्रपते रैशोद्भवे तथा ॥
91b पलाशपर्वके वापि गगस्याभ्यां व्योम्नि धारयेत् ।
कोष्ठे वा गोमयं कृत्य सद्योमन्त्रेण धारयेत् ॥
उपर्यधश्चक्रव्याभां विसृजेन्मध्यमं पुनः ।
गोलकाकारकं कुर्यात् वामदेवेन मन्त्रवित् ॥
अघोरेण च संशोष्य रुद्रदेशे दहेत्पुनः ।
पुरुषेण विशेषेण नव भाण्डे विनिक्षिपेत् ॥
ऽकाहे शोषयित्वा तु निर्दहेच्छिव वह्निना ।
नित्याग्नौ वा शुचिर्द्धीमान् शिवमन्त्रं समुच्चरन् ॥

स्कन्दकालोत्तरे —:

रक्षार्थं मंगलार्थञ्च पवित्रार्थं षडानन ।
भक्तानां लिंगिनाञ्चैव भस्म दत्तं पुरामया ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भस्मदाने तु वा मन्त्री शंखे वा ताम्रपात्रके ।
श्रेष्ठं सुवर्णपात्रन्तु रजितान्वा मध्यमं भवेत् ॥
कन्यासन्ताम्रपात्रन्तु अलाभेमृण्मयं भवेत् ।
अलाबुपात्रमधमं पै-त्तली वाधमाधमम् ॥
पञ्चब्रह्म शिवांगैश्च व्योमव्यापि जपेत्सकृत् ।

चिन्त्यविश्वसादाख्ये-:

कर्पूरो शीर हीबेर केतकैश्चापकैस्तथा ।
दमनैशानमन्त्रेण जपे-त्तस्माद्विशोषत ॥

उक्तञ्च-: ~~उक्तञ्च~~ केतकी मल्लीका नाग-चंपकम् पाटलं तथा ।
पद्मं पलाशतुलसी अपामार्गं कुशान्ङ्कुरम् ॥
जातिञ्च तत्र निक्षिप्य बहुभाण्डेषु परिगृहेत् ।
मृत्कुम्भे तु नवे स्थाप्य कवचेनाभिरक्षयेत् ॥
तद्भस्म परिगृह्णीत शिवमन्त्रमनुस्मरन् ।
अनुकल्पं ततश्चैव शृणुत्वन्नन्दिकेश्वर ॥
वने शुष्कं सकृत्कृत्य कल्पवत्पूर्ववत्कुरु ।
त्रितयमुपकल्पस्या दारण्ये शुष्कगोमयम् ॥
चूर्णयित्वा तु संगृह्य गोमूत्रैः पिण्डवत्कुरु ।
दग्धं पूर्वोक्त विधिना भवेत् भस्मोपकल्पकम् ॥
पूर्वोक्तविधिमुत्सृज्य केवलं भस्मसाधनम् ।
सं - - रे पिण्डवत्कुर्या अकल्पमभिधीयते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अन्यैरापादितं भस्म अकल्पमिति कीर्तितम् ।
चतुर्विधमिदं प्रोक्तं सर्वपाप निकृन्तनम् ॥

कामिके -:

ऽव्वेकतममादाय कालेषु कलशेषु च ।
त्रिसन्ध्यामाचरेत्स्नानं यथा संभवतोपि वा ॥
चतुर्ष्वष्टिरष्टासु सान्धिषु प्रविधीयते ।

तद्यथा -

ऽवमुक्तलक्षणेन भस्मना मलस्नानं कृत्वा विधि स्नानमाचरेत् । कारणे -:

प्रक्षाल्य पाणि पादौ च आचमेत्पुनराचमेत् ।
सकृज्जप्त्वा तु मन्त्राणि भस्मोद्धूलनमाचरेत् ॥
भस्म वामकरे स्थाप्य दक्षिणेनाभि मन्त्रयेत् ।

कामिके -: विधाय शोधयेन्मूल ब्रह्मांगमनुस्तथा ॥
अस्त्रेण दक्षिणहस्तेन मलस्नानन्तु मस्तकात् ।

चिन्त्यविश्वसादाख्ये -

अकल्पभस्म संगृह्य दिग्बन्धं कारयेत्ततः ।
पञ्चब्रह्म षडंगैश्च
~~कुर्यात् मूर्ध आरभ्य मन्त्रवित्~~ निवृत्याद्यभिमान्त्रितम् ॥
शोधितश्चास्त्रमन्त्रेण मूर्धाद्यंगानि धूलयेत् ।

सार्धत्रिशतिकायाम् -:

मलस्नानं पुरा कृत्वा अस्त्रबीजेन षण्मुख ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विधिः स्नानं ततः कुर्यात् मूर्ध्नि आरभ्य मन्त्रवित् ।

सूक्ष्मभेदे- अथवा चाग्निहोत्रे तु भस्मग्राह्य विचक्षणः ॥

तेन स्नायात्पवित्रेण पूर्वोक्तविधिना बुधः ।

अध्वरं कर्मतत्सर्वं न त्रिपुण्ड्रन्न चाचरेः ॥

अथ विधिस्नानं- हस्तप्रक्षालनं कृत्वा भौतिकब्रह्मचारी गृहस्थो वा ईशं तत्पुरुषाघोर वामदेवसद्योजातमन्त्रैर्मस्तक मुखहृदय गुह्य पादेषु । त्रिपुण्ड्रत्वा सद्येनवांसद्योः सर्वांगे ष्वपि सन्यासी नैष्ठिको वा दक्षिण वामक्रमेण पादादिमस्तकान्तेषु प्रतिलोमेन सद्यादिमन्त्रैस्तथासवोस्सर्वांगेषु भस्म मुद्रया वा अंगुष्ठानामिकामध्याभिर्वा धार्य शेषभस्मप्रत्यांगैः मूलैः कुंभमुद्रया भस्मदेवं ध्यात्वा शिरस्यभिषिच्य हुं- फडन्तास्त्रेण तालत्रयं कृत्वा स्नानकालपतितां भूतिं संहारिण्या ह्युपसंहरेत् । "तथाशुचौ प्रदेशे शान्तात्मा ध्यात्वास्त्रापूर्ववत्सुधीः । भस्ममुष्टिं गृहीत्वा तु दक्षिणेन करेण तु ॥ शिरो मुखञ्च ग्रीवा च लेशबा मार्जये-ततः ।

उदरो बाहुञ्च हृदयं पृष्ठौ जघनमेव च ।

पदगम्यन्दक्षिणस्य तद्वामे न तु पाणिना ॥

सम्यगुद्धूलयेदंगं स्पृष्ट्वान्योन्य करावुभौ ।

पौष्करे-:

यतिरुद्धूलनेनैव स्नायान्नित्यमुदङ्मुखः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सन्ताने –: ब्राह्मणस्सर्वमुद्धूल्य क्षत्रियस्तु गलादधः।
वैश्यश्चैव तथा ज्ञेय आर्द्रोद्धूलश्च वर्जयेत॥
सर्वषामन्यजातीनां मन्त्रेणारहितो भवेत्।

सर्वज्ञानोत्तरे –:

आपादमस्तकं यावत् भस्मस्नानं द्विजस्य तु।
नाभेरूर्ध्वं महीपानां आरक्तेस्तु भस्मना॥
वैश्यस्य पट्टिका प्रोक्ता शूद्रस्य तु त्रिपुण्ड्रकम्।
१२० भस्मना ब्रह्मजप्तेन यथा स्यानं त्वनुक्रमात्॥

कालोत्तरे –: नैष्ठिकानां तु विप्राणां सर्वांगं स्नानमाचरेत्।
नृपाणाञ्चैव वैश्यानां शूद्राणाञ्च त्रिपुण्ड्रकम्॥

तथा वीरतन्त्रे –:

उद्धूलयेत्तु सर्वांगं ब्राह्मणानां विशेषतः।
त्रिपुण्ड्रं कारयेत्तत्र नृपाणाञ्च विशांतथा॥
शूद्राणामेव सर्वषामेवमेवं क्रमेण तु।

कारणे –: उद्धूलने त्वशक्तश्चेत् त्रिपुण्ड्रं सर्व सन्धिषु।
त्रिपुण्ड्रं भस्मना कृत्वा सार्द्रेण धवलेन च॥

सूक्ष्मे –: निष्कनिष्कार्द्धकञ्चैव निष्कद्वयं द्वयार्द्धकम्।
विप्रादीनाञ्च वर्णाना भस्मस्नानं समाचरेत्॥

कारणे –: मध्यांगुष्ठ जलैर्युक्तमपरैर्जल वर्जितम्।
त्रिपुण्ड्रे जलसंयुक्तं सर्व दोषनिकृन्तनम्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोत्तरे -:

उत्तरौ तु करौ कृत्वा मध्यमा तर्जनी तथा ।
अनामिका च वै वत्स परस्परं सव्य दक्षिणे ॥
भस्ममुद्रा भवेदेषां त्रिपुण्ड्राणां विधीयते ।

यत्र । मध्यमानामिकांगुष्ठैर्ललाटे भस्मनाकृतिः ॥
त्रिपुण्ड्रं धारयेच्छान्तौ महापातकनाशनम् ।

दीप्ते -: सप्तांगुलन्तु विस्तारं ब्राह्मणानां विधीयते ॥
पञ्चांगुलन्तु विस्तारं क्षत्रियाणां त्रिपुण्ड्रकम् ।
चतुरंगुलन्तु वैश्यानां त्रिपुण्ड्रं सर्वकामदम् ॥
त्र्यंगुलन्तु शूद्राणां स्त्रीणामेकांगुलं भवेत् ।
तत्तज्जातीय स्त्रीणान्तु तत्तदेव विधीयते ॥
अनुलोमानां सर्वेषां त्रिपुण्ड्रं पीतवस्त्रवत् ।
अन्येषामपि सर्वेषां त्रिपुण्ड्रं शूद्रवद्भवेत् ॥

ज्ञानरत्नावल्याम् -:

भौतिके ब्रह्मचारी चेत् पूर्वस्य स्यादुदङ्मुखः ।
नैष्ठिक ब्रह्मचारी चेत् अजाद्यैश्चरणादिभिः ॥
उद्धूल्य सर्वगात्रेषु कुर्यात्पुण्ड्रमिति क्वचित् ।
सन्तानिको बुभुक्षुश्च साधकश्चा त्रियायुषः ॥
भस्मना सेचयेन्मूर्ध्नि ब्रह्माङ्गैः कुंभमुद्रया ।
विसृज्य भूतरेणुं तालत्रय पुरस्सरम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्रवे प्रक्षेपयेत्तत तन्निर्मल्यन्न चाक्रमेत् ।
स्नानमिदं प्रकर्तव्यं आग्नेयं ब्रह्मचारिभिः ॥

मकुटे—: भस्मदेवाकृतिं वक्ष्ये विशेषेण महेश्वर ।
त्रिणेत्रं त्रिवीरं रौद्रं त्रिहस्तं गुणवत्क्रमम् ॥
त्रिपादं वह्निनयनं भस्मकुण्ठित विग्रहम् ।
तांडवाडंबरं भीमं रक्तपुष्पोपशोभितम् ॥
रक्षामन्त्रेश्वरन्देवं ध्यात्वा शान्तिं लभेन्नरः ।
त्रिसन्ध्यमाचरेत्स्नानं यथा संभवतोपि वा ॥
मध्यान्हात् प्रज्जलैर्युक्तं परतो जलवर्जितम् ।

स्कान्दे विशेष उक्तः—:

भस्मना वै त्रिसन्धिश्च स्त्रीणां जलसंवृतः ।
धार्यं त्रिपुण्ड्रं स्त्रीणाञ्च यतीनां जलवर्जितम् ॥
वनस्थव्रतिकन्यानां दीक्षाहीनं नृणान्तथा ।
मध्यान्हात्प्राक् जलैर्युक्तं परतो जलवर्जितम् ॥

तथा ब्रह्मवैवर्ते च—:

दीक्षा नृणाञ्च वारिसहितं मध्यरहितम् । प्राक्-स्मृतः । सर्वी सारमेतदाहुः—पुरावरे सन्तो नवमे विधिं त्रिपुण्ड्र धारण स्नानभेदा उच्यन्ते । चिन्त्यविश्वसादाख्ये—:

द्वात्रिंशत् स्नानके वापि षोडशस्थानकेपि वा ।
अष्टस्थाने तथा चैव पञ्चस्थानेपि योजयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तमांगे ललाटे च कण्ठयोर्नलयोस्तथा ।
नासावक्त्रगलेष्वेव गंडाद्वयमतः परम् ॥
कोर्परे मणिबन्धेव हृदये पार्श्वद्वयोः ।
नाभौ गुह्यद्वये चैव ऊर्वे स्फिक् द्वन्द्वजानुने ॥
जंघाद्वयेव पादौ द्वौ द्वात्रिंशत् स्थानमुत्तमम् ।
अष्टमूर्त्यष्टविद्येशा दिक्पाला द्वन्द्वभिस्सह ।
धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभासश्च इत्यष्टवसवः स्मृताः ।
शतेषां वाममन्त्रेण त्रिपुण्ड्रं धारयेद्बुधः ॥
विद्या तु षोडशस्थाने त्रिपुण्ड्रश्च समाहितः ।
शीर्षके च ललाटे च कण्ठे चांसद्वयोरपि ॥
कोर्परे मणिबन्धे च हृदये नाभि पार्श्वके ।
पृष्ठे चैवं प्रतिस्थानं जंघे तत्रादिदेवतान् ॥
शिवं शक्तिश्च सादाख्य मीशाविद्याख्यमेव च ।
वामादि नव शक्तिश्चाश्विनौ षोडश स्मृता ॥
अथवा मूर्ध्न्यलीकेन कर्णयोश्च गले तु वा ।
७२८ जानुद्वये पादयोश्च पृष्ठभागन्तु षोडश ॥
शिष्टस्थानेष्वधिपतीन् यथा योगं शृणुष्व तान् ।
शिवस्कन्दश्च चन्द्रार्कौ विघ्नेशाविष्णुरेव च ॥
श्रीश्चैव हृदये देशे स्वनाभौ तु प्रजापतिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नागाश्च नागकन्याश्च उभयो ऋषिकन्यकाः।
पादयोश्च समुद्राश्च तीर्थाः पृष्ठेपि चास्तकः॥
एवं वा षोडश ध्याये दशस्थानानि चोच्यन्ते।
गुरुस्थाने ललाटञ्च कर्णयुग्मं ततः परम्॥
अंसयुग्मञ्च हृदयं नाभिरित्यष्टमं भवेत्।
क्रमाच्च ऋषयस्सप्त देवताश्च प्रकीर्तिताः॥
गुरुदेवाग्नि विप्राणां सन्निधौ वान्यदर्शने।
महापातकयुक्तानां कृतघ्नस्यापि दर्शने॥
अशुद्धभूतले मार्गे धूलनं न विधीयते।
तस्माद्विशुद्ध देशेपि चासने संस्थितः शुचिः॥
उत्तराभिमुखो भूत्वा मौनी ध्यात्वा शिवं गुरुः।
परमाणुसमं भस्म भूमौ न पतितं भवेत्।
तद्वत्संवृत्य यत्नेन त्रिपुण्ड्रोद्धूलनं भवेत्॥
उद्धूलनेपि वा तस्यो त्रिपुण्ड्रादीनि कारयेत्।
एवमुद्धूलनञ्चापि त्रिपुण्ड्रं कृतवानथ॥
सर्वपापविनिर्मुक्तस्सद्यश्शुद्धिसमन्वितः।
तस्य दर्शनमात्रेण सर्वपापात्प्रमुच्यते॥
देवेशक्षण संनिभम्।
बहुनात्र किमुक्तेन ~~भस्मना स्नानमुत्तमम्~~।
×भस्मसंस्पृष्टहस्तेन वारिणा प्रोक्षणं परम्॥
द्विजाद्य दीक्षितस्पर्शे भस्मस्नानं विधीयते॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सन्ध्या तयोर्द्वशतौ च चर्यापूर्वा [x]

अनायासेन पापानि प्रणश्यन्त्यखिलान्यपि ।
भूतिस्नानविहीनस्य न तत्त्वज्ञानतत्परः ॥

न च योगस्समाधी च न चेज्या दानमेव च ।
तस्मात्सर्वप्रयत्नेन भस्मस्नानमनुत्तमम् ॥

भस्मसंस्पृष्टहस्तेन वारिणा प्रोक्षणं परम् ।
द्विजाद्यदीक्षितस्पर्शे भस्मस्नानं विधीयते ॥

सन्ध्या तयोर्द्वशतौ च चर्या पूर्वावसानके ।
सुप्त्वा भुक्त्वा जलं पीत्वा कृत्वा चावश्यकाह्निकम् ॥

तथैव चण्डरुद्रस्ती स्पृष्ट आग्नेयमभ्यसेत् ।
शुकमार्जारनकुलैस्तथा च विक्रमूषिकैः ॥

यदा स्पृष्टं तदा चान्यै स्नानमाग्नेयमाचरेत् ।

अथ मानसस्नानम् कुर्यात्तद्यथा —:

पादौ हस्तौ प्रक्षाल्याचम्य प्राणान्संयम्य न्यासं कृत्वा मूलमन्त्रं मनसा द्वादशान्तस्थितपरशक्ति पर्यन्तमुच्चार्य ।निष्कलाद्यशक्तेः प्रसृतेनामृतमयेन वारिणा-स्वान्तनुमन्तर्बहिः प्लाव्यमानां सर्वत्र भावयेत् । तदुक्तं ।चिन्त्यविश्वनसारख्ये—:

मूलमन्त्रेण मनसा प्राणायामसमान्वितः ।
मानसं स्नानमेवं हि सर्वत्र विहितं हि तदिति ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उक्तञ्च । निष्कलशक्ति क्षोभात् स्नुतस्यामृतसलिलस्य मध्ये प्लवं सहसः पुनरागच्छंस्ततो ध्येय इति । तथा ।

मूलमन्त्रपरिक्षिप्त इक्षुपीयूष धारया ।

सबाह्याभ्यन्तरा सेका मानसं स्नानमाचरेदिति ॥

इति मानस स्नान विधिः ॥

---

॥ अथ मन्त्रस्नानं कुर्यात् ॥

पादौ पाणी च प्रक्षाल्याचम्य सकलीकरणं कृत्वा पात्रे जलमापूर्य व्योमव्यापि पदमन्त्रैः षडङ्ग संस्थिता सकृन्मूलेनाभिमन्त्र्य तेन तोयेन कवचमूलमन्त्रौ समुच्चार्य मूर्धादि पादपर्यन्तान्त्रिधा संस्पर्शनेन सर्वपाप क्षयो भवेत् । तदुक्तं कारणे –:

मन्त्रस्नानं वदंते तु प्रक्षाल पाणिपादकौ ।

समाचम्य कृतन्यासो पात्रे क्षिपत्वा जलं तथा ॥

व्योम व्यापिपदैश्चैव षडङ्गै ब्रह्मपञ्चकैः ।

मूलेनैव तु तत्तोय मग्निमन्त्रसकृत्सकृत् ॥

संस्पृशेत्तेन तोयेन मूलमन्त्रेण वर्मणा ।

मूर्धादि पादपर्यन्तं त्रिधा संस्पर्शनं तथा ॥

सर्व व्याधि विनिर्मुक्त सर्वपापात् क्षयो भवेत् ।

। ततो दिव्यस्नानं कुर्यात् । तद्यथा —: ततः पादप्रक्षालनादिकं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कृत्वा प्राङ्मुखस्सन् मूलमन्त्रमीशानमन्त्रं वा स्मरन्नूर्ध्व-बाहुस्सप्तपदगमनात् । सा कुर्यात् पाठवृष्टिं दिव्यस्नानमयं धारयेत् - तदुक्तं कारणे-- :

वृष्ट्या सातपया तत्र प्राङ्मुखेनोर्ध्वबाहुना ।
मूलमन्त्रञ्जपेद्धीयं दैवं सप्तकम् ॥
आदित्याभिमुखः पश्चात्तन्नमस्कृत्य बुद्धिमान् ।
एवं कृते महापापान्मुच्यते नात्र संशयः ॥
माहेन्द्रं दिव्यमिति पर्याय ईशमन्त्रं जपन् गच्छेत् ।
गुरुभक्तिविशारद इति दिव्यस्नानविधिः ॥

---

अथ पादौ हस्तौ प्रक्षाल्याचम्य पूर्वाह्णे परह्णे वा न्यासं कृत्वा गवां खुरोरजसंबन्धि वायुस्पर्शयुक्तस्स-ब्रह्मणां कवचं वा स्मरन्नुत्तरस्यां दिशि सप्तपदगमनाद्वायव्यं-स्नानं भवति । तदुक्तं चिन्त्यविश्वसादाख्ये-- :

वायव्यस्नानमेवाह खुरोद्धृतरेणुभिः ।
पुरुषं कवचं वापि जपन् सप्तपदावधि ॥

इति । मृगेन्द्रे-- :

मरुतं संहितामन्त्रं स्मरन्वायुरजोद्भवेत् ।

४ वायव्यस्नानविधिः ॥

अथ गौरवस्नानं कुर्यात् । तद्यथा-- : पादौ हस्तौ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



१३० प्रक्षाल्याचम्य शुचिर्भूत्वा शिवमन्त्रमुच्चरन् दैशिकचरणौ शिरसा धारयेत् । तत्पादवन्दनात्स्नानफलं लभते । तथा मृगेन्द्रे -: शुचीमूर्ध्ना गुरोः पादौ भूयाच्छेवमुच्चरन्निति । इति
+ गौरव स्नानविधिः ॥ अथ पार्थिव स्नानं कुर्यात् ॥
तद्यथा -: पादौ हस्तौ च प्रक्षाल्याचम्य सकलीकृत्य गंगादि-तीर्थं हस्ते संस्मृत्य संहितां जप्त्वा मूर्धादि पादपर्यन्तं संहितया मृत्लभेत् । तज्जलाभावे तं मृत्तिकां संहृत्य पूर्व-वदाभिमन्त्र्य मूर्धादि स्थानेषु त्रिपुण्ड्रं कुर्यात् । तदुक्तं मृगेन्द्रे -:

गंगात् तनया सिन्धु सरस्वत्यादि तत्पयः ।
स्पृष्ट्वा तत्क्षेत्रजां वापि मृतं संहितयालभेत् ॥
तया मूर्धादि गात्रेषु मन्त्रैः कुर्यात्त्रिपुण्ड्रकम् ।
एवं पार्थिवमाख्यातं सर्वपापहरं परम् ॥

+ इति पार्थिव स्नानविधिः ॥
एतेषां मध्यवारुणमाग्नेयं मानसं मातं नित्यमितरत् दिव्यादीनां तु नैमित्तिकत्वात् तत्तन्निमित्तोपस्थाने तत्त-स्थानं विदध्यात् । तदुक्तं ब्रह्मशंभुपद्धतौ -:

माहेन्द्रादि-चतुष्कं यन्नैमित्तिकमिति स्मृतम् ।
क्वचिद्वारुणभस्म च नित्यं तदन्यं नैमित्तिक-

मित्युक्तं कामिके -:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वारुणं स्यात् गृहस्थानां यतीनां भस्मना कृतम्।
स्नानान्तरं तयोरेवं नैमित्तिकमुदाहृतम्।

मतंगे —: अदीक्षितेन संस्पृष्टा स्नानमाग्नेयमाचरेत्॥
बाह्यावर्णस्य संस्पर्शात् द्वारणस्नानमाचरेत्।

पादौ पाणि च प्रक्षाल्य जडा चूडादिकं बद्ध्वा उदगास्यो-नावृतशिरा मत्कुटमासने जानुमध्यकरास्थित्वा फेनबुद्बुद-शैवल कृम्यादि विनिर्मुक्तैः स्वच्छजलैः पृथिव्यादिशक्तितत्वाद्यन्त पञ्चत्रिंश-तत्वशुध्यर्थं भारत्यादि देवता प्रीत्यर्थं विधिवदा-चमनं कुर्यात्। ज्ञानरत्नावल्याम् —:

बद्धचूडशिरः पादौ पाणि प्रक्षाल्यतः।
उपविश्य समे पीठे सौम्यास्याः पूर्वदिङ्मुखः॥
जानुमध्यकरौ मौनी श्वानादिन्नावलोकयन्।
अनन्यमनसो भूत्वा स्वच्छशीतलवारिभिः॥
फेन बुद्बुदनिर्मुक्तैर्वस्त्रः पूतैस्समुद्धृतैः।
आचमेत्क्रमशो जुष्टैः नान्त्यजातिनिषेवितैः॥
अन्यैः कलुषितैर्यत्त वितृष्णैर्नौर्न जायते।
चर्मस्थैः स्सोवरैः स्सोष्णैन्न्यास त्पाणि पात्रजैः॥

चिन्त्यविश्वसादाख्ये —:

मत्कुटासनसंस्थश्च पाणिं गोकर्णवद्भवेत्।

मत्कुट लक्षणं भरते —:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



समे पार्ष्णि सहस्फिकभ्यां भूतले समौ-चरणौ समौ।
यदा तत्रोत्कुटं योग ध्यान संध्याजपादिषु ।
संगृह्य माषमग्नांबु सव्य पाणि पुटेन च ॥
संवीक्ष्यांगुष्ठमूलस्थ ब्रह्मतीर्थेन तत्पिबेत् ।

अजिते-:

बद्ध-चूटोत्कुटासीनो जानुमध्यकरद्वयम् ।
नावेष्टितशिरः पादौ पाणी प्रक्षाल्यबाह्यतः ॥
हृद्गतं विप्रनिर्दिष्टं कण्ठकस्यान्नृपस्य तु ।
तालुंगाविश्वस्वर्णानक्रमेणांबुशतं भवेत् ॥
तारं प्रथममुच्चार्य हाँ आत्मतत्वाय स्वधा ।
ऽतत्प्रथमपानेन शुद्धिस्यान्नन्दिकेश्वर ॥
ऽकान्तिदा-तत्वं शुद्धिः प्रथमायान्तसंयुता ।
प्रणवं पूर्वमुच्चार्य हिं विद्यातत्वाय स्वधा ॥
एवं द्वितीयपानेन तितत्वस्य विशोधनम् ।
शुद्धविद्येशसादाख्यान्तितत्वमिति कीर्तितम् ॥
×ओंकारं प्रथममुच्चार्य हुं शिवतत्वाय स्वधा । भजान्विधः ।
चक्र बाणाब्ज चिन्मुद्रा शंख कार्मुक कर्णिकाः ।
अभयञ्च यथायोग दधानन्दक्षवामयोः ॥
ऽकवक्रन्तु सौम्यस्या ॰
~~ओंकारं प्रथममुच्चार्य हुं शिवतत्वाय स्वधेति~~ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



~~चतुर्भुजश्चतुर्वक्त्रं चतुरश्रं बुजस्थितम् ।~~
~~आत्मतत्वास्थितं श्वेत तत्व चामीकरप्रभम् ॥~~
ओंकारं प्रथममुच्चार्य हुं शिवतत्वाय स्वधा ।
इवं तृतीयपानेन शान्तितत्वस्य शोधनम् ॥
पञ्चान्तिं वा तत्वशुद्धिरेवमाचमने नहि ।
किन्त्वन्तरन्तरे हस्तं प्रक्षाल्य च मुहुर्मुहुः ।
त्तितत्वस्य ध्यानञ्च ज्ञानरत्नावल्याम् प्रदर्शितः :-
चतुर्भुजश्चतुर्वक्त्रं चतुरश्रं बुजास्थितम् ।
आत्मतत्वास्थितं श्वेत-तत्व-चामीकरप्रभम् ॥
स्रुक्कमण्डलुकं वामे दक्षे पद्माक्षमालिकाम् ।
नील स्पन्दनिभं नील मष्टाश्राष्ट भुजान्वितम् ॥
चक्रबाणाब्ज चिन्मुद्रा शंख कार्मुक कर्णिकाः ।
अभयञ्च यथायोग दधानं दक्ष वामयोः ॥
एकवक्त्रन्तु सौम्यास्यं विद्यातत्वं प्रकीर्तितम् ।
शुद्धस्फटिकसंकाशं वृत्तं सर्वादिवगर्भितम् ॥
शिवतत्वं स्मृतं श्वेतपञ्चवक्त्रञ्चतुर्भुजम् ।
दक्षे पद्माक्षमालाञ्च वामे स्वलकमण्डलुम् ॥
93b अधरोष्ठौ द्विः प्रमृज्य नमोन्त हृदयेन च ।
दक्षिणाङ्गुष्ठमूलेन ततो ज्येष्ठां कनिष्ठिकाम् ॥
विहाय मध्यमस्याभिस्ति -- संस्पृक्ते च तत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्यांगुलित्रयेणापि चोर्ध्वाधो मार्जनं पुनः ।
मूलमन्त्रजलेनैव पादमूर्ध्वञ्च संस्पृशेत ॥

कामिके-: पादावभ्युक्ष्य मूर्धानमंगुष्ठानामिकेन तु ।
चक्षुषी संस्पृशेद् विद्वान् तर्जन्यंगुष्ठकेन तु ॥
नासापुरयुगौ स्पृष्ट्वा कनिष्ठांगुष्ठकेन तु ।
श्रोत्रौ स्पृष्ट्वा जलोपेतौ मध्यमांगुष्ठेन बाहुकौ ॥
नाभिमंगुष्ठकेनैव सर्वांगुल्यग्र पीडितः ।
हृत्प्रदेशन्तु संस्पृश्य सर्वांगुल्यग्रतश्शिरः ॥
दक्षहस्ततलेनैव हृन्मन्त्रान्तु समुच्चरन् ।

अथवांगुष्ठानामिकाग्राभ्यां मुखं नासाक्षिकर्णविवराणि नाभिहृदयांसद्वयशिरांसि द्वादशं स्थानानि दक्षिणवामक्रमेण हृदा संस्पृशेत । तदुक्तं परारव्ये-:

संस्पृशेच्च ततोंगानि शिरो नेत्रसनासिके ।
श्रोत्रांसौ हृदयं नाभि शिरोस्पर्शन्ततोन्ततः ॥
अनामावाग संस्पर्शं कर्तव्यांगुष्ठयुक्तया ।
भवेदीशस्सदांगुष्ठो नामान्वामामृता कला ॥
तयामृता मियादेवामृत तृप्तास्त्वनामया ।
भवन्ति तत्क्रिया कर्तुं क्रिया भावोप बृंहक इति ॥

अथाग्निहोत्रजनितं पूर्वोक्त कपिलादि जनितं सिद्धं भस्म वा समादाय पूर्वोक्तविधिना प्रथममलस्नानं कृत्वा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विधिवद्यथोक्तस्थानेषु त्रिपुण्ड्राणि धृत्वा पूर्ववदाचम्य सकलीकरणं कुर्यात्। तत्त्रिविधः। वीरतन्त्रे —:

प्रथमं सृष्टिन्यासन्तु स्थिति न्यासं द्वितीयकम्।
संहारन्यासं तृतीयं स्यात्त्रिविधं चोच्यतेऽधुना॥
गृहस्थ सृष्टिमार्गेण ब्रह्मचारिस्थितेन च।
वानप्रस्थयतीनान्तु संहारन्यासमुच्यते॥

अथ वानप्रस्थसन्यासिनौ सन्यासन्यासं कुर्यात्। संतान-संहितायाम् —:

कनिष्ठे सद्योजातन्तु वामदेवन्त्वनामिके।
अघोरं मध्यमे न्यस्य तर्जन्यां पुरुषं न्यसेत्॥
ईशानेनैव देवेशी अंगुष्ठे चैव विन्यसेत्।
पादादि केशपर्यन्तं संहारन्यासमुच्यते॥
अपत्नीको वनस्थश्चेत् संहारन्यासमुच्यते।
भौतिकनैष्ठिकब्रह्मचारिभ्यां स्थितिन्यासः कर्तव्यः॥

तथा सन्तान संहितायाम् —:

स्थिति न्यासं प्रवक्ष्यामि शृणुत्वायतलोचने।

मध्यमादितर्जन्यन्तं क्रमात्।

ईशानं मध्यमे न्यस्य पुरुषञ्चत्वनामिके।
अघोरं कनिष्ठिकायान्तु वाममंगुष्ठके न्यसेत्॥
सद्योजातं न्यसेद्देवि तर्जन्यां तु विशेषतः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्यमादि तर्जन्यन्तस्थितिन्यासमुदाहृतम्।

भीमसंहितायाम्:-

हृदादिजानुपर्यन्तं स्थितिन्यासं प्रकीर्तितम्।
हृदये विन्यसेदीशं मुखतत्पुरुषन्यसेत्॥
अघोरं मूर्ध्नि विन्यस्य वामदेवन्तु गुह्यके।
पादेन्यस्य तु सद्यन्तु स्थितिन्यासमिदं परम्॥

अथ सृष्टिन्यासः- ओं हः अस्त्राय हुं फडिति वामकरतलन्तत् पृष्ठञ्च दक्षिणेन त्रिवारं संशोध्य दक्ष करतलं तेनैव मन्त्रेण वामकरेणैकवारं संशोध्यास्त्रतेजसा दग्धौ मणिबन्धावधि हस्तौ सञ्चिन्त्य तौ संपुटीकृत्यांगुष्ठ द्वय मध्ये सूत्ररूपेण शक्तिमण्डलं ध्यात्वा तेनामृतेन ओं हां शक्तये वौषडिति करद्वयं संप्लाव्य ओं हां शिवासनाय नम इति करपुटेऽधिवासनं विन्यस्य तन्मध्ये ओं हां शिवमूर्तये नम इति सूक्ष्ममूर्तिं सदाशिवं विन्यस्यांगुष्ठयोस्तर्जनीभ्यां ओं हों ईशान मूर्ध्ने नमः। तर्जन्यादिकनिष्ठान्तमंगुष्ठाभ्यां ओं हें तत्पुरुष वक्त्राय नमः। ओं हुं अघोरहृदयाय नमः ओं हिं वामदेव गुह्याय नमः। ओं हं सद्योजातमूर्तये नमः। करतलयोः। ओं हां हौं विद्यादेहाय नमः इत्यंगुष्ठाभ्यां सदाशिवविग्रहं विन्यस्य पुनर्मध्यमांगुलिभिः ओं हौं नेत्रेभ्यो नमः। हक् क्रिये-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रक्षात्मकं नेत्रं विन्यस्य सकलहस्तव्याप्त शक्तित्वेन
मध्ये ओं हां हौं शिवाय नम इति सदाशिव देहव्यापकं बीजं
१५० सञ्चिन्त्यांगुष्ठानामिकाभ्यामावाह्य कनिष्ठादिकशाखासु ओं हां
हृदयाय नमः । ओं हं शिरसे नमः । ओं हूं शिखायै नमः ।
ओं हैं कवचाय नमः । ओं हः अस्त्राय फडिति विन्यस्य
वामदक्षिणक्रमेण नमोन्तकवचेनावकुण्ठ्याभौ हस्तौ संयोज्य
वौषडन्तमूलेन परमीकृत्यांगन्यासमारभेत् । दक्षिणांगुष्ठानामिकाभ्यां
हृदि ओं हां शिवासनाय नमः इति षोडशदलकर्णिकासहितं
श्वेतपद्मं विचिन्त्य तत्र ओं हां हं हां शिवमूर्तये नम इति
शुचिकान्तां ज्योतिरूपां सूक्ष्ममूर्तिं बद्ध्वांगुष्ठेन विन्यस्य
हृद्गुह्यजानुषु तत्पुरुषाघोरवामदेव सद्योजातमंत्रांगुष्ठ-
युक्ततर्जन्यांगुलिक्रमेण विन्यस्यांगुष्ठानामिकाभ्यां हृदि
ओं हां विद्यादेहाय नम इति ब्रह्मरन्ध्रान्ते पञ्चब्रह्मकला-
मयं सदाशिवं विन्यस्य नेत्रमन्त्रं नेत्रेषु मध्यमांगुलिभि
स्त्रिभिर्विन्यस्य विशेषाधिष्ठातृत्वेन विधिवत्तन्मूलद्वादशा-
न्तमुच्चार्य मूर्तिव्यापकमंगुष्ठानामिकाभ्यां विन्यस्य हस्त
तलयोरस्त्रमन्त्रमनामिकाभ्यां विन्यस्य हुं फडन्तास्त्रेण
तालत्रयपुरस्सरं विघ्ननिस्सारणार्थं मुद्रयादशदिक्षु छो-
टिकयाबन्धनं कृत्वा कवचेनावेष्ट्य वौषडन्तमूलेन पादादि
मूर्द्धान्तं सर्वमन्त्रप्ररोचनार्थं महामुद्रां प्रदर्शयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा चिन्त्यविश्वसादाख्ये -:

अस्त्रमन्त्रं द्विरुच्चार्य वामपाणिश्च शोधयेत् ।
करेण दक्षिणेनैव दक्षिणं वामपाणिना ॥
द्वावेवं तमुच्चार्य शोधयेन्नन्दिकेश्वर ।
अस्त्रतेजोन्वितौ हस्तौ मणिबन्धौ विधिस्मरन् ॥
पाणिभ्यां संपुटं कृत्वा ह्यंगुष्ठद्वय संपुटे ।
ध्यायेदमृतबीजेन शक्तिमण्डलमुत्तमम् ॥
ओं ह्रौं शक्तये वौषट् संप्लाव्यं तत्कार्यद्वयम् ।
पद्माकारं पुटो भाव्यं तन्मध्ये तु शिवासनम् ॥
मूर्तिं सूक्ष्मान्तु विन्यस्य पश्चान्मन्त्रं समुच्चरेत् ।
एवं सदाशिवं रूपं विन्यसेन्नन्दिकेश्वर ।

वीरतन्त्रे -: ईशादि पञ्चमन्त्राणि अंगुष्ठादिन्यसेत्ततः ॥

कामिके -: विद्याशरीरन्तां ध्यात्वा ततो शक्त्यन्तमुच्चरेत् ।
~~एवं सदाशिवं रूपं~~ नेत्रस्तत्तलेन्यस्य पश्चान्मूलमनुस्मरन् ॥

चिन्त्यविश्वसादाख्ये -:

सकलीकरणं पश्चात् कनिष्ठांगुष्ठकान्तकम् ।
हृदादिमन्त्रविन्यासस्सकलीकरणं भवेत् ॥

कालोत्तरे -:

विन्यस्यांगुलीभिर्मध्ये कवचेनावकुण्ठयेत् ।
करांगुलीषु सर्वासु प्रसादं विन्यसेत्ततः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



करणास्त्रसमारब्धात्स्त्वंगन्यासमतः परम् ।
दक्षिणांगुष्ठानामिकाभ्यां ह्यासनञ्च मूर्तिकम् ॥
विन्यस्य विश्वदेहे पञ्चब्रह्म न्यसेत्ततः ।
अजिते-ः अंगुष्ठाग्रेण मूर्द्धीशं विन्यसेद्ध्रायमाहिना ॥
मुखं तत्पुरुषञ्चैव तर्जन्यांगुष्ठ योगतः ।
मध्यमांगुष्ठयोगेन हृदयघोरन्तथा न्यसेत् ॥
अंगुष्ठेनामिके योगात् गुह्ये वामञ्च विन्यसेत् ।
कनिष्ठांगुष्ठयोगेन हृदयं हृदये न्यसेत् ॥
अंगुष्ठानामिकाग्रेण शिरश्शिरसि विन्यसेत् ।
शिखायां शिखायामंगुष्ठ मध्यमाग्रेणविन्यसेत् ॥
आचिन्त्यविश्वसादाख्ये-ः
चोटिका मुद्रया तेन कादिक् बन्धनं कुरु ।
तदुक्तमजिते-ः
दक्षिणांगुलिभिर्वाम हस्तस्य तलताडनम् ।
अंगुष्ठवर्जिताभिस्स तालमुद्रा तु कुद्रिता ॥
कृत्वा दक्षिण हस्तेन मुष्टिं दृढतरं ततः ।
अंगुष्ठाग्रेण तर्जन्यां सम्यगग्रेण पीड्य च ॥
प्रक्षिपे-तर्जनीं भेदे यदा शब्दो दधा भवेत् ।
नाराचास्त्रसमारब्धेयंमुद्रा दिग्बन्धकर्मणीति ॥
सर्वज्ञानोत्तरे-ः मन्त्रपूतकरौ कृत्वा कवचेनावकुण्ठयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ततश्चालंभनं कुर्वीत पादादारभ्य मूर्धनी ।
मूलेन परमीकृत्य महामुद्रां ततः क्रमात् ॥

तदुक्तंमस्समानतन्त्रे —:

हस्ताभ्यां संस्पृशेत्पादौ तौ नवेद्यावमस्तकम् ।
मावा मुद्रा महामुद्रा करसंस्कारकर्माणि ॥

कारणे विशेष उक्तम् -:

हस्ताभ्यां संस्पृशेत्पादौ कादिपादान्तक यथा ।
डावा मुद्रा महामुद्रा करसंस - र पारिधौ ॥

५५ अस्य फलं पौष्करे प्रतिपादितम् ।

अविभिन्न स्वभावेन! यदि भिन्न प्रयोजनम् ।
अंगानामंगिना सार्द्धम्मृतीकर - तमिति ॥

सर्वज्ञानोत्तरे -:

शिवस्य यादृशं रूपं तादृशं चिन्तयात्मनि ।
शिवमन्त्रन्यासमिदमात्मानस्तु सदा कुरु ॥

इत्थं मन्त्रसन्नद्धविग्रहस्सन् स्साधकश्शरीररक्षार्थं सर्व विघ्नै र्नानुभूयते । तथोक्तं -:

हृदयं यत्परित्राण बन्धपदृवदाहितम् ।
शिरश्च तात्च्छिरस्त्राणं शिरसः परिवेष्टनम् ॥
चूलिकामस्तका त्राणमंगत्राणञ्च कंकणम् ।
करे शस्त्रगृहीते तु शिवणो भटवस्थित :।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्षुद्राणां प्रतिज्ञ्य स्यान्तार्क्ष्यो इत्श्रवसामिवेति ॥

अथ मन्त्रसंहितायां त्रिः प्राणानायम्य पुनराचम्य श्रौतवन्दनं कुर्यात् । क्रियाकाण्डक्रमावल्याम् —

सकलीकरणं कृत्वा प्राणायामेन संस्थितः ।
त्रिस्समावर्तयेन्मन्त्री मनसा शिवसंहिताम् ॥
पूर्ववत्पुनराचम्य विधाय श्रौतवन्दनम् ।

शिवधर्मोत्तरे प्राणायामस्वरूपमुक्तम् —

यथा प्राणवायुश्शरीरस्थ तस्य यामो निरोधनम् ।
रेचकः पूरकश्चैव कुंभकस्त्रिविधस्स्मृतः ॥
नासिकापुटमंगुल्या पीड्यैकमपरेण च ।
औदर्यं रेचयेद्वायुं रेचनाद्रेचकस्स्मृतः ॥
बाह्येन वायुना देहं दृतिवत्पूरयेद्दृढम् ।
तदनु पूर्णञ्च संतिष्ठेत् पूरणात्पूरकस्स्मृतः ॥
न मुञ्चति न गृह्णाति वायुमन्तर्बहिस्स्थितम् ।
संपूर्णं कुंभवत्तिष्ठेदचलस्स तु कुंभकः ॥

तदनु — अंगुष्ठानामिकाग्राभ्यां नेत्रयोर्दिव्यमुद्रां विन्यस्य नमोन्तमूलेन जलं निरीक्ष्य हुं फडन्तास्त्रेणाग्नितीर्थेन संप्रोक्ष्य तेनैव संताड्य वौषडन्तकवचेनाभ्युक्ष्य ओं हां हृदयाय वौषडित्यं कुशमुद्रया बिन्दुस्थानात् गोदावर्यादन्यतम तीर्थमाकृष्य नमोन्तहृदयेनोद्भवमुद्रया जले तीर्थं प्रक्षिप्य

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मूलेन शिवतीर्थमभिमन्त्र्य हुं फडन्तास्त्रेण संरक्ष्य नमोन्त-
कवचेनावकुण्ठ्य वौषडन्तशक्तिमन्त्रेण मन्त्रवित् अमृती-
करणं कुर्यात् । चिन्त्यविश्वसादाख्ये—

निरीक्षणादिभिश्शोध्य जलमंकुशमुद्रया ।
ललाटे तीर्थमाकृष्य ओं हां हृदयाय वौषट् ॥
वारणुनाथ संरक्ष्य शक्तिमन्त्रेण मन्त्रवित् ।
अमृतीकरणं कुर्याद्विद्वान्धेन्वा(?)नेवारणम् ॥

सुप्रभेदे धेनुमुद्रा स्वरूपमुक्तम् । तद्यथा

वेणीबन्धकरौ कृत्वाह्यंगुष्ठौ युग्मसंस्थितौ ।
तर्जनी मध्यमे लीनौ कनिष्ठानामिका युतौ ॥
एवञ्चत्वारियुग्मन्तु दिव्यामृतसुवर्षिणी ।
इयं सुरभिमुद्रा च द्रव्य शुद्ध्यर्थमुच्यते ॥

कामिके—

सकलीकृत देहस्तु ततस्संध्यामुपासयेत् ।

अथ सन्ध्याकालमुक्तमातिक्रमेणोच्यते

आद्यान्नक्षत्र सहित सार्का सन्ध्यान्तु पश्चिमाम् ।
मध्यमां मध्यमेऽर्के यत्नात्सद्ध्यां समभ्यसेत् ॥
उक्तमाष्टनक्षत्रमध्यमालुप्ततारका ।
अर्धोदितारुणा कन्या त्रत स्सन्धा त्रिधास्मृता ॥
मध्वार्केपित थाद्वय घटिकात्रयकाल्पिता ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अर्धार्कमण्डले श्रेष्ठा मध्यमास्तमिते रवौ ।
कन्या सा दृष्टनक्षत्रा सायं सन्ध्या त्रिधा मता ॥
प्राक्सन्ध्या समयस्तस्य विशेषाह्निक द्वयम् ।

निर्वाणदीक्षितस्यात्र संध्यात्रयमुदाहृतम् —

चतुर्थीमपि संध्यायां पूर्ववद्देशिको मतः ।
सकलं निष्कलभेदेन सा संध्या द्विविधा मता ॥

माहेश्वरोत्तरे —

संध्याया लक्षणं शक्र प्रसंगेन निगद्यते ।
आद्या शक्तिपरा नित्या या सा कारणधर्मिणा ॥
सा संध्या परमार्थेन बोधनावगतात्मनः ।
मृणालसूत्रपश्चात् स्थूलतरा भवेत् ।
पूर्वं कालादि भिन्ना भेदेन भिन्नवर्णा पृथक्पृथक् ।
रक्तशुक्ला तथा श्यामा चतुर्थी गुणवर्जिता ।
हृदयेन तथा बिन्दौ ब्रह्मरन्ध्रे निरास्पदे ॥
चतसृणां समुद्दिष्टा ध्यानस्थानं शतक्रतोः ।

तत्र समाधिविषये सकलशक्ति ध्यानमुक्तं चिन्त्यविश्वसारे —

प्रातःसन्ध्येति तत्काले प्रातर्मौ हृदय पंकजे ।
रक्तभूषाम्बरां रक्तां रक्तमाल्यानुलेपनाम् ॥
जटामकुटसंयुक्तां चक्रां चतुर्भुजाम् ।
हंस पंकजमध्यस्थां अष्टदशावलोकिनीम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यज्ञोपवीतिमं बालां पद्ममाला विराजिताम् ।
स्रुगक्षमालां सव्याभ्यां बाहुभ्यां दधती पराम् ॥
दण्डं कमण्डलुं द्वाभ्यां वामाभ्याञ्च तथैव च ।
त्रिपुण्ड्रावलि सन्दीप्तां सर्वाभरणभूषिताम् ।
शतयोजन कोटिभि विस्तृते रक्तमण्डले ॥
तन्मध्ये सुस्थिता देवीं सर्वकर्माणि साक्षिणीम् ।
मध्याह्ने वैष्णवीं ध्याये शुक्लांशुक्लांशुकोज्वलाम् ॥
वैन तेयाब्जमध्यस्थां चक्रवक्त्रां सुग्रीवनाम् ।
वनमालोपवीतां च सर्वलक्षणसंयुताम् ।
बिंबोष्ठीञ्चारुवदनां नेत्रयुग्मां सुकुण्डलाम् ॥
शंख वामे च वर्णञ्च दक्षिणे दधतीं करे ।
गदाभयञ्च दधती त्रिपुरांकितमस्तकाम् ॥
सर्वलोक रसं युक्तां साक्षिणीं सर्वकर्मणाम् ।
द्विशतकोटि विस्तीर्णे विस्तीर्णे श्वेतमण्डले ॥
तत्र मध्ये स्थितां देवीं वरा सांस्थितिकारिणीम् ।
सायाह्ने शिरसि ध्याये द्रौद्रीं नीलोत्पल प्रभाम् ॥
अर्द्धचन्द्रांकित जटामीषत् गलित यौवनाम् ।
कृष्णाजिनोपवीतञ्च सर्वाभरण भूषिताम् ॥
सर्वलक्षणसंयुक्तां संहारकर्मकारिणीम् ~~भस्मान्ति~~ ।
भस्मति पुण्ड्रसंयुक्तां त्रिरत्नाक्षञ्च दक्षिणे ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वामशक्त्यभयं देवीं सर्वकर्मसुसाक्षिणीम् ।
अर्द्धास्तिमित निशात कोटि योजन विस्तृते ॥
बिन्दुमण्डलमध्यस्थां भावयेन्नन्दिकेश्वर ।
तासां प्रभाभिश्शात्मानं भासितं भावयेन्तदा ॥

अथ फुल्लकाख्यास्तु निष्कल ध्यानम् –

ज्ञानिनां परमा संध्या चतस्राभिर्दये धुना ।
एकैवानेकतां याति शिवशक्तिरुपासिता ॥

चिन्त्यविश्वसादाख्ये –:

उत्तमापरमा संध्या मर्धराते विशेषतः ।
शिवशक्ति स्वरूपेण चैकत्वे नैकतां गता ॥
बिसतन्तु निभां सूक्ष्मां रक्ता शुक्लासितेतरा ।
चतुर्थी निष्कला नित्या कृष्णा वासा विभाव्यते ॥
शिवबोधा परा यातु सा संध्या परमा भवेत् ।

मृत्युञ्जयोत्तरे –:

ज्ञानिनां कथितं किञ्च योगिनां कथ्यते हरे ।
अन्ते सूर्यस्य चन्द्रस्य द्वे सन्ध्ये प्राणयोगिनाम् ॥
परयोगो न कथिता त्वन्यथा ममशालिना ।
शुद्धबोधपदावस्था चात्मनो या शचीपते ॥
यथा क्रमेणैव संध्यां ध्यात्वा स्वभावतः ।

एवं यथाधिकारं संध्यां ध्यात्वा पूर्वाभिमन्त्रित शिवो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तीर्थं जलं दक्षहस्तेन वामहस्ते दत्वा निक्षिप्य सकृ-त्संहितयाभिमन्त्र्य प्रणवरूपया चन्द्रसदृशामृतस्रुवन्त्या कुंभमुद्रया वौषडन्तमूलेन सकृत् प्रयोगेण शिरस्याभिषेचयेत् । पुनर्हदा दक्षिणहस्तेन वारि कुशान्वितं वामहस्ते निक्षिप्य वौषडन्तसंहितयाभिमन्त्र्य दक्षिणहस्तेन वामांगुलिमध्यस्रुतं जलं शिरसि वौषडन्त संहितया प्रोक्षयेदिति मार्जनम् । तथागमः

बध्वा कलशमुद्रान्तु सुधारव्या धारणां स्मरेत् ।
पृथिव्यावतारकं पञ्चमात्रान्तु कुंभवच्चाप्यधोमुखम् ॥
स्रुस्निग्धं चन्द्रसदृशं स्रुवन्तममृतं ततः ।
कुंभमुद्रां पुरा बध्वा संहितान्तु सकृत्स्मरेत् ॥
पृथिव्यां यानि तीर्थानि तत्र स्नातो भवेत्तदा ।
सर्वकर्माधिकारः स्यात् सर्वयज्ञफलं लभेत् ॥
मूलांग ब्रह्माभिर्मन्त्रैः दक्षहस्तेन नित्यशः इति ।

अथवा शिष्टजलं दक्षिणकरे प्रक्षाल्य पूरकवायुना वामनासापुटेन प्रविष्ट धर्मरूपं शुद्धश्वेतजलं बहिर्निस्सृतं विभाव्य हुं फडन्तास्त्रेण ज्वलदग्निवज्रशिलायाम् । कृष्णरूपेण दक्षिणपाणिभागे निक्षिपेदित्यघमर्षणम् ॥ कामिके - भूयोपि दक्षसंस्थं हि शैवं वार्यासितद्युति ।

आहृत्य पूरकेणैव वामनासापुटेन तु ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तज्ज्योत्स्नाया च निर्दग्धं पापदेहं सितप्रभम्।
रेचकादर्कनासातो निर्गतं परिचिन्तयेत्॥
तच्छेवं दक्षहस्तस्थं भू विक्षिप्य महास्ततः।

मृगेन्द्रपद्धत्याम्-

वलं वज्रशिलापृष्ठे क्षिपेत्तदघमर्षणमिति।

तदनु मन्त्रकं समन्तकम्बा चम्य विधिवत् सकलीकरणन्तु कृत्वा कवचेनास्त्रेण चात्मानं संवेष्टयेत्। तथागमः।

ततो द्विधा समाचम्य कृतन्यास प्रसन्नधीः।
यदा यदा समाचामं मन्त्रन्यासं तदा तदा॥
कुर्वीत करकार्येषु मन्त्रीमन्त्रार्थ सिद्धये।

अचिन्त्यविश्वसादाख्ये-

सुधामयजलेनैव देहसंवेष्टनं कुरु।

तथा सूक्ष्मे- सव्यहस्ते वलं गृह्य अस्त्रमन्त्रं प्रदक्षिणम्॥

आदित्यमण्डलमध्यस्थं सदाशिवं स्मरन्।

१५b ॐ हां हौं शिवायार्घ्यं स्वाहेति शिवाय पुष्पाक्षतसन्निहित मञ्जलितयं हृत्प्रदेशे निधायार्घ्यं दद्यात्। मृगेन्द्रे-

तीक्ष्णांशु बिंब मध्यस्थं सदाशिवं स्मरन्।
ध्यात्वा देवं सदाशिवं। क्षिपेज्जलाञ्जलिममन्त्री

विरतौ चेतसा स्मरेत्। मोहशूरोत्तरे-

शिवमन्त्रं शृणु मन्त्रिस्वाहान्तमुदकाञ्जलिम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दत्वार्घ्यं शिवाय गायत्रीं जपत्वा - - पश्चात्स्वभावतः ।

यथा विधानमर्घ्यमुत्क्षिप्य वक्ष्यमाणनयेन गायत्रीं जपेत् । कामिके -:

प्रातरुत्थित्वाथ सायाह्ने समासीनो मुनीश्वरात् ।
आसीनो वासितो वापि मध्याह्ने - - - - ॥

ज्ञानरत्नावल्यां - :

उत्थितः पूर्वसन्ध्यायां अर्घ्यं पूर्वानने न तु ।
आदित्याय प्रदातव्यं जपस्थैवोत्थिते न तु ॥
मध्याह्न समये तद्वत् किन्तु दक्षाननेन तु ।
सायमुत्थाय दत्वार्घ्यं - वि - ञ्जपेत्तदा ॥
शुष्कार्द्रवसनो वापि गायत्रीं न जले जपेत् ।
सूर्यानलात्मिकान्नित्यं विरोध ह्यरितेजसोः ॥
नाडीसन्धानगस्सूर्य सम्भे संपूर्ण विग्रहः ।
गायत्रीं हृदि सञ्चिन्त्य शुक्लां शुक्लोपवीतिनीम् ॥
तिर्यक् प्रसृत दक्षांघ्रि वामांघ्र्यब्जदलेस्थिताः ।
एकवक्त्रां त्रिणेत्रां च जटाखण्डेन्दु मण्डनाम् ॥
त्रिपुण्ड्रवलिभिर्दीप्तां सर्वाभरणभूषिताम् ।
कृष्णाजिनोत्तरासंगां शुक्लवस्त्रविभूषिताम् ॥
साक्षसूत्रवरां संख्ये वामे पद्माभयान्विताम् ।
एवं ध्यात्वाथ गायत्रीमारभेत्तु जपं यथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं नमर्महेशाय पदं विद्महे च ततः पदम् ।
महादेवाय मन्त्रान्ते धीमहीति समन्वितम् ॥
तन्नश्शिव पदन्तस्मान्नियोज्यञ्च प्रचोदयात् ।
गायत्री कथिता वत्स चतुर्वेदफलार्थिता ॥
त्रिसन्ध्यं शिवगायत्रीं जपेद्भक्तिसमन्वितः ।
वह्नि त्र्यक्षरगायत्रीं जपेत् ।
ओं हां ह्रीं वाथ गायत्री नमोन्ताभीष्टदायिके ।
इति सप्तावर्ता पुनराक्त्यन्दशभिः प्रापयेद्दिवम् ॥
विंशावर्तातु सा देवी नयं त्वैश्वरमालयः ।
शतमष्टोत्तरं जप्त्वा तारयेज्जन्मसागरात् ॥ इति
सूर्यमण्डलागदाञ्जपान्ते पुनस्तमण्डलमेव प्रविष्टं चिन्तयेत् ।
उक्तञ्च ।

ओंकाराद्या चतुर्वंशाक्षरां तेन त्रिवर्जिता गायत्र्यक्षागता
जप्त्वा शिष्टोपान्ते कं मण्डलमिति इत्थं
~~त्रिसन्ध्यं शिवगायत्री जपेद्भक्ति समन्वितः~~ ॥
प्रतिदिनं जप्त्वा स्वाहान्तेमूलेन प्रदक्षिणत्रयं कृत्वा
मन्त्राणां दीपनार्थाय स्वाहान्तं संहितां तर्पयेत् । चिन्त्य
विश्वसादाख्ये —

त्रिसन्ध्यं शिवगायत्री जपेद्भक्तिसमन्वितः ।
एवं मन्त्रं जपित्वार्घ्यन्दत्वा सद्यो विसर्जनम् ॥
त्रिः प्रदक्षिणमावर्त्य मूलमन्त्रञ्जपेत्ततः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मन्त्राणान्दीपनार्थाय कुर्यात्तर्पणमव्ययम्।

कामिके- हस्ताभ्यान्तर्पणं प्रोक्तं प्रीणनन्तर्पणं स्मृतम्।

मन्त्रास्तु मूलब्रह्माङ्ग हेतवो मुनिसत्तमाः॥

तद्यथा - ओं हां हौं शिवाय स्वाहा । ओं हों ईशानाय स्वाहा । ओं हें तत्पुरुषाय स्वाहा । ओं हुं अघोराय-स्वाहा । ओं हिं वामदेवाय स्वाहा । ओं हं सद्योजाताय स्वाहा । ओं हां हृदयाय स्वाहा । ओं हें शिरसे स्वाहा । ओं हों शिखायै स्वाहा । ओं हैं कवचाय स्वाहा । ओं हौं नेत्रेभ्य स्वाहा । ओं हां सर्वेभ्यो मन्त्रेभ्य स्वाहा । ओं हां सर्वेभ्यो देवेभ्य स्वाहा । इत्थं कुर्यादग्रे स्सकुशाक्षत वारिभिर्देवतीर्थेन तर्पयेत्॥ अथ दक्षस्कन्धोपवीत कुशमूलाग्रेण सतिलवारिणा ओं हां सर्वेभ्य शिवपितृ-भ्यस्स्वधा ओं हां सर्वेभ्यो देवपितृभ्यः स्वधा ओं सर्वेभ्यः पितृभ्यः स्वधा । ओं हां सर्वेभ्यो मातृभ्यः स्वधा ओं हां सर्वेभ्यो ज्ञातिभ्यः स्वधा ओं हां सर्वेभ्य आचार्येभ्यः स्वधा इति तर्जनी मध्यरूपपितृ - र्थेन संतर्पयेत्। तथा कामिके -

स्वाहान्तं मन्त्रदेवानां मुनीनान्तु नमोन्तकम्।

मनुजेच्च वषट्चैव भूतानां वौषडन्तकम्॥

पित्रादीनां स्वधान्तं स्यात् यथायोग्योपवीतयुक्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोत्तरे –:

१८a देवानामुपवीतेन ऋषीणां कण्ठसंज्ञितम् ।
पितॄणां प्राचीनावीतं तर्पयेत्सुसमाहितः ॥
कुशपुष्पाक्षतैर्नैव देवानान्तर्पयेद्बुधः ।
कुशैश्चैव ऋषीणान्तु पितॄणाञ्च तिलेन तु ॥
देवानाञ्च ऋषीणाञ्च जलेनैव तु तर्पयेत् ।
पितॄणाञ्जलतीरे तु नित्यञ्चैव यथाविधि ॥

कामिके –:

कराग्रे दैविकन्तीर्थं पर्वसंधिषु चार्षकम् ।
तीर्थं कनिष्ठिकामूले प्राजापत्यं प्रकीर्तितम् ॥
पैतृकं तर्जनीमूले ब्राह्मकं करमूलतः ।
एवं ज्ञात्वा विशेषेण देवादिन्तर्पणं कुरु ॥

इदं संक्षेप - - - भवति । अत्र बालादीनामधिकारः । तथा चिन्त्यविश्वसादाख्ये –:

बालबालीश वृद्धस्त्री रोगिणां भोगि भूभुजाम् ।
गुरुवक्त्रेण संकोच्य तर्पणादीश्च कारयेत् ॥
अथ विस्तरतर्पणं शक्तश्चेत्कुर्यात् । तद्यथा –:
संहितामन्त्रान् स्वाहान्तान् देवतीर्थेन तर्पयेत् ।
ओं हां शतकोटिमन्त्रेभ्यः स्वाहा । ओं हां सर्वेभ्यः शिवागमेभ्यः स्वाहा । ओं हां वसिष्ठाय नमः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हां पुलस्त्याय नमः ओं हां कृतवे नमः। ओं हां भारद्वाजाय नमः। ओं हां विश्वामित्राय नमः। ओं हां प्रचेतसे नमः। ओं हां मरीचीकाय नमः। ओं हां अगस्त्याय नमः। ओं हां दधीचाय नमः। ओं हां दुर्वाससे नमः। इत्येकादश ऋषीन् पर्वसिद्धिभिः। ओं हां सनकाय वषट् ओं हां सनन्दाय वषट् ओं हां सनत्कुमाराय वषट् ओं हां कपिलाय वषट्। ओं हां पञ्चशिखायै वषट् ओं हां ऋभवे वषट् इति मानवतीर्थेन कनिष्ठमूलेन मनुष्यांस्तर्पयेत् ओं हां सर्वे आकाशादि पृथिव्यन्तभूतेभ्यो वषडिति संलक्ष करतलमूलेन तर्पयेत्। अथ दक्षस्कन्धोपवीति कुशमूलाग्रेण स तिलवारिणा। ओं हां कव्यवाहनाय स्वधा। ओं हां अनलाय स्वधा। ओं हां सोमाय स्वधा। ओं हां यमाय स्वधा। ओं हां अर्यम्णेभ्यः स्वधा। ओं अग्निष्वात्ताय स्वधा। ओं हां बर्हिषद्भ्य स्वधा ओं हां आज्यपाय स्वधा। ओं हां सोमपाय स्वधा इति देव पितॄन् ओं हां पितृभ्यस्वधा। ओं हां पितामहेभ्यस्वधा। ओं हां प्रपितामहेभ्य स्वधा। ओं हां वृद्धप्रपितामहेभ्य स्वधा ओं हां मातृभ्य स्वधा। ओं हां सर्वेभ्यो आचार्येभ्यस्वधा। ओं हां दिक्भ्यस्वधा। ओं हां दिक्पतिभ्य स्वधा। ओं हां सिद्धेभ्यः स्वधा। ओं हां साध्येभ्यः स्वधा। ओं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



हां मातृभ्य स्वधा । ओं हां रुद्रेभ्य स्वधा । ओं हां राक्षसेभ्य स्वधेति सन्तर्प्य

ओं अग्निदग्धाश्च ये जीवात्यदग्धाः कुले मम ।
भूमौ दत्तेन तोयेन तृप्तायान्तु परा - - तिमिति ॥

पठित्वा हुं फडन्तास्त्रेण सकुशतिलजलाञ्जलिं तीरे क्षिपेत् । अथोपवीति गुणं विकादीनां मन्त्रमुच्चार्य सन्तर्प्य कुशांस्त्यक्त्वा समाचम्य कृतन्यासो हृन्मन्त्रेण संहारमुद्रया तीर्थं मन्त्रदेवादीनुपसंहरेत् । द्विजश्चेद्गायत्रीजपोपस्थानानन्तरं संहितया - द्विव्यमूर्तये शिवायोपस्थानं कृत्वा प्रासादं यथा शक्तिजप्त्वा निविश्येत । - - - सन्ध्यायामुक्तलक्षण कालत्रिंशे संहितामेक - वारंजपेत् तदुक्तं श्रीमन्मृगेन्द्रे -:

सन्ध्याकालपरिभ्रंशे शिवैकादशीकां जपेत् ।

इत्थं अनुष्ठानं निर्वर्त्यास्त्रेणमार्गस्थान्विघ्नानुत्सार्य - - - - द्वि गोदेवालयं गृहमालीयं वा प्रविश्य पृथिव्यादि तत्वानि मनसा सन्त्यज्य शुद्धविद्यातत्वान्त व्यापकं पूजास्थानं प्रविशेत् । तथा कामिके -:

विघ्नान्विरेच्य मार्गस्था स्मा - - - ।
पूजेद्देवालयं वापि गृहमालीयमुत्तमम् ॥

मतंगे -: प्राविद्याधिपतिं ध्यात्वा ओंकारपुरस्सरम् ।
यायाद्वात्संयमी वेशात् पूजास्थानमनिन्दितम् ॥ -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्यात्मार्थपूजापद्धत्यां शौचाचमनस्नानसन्ध्याविधिः ॥

---

तत्रात्मार्थपूजार्थं शिवक्षेत्रे गृहनदीतीरवनोपवनादिषु
क्वापि देशे मनोरमे पूजागारं कुर्यात् । सुप्रभेदे -:
लिङ्गाद्धस्तशतं सार्धं शिवक्षेत्रं समन्ततः ।
यस्य तत्रैव वासित्वं शिवलोकस्य कारणम् ॥
यत्तु मानुषकं लिङ्गं क्षेत्रमानिन्दितं स्मृतम् ।
७८८ स्वयंभूते सहस्रं स्याद्दार्षे चैव तदर्धकम् ॥
आराधितानि सर्वाणि स्थावराणीतराणि च ।
दिव्यं प्रयान्त्यसन्देहः प्रभावात् परमेष्ठिनम् ॥
तस्मादावसथं कार्यं शिवक्षेत्रसमीपतः ।
आत्मार्थं पूजयेत्सर्वस्वोपहारं शिवस्य तु ॥
तस्मात्पितृफलैः पुष्पैरंभसा मनसा पुनः बुधः ।
चित्तं शिवात्मकं कृत्वा शिवमाराधयेत्सदा ।
देवस्थानं विना यत्र क्षणकालं न वासयेत् ॥
मतंगे -: वस्तव्यं लिंगमाश्रित्य दक्षिणस्यान्तु दीक्षितैः ।
तदभावात्पुच्चौ देशे कृत्वा चातिशुभं गृहम् ॥
नाति दूरे भयं शस्तं सवितानं कुत्सितम् ।
कामिके -: पुष्पानामष्टमगदीनां स्थानं सर्वत्र कल्पने ॥
अंशुमति -: आत्मार्थ यजनन्तु प्रसादं पूर्ववद्बुधः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गृहे शिवालये वापि इष्टदेशे मनोरमे ।

किरणे च-: महानदीतटे रम्ये वने चोपवनेऽपि वा ॥

पर्वताग्रे च वृक्षे - - - - लक्षणान्विते ।

कालोत्तरे-:

देवालय समीपे च पुण्या नद्यश्च तीरके ।

अथवा रुद्रगेहेति शिव यागं प्रकल्पयेत् ॥

सूक्ष्मे च-: पादप्रक्षालनं कृत्वा गृहारामे शिवालये ।

नदी तीरे तटाके वा पर्वते राजधानके ॥

चललिंगार्चनं कुर्यात् भुक्ति मुक्ति फलप्रदम् ।

तत गृहे च ईशानकेभागे धूजागारं कुर्वीत ॥

अनोद्देषु नदीतीरादि क्षेत्रेषु · · · ष्ट दिक् प्रदेशे कुर्यात् । कालोत्तरे-:

ऐशान्यान्दिशि संस्थन्तु धूजागारं मनोरमम् ।

किरणे च. गरुड: भगवन् प्रोक्तमैशान्यान्दिश स्याद्देवता गृहम् । तद्गृह कीदृशं शतं ब्रू सं · · · तस्य लक्षणं । ईश्वरः ।

चतुश्शाला गृहाणान्तु तत्रान्या कल्पना मता ।

पूर्वायां श्रीगृहं प्रोक्त माग्नेय्याम्महानसम् ॥

शयनादक्षिणाया नै ऋत्यामायुधालयम् ।

भोजनं पश्चिमायां स्याद्वायव्यां धान्यसञ्चयम् ।

उत्तरेन्द्रव्य संस्थान मैशान्यान्देवतागृहम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिशालं वा द्विशालं वा गृहं स्यादेकशालकम् ।
चतुःशालयुतं धार्यं नद्यावर्तमिति स्मृतम् ॥

तथा मतंगे-: एकशालं द्विशालं वा त्रिकूलमथवा शुभम् ।
विस्तारानुसारतः कार्यं चतुश्शालामथापि वा ॥
हिरण्य नाभमथवा सुक्षेत्रं नामनोरमम् ।
हिरण्यनाभसुक्षेत्रादिशालास्वरूपं मठप्रतिष्ठाध्यायेऽनुसंधेयः ॥
उदकुम्भं सदाकार्यं सर्वशालान्वितं शुभम् ।
महानसामथाग्नेय्यामैशान्यां यागमण्टपम् ॥
धान्यस्य सर्वदा शस्तं स्थापनं वायव्यवनि ।
याम्याग्नेय्यान्तरं द्धीमान् कार्यं स्थापनं सलिलामनघ ।
भाण्डानां मुनिशार्दूल विधिवत्परिकल्पितः ।
चतुष्पदानां सर्वेषां दिशि सौम्यां प्रशस्यते ॥
एवं विधं गृहं कार्यं वसन्तत्रैव बुद्धिमान् ।

अथास्य निर्माणप्रकारः ।

तत्र प्रथमे ही तलं वर्णगन्धरसैःपरीक्ष्य स्वस्वोचितः ।
परिगृह्य विशोध्य शिलामयं पक्वेष्टकामयम् ।
शुद्धदारुमयं मृण्मयं चतुरश्रमायताश्रं वृत्तं वा त्रि-
पञ्च सप्तनवतयो दश सप्तदश विंशत्येकविंशद्वात्रिंशद्धस्तान्यतर
प्रमाणमेकभौमं त्रिभौमं वा पूर्वपश्चिम दक्षिणान्यतरं मनोरमं
ध्वजायाग्निर्माय तं पञ्चधा विभज्य मध्यभागे शिलासु

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ये वर्जयित्वा मृण्मया मैष्टकां वा चतुष्कोणस्तंभयुक्तास्तं भ.न. हितां वा बो प. दशांगुलोत्सेधामष्टांगुलोत्सेधां वा वेदिकां परिकल्प्य तदुपरि पश्चिमभागे दक्खलविस्तारायां पञ्चां- गुलोत्सेधं युक्तगर्भगृहस्थानीय देशान्तत्पूर्वतस्ताद्दशायां विस्तारोत्सेध युक्तामर्धमण्डलावस्थानीय देशान्तत्पूर्वभागे पञ्च ताला-चतुस्ताल विस्तारष्टांगुलोत्से ध युक्त बेरमण्टप - स्थानीयदेशा वेदिकां कल्पयेत् । अथवा समतालमुक्ताविस्तारयां गर्भगृहादिस्थानीय देशां वेदिकां गोमयांकितां कुर्यात् । पूजा- मण्टपनिर्माणाशक्तौ शिवालयादिषु देवस्य दक्षिणेदेशे मनो- रमे पूजार्थं परिकल्प्य तत्र प्रासादं कालोन्तरे-:

वर्णगन्धरसं ज्ञात्वा यागवेश्म समारभेत् ।

दीक्षा स्थानं शिवस्थानं स्नपनस्थानमेव च ॥

योगस्थानानि सर्वाणि विधिरेषः प्रकीर्तितः ।

तथा सर्वज्ञानोत्तरे-

- - - - जपो यागो योगो दीक्षा वडान ।

गुह्ये मनोरमे स्थान सुविशुद्धेवहीतले ॥

तत्र परीक्षा विधिः ॥ किरणे

कुन्देन्दुमकोवहेमाली वर्णा सा ब्राह्मणादितः ।

ग्रात्याज्यरक्तगन्धाढ्या मृताविद्गान्धिनो क्रमात् ॥

१२० मधुराद् कषाया च कटुका भेति स्वादुतः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोत्तरे –:

वर्णं गन्धन्तथास्वादे भेदे ज्ञात्वा तु लक्षणैः।
सर्वसिद्धिमवाप्नोति सिद्धीनां कांक्षितानि वै॥
शताश्चतस्रो विप्रस्य तिस्रो राज्ञे उभे विशः।
शका शूद्रस्य निर्याऽच्छेलाभिश्च कीर्तिता॥

वीरतन्त्रे –: हस्तं मात्रं खनित्वा तु पूरयेत्तेन पांसुना।
आधिक्यश्चोत्तमं ज्ञेयमधमं न्यूनमुच्यते॥
समं मध्यममेवं स्याद्विवर्जयेदिषमन्ततः।

मतंगे –: खात्वा नाभिप्रमाणन्तु शल्योद्धारञ्चकारयेत्।
केशभस्म तुषांगार शकारास्थि तृणाद्ययः॥
प्राणिनाञ्चापि ये दुष्टा स्तान् प्रयत्नेन सञ्चयेत्।
ससम् – क वृश्चिकस्त्याज्या यत्नात् महामुने।
कूर्म मीनस्समण्डूकाः प्राणिनश्शुभदाः स्मृताः॥
शंखविद्रुमवैडूर्य शाला वर्ता दय श्शुभाः।
धातवश्च प्रशस्तास्यु सिद्धिदाश्च महीतले॥

सर्वज्ञानोत्तरे –:

सेचयेत् शुद्धतोयेन पञ्चगव्य शिवांभसा।
पञ्चरत्नं क्षिपेत्तत्र मूलमन्त्रेण देशिकः॥
पूरयेत्प्राग्यपाषाणैः ष्टांगुल मन्तरैः।

अंशुमति –: पुण्यक्षेत्रे नदीतीरे शुद्धदेशे मनोरमे॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



संगृह्य मृदमादाय तद्गर्तं पूरयेत्समम् ।
निघट्टनं वालुकाभि निम्नोन्नतविवर्जितम् ॥
वास्तुमिष्ट्वा यथा शास्त्रं कृत्वा भूमौ समं प्लवे ।
आयादिशुभसंयुक्तं यजमानानुकूलतः ॥
शिलां वा चेष्टकां वापि दारुमृण्मयमेव वा ।
समास्रं मण्टपं कुर्यात् आयतास्रमथापि वा ॥
डावं मण्टपनिर्माणं स्थानं निर्देश उच्यते ।

सूक्ष्मे तु–:

चतुरस्रायतं वृत्तं यथेष्टं मण्टपं न्यसेत् ।

अतमण्टपनिर्माणप्रसंगे मात्राङ्गुलं तु विध्येन तदधीनं हस्तप्रमाणमपि त्रिविधमिदञ्च त्रैविध्यं देश संकटादिषु ज्ञात्वा यथा संभवं प्रयोज्यं तथा चिन्त्ये–:

आचार्य दक्षिणे हस्ते मध्यमाङ्गुलि मध्यमे ।
पर्वदीर्घसमन्तारं नाहं त्रिविधमुच्यते ॥
तदंगुलैश्चतुर्बु वो हस्तमानं प्रकीर्तितम् ।

समानतन्त्रे–:

द्वात्रिंशद्धस्तमात्रन्तु विंशत्यर्द्धमथापि वा ।

किरणे–: नव त्रिदशहस्तं वा तथा सप्तदशात्मकम् ॥

डाकविंशति हस्तं वा सप्तविंशमथापि वा ।

सूक्ष्मे–: नवहस्तं सप्तहस्तं पञ्चहस्तं त्रिहस्तकम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मोहेश्वरोत्तरे -:

एकभौमं द्विभौमं वा त्रिभौमं वा यथा सुखम्।

सर्वज्ञानोत्तरे -:

दैर्घ्यं तद्द्विगुणं कृत्वा विस्तारे चैकभागिकः।
द्वारं तृतीयके भागे सार्द्धहस्तप्रमाणतः॥

किरणे -: कुर्याद्वा पश्चिमद्वारं दक्षिणं पूर्वमेव वा।
मध्ये तद्भागमात्रे तु सप्तविंशत्यङ्गुलम्॥
द्वात्रिंशदथषट्त्रिंशदष्टात्रिंशद्भवत्यथ।
अंगुलानि भवेद्द्वारं विंशत्पञ्चांगुलानि तु॥

ज्ञानरत्नावल्याम् -:

वाहयेत्पश्चिमद्वारं पूर्वद्वारमथापि वा।
इति नित्यार्चनेशस्तं मन्दिरं भुक्तिमुक्तिदम्॥
एकभौमं द्विभौमं वा तद्विधानमिहोच्यते।
क्षेत्रं तत्पञ्चधा कृत्वा मध्यभागेन वेदिका॥
डोविका मृण्मय श्रेष्ठा नैव शैलसुधामया।
षोडशाद्यंगुलोच्छ्रायं कोणस्तंभादि संयुतम्॥

किरणे -: विचित्ररन्ध्रसंयुक्तं सकवाटार्गलान्वितम्।
मध्यस्तंभविहीनं वा कर्तव्यं देवता गृहम्॥

अंशुमति -: गर्भवेश्मैकतालञ्च तत्समञ्चार्द्धमण्टपम्।
तत्समं विस्तृतञ्चैव पञ्चांगुलोन्नतं ततः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पञ्चतालायतालञ्च तुर्यतालञ्च विस्तृतः।
विंशांगुलोन्नतं चैव निम्नोन्नतविवर्जितम्॥
बेरमण्टपमाख्यातं यद्वा समतलन्ततः।
गोमयालेपनं कृत्वा वामदेवेन मन्त्रवित्॥
गर्भार्द्धं मण्डपञ्चैव द्वितालञ्चैक संख्यया।
तत्समं विस्मृतञ्चैव निम्नोन्नत विवर्जितम् चतुरश्रसमन्वितम्।
पञ्चतालायतश्रञ्च वेदतालञ्च विस्मृतम्।
बेरमण्टपमाख्यातं तन्मध्ये तु दलं क्षिपेत्॥
स्थण्डिलं पत्र हीनञ्चेदसुराणां प्रवेशनम्।
अस्त्रमन्त्रं समुच्चार्य पत्रं तत्रैव विन्यसेत्॥
प्रसादं मनसा कल्प्य वेदिकामानमेव च।

एवं विधि यन्निर्मितं प दीपिकायां गर्भगृह स्थानीय देशे पेटकं विन्यस्य बेरमण्डपस्थानीयदेशे ओं हां आधारशक्तये नमः इत्यभ्यर्च्य तन्मध्ये द्विहस्तमायतं पीठमेकहस्त प्रविस्तृतम्। द्वादशांगुलमुच्छ्रायं यद्वा हस्तोन्नतं दृढम्॥ नानावर्णकसंयुक्तं मध्ये कमलं भूषितम्। श्रीमयमते। वासवदिष्टा शिवाहरीति चरणायत कुंकुंपवाजिनकम्। तदुपरि पद्मदलस्योत्कण्ठिकाया युक्तमलंकृतम्। यथा शोभम्। एवं स्वटकं न्यस्य तदुपरि बः नित्त मानं प्रसार्य तन्मध्ये नागदन्तादि निर्मितं पीठं विन्यस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



92b तदुपरि पश्चिमभागे प्रभामण्डलसहितं स्वर्णादिरचितं पद्मपीठं पूर्वाभिमुखमस्थापयेत् । तदुक्तं सूक्ष्मे —:

आधारशक्तिमभ्यर्च्य तन्मध्ये खेटकं न्यसेत् ।
तदूर्ध्वं बिम्बमाच्छाद्य ऊर्ध्वपीठे तु पश्चिमे ॥
तदूर्ध्वं पीठे पद्मपीठे स्यात् प्रभामण्डलसंयुतम् ।

तथांशुमती —:

तस्योर्ध्वे चैव तन्मानां चित्रवस्त्राद्यलंकृतम् ।
खेटके पश्चिमे देशे पद्मपीठञ्च विन्यसेत् ॥
प्रभामण्डलसंयुक्तन्दामाधारञ्च विन्यसेत् ।
प्रभामण्डल पार्श्वे तु चित्रवस्त्रैरलंकृतम् ॥

तत्पूजामण्डपं प्रकीर्णकुसुम धूपामोदचन्दन-चर्चा-वितान मुक्तादाम पताकाध्वज कर्पूरक्षोद प्रतिबिम्बदर्पणादिभिरलं-कुर्वीत । तथा मतंगे —:

सुगुप्तं विजनं रम्यं प्रकीर्णकुसुमोज्ज्वलम् ।
सुधूपामोदगन्धाम - - चन्दनाद्यैरितिमिति ॥ (दिभिः)

*इत्थं विधिवन्निर्मितं पूजागारं प्रविश्य सौरपूजां कुर्यात् ।

तथांशुमती -

पूजार्थं प्रविश्याथ भृंगारकजलैर्युतम् ।x)
वितानोपरि सञ्छन्न मुक्तादामावलंबितः ।
सितवस्त्रपताकाढ्यं सितच्छत्रध्वजोच्छ्रितम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुंकुमोदकसंयुक्तं कर्पूरक्षोदधूसरम् ।
निष्कंपार्चिः प्रतीवाञ्छ्य - पंचाङ्गं प्रवृत्तिमिति ॥

इत्थं विधिवन्निर्मितं पूजागारं प्रविश्य सौरपूजां कुर्यात् ।
तथा स्मृती —

पूजास्थलं प्रविश्याथ ~~सौरपूजां समारभेत्~~ भृंगारुकजलैर्युतम् ।
पादप्रक्षालनं कृत्वा तच्छेषं विवर्जयेज्जलम् ॥
पुनर्जलं समादाय आचम्यविधिनाबुधः ।
मण्टपान्ते प्रविश्याथ सौरपूजां समारभेत् ॥
देवेन्द्रानलयोर्मध्ये सूर्यमूर्तिं शिवं यजेदिति ।

अत्र कथं दिङ्नियम इति चेत् तत्रैव प्रभावती नाम्नी भानुरुस्यावस्थानादित्याहुः । नन्वत्र सौरमूर्तिमेव शिवं यजेदिति किमुक्तं इतरेषाञ्चन्द्रादीनामपि शिवमूर्तित्वात्तेषामभ्यर्चनं किमिति न क्रियते । सत्यम् । किन्तु षडाधारशिवार्चनमेव नित्यमुक्तत्वात्तेषां पूजा न क्रियते उक्तञ्च । मोहशूरन्तरे

सूर्योपस्थानमात्मेज्यां लिंगाग्नि गुरुपुस्तकम् । इति

नित्यं समाख्यातं षडाधारं शिवार्चनमिति । सूर्य शिवयोरैक्याच्च तद्वैद्वैव कर्तव्यम् । उक्तं वातुले —:

आदित्यञ्च शिवं विद्याच्छिवमादित्यमेव च ।
उभयोरन्तरं नास्ति आदित्यस्य शिवस्य च ॥

तर्हि शिवार्चनमेव प्रथमं स्थिति चेत्तथापि सूर्यस्सकलो यतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अत एव प्रथममर्चनीयः तथाहि मति-:

सकलस्सूर्य रूपस्तु निष्कलश्शिव एव च।
देहस्थं पूर्वमाराध्य पश्चाद्देवं यजेद्बुधः॥

ज्ञानरत्नावल्याम्-:

अथ नन्दिमहाकालौ दण्डी पिंगलसंज्ञकौ।
शिवस्सूर्य शिवांगानि मन्त्रा विद्येश्वरा ग्रहाः॥

इयं सौर पूजा च द्विधा -चतुः पूजा बेर पूजा -चेति। तथाहि-
मति-: सौरं प्रतिम बेर च चक्रे वापि समर्चयेत्।
स्थण्डिले पद्ममालिख्य यथापूर्वोक्तमार्गतः॥

सूक्ष्मे च-: खेटके क्षतले वापि सौरपूजां समारभेत्॥
पूर्वाशाभिमुखं प्राच्य खेलयेद्रविमण्डलम्।
बेरे तु चक्रलिखिते यथेष्टं मण्डले लिखेत्॥

विजये-: मण्टपे वापि कूपे वा मण्डलेपि विशेषतः।
सौवर्ण ताम्रमाणिक्य प्रवालप्रतिमासु वा॥

कारणे-: अतः परं प्रवक्ष्यामि सौरार्चनविधिक्रमम्।
नित्यन्तमुदयात्पूर्वं चातुर्वर्णं समर्चयेत्॥
वृत्तं त्रियश्रं वृत्तञ्च षडश्रं वृत्तयुग्मकम्।
अष्टाश्रञ्च कलश्रञ्च सौरचक्रं प्रकीर्तितम्॥
वृत्तं तु मध्ये प्रणव त्रिकोणंगारकं लिखेत्।
पुनर्वृत्तं लिखेत्पञ्च बहिरष्टाक्षरं न्यसेत्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सुदर्शनं तु षट्कोणे षडंं तत सन्धिषु ।
वृत्तयुग्मे महासौर गायत्रीं शिरसान्यसेत ॥
अष्टस्वष्टाक्षरन्यस्य इन्द्रादिदेवता न्यसेत ।
कलाश्रश्च स्वरं प्रोक्तं लिखेच्च विधिवत्ततः॥
कादि सान्तश्च रन्ध्रेषु श्रीं ह्रीं क्लीं पूर्व समन्ततः।
वारवाग्निचक्रवरुणेश्च राक्षसेषु प्रादेश पतालिखेत
स्थवारिवर्णान । महामण्टपमध्यस्थं सौरचक्रं प्रकीर्तितम्॥
चतुर्वेदागमातीतं सर्वपापहरं भवेत ।
विप्रयैवार्चनं कार्यं क्षत्रियस्यार्चनं शृणु ॥
वृत्तञ्च वृत्तपद्मञ्च षडश्रं वृत्तपद्मकम ।
अष्टाश्र चतुरश्रञ्च लिखेत्प्रणवमध्यमे ॥
सूर्यमन्त्रदले न्यस्य श्रीं ह्रीं चैव लिखेत्तद्बुधः।
क्षत्रियस्यार्चनं कुर्यात वैश्यानामर्चनं शृणु ॥
वृत्तं पद्मं तथा पद्मं षट्कोणं वृत्तमश्रकम ।
तारं मध्ये दलं न्यस्य सूर्यनाम लिखेद्बुधः॥
98a ह्रींकारमश्र संयुक्तं श्रीं ह्रीं श्चैव दले लिखेत ।
वैश्यानामर्चनं कुर्या शृणु शूद्रस्य चार्चनम ॥
वृत्तं षडाश्रकं चैव वृत्तं पद्मं षडश्रकम ।
मध्ये वैदिकं प्रोक्तं सूर्यमन्त्रं लिखेद्दले ॥
श्रीं ह्रींश्चैव षट्कोणे श्रीं ह्रीं कारं लिखेत्पुनः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अत्र चैव पूजा च द्विधा भुक्त्यर्थं मुक्त्यर्थं चेति । तदुक्तं वातुले - भुक्त्यर्थञ्चैव मुक्त्यर्थं पूजा च द्विविधं भवेत् । भुक्त्यर्थं शक्ति संयुक्तं मुक्त्यर्थं केवलं विदुः ॥

अथ पूर्वास्यमुपविश्य समाचम्य करांगन्यासं कृत्वा अर्घ्यं संपाद्य दर्शनार्घ्यं दत्वा यथाशक्ति जपत्वा पूजोपकरण द्रव्या- ण्युपादाय शिवसूर्यमण्डलादौ यजेत् -

आसन्ने प्राङ्मुखो भूत्वा आदित्यार्चनमारभेत् ।
आचम्य विधिवच्छुद्धः करांगन्यासमारभेत् ॥
अस्त्रेण प्रोक्षयेत्पात्रं रक्तचन्दन वारिभिः ।
~~तत्पात्रे जलमापूर्य सौवर्णेन कृतं पात्रमुत्तमञ्चेति सम्मतः~~ ॥
चतुरंगुल विस्तारमुत्सेधन्तु तदर्धकम् ।
अर्घ्यपात्रमिति प्रोक्तं ज्ञात्वा कर्म समारभेत् ॥
अस्त्रेण प्रोक्षयेत्पात्रं रक्तचन्दन वारिभिः ।
~~सौवर्णेन कृतं पात्र~~ ततः पात्रे जलमापूर्य रक्तचंदन तण्डुलैः ।
रक्तपुष्प कुशैर्वापि तिलसर्षपतण्डुलैः ॥
ललाटाकृष्ट बिन्दुञ्च निक्षिपेदमृताकृतिः ।
अंगशक्त्यभ्यर्च्य कवचेनावकुण्ठयेत् ॥
अस्त्रेण रक्षणं कृत्वा जानुभ्यामवनीं गतः ।
आमस्तकान्तं नीत्वा तु सूर्यमण्डलदृष्टियुक् ॥

ओं हाँ हीं सः शिवसूर्याय नमः इति दर्शनार्घ्यं दत्वा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यथाशक्ति जपं कुर्वीत। यद्वा शिवगायत्र्यादिभिरर्घ्यं दद्यात्।

शिवगायत्रीमन्त्रेण प्रणवेन हृदाथवा।

सूर्यायार्घ्यं प्रदातव्यं सकृन्नित्यं प्रपूजयेत्॥

मृगेन्द्रे- नित्यां समुन्द्रितां पूजां संपाद्यार्घ्यं पुरस्सरम्।

ततो जपत्वा शिवं सांगमवेद्यो-त्तरमारभेदिति॥

ततः पात्रमस्त्रेण प्रक्षाल्य बिन्दुनिर्गतामृतास्मयेन गन्धोद-केन ओं खं कखोल्काय नम इत्यापूर्य षडंगमूलैरभ्यर्च्य तैरेवाभिमन्त्र्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य वौषडन्त-मूलेन धेनुमुद्राममृतीकृत्य तज्जलैर्द्रव्याणि स्थानान्यस्त्रेण संप्रोक्ष्य पुष्पं क्षिप्त्वा स्त्रेण विघ्नान्विद्राव्य स्थण्डिले-लिखिताष्टदलाष्टपद्मे ताम्रादि निर्मितचक्रे वेरे वार्चयेत्।

अथ पूजाक्रमः। पश्चिमद्वारे स्वदक्षिणशाखायां। ओं अं दण्डिने नमः। इति दण्डीद्वारदक्षिणे गौरस्थूलस्तुन्दिलकूर्चवान्।

मषीभाजिन लेखिन्यौ धारयन्हस्तयोर्द्वयोः।

स्ववामशाखायां - ओं अं पिंगलाय नम इति

रक्तवर्णस्स्रुवपार्श्वे स्रुचिहस्तसमान्वितम्।

पिंगलो वामपार्श्वे तु प्रतिहारश्च दण्डवान्।

देवान्यां- ओं गणपतये नमः-:

रक्तपद्मासनासीना दन्तपाशांकुशौ फलम्।

दधानञ्च चतुर्हस्तैर्गजवक्त्रं गणाधिपमिति॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आग्नेय्याम् :- ओं अं गुरुभ्यो नमः -

जटामकुट शोभाढ्यं भस्मपाण्डर विग्रहम् ।
योगपट्टयुतं ब्रह्म सूत्रं नाभिस्थलोपरि ॥
कृत योगाख्य मुद्राञ्च ध्यायेच्छान्तं परगुरुमिति ।

ध्यात्वा संपूज्य पीठे वा स्थण्डिले वा पद्मासनं पूजयेत् । मध्ये ओं अं प्रभूतासनाय नमः । आग्नेयादिषु चतुष्कोणादिषु ओं कं विमलाय नमः । ओं अं साराय नमः । ओं अं आराध्याय नमः । ओं अं परमसुखाय नमः ।

सिंहवक्त्रं द्विनेत्रञ्च द्विहस्तञ्च द्विपादकम् ।
वृश्चिका कण्ठमालाञ्च मुण्डीकासन संस्थितम् ॥

इति ध्यात्वा इति सितरक्त पीत हरित सिंहरूपान्धर्मादि पृष्ठ दर्शिनी यथाक्रमेण विचिन्त्याभ्यर्चित तदुपरि जांकुरनाल पत्र दलकेसरकर्णिकासहितं अभिनव सरसीरुहं श्वेत पद्मं विचिन्त्य संपूज्य पूर्वादिदलेषु दीप्ताद्यष्टशक्तीः ओं रं दीप्तायै नमः । ओं रीं सूक्ष्मायै नमः । ओं रुं जयायै नमः । ओं रूं भद्रायै नमः । ओं रें विभूत्यै नमः । ओं रैं विमलायै नमः । ओं रों अमोघायै नमः । ओं रौं विद्युतायै नमः । इति संपूज्य कर्णिकायामीशाने ओं रः सर्वतोमुख्यै नमः ।

दीप्तदीपशिखाकारा ध्यातव्या नव शक्तयः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE





वामहस्तेऽरविन्दाढ्य दक्षिणे धृतचामरा ।
सूर्यस्याभिमुखास्सर्वे सर्वाभरणभूषिताम् ॥
द्विनेत्रा द्विभुजारक्ता वन्दनीया इमाः क्रमात् ।

एवं ध्यात्वा संपूज्य विस्फारान्मुद्रां प्रदर्शयेत् । तथा सूक्ष्मः-
दण्डिनं पिंगलञ्चैव गणेशं गुरुमेव च ।

विजय संहितायाः-:

आसनं कल्पयेत्पश्चात् सिंहे पीठे द्विपंकजम् ।
प्रभूतं मध्यम न्यस्य चतुर्दिक्षु समन्ततः ।
विमलं सारमाराध्यं सुखं परमपूरकम् ॥
आग्नेयादिषु कोणेषु सिंहपादाकृतीन्हृदा ।
तन्मध्ये पंकजं रक्त मष्टादिक् दलशोभितम् ॥
केसरेषु च दीप्तादि शक्तिरष्टौ प्रकल्पयेत् ।
पूर्वादीशानपर्यन्तं मध्ये सा सर्वतो मुखी ॥

विस्फुरा लक्षणमुक्तं –

हस्तद्वयश्चोर्ध्वमुखं किंचिदाकुचिदांगुलीम् ।
अंगुष्ठाभ्यां कनिष्ठादि क्रमेण स्फुरितौ ततः ॥
विस्फुरेति समाख्यातामेव सांनिध्यकारिणी ।

कर्णिकामध्ये मायातत्वान्त व्याप्तिकं आसनं विचिन्त्य ओं अं अर्कासनाय नमः । इत्यासनं संपूज्य तदुपरि भक्तिकामश्चेत् - सौरं कुंकुमसंकाशं सर्वाभरण भूषितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्विनेत्रञ्चारुवदनं रक्तमाल्यानुलेपनम् ।
चतुर्भुजं समोपेतं वरहस्ताम्बुजद्वयम् ॥
अभयवरदोपेतं प्रभामण्डलमण्डितम् ।
उषाप्रत्यूषासंयुक्तं उषा प्रत्यूषयान्वितम् ॥
उषादेवीं दक्षभागे प्रत्यूषां वामपार्श्वके ।
द्विभुजाञ्च द्विनेत्राञ्च सरोजवदनान्विताम् ॥
सर्वाभरणसंयुक्तां सर्वलक्षणसंयुताम् ।
पद्मस्थं वा रथारोहा मरुणेन समन्वितम् ॥
सुप्रसन्नं सुदीप्ताङ्गं ध्यायेद्देवं रवेर्वपुः ।

इति शक्ति सहितन्देवं ध्यात्वा संपूजयेत् । मुक्तिकामश्चेत्

धवलांभोरुहारूढं डाडिमी कुसुम प्रभम् ।
स्फुरद्बक महातेजा वृत्तमण्डल मध्यगम् ॥
हंसासक्त स्फुटश्वेत सनालब्ज करद्वयम् ।
एकास्यञ्चिन्तयेद्भानु द्विनेत्रं रक्तवाससम् ॥

इति ध्यात्वा ओं अं खं खषोल्काय सूर्यमूर्तये नम इत्युच्चार्य बद्धपुष्पाञ्जलिस्सदाशिवतत्वान्त व्यापिकां मूर्तिं विचिन्त्य विन्यस्य ओं हां भानुनेत्राभ्यान्नम इति नेत्रयोर्नेत्रं विन्यस्य पुष्पैरञ्जलिमापूर्य ललत कृष्ण स्फुर-दरुण बिन्दुमञ्जलौ तत्वान्त व्यापकं विचिन्त्य ओं हां ह्रीं सः शिवसूर्याय नम इति मूर्तिं तेजोरूपमावाहन्या

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थाप्य सन्निधान्या सान्निधाप्य निष्ठुरया निरोध्य

देव देव चिदात्मेश जगत्प्रथम मंगल ।

तिष्ठत्वं स्थापितो भक्त्या मया सूर्य जगत्पते ॥

इत्येवं विज्ञाप्य संनिधान्वार्घ्यं दत्वा सांनिधीकरणार्थञ्च बिंबमुद्रां प्रदर्शयेत् । तदुक्तम् -:

दक्षवामे तु संयोज्य संप्रसार्य तलद्वयम् ।

मध्यमांगुष्ठसंयोगात् बिंबमुद्रा प्रकीर्तिता इति ॥

सूर्यहृदय शिरश्शिखाकवचास्त्र स्वस्वस्थानेषु स्तनमध्ये कवचं पाण्योरस्त्रञ्च न्यस्य संपूज्य मूलेनैकत्वं कृत्वा । रक्षावकुण्ठने विधाय वौषडन्तमूलेन धेनुमुद्रां महामुद्रां च प्रपाद्यादीनि वौषडन्तमूलेन पुष्पाक्षत दूर्वाणि धूप दीपा-चमनार्घ्याणि दत्वा हृदयेनाभ्यंग स्वक्षार दधि क्षीर मधु हरिद्रा मलकादिना संस्नाप्य पश्चाच्छुद्धोदकेन संस्नाप्य -चल बिंबश्चेत् पीठे आरोप्य रक्त वस्त्र गन्ध पुष्पै रलंकृत्य ओं ह्रां ह्रीं सः शिवसूर्याय नम इति पुष्पाञ्जलित्रयेण संपूज्यार्घ्यं दत्वा पद्ममुद्रां बिंबमुद्राञ्च प्रदर्शयेत् । तदुक्तम् ।

उत्तानौ तु करौ कृत्वा मणिबन्धन्तु कारयेत् ।

मध्यमे कुञ्चितांगुष्ठौ शेषाः प्रविरला स्तथा ॥

पद्ममुद्रा भवेदेषा तलोपरि तलं न्यसेत् ।

किरणे- अंगुष्ठांगुष्ठ संयोगा द्वेशिनी द्वयसंगतः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शेषाः प्राग्यार्य विंबाख्यमुद्रेयं भास्करस्य तु ।

अथो भोगांगपूजार्थं विन्यासाग्नेयैशान नैरृत वायव्यदलेषु हृदयादिमन्त्रान् सूर्यहृदादिस्थानेभ्योंगिनोंगान्यादाय अंगानि सौम्यरूपाणि द्विभुजान्युज्वलानि च वरदांबुजहस्तानि भानो-रंगानि भावयेत् इति भानोरंगानि भाव्याभ्यर्च्य पश्चिमदले

११०

ज्वलत्पावकसंकाशं द्विनेत्रञ्चोज्वलप्रभम् ।

इति ध्यात्वा । नेत्रं संपूज्य पूर्वादि चतुर्दलेष्वस्त्रञ्च

दंष्ट्राकरालवदनं प्रज्वलत्पावकप्रभम् ।

तर्जयन्विघ्नसंघातमित्यमस्त्रं विचिन्तयेत् ॥

इति ध्यात्वा गन्धादिभिस्संपूज्य स्वमन्त्रैरर्घ्यन्दत्वा हृद-यादीनान्धेनुमुद्रान्नेत्रयोर्गोविषाणमुद्रामस्त्रस्य त्रासनीमुद्राञ्च प्रदर्शयेत् । तथागमः ।

धेनुमुद्राञ्चतुर्णान्तु त्रासनमस्त्रस्य लोचने ।

दर्शये गोविषाणाख्यं संनिधीकरणाय तु ॥

अजिते- तर्जनी मध्यमाभ्यां तु शिष्टाभ्यान्दक्षिणस्य तु । च ।

वामहस्ततले कुर्यात् ताडनं सकृदेव हि ।

त्रासनी स्यादियं मुद्रा त्रासने परियोजयेत् ।

विस्फार्य तर्जनी मध्ये गोविषाणा प्रसारिते ॥

तदेव तस्य नेत्रमुद्रा । अथावरण पूजा पूर्वादि दलाग्रेषु । ओं सं सोमाय नमः ओं बुं बुधाय नमः ओं बृं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



बृहस्पतये नमः ओं भ्रं भार्गवाय नमः । इत्याग्नेयादि
दलाग्रेषु ओं अं अंगारकाय नमः । ओं शं शनैश्च-
राय नमः ओं रं राहवे नमः । ओं कं केतवे नमः
इत्यभ्यर्च्य- पूर्वे सोमास्थितसौम्य साक्षसूत्र कमण्डलुः ।
अग्नेय्यामंगमत्यारक्त वागत्यक्षा रक्तलोचनः ॥
याम्यां पीतो धश्चापि साक्षसूत्र कलशस ः ।
वृद्धो गौरो गुरुस्साक्षः कुण्डीहस्त स्त्, नैरृते ।
दक्षीकाक्षास्सितश्शुक्रः कुण्ड्यक्षं वलयी जले ॥
वक्त्रपादस्त्वथ क्रूर दृष्टिर्भीम शनैश्चरः ।
लिखरी जपमाली च राजावर्तनिभो निलि ।
व्यावृतास्यो र्धदेही च राहुकृष्णोऽथ चर्मकृत्त ॥
उत्तरे वांकरे केतुस्तिफणी खट्गखेटहृत ।
नरनागार्द्ध देहिश्च धूम्रोथ वाथ कृताञ्जलिः ।
यद्वा - सोमबुध बृहस्पति शुक्राः पूर्वादि दिक्षु मंगलाद्या
वह्न्यादि कोणगाः ।
पूज्याः कामरूपधरान सर्वान दिव्याभरणभूषितान ।
वामो नित्यस्त हस्तश्च दक्षहस्ताभयप्रदान ।
इति ध्यात्वा समभ्यर्च्य इति तथा किरणे -
सोमं भौं बुधं गुरुं शुक्रं पूर्वादारभ्य पूजयेत ।
तथा किरणे: सोमादीनां नमस्कार दत्वा ध्याये त्गृहान क्रमादिति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदुक्तम् -: सततांगुलि संलग्न हस्तौ हृदेशमाश्रितौ ।
सर्वेषां बन्धनं कार्यं वामांगुष्ठेन पीड्य च ॥
नमस्कारेति विज्ञेया सर्वकर्माणि कारयेदिति ।

तदन्वाचमनीयन्दत्वा धूपदीपनैवेद्यताम्बूल मुख वासादिभिस्संतोष्यान्तराचमनार्घ्यन्दत्वा मूलमन्त्रं यथा शक्ति जपित्वाग्निभसा स्वाहान्तमूलेन भास्कराय चुलुकोदकेन समर्प्यांगाराके यथाशक्ति जपं कृत्वा निवेद्यायष्पुष्पिका दत्वा नमस्कृत्या स्तोत्रादिनामंगनाश्च खषोल्किना स्वाहान्तेन पराङ्मुखाय स्यन्दत्वा क्षमस्वेत्युक्त्वा हुं फडन्तास्त्रमन्त्रेण भोगस्थानास्थित मन्त्रान्नाराचमुद्रया उत्थाप्य खं खषोल्काय सूर्य मूर्तये नम इति दिव्यमुद्रया मूर्तौ लीनान् विभावयेत् ।

कृत्वाञ्जलिं कराभ्यान्तु अंगुष्ठानामिकान्वितम् ।
प्रसारयन्ततरेखा मुद्रेयन्दिव्यरूपिणी ।

निर्मूर्तौ सानपेक्षं विसर्जनं कुर्यात् -
असूर्ते मण्डलादौ तु निरपेक्षविसर्जनम् ।

हृदयपुण्डरीकगतं विभावयेत् -: गेशान्यान्दिशि गोमयेन मण्डलं कृत्वा ओं अं तेजश्चण्डासनाय नमः ओं अं तेजश्चण्डमूर्तये नमः ओं अं तेजश्चण्डाय नमः ।

दंष्ट्राकरालदीप्तास्य जटिलं रक्तवाससम् ।
दधानं टंकमंभोज तेजश्चण्डेश्वरं स्मरेदिति ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ध्यात्वा हृदयादिभिस्संपूज्यार्घ्यंदत्वा सूर्यनिर्माल्यं दत्वा नैवेद्य पानीयादीन्निवेद्य विसृजेत् यद्वा शिवपूजान्ते विसृजेत्-काम्यार्थी विशेषपूजां कुर्यात्- कारणे-:

रक्षार्थं भयनाशाय अस्त्रशस्त्र निवारणम् ।
सौभाग्यन्धनलाभञ्च आयुर्वर्द्धनमुत्तमम् ॥
चण्डमारुत सर्वषान्तारका श्रमिवर्द्धनम् ।
अपस्मारक्षयं कुष्ठ त्वक्दोषं सर्वनाशनम् ॥
शतास्मिन् तद्दिनं प्रोक्तं सर्वासिद्धिप्रदं परम् ।
षण्मासात् सर्वकामार्थं संवत्सरमुपासितम् ॥
सर्वकार्येषु सिद्ध्यर्थं सूर्यलोके महीयते ।

इत्यात्मार्थपूजापद्धत्यामात्मार्थपूजास्थान सौर पूजा विधिः

अथ शिवयजनमारभेत् । यजनशब्दो यजनदेव पूजासंगत करणदानोष्विति धात्वर्थवाचकः। अत-च देवशिवस्तस्य पूजापूज्य पूजकयोरन्योन्य समस्तरूपं संगतकरणम् । अहं शिवंपूजयामि । अहं शिवपूजां गृह्णामीति । शक्तिप्रसादविशेष दानमुभयोरानुकूल्येन पाद्यादि स्वात्मसमर्पणन्तु दानं शक्तिदानञ्च शतत्परिपूर्णार्थं शिवयजनं तच्च शिवार्घ्या-धारे ज्ञानशक्त्यात्मके लिंगे कार्यं शिवस्याधारणमनन्तत्वेपि लिंगमेव श्रेष्ठम्। तदुक्तं बृहत्कालोत्तरे-:

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च।
बसन्ति लिंगमूले तु तस्माल्लिंगं समर्चयेत्॥

सुप्रभेदे- लयं गच्छन्ति भूतानि संहारे निखिलानि च।
सृष्टिकाले यथा सृष्टि तस्माल्लिंगमुदाहृतम्॥

दीप्ते- पुरुषस्य तु यच्चिह्नं पुरुष व्यक्तिकारणम्।
सदाशिवस्य तल्लिंगं शिवलिंगमिति स्मृतम्॥
नादं लिंगमिति प्रोक्तं बिन्दुः पीठमिति स्मृतम्।

लिंगशब्देन चात्र लिंग चित्तीकरण इति धात्वर्थगत्यां लिंग इति सृष्टिस्थित्यादिभिः। कृत्यैर्जगच्चित्री करोतीति पारमेश्वरन्तेजोऽभिधीयते। तद्व्यक्ति स्थानन्तु शैला-दिकमुपचारलिंगशब्देनोच्यते। यदाहुर्गुरवः-

लिंगितं चितितं येन जगत्कृत्यैश्च पञ्चभिः।
तत्तेजश्शांभवं लिंगं भाक्तं तद्व्यक्तिधामिकमिति॥
अस्मिन् लिंगे शिवपूजा कार्या श्रेयस्करी।

तथा कालोत्तरे-

सर्वत्र संस्थितं पूज्यं सर्वाधारेषु सर्वदा।
तथापि लिंगे भगवान् पूजां गृह्णाति धूर्जटी॥
अर्सं पूर्णा कृता पूजा मन्त्रद्रव्य क्रिया गुणैः।
तथापि लिंगे संपूर्णा पूजा भवति षण्मुख॥
न च न्यूनाधिका कार्या पूजा वै स्थण्डिले सुत।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



- - - धिका तु या पूजा फलहीना प्रकीर्तिता ।
ऽभिर्वा कर्णैर्वत्स लिंगाराधनमारभेदिति ॥
स्थिरलिंगे सदाकार्यं सिद्धिकामै प्रयत्नतः ।
भुक्तिमुक्तिकरं पुंसां चललिंगे शिवार्चनम् ।

पूजापदं निर्वचनं सन्तान संहितायाम् - ।
पूर्यते सर्वकामार्थे जायते ज्ञानमात्मनि ।
पूरणाज्जायते यस्मात् पूजाशब्दमिहोच्यते ॥

सेयं पूजा द्विविधा परार्था आत्मार्था चेति

कामिके - अथार्चनविधिं वक्ष्ये भुक्तिमुक्ति फलप्रदम् ।
परार्थं स्वार्थमित्येवं द्विविधं तत्प्रकीर्तितम् ॥
ग्रामखेट पुरादौ वा नद्यां पर्वत एव वा ।
अष्टषष्ट्य महाक्षेत्रे महाक्षेत्रेष्वन्यत्र चमनोरमे ॥
स्वयं भूर्दैवगाणार्ष लिंगयुक्ते शिवालये ।
मानुषे स्थापिते लिंगे परार्थ यजनं स्मृतम् ॥
दीक्षान्ते गुरुणा दत्ते लिंगे वा स्थण्डिलादिके ।
यजनं स्वार्थमाख्यातं स्वस्यैव फलदं यतः ॥
आत्मार्थन्तु क्षणिकादौ चललिंगे वा कार्यम् ।

मकुटे - गुरुदेहे शुभे लिंगे स्थण्डिले वा निज आत्मनि ।
क्षणिके मण्डले तोये चात्मार्थं यजनं स्मृतम् ।

सुप्रभेदे - क्षणिके चललिंगे च स्थण्डिले मण्डलेपि च ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कौतुके भित्ति चित्रे वा आत्मार्थार्चनमारभेत ।

कारणे -: सैकतन्तण्डुलञ्चैव नदीमृद्गोमयं तथा ॥

नवनीतञ्च रुद्राक्षं भस्मचन्दन कूर्चकम् ।

पुष्पमाला गलां पिष्टं क्षणिकद्वादशोच्यते ॥

अजिते क्षणिकानान्तु लिंगानां पीठन्नैवास्ति लक्षणम् ।

अत्रैव क्षणिकानां पूजने विशेष उक्तः-:

सिकतन्तण्डुलञ्चान्नं क्षिप्रनैव समर्चितम् ।

नदीमृद्गोमयञ्चैव नवनीतन्नृपेव च ॥

वैश्येन पूजितञ्चैव फलं पिष्टञ्च चन्दनम् ।

शूद्रेण पूजितञ्चैव कूर्चमाल्यगलं भवेत् ॥

क्षणिकानां फलमंशुमती स्पष्टमुक्तम् ।

सिकतमुक्तिदं प्रोक्तं तण्डुलं भुक्ति दायकम् ।

नदी मृत्वात्मशुद्धि स्यात् अन्नमायुष्य वर्द्धनम् ॥

गोमयं रोगनाशार्थं नवनीतं सुखप्रदम् ।

रुद्राक्षं रुद्ररूपत्वं पिष्टं पुष्टिप्रदायकम् ॥

गन्धदीप्तिकरञ्चैव कूर्चं सौभाग्यमेव च ।

पद्मं भोगार्थमेवं तु जलजसायुज्यमेव च ॥

सर्वपापहरं भस्मं गलं प्रतिप्रदं भवेत् ।

फलञ्चाभीष्टसिध्यर्थं पल्लवं सद्गुणप्रदम् ॥

क्षणिकानान्तु लिंगान्वां फलमेवं प्रकीर्तितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्षणिकं सिकतादिश्च पूजयेत्तु विधानतः।
स्नापनावाहनश्चैव सर्वं मानसकल्पनम्॥
अर्चनान्ते विसृज्याथ न प्रमाणं न चास्थिरम्।
रुद्राक्षं क्षालनाच्छुद्धिरन्येषां परिवर्जयेत्।
क्षणिकार्चनमेवं स्यात् गुरुमार्गेण दृश्यते॥
क्षणिकादि निवेद्यश्च पृथुकं गुलमुद्गकम्।
फलादिश्चैव नैवेद्यमेवमेव क्रमेण तु॥
चित्रश्चैवार्द्धचित्रश्च पटाचित्रं क्रमेण तु।
सौधजं चित्रभेदं स्यात् अर्धचित्रश्च भाक्तिकम्॥
पटे तु पटाचित्रं स्यात् त्रिविधं लिंगमर्चयेत्।
सौधजं सुखमाप्नोति सौन्दर्यं भक्ति चित्रके॥
पटाचित्रं श्रियश्चैव चित्रलिंगार्चनात्फलम्।
मण्डलं द्वितयं प्रोक्तं पक्षं वा लिंगमेव वा॥
पक्षे तु श्रियमाप्नोति लिंगे वा सर्वकामदम्।
क्षणलिंगादि भेदानां फलमेवं प्रकीर्तितम्॥
तेषु लिंगेषु भेदेषु चललिंगं विशिष्यते।
मासामण्डलं श्रेष्ठं मण्डलात् क्षणिकं भवेत्॥
100a क्षणिकात्फलमुत्कृष्टं पटश्चैव ततः परम्।
पटादाभासमुत्कृष्टमाभासाद्बिंब मुच्यते॥
बिंबाद्दै लिंगमुत्कृष्टं लिंगाद्वै निष्कलं परम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थण्डिलादेर्मन्त्र सिद्धि प्रदा याक्ता सर्वसिद्धये ।

शिवो लिंग एव पूजनीयः । तथा

अस्मेवास्तिसिद्धिदं लिंगं सर्वसिद्धि प्रदायकम् ।

स्थण्डिलेपि हि मन्त्राणां आशु सिद्धि प्रजायत इति

चिन्त्यविश्वसादाख्ये -:

आत्मार्थं चललिंगञ्च तद्विशेषं तत्र शृणु ।

शैलजं लोहजं चैव रत्नजञ्च त्रिधा भवेत् ॥

एतेषां लक्षणं चललिंग प्रतिष्ठा प्रकरणे वक्ष्यामः । इदमात्मार्थ

यजनान्द्विधमन्तर्यजनं बहिर्यजनञ्चेति । तत्र तावदष्वाल-

इष्टीनां अन्तर्यजनमेव । तदन्येषां तु अन्तर्यजनपूर्वक

बहिर्यजनं यथा सिद्धान्ते -:

यजनं संप्रवक्ष्यामि यथा विद्यान् पूर्वशः ।

द्विविधं तच्च विज्ञेयमधिकार्या तु रूपतः ॥

यतीनां योगिनाञ्चैव बाह्योपरत बाक्तिषु ।

अन्तर्यागस्तु विहिता बाह्य पूजा परेषु च ॥

अंशुमति -: सूतक प्रेतकाशौचिनो रुद्राध्य चोरगृहीत लिंग

व्यापिमान्न स यजनमुक्तम् । अंशुमति -:

सूतक प्रेतकाशौचे त्वात्मार्थ यजनस्मृतम् ।

पूजालोपेन कर्तव्यस्सूतके प्रेतकेपि च ॥

शिवमन्त्रेण कर्तव्यं स्नानमात्रेण शुध्यति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आशौचं न भवेत्तत्र पद्मपत्रमिवांभसा ।
पूजान्ते प्रविशेच्छेद माशौचं विशेषतः ॥
एवं लिंगार्चनं कुर्यात् काम्यानुष्ठान हीनकम् ।
आशौचान्ते तु कर्तव्यं नित्यं काम्यमनुष्ठितम् ॥
काम्यानुष्ठानहीनं तु तद्दिने द्विगुणमर्चयेत् ।
एवं वै शुद्धशैवानां विप्रादीनान्तु कथ्यते ॥
सूतके प्रेतके कुर्यात् न स्वयं लिंगपूजनम् ।
स्वकर्मानुष्ठितव्यं तु जलहीनन्तु भस्मकम् ॥
मानसञ्च यजेद्धीमान् सर्वं मानसकल्पनम् ।
तल्लिंगं पूजयित्वा तु गुरुणा वा स्वजातिना ॥
सुबन्धुना- अन्येनैवार्चनं कुर्यादन्ते पुष्पाञ्जलित्रयम् ।
आशौचान्ते च कर्तव्यं पूर्वमार्गेण याजनम् ॥
कथं पुष्पवतीनारी अर्चनं गुरुदेवता ।
अन्तर्यागः प्रकर्तव्यः तथा पूर्वा दिनत्रयम् ॥
चतुर्थे दिवसे स्नात्वा गव्यं प्राश्य यजेत्तु सा ।
चोरैर्लिंगं गृहीतञ्चेत् मनसा तु यजेत्ततः ॥
चत्वारिंशद्दिनान्तञ्च उपवासञ्च कारयेत् ।
नालिकेरोदकेनैव क्षीरेणैव फलादिना ॥
आत्मानं रक्षयेद्धीमान् शिवध्यानपरायणः ।
तस्मात्सर्वप्रयत्नेन तल्लिंगं ग्राह्यमेव च ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लब्धश्चेत्तत्समादाय प्रीतियुक्तो विशेषतः।
लिंगशुद्धिं क्रमात्कृत्वा पूजयेत्सर्ववद्बुधः॥
तल्लिंगमलालब्धश्चेन्नवलिंगन्तु संगृहेत।
स्वगुरोर्लिंगमादाय पूजयेत्पूर्वमार्गतः॥
दृष्टश्चेत्पूर्वलिंगन्तु द्वयं संपूजयेत्क्रमात्।
तस्मात्सर्वप्रयत्नेन मरणान्तं यजेत्सदा॥

अस्य यजनस्य माहात्म्यञ्च स्वरूपत्रैविध्यञ्च सूक्ष्मे प्रतिपादितम्-:

आत्मार्थ यजनं वक्ष्ये शृणुत्वं तत्प्रभञ्जन।
आरोग्यमायुः कीर्तिञ्च विजयस्य फलप्रदम्॥
ब्रह्महत्ति विनाशार्थं वीरहत्ति विनाशनम्।
गोपहत्ति विनाशार्थं प्रजावृद्धिकरं परम्॥
सर्वकामप्रसिध्यर्थं सर्वयज्ञफलप्रदम्।
आत्मर्थ यजनात्साम्यं न भूतो न भविष्यति॥
शुद्धकेवलसाम्मिश्रमात्मार्थान्त्रिविधस्मृतः।
शुद्धञ्च शक्तिरहितं केवलं शक्तिसंयुतम्॥
सौरादि चण्डपर्यन्तमिश्रञ्चैव प्रकीर्तितम्।

अंशुमते च त्रैविध्यं प्रकारान्तरेण वर्णितम्। तद्यथा।

केवलं सहसंमिश्रं यजनं त्रिविधं भवेत्।
केवलं लिंगमेकं स्यात् सहजं पञ्चबेरकम्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



महेश्वरादि बेराणां सहितं मिश्रमुच्यते।
गणेशं स्कन्दबे - - - - ञ्च वृषभस्तथा॥
लिंगेनैव समायुक्तं सहजश्चेति कीर्तितम्।
सहजेन समायुक्तं महेशान्नृत्तमूर्तिनम्॥
काम्यार्थं यानि बेराणि सहितं मिश्रमुच्यते।
अत्र तु त्रैविध्येऽपि कश्चिद्विशेषः न्यायं उक्तम्।
यथा-: शुद्धकेवलसंमिश्रं पूजा च त्रिविधा भवेत्॥
जितेन्द्रियार्चितं शुद्धं केवलं शैवमर्चयेत्।
आचार्यो मिश्रकञ्चैव केवलं शुद्धमर्चयेत्॥
कारणे-: एकलिंगादि फलं निरूपितम्।
एकलिंगं तथा मोक्षं व्याधिरूपं द्वयं भवेत्।
लिंगत्रयं तथा कुर्वात भोगमोक्षप्रदायकम्॥
चतुर्लिंगन्तु यत्नेव आयु श्री कीर्ति हानि च।
पञ्चलिंगमिति श्रेष्ठं पञ्चपातकनाशनम्।
षष्ठञ्चेन्मारणं कुर्वात् सप्तमं भवनाशनम्॥
अष्टमन्तु महाव्याधिरथवा शत्रुवर्धनम्।
नवलिंगं तथा चेष्ट्वा शिवलोके महीयते॥
अत्र चतुर्णामपि वर्णानामादिशैव महाशैवानुशैवान्तरशैवादिनान्तत् स्त्रीणाञ्चाधिकारः। आदिशैवादीनां लक्षणमस्माभि
100b रशौच दीपिकायां प्रदर्शितम्। अंशुमत्यात्मपूजायामधिकारी

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



निरूपितः। विप्रक्षत्रियवैश्यानां शूद्राश्चैव तु दीक्षिताः।
आत्मार्थमर्चनं कुर्यात् तु परार्थकम्।
चातुर्वर्णोद्भवं स्त्रीणां अर्चनन्तु विशेषतः॥
मकुटे-:
विप्रक्षत्रियवित्शूद्रा दीक्षिताश्च प्रवेशकाः।
आत्मार्थ यजनं कुर्वन्तु परार्थकम॥
सूक्ष्मे-: ब्राह्मण क्षत्रिय वैश्यौस्तथा शूद्रस्तथैव च।
जंगमं पूजयेन्नित्यमात्मार्थे तु विशेषतः॥
सन्ताने- आत्मार्थं चललिंगन्तु स्थिरलिंग परार्थकम्।
ब्राह्मण क्षत्रियश्चैव वैश्य शूद्रस्तथैव च॥
आत्मार्थं पूजयेन्नित्यं संध्याकाले त्र्यककालके।
सुप्रभेदे-: दीक्षितानां द्विजातीनामात्मार्थमनुलोहिताम्।
परार्थमादिशैवानामात्मार्थं विहितं भवेत्॥
सूक्ष्मे -: अनुलोम प्रति लोमैस्तु आत्मार्थं संप्रपूजितम्।
आत्मार्थं पूजयेन्नित्यं सर्ववाग्जातिरेव च॥
योगजे - आदिशैवेन दीक्षायां महाशैवादिशैवकः।
विप्रक्षत्रियवित्शूद्रा दीक्षिताश्च सुपूजकाः॥
आत्मार्थ यजनं कुर्यान्न कुर्यान्त परार्थकम्।
चिन्त्ये- आत्मार्थञ्च द्विजातीनां भक्तानाञ्च विशेषतः॥
पूजयेद्गुरुणा दत्तं परार्थञ्चैव योजयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्वयोरुभयोः पूजा कर्तव्यन्त्वादिशैवकम् ।

कारणे तु- आत्मार्थं न यजेत्तत परार्थञ्च यजेद्यदि ॥

आत्महीनं यजेद्यत परार्थे यजनं कृतः ।

तद्दोषमनार्थाय - - - - न्ती होमकम् ॥

शिवसृष्टिं विना ये तु जायन्ते ब्रह्मणो मुखात् ।

ते समान्या न तेषान्तु परार्थत्याधिकारिताम् ॥

परार्थस्वार्थमित्युक्त विधन्तत्परिकीर्तितम् ।

परार्थयजनं कार्यं शैद्वै विप्रैस्तु कीर्त्यबाः ॥

अन्येषामर्थमेव स्यात् कुर्याश्चेच्च तु नाशनम् ।

कृत्वैव विधिवत्पश्चात् उभे च यजने कृतौ ॥

वीरतन्त्रे-: भुक्त्यर्थं सर्वदा कालमादिशैव शिवं यजेत् ।

तच्च स्वधर्मानुष्ठानं न दोषाय प्रकल्पते ॥

अदीक्षितश्चतुर्वेदी शिवलिंगं न संस्पृशेत् ।

दीक्षितश्चापि यो विप्रो भुक्त्यर्थन्तु न पूजयेत् ॥

आत्मार्थं पूजां कुर्यात्परार्थं न्नैव पूजयेत् ।

सन्ताने-: अदीक्षितोपि यो विप्र षण्मासन्तु शिवं स्पृशेत् ।

सोपि देवलकं प्रोक्त सनार्हो देवपूजने ।

दीक्षितश्चापि यो विप्रः स्वार्थं वत्सरत्रयात् ।

पूजये यदि देवेशं सोपि देवलको भवेदिति ॥

षट्सहस्रिकायां आद्येकारिणामेषां मध्ये कश्चिद्विशेषो स्वाचितः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्यथा-: अत्र कश्चिद्विशेषोऽस्ति चललिंगार्चने सुत।
पूजाकार्यं तु सर्वेषां द्विजानां शिवयोगिनाम्॥
त्रयाणामपि वर्णानां न च शूद्रान्त्यजातिषु।
शैवाचारक्रिया युक्ता शूद्रास्ते मांसवर्जिताः॥
माहवतन्त्रमुखाचार्यावर्ये विप्रे तु दीक्षिताः।
शिवभक्तास्तु ये तेषां पूजाकार्यं न्यथा नहि॥
अंशुमत्यात्मार्थपूजायाम्-:
त्रैविध्यमुक्तयजनं त्रिविधं प्रोक्तमुत्तमम्।
मध्यमाधमम्। केवलं शिवमन्त्रैस्तु यजनं चोत्तमं भवेत्॥
वैदिकैः शिवमन्त्रैस्तु यजनं मध्यमं भवेत्।
केवलं वैदिकैर्मन्त्रैर्यजनं चाधमं भवेत्॥
केवलं शैविकैर्मन्त्रैर्यजेदात्मार्थमुत्तमम्।
तथा कामिके-:
उत्तमं मध्यमं नीचं त्रिविधं प्रोक्तमर्चनम्।
केवलं शुद्धशैवार्थैर्मन्त्रैरुत्तममुच्यते॥
मध्यमं शैववेदार्थैरधमं वैदिकैर्मतम्।
शैवमन्त्रसमो मन्त्रो नास्तीति भुवनत्रये॥
तत्रापि मूलमन्त्रैस्तु बीजाः श्रेष्ठ उच्यते।
डावमार्गे कार्यत्वयमर्थोऽनुसन्धेयः। न्यायसाम्यात् तत्रैवा-
ग्निकार्ये-: वैदिकं मिश्रकं शैवमग्निकार्यं त्रिधास्मृतम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



केवलं विहितैर्मन्त्रैर्विहितो वैदिको भवेत् ।
मन्त्रैर्वैदिकशैवैस्तु विहितं मिश्रमुच्यते ॥
केवलं शिवमन्त्रैस्तु विहितश्शैव उच्यते ।
त्रिभिः परिधिभिश्चोर्ध्वं स्समिद्भिस्संयुतश्च यः ॥
वैदिकाग्निस्समुद्दिष्टो मिश्राग्निस्तूभयात्मकः ।
चतुष्परिधिभिश्चैव शास्त्रेस्मिन् संप्रकीर्तितः ॥
प्रणीता ब्रह्मकूर्चेन संयुक्तो वैदिकस्मृतः ।
तथैव मिश्रवह्निस्तु शैवस्ताभ्यां युतो न वा ॥

विजयोत्तरे –

शैवानामेव मन्त्राणां होमप्रोक्तश्शिवानले ।
नान्येषां प्रागतस्तत्र शिवाग्निर्यश्शिवात्मजः ॥
मन्त्रा ये वैदिकाद्याश्च त्रिधा वेदादिचोदिताः ।
शिवानले नियुक्ताश्चेत्सहो तु त्रिपताकं कृत ॥
आस्मिंश्च वासरे वाच्या हव्यकव्यादि भूतले ।
अवाहितं शिवे होम इति शास्त्रार्थ निर्णयः ॥

सन्ताने – कौशिकः काश्यपश्चैव भारद्वाजस्तथैव च ।
गौतमश्चैव देवर्षि अत्रिपुत्रं पराशरः ।
एषां कुलेषु सञ्जाता उपस्थानादि कर्माणि ॥
वैदिकैस्तान्त्रिकैर्युक्तान् क्रियास्सर्वा समाचरेत् ।
101a तान्त्रिकेण विना यत्तु शिवदीक्षा च निष्फलाः ॥

(दी ?)

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्माद्वैदिकतन्त्रेषु शिवमन्त्रान्समाचरेत् ।
क्षत्रियश्चैव वैश्यश्च तद्वदेव समाचरेत् ॥
केवलं शूद्रजातिस्तु आगमोक्तं समाचरेत् ।
इतरेषाञ्च शैवानां तूष्णीमाचार इष्यते ॥

तथान्यत्र: वैदिकं ब्राह्मणानान्तु राज्ञो वैदिकतान्त्रिकम् ।
तान्त्रिकं वैश्यशूद्राणां सर्वेषान्तान्त्रिकन्तु वा ॥

षट्सहस्रिकायाम् +: पूजा विधौ विशेष उक्तः । अत्र पूजा विधानञ्च कथ्यते शृणु षण्मुख ।

ब्राह्मणानां नृपाणाञ्च पूजाकर्म निगद्यते ।
~~[x अष्टत्रिंशत्कला न्यासं शिवगायत्रीमेव च ॥~~
~~वामादिशक्तिमन्त्राणि हित्वा सर्वं समाचरेत् । x]~~

~~सुप्रभेदे~~: पञ्चब्रह्मषडङ्गानां न्यासः प्रोक्तस्ततस्ततः परम् ।
अष्टत्रिंशत्कला न्यासं श्रीकण्ठाद्यास्ततः परम् ।
वामाद्यष्टशक्तयश्चापि शिवगायत्रीरिष्यते ॥
वैश्यानां पादजानाञ्च पूजाकर्म निगद्यते ।
अष्टत्रिंशत्कला न्यासं शिवगायत्रीमेव च ॥
वामादिशक्तिमन्त्राणि हित्वा सर्वं समाचरेत् ।

सुप्रभेदे: प्रणवेन समायुक्तञ्जपकालो तथोच्यते ।
तदा षडक्षरं प्रोक्तं स्त्रीशूद्राद्यैश्च वर्जितम् ॥

कामिके: शूद्रस्यापि गृहस्थस्य नित्येष्टा विधिकारिता ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्रापि नादरहितैर्मन्त्रैरेव तु पूजयेत् ।

अंशुमति- उत्तमादि विभेदेन प्रजार्थे विद्ध्युत्तमम् ॥

आत्मार्थं पूजयेद्विद्वान्यथा शक्त्यानुरूपकम् ।

द्वारादि चण्डपर्यन्तं यजनञ्चोत्तमं भवेत् ॥

द्वारादि च निवेद्यान्तयजनं मध्यमं भवेत् ।

स्नानञ्चैव निवेद्यञ्च यजनञ्चाधमं भवेत् ॥

सर्वोपचारकर्तव्यो विशेषः कश्चिदस्ति हि ।

नित्योत्सवञ्च भोगांगं सायं रक्षाविधानकम् ॥

उपसन्धिं विना कुर्यादात्मार्थ यजनं क्रमात् ।

चललिंगपूजायामंगप्राधानिकत्वेन द्वैविध्यं कामिके प्रदर्शितम् । तद्यथा

चलञ्च द्विविधं प्रोक्तमंगप्रधानिकंत्विति ।

च्चितप्रतिम ईशानां पूजार्थं तन्त्रकर्मके ॥

पूजितं त्वंगमित्युक्तमन्यत्प्राधानकं मतम् ।

अंगञ्च यथा पूजा यत्काले शास्त्रचोदिता ॥

नित्योत्सवा च संयुक्ता तथा तस्य क्रिया भवेत् ।

अन्यस्य नृत्तशुद्धञ्च तद्वन्नित्योत्सवादिकम् ॥

एवमुक्त्वान्यत्प्राग्वदुद्दिष्टमात्मार्थे तद्विशिष्यते ।

अस्मिन्नात्मार्थ यजने उपचारेषु कर्तव्यं परिच्छिद्यते ।

तद्यथा सुप्रभेदे- दीपान्तं वा हविष्यान्तं आत्मार्थे तु परार्थके ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सामान्यमिदमाख्यातं परार्थे तु विशेषणम्।
नित्योत्सवञ्च नित्याग्नि यजनं पादुकार्चनम्॥
नीराजनं रजन्याञ्च गीतं नृत्तञ्च वाद्यकम्।
तेषु कुर्याद्यथाशक्त्यं लिंगे स्थावरसंज्ञके॥
उक्तेष्वेतेषु सर्वेषु विना नित्योत्सवं ततः।
पादुकाभ्यर्चनं त्यक्त्वा शेषस्यात्मार्थमाचरेत्॥

अजिते-: न द्वारपूजा कर्तव्या न चण्डेश निवेदनम्।
नामन्त्रण हविस्तत्र नित्योत्सवमेव च॥
महा घण्टा च नोद्दिष्टानातिरस्करणे क्रिया।
रुद्रनृत्तविधिर्नोक्तः सूर्यं विघ्नं गुरुं पुनः॥
संपूज्य यजनं कुर्यात् आत्मार्थं मन्त्रवित्तमः।

अत्र द्वारपूजा निषेधः पुनः भावित द्वार पूजा धान निषेधः भावित द्वारपूजाया सर्वत्र विधानात्। अंशुमति-:

द्वारादि चण्डपर्यन्तमुत्तमं त्विति कीर्तितम्।
द्वारादि च त्रिवद्यान्तं मध्यमं परिकीर्तितम्॥

एवं चण्डेश निवेदनिषेधोऽत्युह्यः। वातुले च्चत्वारिंशोपचाराः प्रतिपादिताः। यथा-:

आवहनासनार्घ्याणि स्थापनं स्वागतन्तथा।
सान्निध्यं संनिरोधञ्च अंगप्रत्यंग कल्पनम्॥
पाद्याचमनादर्घ्येण गन्धपुष्पैस्तथैव च।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



धूपदीपैस्तत स्नानं वस्त्रञ्चैवोपवीतकम्।
गन्धपुष्पं तथा धूपं दीपं नीराजनं तथा ॥
भूषणासनाद्यञ्च मुद्रा दर्शनमेव च।
आवृत्त्यार्चन नैवेद्यं होमादिबलिदानकम् ॥
समाधिञ्च जपस्तोत्रं प्रदक्षिणनमस्क्रियां।
चुलुकोदप्रधानञ्च प्रस्तकाराधनन्तथा ॥
अर्घ्यमाचमनञ्चैव विसर्जनमिति स्मृतम्।
चत्वारिंशोपचारैस्तु आत्मार्थे देवपूजनम् ॥
तथा योगजे—:
आत्मार्थमुपचारञ्च अहं वक्ष्ये शृणुष्विह।
आवाहनं स्थापनं च स्वागतं संनिरोधनम् ॥
अंगप्रत्यंग कल्पञ्च पाद्यमाचमनार्घ्यकम्।
गन्धपुष्पञ्च धूपञ्च दीपस्नानं तथैव च ॥
वस्त्रोपवीतं गन्धञ्च पुष्पन्धूपञ्चदर्पणम्।
नीराजनं भूषणञ्च गीतं नाट्यं तथैव च ॥
मुद्रादर्शनमेवोक्तमावृतार्चनमेव च।
नैवेद्यं होमकर्माथ समाधिर्मन्त्रजापनम् ॥
प्रदक्षिण नमस्कारश्चुलुकाचमनीयके।
101b चत्वारिंद्विधानेन आत्मार्थे देवपूजने ॥
अजिते काल नियमः प्रतिपादितः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ईशार्थे स्यादियं पूजात्वात्मार्थन्तु जनार्दन।

एककालं द्विकालं वा त्रिकालं वा विधीयते॥

तथा कारणे-: द्विकालं चैककालं वा आत्मार्थं संप्रपूजयेत्।

आत्मार्थं यजनं कार्यं यत्नेनान्यत्र सन्ध्ययः॥

पाद्याचमनार्घ्यं कल्पयेत् पूर्ववत्क्रमात्।

सौरार्चनादि चण्डान्तमात्मार्थं यजनं कृतम्॥

स्वायंभुवे-स्वायंभुवे द्विसन्ध्यां वा त्रिसन्ध्यां वा चात्मार्थं तु समाचरेत्। निःश्वासकारिकायाञ्च तुर्वापि कार्येषु पूजा विहिता यथा-: एककालं द्विकालं वा त्रिकालं वार्धरात्रकम्।

पूजयेत्तत्रशम्भुं नित्यमेव गृहीतया॥

कालोत्तरे तु-: प्रातरादिषु कालेष्वेव पूजां कुर्यामिति नियमवतास्तमयादि घटिका त्रयादूर्ध्वं नैव पूजा कार्या। तदारंभश्चार्धास्तमितमानौ कर्तव्यः। तस्यापि रात्रौ नैमित्तिक पूजां दोषदेत्युक्तन्तद्यथा-:

त्रिकालं पूजनं येषां तेषां सार्धाकमण्डले।

प्रारब्धा न भवेत्पूजा यावत्स्याद्घटिकात्रयम्॥

तदूर्ध्वन्नैव कुर्वीत लीनेन्दु ग्रहसंक्रमैः।

मन्त्रसाधनकाले च कृष्णाष्टम्यादि पर्वसु॥

शिवरात्रिव्रते चैव रात्रौ पूजा न दोषदा।

मुमुक्षोस्तु न कालानियमः। तदुक्तं सोमशंभुना-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मुद्धौ स्सर्व दाशस्ता शिव पूजा न वार्यते ।

कामिके : सर्वेषां नियम उक्तः । तद्यथा

स्वयंभू बाणलिंगादौ प्रोक्तेषूक्तं हि वाञ्छितम् ।
स्नानोदक प्रमाणं स्यात् आत्मार्थे तु यथेच्छया ॥
पञ्चामृतं पञ्चगव्यं कलशोदकमेव च ।
स्नपनाद्यपि कथित प्रमाणेन प्रकल्पयेत् ॥

तथा - नैवेद्यञ्च जलं पुष्पं वस्त्रं गन्धं सगन्धकम् ।
पूर्वको मनसा ध्यात्वा संक्षेपात्मार्थ संयुतः ॥
द्रोण तण्डुल नैवेद्यं द्रोण द्रोणाढकञ्जलम् ।
पुष्पन्तु त्रिफलं प्रोक्तं वस्त्रं हस्तप्रमाणकम् ॥
गन्धं चतुष्कलं तत्र प्रस्थ प्रस्थञ्च गव्यकम् ।
घृतञ्च मधुना चैव प्रस्थं प्रस्थञ्च योजयेत् ॥
पायसन्नालिकेरञ्च आत्मार्थे संप्रपूजयेत् ।
पुष्पं गन्धञ्च नैवेद्यं जलं वस्त्रोपचारकम् ॥
इच्छया यजमानस्य आत्मार्थं यजनं कुरु ।

अस्यात्मार्थ यजनस्य कालातिक्रमणमपि न दोषावहम् ॥

उक्तमंशुमति -:

यथा संभवकालेषु यथा संभव नाडिका ।
कालातिक्रमण प्राप्ते प्रायश्चित्तं न कारयेत् ॥

आतुरविषये पूजाविधानं तत्रैवोक्तम् -:

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जनिते द्विक्त सन्तापे व्याधिभिर्निहते सति ।
कार्याणि पादसंशोध्ये व्याध्युपद्रवणादिषु ॥
स्नानहीनन्तथा चैव पादप्रक्षालनन्ततः ।
भस्मोद्धूलनकं कृत्वा दर्पयेद्विशेषतः ॥
अर्चनायामशक्तश्चेत् स्पर्शनञ्चापि कारयेत् ।
एवन्तु मस्तके न्यस्य मूलमन्त्रमनुस्मरन् ॥
स्पर्शने वाप्यशक्तश्चे लिङ्गदर्शनमेव च ।

मेरुतन्त्रे- लिंगस्य दर्शनं वाथ लिंगस्यार्चनमेव वा ।
विद्यते यदि जन्तूनां भवन्ति ते दशाधिपाः ॥

मोहशूरोत्तरे-

देवासुर नरा यक्षा मुनयो वीतमत्सराः ।
लिंगाराधानतस्सिद्धिं गतामुक्तिञ्च शाश्वतीम् ॥
इति क्रिया समोपेतां लिंगमाश्रित्य साधकः ।
लभतेऽभिमतां सिद्धिं मोक्षमोक्ष परायणः ॥
पद्मपत्रे यथा तोयं वातोद्धूतं सुचञ्चलम् ।
तद्वत्सुचञ्चलं शक्र प्राणिनं भुवि जीवितम् ॥
अस्थिरं यौवनं शक्र द्रव्यमस्थिरमेव च ।
अस्थिरं पुत्रपौत्राद्यं ईश्वा सारसमायतः ॥
तस्मात्पुत्रकलत्राणि संत्यन्मेत्र धनानि च ।
विहाय मोहजालानि कुर्याल्लिंग परिग्रहम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा कामिके-:

निस्सारे सारमार्गणः।

मनुष्ये कदलीस्तंभे ~~धारण कृत्वा सकलीकृत्य~~

~~रुद्राक्षमालाया वपुषि कृत्य सामान्यार्घ्य~~

यः करोति सर्मं मूढो जलबुद्बुद संनिभे।

अद्रिर्वसुमतीनाशं उदधिर्देवतानि च॥

फनः त्ररव्यः कथं नाशं मर्त्यलोको न यास्यति।

अथ पूजाक्रमः-: आचम्य भस्मधारणं कृत्वा सकलीकृत्य रुद्राक्षमालाया वपुषि कृत्य सामान्यार्घ्यपात्रमस्त्रेण संशोध्य निरीक्षणादिभिस्संस्कृत्य त्रिपाद्यान्यस्य तन्मूलमध्यमाग्रवलयेषु ब्रह्म विष्णु हर शक्तिरभ्यर्च्य हृदयेन वौषडन्त्य रुद्रतोयेनापूर्य प्रणवेन सप्तधा दशधां वाऽभिमन्त्र्य। रक्षावकुण्ठनामृतीकरणानि विधाय तेनार्घ्योदकेन वर्धिमद्द्वारमस्त्रेण संप्रोक्ष्य द्वारपालान् न्यसेत्। सूक्ष्मे-:

आचम्य सकलीकृत्य पूर्ववद्भस्मधारणम्।

सर्वज्ञानोत्तरे-:

अलं कृत्य स्वकं देहं शिवमन्त्रैर्यथा क्रमम्।

शिवभूतस्य दीक्षात्मा शिवस्यार्चनमारभेत्॥

कालोत्तरे-: ग्रहणे विषुवे चैवायने संक्रान्तिकेऽपि च।

दर्शे च पूर्णमासे च पुण्येषु दिवसेषु च॥

अर्चने होमकाले च स्वजन्मदिवसे तथा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रुद्राक्षं धारयेन्नित्यं सर्वपापक्षयो भवेत् ।
ब्राह्मणाः क्षत्रियाश्चैव वैश्य शूद्रास्तथैव च ॥
102a चातुर्वर्ण्यन्तु रुद्राक्षान्तत्तज्जाते तु सिद्धिदम् ।

यथा पुराणे –:

तत्रापीनोत्तरन्नीलध्रार्यमाणमथान्तरैः ।
अधारणे धारणे च नरकाभीष्टदृक्तः ॥

रुद्राक्षान् कण्ठदेशे दशन परिमितान्मस्तके विंशति द्वौ षट्षट्
कण्ठप्रदेशे करयुगलगतान्द्वादशान्द्वादशैव ।
बद्धोरिन्द्रोः कलाभिः पृथुगुणग्रथितश्चैकमेकं शिखायाम् ।
वक्षस्यष्टाधिकं यं कलयति शतकं स स्वयं नीलकण्ठः ॥

कालोत्तरे-: रुद्राक्षान्धारयेत्स्त्रीणां दीक्षासंस्कार संयुतः ।
यथाविधि दीक्षयित्वा पश्चान्मन्त्रेण धारयेत् ।

व्योमव्यापीति मन्त्रेण-:

ईशानेन शिरोधार्यं कंठे तत्पुरुषेण च ।
अघोरेण गले धार्यं हृदयघोरेण धारयेत् ॥
बीजमुखेरधोरे वा हस्ते चैव तु धारयेत् ।
व्योमव्यापीति मन्त्रेण शतार्द्धमालाञ्च धारयेत् ॥
क्रिमिदष्टच्छिन्नभिन्नः कण्ठकाद्भिन्न डाव च ।
स्वयमेव तु तद्वारं पृष्टकञ्च विशेषतः ॥
विपरीतद्वास्मेवन्तु मुखमेकञ्च वर्जयेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षट्दोषं रहितं वत्स रुद्राक्षान्धारयेन्नरः।
एकैकमेकगोदानं फलं ज्ञेयं समासतः।
रुद्रो रुद्राक्षदानेन भवतीति किमद्भुतम्॥

सहस्रे-: कुलिशेन तु संप्रोक्ष्य निरीक्षणादि चतुष्टयम्।
ब्रह्मविष्णु हरादीनां मूलं मध्यमाग्रके॥
वलये शक्तिमभ्यर्च्य पूजयेद्धृतिचालितम्।
प्रणवं सप्तधामन्त्र्य धेनुमुद्रां प्रदर्शयेत्॥

चिन्त्यविश्वसादाख्ये-:
ओंकारं दर्शया कृत्वा जप्त्वा चार्घ्यं प्रकल्पयेत्।

अंशुमति च-: खेटके पश्चिमे देशे द्वारं संपूज्य देशिकः॥

ननु कारणे-: चतुर्द्वारपूजनस्यापि प्रतिपादनादिह पश्चिमद्वार पूजनप्राप्तव्यस्य किं प्रयोजनमिति चेत्। सत्यं तथापि।
उदग्द्वारं न कर्तव्यं इति चिन्त्यविश्वसादाख्ये उद-द्वारस्य निषेधात् दक्षिणद्वारपूजायामुत्तरे नालदोषकृदिति।

मकुटे-: दक्षिणद्वारनिषेधाच्चावाहयेत्पश्चिमद्वारं सिद्धिकाम-स्समाहित इति वचनेन पश्चिमद्वारस्यैव श्रेष्ठंप्रतिपादनाच्च।
पश्चिमं पूजयेद्द्वारं शेषद्वाराणि घट्टयेदिति।
वचनेन पश्चिमेतरद्वाराणां घट्टन विधानाच्च। सूक्ष्मे-त्वात्मार्थ पूजाया।
द्वारं पश्चिममेवं तु नैवेद्यं पूर्ववक्तके।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्युक्तत्वाच्च पद्धति कृद्भिरशचार्यैरशखिलैरपि । पश्चिम द्वार पूजया एव प्रस्तुतत्वाच्चात्मार्थे पश्चिमद्वारपूजनमेव कार्यमिति तदेवेह । प्रस्तुतम् । अथार्चनप्रकारः । सूक्ष्मे -

पश्चिम द्वारमस्त्रेण प्रोक्षयेत्तु शिवांभसा ।
गणेशं दक्षिणेभ्यर्च्य वाग्देवीं वामपार्श्वके ॥
मध्यमे तु महालक्ष्मीं नन्दी गंगाञ्च दक्षिणे ।
महाकालञ्च यमुनां वामपार्श्वे विशेषतः ॥
ऊर्ध्वाधस्संप्रपूज्याथ शिवास्त्री संप्रपूजयेत् ।

ततस्तेषां ध्यानं यथा ज्ञानरत्नावल्याम् -

श्यामं लंबोदरं स्थूलं गजवक्त्रञ्चतुर्भुजम् ।
दन्ताक्षस्रत दक्षे तु पाशमल्लब धृक् ।
विघ्नाणां वामनं त्र्यक्षं द्वारोर्ध्वे दक्षिणे यजेत् ॥
श्वेतां सरस्वतीं बालां सर्वशोभाभिभूषिताम् ।
वाम दक्षकरोत्पात वीणा वादन तत्पराम् ॥
पुस्तकाक्षकरा द्वाभ्यां मन्तरे संप्रपूजयेत् ।
तयो मध्ये महालक्ष्मीं हेमवर्णां विभूषिताम् ॥
श्री कलाब्जधरा दक्षे वामे पद्माभयान्विताम् ।
भृंगारामृत धाराभि स्यज तुण्डाभिषेचनीम् ॥
श्री नन्दिकेश्वरं रक्तं जटायज्ञोपवीतिनम् ।
त्रिशूलाक्षधरं सौम्यं वरदाभयपाणिना ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यजेद्दक्षिण शाखायान्तिणेतश्चन्द्र भूषणम् ।
जनु कन्यां सितां सौम्यां मकरोपरि संस्थिताम् ॥
श्वेतचामर पीयूष कलशासक्त बाहुकाम् ।
यजेदुत्तरतस्तस्य नन्दिनस्सर्वभूषणाम् ॥
कृष्णं पिंगजटं भीम दंष्ट्रा विकटवक्त्रकम् ।
भृकुटी भीषणं पीन नागयज्ञोपवीतिनम् ॥
कपाल खट्वांग धरं सर्प दुन्दुभि वारणम् ।
यजेदुत्तरशाखायां याम्ये तस्याथ यौवनाम् ॥
कूर्मोपरिस्थितां श्याम मर्क पुत्रीं विभूषिताम् ।
सरोजामृत कुंभैतान्धारयन्तीं यजेद्बुधी ॥

चिन्त्यविश्वसारारव्ये -:

आवाहनादि पाद्यन्तं प्रत्येकं पूजयेत्क्रमात् ।
अंगुष्ठानामिकाग्रन्तं मोहौ शिवाय नमोन्तकम् ॥
नेत्रद्वये च विन्यस्य निरीक्ष्ये दिव्य विघ्नकान् ।
सन्त्यज्य दिव्य विघ्नांश्च पुनर्नाराच मुद्रया ॥
तर्जन्यांगुष्ठपूर्वेण ओं अं हं अस्त्राय फडिति ।
अन्तरिक्षग विघ्नांश्च निरस्वे नन्दिकेश्वर ॥
सव्यपार्ष्णि त्रिघातेन भूमि विघ्न विनाशनम् ।
हुं फडन्तास्त्र ~~मन्त्रेण~~ मन्त्रेण विघ्न निस्सारणं भवेत् ।
अथ देहलीं वामशाखायां दक्षिणां संश्रितो विशेत् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दक्षिणे नैव पादेन प्रविशेन्मन्दिरं पुनः।
शिवास्त्रं देहलीमध्ये पूर्ववच्चालनादिकम् ॥

102 b चतुर्वक्त्रश्चतुर्बाहुं प्रदीप्ताग्निसमप्रभम्।
शिवस्याभिमुख - क्ष शूलाभयवराान्वितम् ॥
जटामकुटसंयुक्तमध्येन्दुगतशेखरम्।

इति ध्यात्वा पश्चिमाभिमुखस्सन्नस्त्रं यजेत् ॥ ततः प्रदक्षिणी कृत्य देवदेवमहेश्वरं -

देहली दक्षिणे चैव वास्तुदेव संपूजनम्।
हंसस्थन्तुन्दिलं गौरं सश्मश्रु चतुराननम् ॥
दधानन्दक्षिणे वामे दण्डाक्षस्रुक् कमण्डलुम्।

इत्यभ्यर्च्य। चिन्त्य विश्वसादाख्ये -:

द्वारस्याभ्यन्तरे युग्नत् पूजां कुर्यात्तु दक्षिणे।
रक्तवर्ण - - बाहुं त्रिणेतश्चन्द्रशेखरम् ॥
जटामकुटसंयुक्तं भस्मोद्धूलित विग्रहम्।
रुद्राक्षोपवीतञ्च शुक्लयज्ञोपवीतिनम् ॥
रुद्राक्षं लंपमालाञ्च हस्त -लान्तथैव च।
ओं हां श्रीञ्च स - चार्य नन्दिकेश्वराय नमः॥
एवञ्च नान्दिनं पूज्य सुयशोन्नस्य वामके।
श्यामवर्णां प्रसन्नाक्षीं - - गणनायिकाम् ॥
सर्वभूषणसंयुक्तां सर्वलक्षणसुन्दरीम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्पलन्दक्षिणे हस्ते प्रसारितन्तु परन्ततः।
ओं हां बीजं समुच्चार्य सुयशार्थे नमस्य हि॥
डावं तां पूजयेद्भक्त्या भोगमोक्षार्थ सिद्धये।

विश्वेषणसंहितायाम् –:

स्थावरे जंगमे चापि मन्तरवं स्तु पूजयेदिति।

अथवा समुक्तिं रूपं विभाव्य सकृत्प्रयोगेनार्च्चयेत॥ यथांशुमती –: अथवा द्वारपालानामेकत्रैव तु मद्यमे।

सर्वेभ्यो द्वारपालेभ्यो नम इत्यर्चयेत्सुधीः॥
विघ्नतयन्तु निस्सार्य पार्ष्णि वा ङ्गणि च।
तालत्रयन्तु सन्ताड्य ऊर्ध्वपूर्वं विसर्जयेत॥

तदनु स्नापनोदकादि पूजोपकरण सकल द्रव्य जातं संहृत्य देवस्य दक्षिणे भागे स्वप्रथायासन उदङ्मुख उपविश्यात्मद्रव्य स्थानं मन्त्रलिंग शुद्धिः क्रमेण कुर्यात। तथागमः।

निरक्षणाभिस्शस्त्रैश्च शुद्धानादाय गडुकान्।
लब्धान्ताज्ञं शिवं मौनि गंगादिकमनुव्रजेत॥
प्रभागेनैव जप्तेन वस्त्रपूतेन वारिणा।

कारणे –: वर्णं गन्धरसैर्जुष्टं कृमि कीटादि संयुतम्॥
तद्वारि वर्जयेत्तत्र उष्णितं पल्वलोदकम्।
अशुचि स्नानसंयुक्तं सर्वरसैर्विवर्जितम्॥
वर्जयेत्तु प्रयत्नेन संग्रहेत्तु मनोरमम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नद्यां तटाके कूपे वा संभवन्तु जलं भवेत् ।
अस्तमयं समारभ्य यावत्सूर्योदयान्तकम् ॥
न ग्राह्यं स्नानवारि स्यात्पाद वारि तथैव च ।
इतरद्रव्य जातस्वरूपं द्रव्य शुद्धिप्रकरणे वक्ष्यामः ॥

सूक्ष्मे :- आसनं दर्भदारुञ्च शार्ङ्गञ्चर्ममेव च ।
व्याघ्रचर्म सुरो वापि रत्नकंबलवाससम् ॥ स्नानं फलं निरूपितम् । तद्यथा ।
चतुरश्रायताश्रञ्च सौभाग्यं दारवासनम् ।
वस्त्रासने व्याधिनाशं कंबले दुःखमोचनम् ॥
कृष्णाजिने ज्ञानसिद्धि मोक्षश्रीर्व्याघ्रचर्मणि ।

सूक्ष्मस्वायंभुवे :-
देव दक्षिण दिग्भागे देवस्याराधनाय च ।

सूक्ष्मे च :- देवस्य दक्षिणे भागे यथेष्टमासनं न्यसेत् ॥

क्रिया काण्डे :-
देव दक्षिणदिग्भागे सन्निविष्टे सुखासने ।
उत्तरास्यो विनीतात्मेति सहस्रे च ।
देवस्य दक्षिणे भागे रुचिरासन संस्थितः ।

कारणे तल्लक्षण मुक्तम् ।
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ।
द्वयो जान्वोश्च कृत्वन्तु पादाग्रे चैव संपुटम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इषन्नासाग्रदृष्टिस्तु देह दीर्घञ्च तत्र वै।
रुचिरासनसमाख्यातं सर्वपूजार्हकं विदुः॥

अंशुमति-च-:

श्वेतका दक्षदेशे तु स्वासीनो देशिकोत्तमः।
संपुटीकृत्य जान्वन्तं पादाग्रन्दक्षिणं परम्॥
अधस्सव्यं प्रकुर्वीत रुचिरासनसंज्ञिकम्।
रुचिरासनमाख्यात मासीनश्चासनोपरि॥

यद्वा शिवरहस्ये-

देव दक्षिण दिग्भागे स्वस्तिकासनसंस्थित इति।
न प्राच्यामग्रतश्शंभो नोत्तरे योविदाश्रये॥
न प्रतीच्यां यतः पृष्ठं तद्दक्षे संस्थितोर्चयेत्।

तथा-: न विभोः पुरतास्तिष्ठेन पश्चात्तिय न्तिकेऽपि च।
अघौच ध्वंसमोक्षार्थ न्दक्षे दक्ष स्थितोऽर्चयेत्।
न येषा सांनिधौ न पृष्ठे स्वामिनो भवेत्॥
अर्चयेद्भुक्ति मुक्त्यर्थं दक्षोद्योध हरे गुरुः।
तन्वघोरस्य शान्तस्य कथं पापनिर्दाहकत्वमिति चेत्

बाढम्। तथापि वस्तुस्वभावोऽयं तदुक्तमंशुमति-

हिमं मृदु च शीतञ्च वह्निर्दहते यथा।
तथाघोरः प्रशान्तोऽपि पापनिर्दाह कारकः॥
तस्मादनेन वचसा उत्तराभिमुखो यजेत्।

Center for Shaiva Studies, Pondicherry Collection

ननु दक्षिणभागावस्थितिस्ता पूजकस्य न युज्यते।

103a पश्चिमद्वारपूजाया एवं प्रस्तुतत्वा सदाशिवभट्टारकस्यापि तद्द्वाराभिमुखतया तत्र पूजकस्य भागास्थित्यनुपपत्तेः न च तत्तद्द्वाराभिमुख्यं शिवस्यासिद्धमिति वाच्यम्। कामिके –

यस्यान्दिशि भवेद्द्वारं तां प्राचीन्तु प्रकल्पयेत।
लिङ्गस्याभिमुखं यत्तु द्वारं तत्पूर्वमिष्यते॥

तत्र तत्पुरुषं वक्त्रं मूर्धन्याभिमुखं भवेत्।

इत्युक्तत्वादिति चेन्न तस्य कामिकवचनस्य परार्थविषयत्वा-दुक्त दुत्तरत्रैव –: बलिपीठं वृषं खलं तद्द्वाराभिमुखं भवेत्। इति वचनात्। परार्थ एव बलिपीठार्च्चन विधानात्। आत्मार्थे तु द्वारस्य यात्किञ्चिद्दिङ्मुखत्वेपि देवस्य पूर्वाभिमुखत्वं साधकस्य उत्तराननत्वमेव श्रीमुखबिंबे दीक्षादिषु घटेशस्य प्रतीच्याञ्चिन्तयेत। गुरुं ईशान्तत्पुरुषं वान्तं नित्यं नित्ये पुराननम्। श्री बृहद्भार्गवादौ ध्यायेत्। सदाशिवन्नित्यप्राङ्मुखेशास्य वक्षसे दीक्षादौ कलशान्तमेव प्रत्यगाननमिति। लक्ष्मी केशवसंवादे।

नित्ये नैमित्तिके काम्ये सर्वाधिकरणस्सदा।
शिवः पूर्वाननो लक्ष्मी प्रत्यङ् पृष्ठकलाननु॥

श्री करणो द्योतादौ प्राङ्मुखावीशपुरुषावघोरो दक्षिणामुखम्।

नित्यं साम्याननो वाम सद्यः पश्चान्मुखस्स्मृतः॥
नित्यवत्पश्चिमद्वार प्रविश्यारत्तमुदुंबरे।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ब्रह्मस्थाने न्यसेत्कुम्भं वास्तुनाथाय सोदकम् ।
आगमानामनेकत्वात् स्वस्वाम्नाय विधिरिष्यते ॥
सर्वाधिकरणश्शंभुस्तस्मात्पूर्वाननो मतः । इति सिद्धान्त वचनम् । तथागमश्च ।
देवस्य प्रसादो भवतु यथा काश्यकामम् ।
तत्वरूपाणि मुखानि तु न जहाति पूर्वादिदिक् संस्थाम् ॥
लिंगं वा प्रतिमा वा क्रियतेन्यया यया ककुभा ।
तस्यां तस्यां यज्वा यजेत शिवमुत्तराभिमुखः । सूक्ष्मे च । आत्मार्थ पूजाप्रकरणे द्वारं पश्चिममेवन्तु नैवेद्यं पूर्ववक्त्रके ॥ इत्याशंका पूर्वकम् । ज्ञानरत्नावलीकारैराचार्यैरीशस्य पूर्वाभिमुखत्वं बहुसंमतिभिः । प्रतिपादितम् । ननु द्वारस्य पश्चिमत्वे पि द्वाराभिमुखस्य परार्थ विषयता व्यवस्थापने आत्मार्थे देवस्य द्वाराभिमुखं मा भवतु पूर्वाभिमुखत्वं न सहामहे किन्तु दक्षिणाभिमुखत्वमेव वदामः । तथाहि सर्वेष्वप्यागमेषु साधकस्योत्तराभिमुखत्वं विवादेन प्रतिपादितम् । तथा च ।
स्थाण्डिले चललिंगे च साधकाभिमुखश्शिव । इत्यादि वचनाद्दक्षिणाभिमुखत्वमेव वदामः सिद्धमेव । इदञ्च देव दक्षिणामूर्तित्व माशंका पूर्वक मृगेन्द्रपद्धति व्याख्याने समुत्थित मिति चेन्न । साधकाभिमुखवचनस्य दीक्षायां नैमित्तिक पूजा विषयत्वात् । तत्रैव साधकाभिमुखस्य बहुशः प्रतिपादितत्वात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



न च तन्वाद्यस्य नित्यार्चनेपि प्रसंग इति वाच्यं अत्र विभोः
परास्तेष्टेदित्यादि निषेधात् अत एव तन्निषेधस्तत्र नैमित्ति-
केन प्रसरति तत्र तस्याभिमुख्य वचनबाधात् । किञ्च
नित्ये नैमित्तिके काम्य इति वचनात् सदा देवस्य पूर्वा-
ननत्वमेव न चानेनैव वचनेन दीक्षायामप्याभिमुख्य न स्यादिति
वाच्यम् । अस्य वचनस्य यत्र नैमित्तिके संक्रमपूजादौ
साधकाभिमुख्य वचनसहस्रेण नित्यार्चनेपि साधकाभिमुख्यं
प्रतिवादयन्तं पद्धतिव्याख्यानकारं न प्राच्यामित्यादिनिर्वचन
प्रकरणसिद्धनिषेध एव परिहरति न चास्य निषेधस्य पूर्व
द्वारकास्थिरलिंगविषयत्वं तेन प्रतिपादितमिति वाच्यम् ।
अंशुवन्तन्त्रा दावात्मार्थ पूजाप्रकरणे स्थितस्य वचनस्य
परार्थविषयतया वक्तुमशक्यत्वात् । यत्तु मण्टपकुंभेशदृष्टा-
न्तेनरक्षस्य मण्टपाभिमुखत्ववद्रक्ष्यसाधकाभिमुखत्वमुक्तन्त - - नहि
तत्र देहस्य मण्टपाभिमुख्यमण्टपरक्षाणाय किन्तु वचनादेवार्था
द्रक्ष्यसिद्धेः तदाहि मुख्य भावेपि तद्रक्ष्यत्वानपायात् अन्यथा
परार्थे द्वारा तदपि दक्षिणामूर्ति वा - - - यघोरवक्त्र सांनिध्यश्चत
दक्षभागावस्थान विधानमात्रपरं न देवस्य दक्षिणमुखत्व प्रति-
पादकन्त व्याख्या - - लेक्षद्वयाध्यायिभिस्तस्या प्रतिपादनात्
यत्तु श्रीमद्रौरवप्रविवेक मुद्राप्रकरण श्रीमत् - - - शंभु
पद्धतिगताभ्यां तदनुग्राहकत्वेनाभिमुखी भावोविशिष्टं सांनिध्यं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सादरं संमुखीभाव आवाहन ... मिहोच्यत इति वचना-भ्यामावाहनार्थं व्याख्यानाभ्यां [संग्रहणसावधानता कग्रहणमेवा-वाहनं संमुखीबाधकाभावः उक्तं रुद्राख्यायां किंचिदस्मिन् विशेषोस्ति ऊर्ध्वाननस्य षण्मुख त्रे साधकाभिमुख्यमुक्तं तदपि ... हृगावाहनस्य परार्थेपि विद्यमानतया साधकाभि-मुख्यप्रसंगात्। तर्हि कोयमावाहनार्थं इति चेत्। उच्यते।

ऊर्ध्वं चिन्ताकुलेशान मुखस्य साधकपूजा ग्रहण-सावधानताकग्रहणमेवावाहनं संमुखीबाधकाभावः। उक्तं रुद्रा-ख्यायाम्। किञ्चिदस्मिन्विशेषोस्ति ऊर्ध्वाननस्य षण्मुख। मूलं सञ्चिन्त्य षण्मुख। मूलं सञ्चिन्त्य तद्वक्त्रं पराशरवमिति स्मृतम्॥

पूजाकाले तु तद्ध्यात्वा अर्चितं कर्मवक्त्रवत्।
डवं संकल्प्य विधिवत् पूजान्ते पूर्ववद्भवेत्॥

-103b न चेतावतां साधकताभिमुख्यमीश सोमशंभु पद्धति व्याख्याने कृतिरावाहनमित्युक्तं तदपि विरुध्येत। यत्तु

ईशानस्य तदाकार्यं मूलद्वारावलोकनम्। इति वचन बलेन पश्चिमद्वारपूज ..ताम्। पश्चिमाभिमुखत्वमीशस्य प्राप्त-मिति भणितं तदपि न द्वाराभिमुखस्य परार्थविषयतया व्यव-स्थापितत्वात् यत्तु सर्वासु पद्धतिषु चललिंगविषये पूर्वाभि मुखत्वविधानदर्शना तद्विषये पूर्वाभिमुख्य बट्कल्वे उक्तानां वचनानां स्थिरलिंग ~~सोऽयमनेकशः। ऊर्ध्ववक्त्रे तु दातव्यं~~

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विषयत्वेन चरितार्थत्वमिति तदपि न शोभावहं सर्वासु पद्धतिषु नित्यार्चने साधकाभिमुख्य विधानादर्शना-तदाभिमुख्य दर्शकत्वेनोक्तानां वचनानां नैमित्तिकार्चन विषयतया चरितार्थत्वे ... पत्तेस्तदभिलषित भाव प्रसंगात। तत एवैतत्पद्धतिव्याख्याननिरूपितं युक्तिभिस्साधकाभिमुख्यं विदिन विधिनादर्शना-
~~तदाभिमुख्य दर्शकत्वेनोक्तानां वचनानां नैमित्तिका प्रदर्शितम्।~~
प्रतिपादितं पूजास्तवव्याख्यानमभ्युपेक्षणीयं किञ्च देवं दक्षिण-मुखत्वं तत्पुरुषमुखेन ... शानमुखेन वा नाद्यः तदानीमघोरस्या न्यतोपगमे तदधीनपापध्वंस फलता दक्षासनस्य भज्यते ... न्त वचनेष्टापत्तिः। दक्षिणाभिमुखत्व वैफल्यापत्तेः। अथ भक्ष्य भोज्यान्नपानादि ... शोष्यमनेकशः। ऊर्ध्ववक्त्र तु दातव्यं यत्किञ्चिद्विधिचोदनमिति वचनात्। ईशान मुख एव साध-काभिमुखे नैवेद्यमास्त्विति चेन्न नैवेद्यं दक्षिणहस्ते दद्यात्। पानीयमुत्तमामिति वचनेन नैवेद्यस्य दक्षिण हस्त ... तव्यतया प्राक्दिगवस्थित तत्पुरुष मुखदेशावस्ते तदेव हस्तस्य दक्षिण दिग्भागमेतदनुपपत्तेः। न च प्रागवस्थिते हस्तेनैव दक्षिण दिक् प्रसारित नैवेद्यस्य दक्षिणाभिमुखेशानवक्त्र निक्षेपसंभ-वतीति वाच्यादेवस्य तदा भोजने हस्तक्लेशेन साधकवैमुख्यापत्तेः अपिचेशानवक्त्र शिरोरूपतया तत नैवेद्य दानपक्षो लौकिक विरुद्धः। नहि लोकाश्शिरसा भुञ्जन्ते किन्तु मुखेनैव

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्पुरुषस्य साक्षान्मुखरूपतया शिवादिचतुस्सादा-
ख्यानामपि व्यापकीभूतकर्मसादाख्यतया च तत्रैव नैवेद्यदानं
साधीयः। सूक्ष्मे आत्मार्थयजनप्रकरणे तत्पुरुषमुख एव नैवेद्य-
प्रधानविधाना तस्मान्नित्यार्चने साधकाभिमुखस्य मुखतो वचना-
भावाद्दर्शितयुक्तीनामन्यथोपपत्तेः नैवेद्यदानविशेषाच्च मृगेन्द्र-
पद्धतिपूजास्तवव्याख्यातृभ्यामुक्तं देवस्य दक्षिणमुखत्वमुपेक्षणी-
यम्। ननु स्थण्डिले लि चललिंगे च साधकाभिमुखवीव।
इति वचनाद्दीक्षाविधमित्युक्तमनुपपन्नं तत्र चललिंग
प्रसक्त्यभावादिति चेन्न तत्र चललिंगपूजायामपि दोषा-
भावात्। अन्यथा तत्र वक्तव्यं किमनेन वचनेन देवस्य
साधकाभिमुख्यं साधकावस्थानात् पूर्वं प्रतिपाद्यते। अनन्तरं
वा नाद्यः तदानीं साधकस्यैवाभावेन तदाभिमुख्य सिद्धेः न
द्वितीयः साधकावस्थानानन्तरमेव तदभिमुखस्य देवस्य
पुनरावाहनेनाभिमुख्य वैफल्यापत्तेः। न चावाहनार्थं
व्याख्यानशदाभिमुखस्य सावधानताकारणाद्यन्य इवार्थः।
न तु तद्दिङ्मुखत्वमिति वाच्यं तद्यस्यापि मुख्य वचनस्याव-
न्यार्थत्वस्यैवौचित्यात् अन्यार्थत्वस्वीकारे च भवदुक्ति
विरोधाच्च। अथावाहन व्याख्या वचनमेतद्वचनस्यैकार्थक-
तथा च तथापि वचनद्वयेनाल्यावाहनानन्तरं साधकाभि-
मुख्यं प्रतिपाद्यत इति चेत् हन्त तस्यावाहनात् पूर्वं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूर्वमुखत्वमस्मादिष्टमायातं न च ममापी दमिष्टमेवावाहनानन्तर-
मेवाहं साधकाभिमुखत्वं वदामि इति वाच्यं पूजारंभकाले
पूर्वमुखस्त्वेन स्थितस्य पुनरावाहनेन साधकाभिमुख्य करणात्
अन्यथा परार्थेपि साधकाभिमुख्य प्रसंग इत्युक्तं न परार्थे
परेषामेवानुग्राह्यत्वान्न साधकाभिमुख्यमावाहनेन आत्मार्थे तु
साधकस्यैवानुग्राह्यतया तदभिमुखत्वमीति वाच्यम्। तर्हि
परार्थे सकलदिग्गतानामनुग्राह्यतया अनियत दिगाभिमुख्यः
प्रसंगः किञ्चावाहनात् पूर्वं पूर्वमुखत्वे पूजारंभे दक्षिणमुखत्व
प्रतिपादककिरणवचनादिति विरोधः। अथ किरणवचनेन पूजा-
रंभे दक्षिणमुखं साधयामीति मतं तर्ह्यावाहनेन साधकाभिमुख्य
प्रतिपादकवचनोदाहृति विरोधः। दक्षिणमुखस्य देवस्य पुन-
रावाहनेन दक्षिणमुखत्व ~~किरणवचनेन पूजारंभे दक्षिण~~ करण-
वैकल्यात् तन्यास्ते मुदाहरणम् विरोधः। आवाहनार्थोप्यन्य
एव स्वीक्रियते। किन्तु किरणेनैव दक्षिणमुखत्वं साधयामीति
चेन्न तस्य दक्षभागावस्थानमात्रपरत्वमित्युक्तत्वात्। अन्यथा
ततो वोत्तरत दत्वा यावरणान्विष्ट्वा साध्यानां पूजयेत्ततः।
तदंगैरंकितं कृत्वा प्रणवे कमलासने। शिवस्य दक्षिणे भागे
10५a विभवेन तु पूजयेत्॥ मृगेन्द्रे-:

याम्याब्जपत्रे प्राक्पश्चाद्भागयोस्तत्र विग्रहः।
अघोरलोचनज्योतिर्मध्येनान्यत्र कुतचित्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्माद्देवस्य नित्यार्चने दक्षिण मुखत्व साधकवचनाभावात् सहजं पूर्वमुखं देवस्य सकल शैवैरभ्युपेयमंगीकृतञ्चेदं लक्षाध्यायाध्यायी प्रभृति शैवसंप्रदाय प्रवर्तकैः क्रियापद्धति दुराद्धरैशाचार्य चरणैस्तस्मात् परार्थे देवस्य द्वाराभिमुखत्वं आलाये तु नित्यार्चने पूर्वाभिमुखत्वं नैमित्तिका काम्येषु पूर्वमुखत्वमुत्सर्ग दीक्षादि नैमित्तिकेषु विशेष वचनैर्दक्षिणमुखत्वादिरवाद इति सर्वं सुस्थम् । चिन्त्य विश्वसाराख्ये–:

पञ्च शुद्धिक्रमेणैव पूजयेच्छिवमव्ययम् ।
आत्मशुद्धिं पुरा कृत्वा स्थानशुद्धिमनन्तरम् ॥
द्रव्यशुद्धि तृतीय स्यात् चतुर्थं मन्त्रशोधनम् ।
पञ्चमं लिंगशुद्धि स्यादयं शुद्धिक्रमोदिता ॥

वातुले–: यो वेत्ति पञ्चशुद्धिस्तु स पूजां कर्तुमर्हति । अत्र भूतशुद्ध्यन्तर्यजन हवन ध्यानसमाधीनामात्मशुद्धिहेतुत्वात् प्रथमभूतशुद्धिरुच्यते । ननु पूर्वमेव दीक्षाया षडध्वगर्भितानि भुवानि शोधितान्येव । संप्रति भूतशोधनेन किं साध्यते । सत्यम् । तानि भूतानि द्विविधानि । स्थूलभूतानि सूक्ष्मभूतानि चेति । तत्र तावद्दीक्षावसाने भोग्यकर्माधभोगस्थानानि तत्वरूपानि सर्वेषां व्यापकानि तु । नहि ना पञ्चभिस्तत्वैर्देही बद्धो विधीयते । स्थूल सूक्ष्मविभागेन ज्ञात्वैतानि विशोधयेत् । इति । एवञ्चेद्दीक्षाया प्रयोजनन्तदृष्टं तत्र दीक्षाया अनेक

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जन्मान्तरीयं कर्ममन्त्रैर्दग्धं बीजमिव अविष्यत् कर्म च विष-
य शक्ति वि निरुद्धं येन कर्मणा इदं शरीरञ्जातं तत्कर्मणो-
भोगतो नाशे देहान्ते मोक्षस्यात् । प्रारब्धकर्मणस्सद्यो विनाश
भावात् । उक्तं किरणे-:

जातायां घटनिष्पत्तौ यथा चक्रं भ्रमत्यपि ।
पूर्व संस्कार संसिद्धतथा वपुरिदं स्थितम् ॥
अनेक भविक कर्म दग्धं बीजमिवाणुभिः ।
भविष्यदपिसंरुद्धं येनेदं तद्विभोगतः ॥
देह पाते विमोक्ष स्यात् सद्यो निर्वाणदापि वेदिति ।

तस्माद्दीक्षासंशुद्धस्यात्मनः प्राकृते पञ्चभूतात्मके अशुद्धे
देहे मायीय व्यक्तिशक्ति प्रेरितकर्मोपभोगस्थाने वस्थान मयुक्त-
मिति भूतशुध्यास्स देहो मन्त्रमय प्रत्यहं प्रतीक्षणञ्च विधेयः ।
चित्ते स्थैर्याभावात् । उक्तञ्चाचार्यैः ।

~~तस्माद्दीक्षा विशुद्धस्यात्मनस्सुधीः~~ प्राकृते पञ्चभौतिके ।
देहे शुद्धे स्वकर्मोपभोगस्थाने स्थितात्मनः ।
~~कुर्या सा च सदा कार्या तस्थैव न चात्मनः ॥~~
प्रेरितस्य दशाशक्तिभिर्भोग संततौ
~~मन्तत्सर्वं~~ सिद्धान्तशेखरे च स्पष्टमुक्तन्तद्यथा -:
अयुक्तं तदवस्थानं दृष्टपाते यथा मधु । —>
अणुभूतानि शुद्धानि दीक्षाया गुरुणाणुभिः ।
कृतानि पूर्वमेतेषां शुद्धा किं साध्यते धुना ॥
सत्यभूतानि शुद्धानि द्विप्रकाराणि तानि तु ।
अभ्यन्तराणि बाह्यानि देहे चाभ्यन्तराणि हि

तस्मात्स्थाक्तमयं देहं भूतशुद्ध्यात्मनस्सुधीः ।
कुर्यात् सा च सदा कार्या तस्थैर्यं न चात्मनः ॥
ऽमन्तत्सर्वं । सिद्धान्तशेखरे च स्पष्टमुक्तं तद्यथा-:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षडध्वस्तानि बाह्यानि तानि शुद्धानि दीक्षया।
देहस्थितानि भूतानि शोध्यानिस्युर्दिने दिने॥
न शैव दग्ध पाशस्य भुक्तभोग्यस्य चात्मनः।
निर्बन्धसञ्चितांशानि कर्मणो निर्मलात्मनः॥
माता पितृमलोद्भूत देहे स्थानं न युज्यते।
तस्मान्मन्त्रमयः कार्यः क्रियते प्रतिवासरम्॥
... रणाशोधिते देहे शिवस्साक्षात्प्र दृश्यते।
मया मयाति तत्कार्य स्ससाक्षात्त्छेव उच्यते॥
अन्तश्शुचिर्विधातव्या भूतानां देहवर्तिनाम्।
सा शुद्धिर्द्वा ... यत्ता धारणा काल तत्परा<del>कमलोन</del>॥
<del>उच्यते</del>: कालेन शुध्यते भूत व्रातश्शुद्धि विधायकः।

... क्षया स्थूलसूक्ष्मरूपोभय विधशोधने कृते प्रा<del>ब</del> प्रारब्धकम्। मशोधना भावेन तत्प्रसक्तानान्देहाभिव्यक्त शक्तीनां मायात्मिका न ... नेरोधिकीनां विघ्नरूप मलस्वरूपाणां निरोधाय तस्मिन्देहे शिवशक्ते अभिव्यक्तये च प्रत्यहं प्रतिक्षणं भूतशुद्धिर्विधेया। चित्तस्थैर्या भावात्। इतत्सर्वं बालज्ञानरत्नावलीकारैः स्पष्टं प्रतिपादितम्। तद्यथा-

ततोब्जमुकुलं ध्यात्वा सुधा गारि परिप्लुतम्।

ततस्थं चिन्तयेत्कायं दह्यमानं यथा पुरा।
द हो योगाग्निना प्रोक्तो न व्यक्तेः किन्तु कर्मणः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वमन्त्रं प्रसाद्यानां यास्मृता व्यक्तिशक्तयः।
विघ्नरूपा निरोधिन्यास्तासान्दोह इहोच्यते ॥
दाहश्चाप्रसवस्तासां निरोधो वा तदा स्मृतः।
10५b तस्योपायस्य तेनान्य इति तेनायमुच्यते ॥
एवं कृते निरुद्धास्तु जायन्ते व्यक्तिशक्तयः।
रुद्धासु तासु तस्यैव तथैव शिवशक्तयः ॥
आरोप्यन्त्येथमन्त्रास्तु न्यस्यमाने यथा क्रमम्।
स्थानञ्च व्यपुर्याति समाप्ते कर्माणि स्वयम् ॥
अहन्यहनि योगाग्नि संपर्कात्दिव्यैवशक्तयः।
नित्यं मन्त्राम्बुसिक्ताश्च गच्छन्त्युपचयं क्रमात्।
निरुद्धाश्च भवन्त्येवन्नाभिश्च व्यक्तिशक्तयः॥
प्रयान्त्युपचयं शुद्धस्सर्वदोषहताश्च यः।
अपिव्ययाश्च संपूर्णा भवन्त्येव न संशयः॥

ततः तिः प्राणानायम्य पूर्वोक्तक्रमेण करन्यासं कृत्वा पूर्वं मन्त्रगतं रुद्रम्। पूरककुंभकरेचकपूर्वप्राणायामेनास्त्रमन्त्रोणोत्सार्यबाह्येन शिवाधिष्ठितेन वायुना उदरं प्रपूर्य पादांगुष्ठद्वयारभ्य यावद्विधाश्रुतान्तरत ऊर्ध्वं ब्रह्मबिलान्तमेकीभूतां हृत-कण्ठादिष्विवं पिंगलाभ्यासंयुक्तामधोमुख पद्ममुकुलयुक्तां कुण्डलिनीं शक्तिं विभाव्य सुषुम्नामध्ये हुंकारज्वलन्तं सञ्चिन्त्य हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु अधोमुख-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



बास्थित क्रमं वा - - के - - क स्थितं कुंभकेनोक्तं भीतं रेचकेणध -
मुखं कृत्वा ततो मूलाधार प्रदेशे दीपशिखोपमहंकार ध्यानहुं -
फडिति सन्ततोच्चारणेन प्राणायामेन पञ्च पञ्चग्रन्थीन् भित्वा
प्रतिनिवृत्य दक्षिणाध्या वायुं विमुञ्चन् पुनर - - - शिखा -
- - पूर्वप्रदेशे ध्यानपूर्वमुच्चार्य तस्मिन् मनस्सन्निवेश्य
धरकवायुना कृष्टचैतन्यं हृत्कमलाश्रितम् स्फुरत्तारकाकारम्
सान्तबीजये जीवं हृदय संपुटितं हुंकारमूर्ध्नि विन्यस्य
बि - - - हं हुंकार शिखान्तस्थं पुर्यष्टकावच्छिन्नं पुरुषं
तृणाग्रजलबिन्दुभूतमेकाकिनं निरामयं ध्यात्वा कुंभकं कृत्वा
वायुमूर्द्ध्नि प्रवर्तयन् संहारमुद्रया तमादाय क्रमादिकारणत्या -
- - कु - - कोत्। ओं हूं हां हं हां हूं आत्मने नम इति
भोगकर्माविभोगार्थं द्वादशान्तपदस्थे परमकारणे शुद्धस्फटिक
निर्मले ज्योतिरूपे निष्कलशिवे योजयेत्। यथा सूक्ष्मे -

प्राणायामत्रयं कृत्वा भूतशुद्धिं क्रमञ्चरेत्।

कामिके तन्त्रसारे -:

प्राणायामं समासेन कथयामि विशेषतः।
तालैर्द्वादशभिर्जातो द्विगुणो मध्यमो मतः॥
त्रिगुणो ऽन्त्तमः कालः प्रत्येकं रेचकादिषु।
अकारोकारमकारस्त्वक्षराः परिकीर्तिताः॥
रेचयेद्देहकं वायुमरुड्धं वायुव्योमसंस्थितम्। -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शुद्धं वायुं पूरकेण समाहृत्य शनैः शनैः ।
संपूर्णं कुंभवत्तिष्ठेद्रेचयेत्तदनन्तरम् ॥
करन्यासं ततः कृत्वा सुषिरन्देवि मध्यमम् ।
ध्यात्वा ज्वलन्तं हुंकारं प्राणान् संयम्य निश्चलः ॥
फट्कारं तेन तेनैव रेचकेण समन्वितम् ।
पञ्चग्रन्थिं ततश्छित्वा तस्मात्प्रतिनिवृत्य च ।

सर्वज्ञानोत्तरे-:

पूरकेणोपसंहृत्य हृदयेन तु मन्त्रवित् ।
सान्तबीजमयञ्जीवं न्यसहुंकारमूर्धनि ॥
हुंकारस्य शिखान्तस्थं पुरुषं बीजविग्रहम् ।
ध्यात्वात्वेकाकिनं सूक्ष्मं बिन्दुभूतन्निरामयम् ॥

कालोत्तरे-:

आत्मानं योजयेत्पश्चाच्छिवे परमकारणे ।
शिखाग्रे द्वादशांगुल्ये शुद्धस्फटिकनिर्मले ॥
शिवतत्वे परे सूक्ष्मे ज्योतिरूपे तु निष्कले ।
संहारमुद्रया चैव, हृदयेन तु योजयेत् ॥

तथा सुप्रभेदे-

संहारमुद्रयात्मानं शिखाग्रे द्वादशांगुले ।
परमस्थं योजयेद्विद्वान् द्वादशाग्रे क्रमेण तु ॥
न त्वात्मनोपि व्यापकत्वेन गमनासंभवात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुर्यष्टकेनात्तगमनमभ्युपगन्तव्यं तस्यापि शोध्यत्वादात्मन ऽकाकित्वमित्युक्तत्वाच्च अस्यात्मनस्तत् पुर्यष्ट विरहे द्वादशान्तस्थ शिवे योजनं कथं स्यात् । अतो च्यते । शिवशक्त्याधिष्ठितया आत्मन क्रिया शक्त्या सूक्ष्मो देहान्नयनमुपपन्नम् । तदुक्तं समानतन्त्रे-: शक्त्या तु नैव ते जीव इति पुर्यष्टकत्यागे तु मन्त्रबीज वृत्या बिन्दुभूतसान्निधिष्ठात्र्या शिवशक्त्या शिवपदे प्रवेशमात्मनोऽनुसन्दध्यात् । तदुक्तं सर्वज्ञानोत्तरे -: ऽकलक्षांसुयान्तितः ऽकभावसमायुक्तः प्रविशेऽच्छिवमव्ययम् । बीजवृत्या शिवे लीनस्तत्व वृत्या तु तत्ववित् ॥

शोधयेत्तत्वसंघातं भूतानि च परस्परम् ।
शवं बीजवृत्या शिवे लीन सूक्ष्म वृत्या देहरुद्धये ॥

105a संहारक्रमेण स्वेषु स्वेषु कारणेषु पृथिव्यादीनि तत्वानि बिन्दुपर्यन्त तत्व समूहं लयं नयेत् । तद्यथा-

गंधे पृथ्वी रसे जलं रूपेऽग्निः स्पर्शे वायुः शब्दे व्योम इतास्तन्मात्रास्तामसाहंकारे वाक्पाणिपादपायूपस्थानि राजसाहंकारे श्रोत्रत्वक्चक्षुजिह्वाघ्राणानि मनश्च सात्विकाहंकारे स च बुद्धौ सा गुणेष्वगुणतत्वं प्रकृतौ सा रागविद्ये च कलायाम् । पुंस्त्वञ्च कालो नियतिः कला च मायायां विलीनानि विभाव्य शुद्धविद्यातत्वमीश्वरतत्वे तत्सदाशिवतत्वे तच्छिवतत्वे तदव्यक्षोभरूपे बिन्दौ विलीनां भावयेत् । आचार्यैरप्युक्तम्-: गन्धीभूतस्सलिलं रसे हुतवहो रूपमरुत्स्पर्शने

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शब्दे। स्थात्स्वमहंकृतौ पुनरिमास्तन्मात्रिकास्तामसे कर्माक्षाणि च राजसे सह मनो बुद्धौ बुद्धीन्द्रियैस्सात्विके बुद्धौ तच्च गुणेषु सगुणगणे व्यक्ते लयं गच्छति। तद्रागविद्ये च कलां प्रयाति पुंस्त्वञ्च कालो नियतिः। कला च मायासु विद्येशमसौ सदेशं संशक्तिमेवा शिवमेव बिन्दुरिति अत्र शिव शब्देन शक्तितत्व मस्तकस्थ बिन्दुतत्वभुवनमुच्यते। एवं सूक्ष्मदेह शोधनं शक्तानां विस्तारेण कर्तव्यं। अनवसराक्रान्तानां रोगिणाञ्च कर्तव्यम्। तद्यथा - हृदयादि पद्मस्थिति कारणेश ब्रह्मादि पञ्चके शब्द-स्पर्श रूपरसगन्ध बुद्ध्यहंकार मनोरूप पुर्यष्टकं लयं नयेत्।

तदुक्तं सार्द्धत्रिशतिकायाम् -

शब्दस्पर्शरूपञ्च रसोगन्धश्च पञ्चकम्।
बुद्धिमनस्त्वहंकारः पुर्यष्टकमुदाहृतम्॥
यावदेतैर्न निर्मुक्तः कथमुच्येत बन्धनात्।
ब्रह्मणि स्पर्शशब्दौ तु रसं वै केशवे त्यजेत्॥
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहंकार ईश्वरे।
मनो बिन्दुं शिवे त्यक्त्वा त्वेभिर्मुक्तश्शिवं व्रजेत्॥

तदा बाह्यशरीरशुद्ध्यर्थं स्थूलादि पृथिव्यादीनि पञ्चभूतानि क्रमेण परस्परं शोधयेत्।

पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितम्।
चतुरस्रं लं बीजं सद्योजात ब्रह्मणा चाधिष्ठितम्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कारणेश्वरब्रह्मणायुक्तं हृदयमन्त्रेण संनि तन्निवृत्तिकलोपेतं पादादिमूर्द्धान्तं व्यापकं संञ्चिन्त्य ओं हां निवृत्तिकलायै हः हुं फडिति पूरकपूर्वकं सुषुम्ना यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्या दक्षिण नाड्या विरेचयेत्। अतोद्घात लक्षण मुच्यते -:

प्राणेनोच्चार्यमाणेन अपानः पीड्यते यदा।
गत्वा चोर्ध्वं निवर्तेत एतदुद्घातलक्षणम्॥

उक्तञ्च - संनिरोधे कृते सम्यगूर्ध्वं वायु प्रवर्तते।

उद्घात इति चाख्यात स्वेच्छया तु कनीयस इति प्रत्युद्घातं पूरकायस्तयः। प्राणायामा अर्द्धसिद्धा एव यदुक्तं श्रीमत्त - - शतिके -:

एवं पञ्चदशः प्रोक्ताः प्राणायामास्तु गृगताः।
वरुणस्य दशाङ्गे च वारिभूतं विशोधयेदिति॥

कठिनादिस्वभावं विहाय पवनं तदन्वाप्यं मण्डलं शुभ्र इव भा नलाञ्छितम्। अर्धचन्द्रं व बीजं वा देवब्रह्मणाधिष्ठितम्। कारणेश्वर विष्णुना युक्तम्।

शिरोमन्त्रेण संयुक्तं प्रतिष्ठाकलोपेतमपादमस्तक-व्यापकं सञ्चिन्त्य। ओं हां प्रतिष्ठाकलायै हः हुं फडिति पूरकपूर्वसुषुम्नाया यावद्द्वादशान्तं वायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्या विशोधयेत्युद्घात-चतुष्टयेन रसादि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुणचतुष्टयमुत् .. य जलं शिवशक्त्यधिष्ठानवशात् शोषकत्व शक्तियुक्तेन स्वविरुद्धाग्निनाभिभूत न्तदाकारं चिन्तयेत् । ततः वह्निमण्डलं रक्तं .. स्ति क .. ञ्चि .. त्र्यस्रं बीजमघोरब्रह्मणाधिष्ठितं रुद्रकारणेनयुक्तं शिखामन्त्रेण संयुक्तं विद्याकलोपेतं चरणादि मूर्द्धान्त व्यापकं सञ्चिन्त्य ओं हूं विद्याकलायै हः हुं फडिति पूरकपूर्वकं सुषुम्नया यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रति निवृत्या दक्षिणनाड्या विरेचयेत् इत्युद्घात त्रयेण रूपादिगुणत्रयमुत्सार्य वह्निं शिवशक्त्याधिष्ठानबलेन शोधकत्वशक्तियुक्तेन स्वविरुद्धजलेनाभिभूतं तदाकारं भावयेत् । पश्चाद्वायुमण्डलं कृष्णषडस्रं षड्बिन्दुलाञ्छितं य बीजन्तत् पुरुष ब्रह्मणाधिष्ठितम् । ईश्वरेण नेयुक्तं कवच मन्त्रेण संयुक्तं शान्तिकलोपेतं पादादिमूर्धान्त व्यापकम् । संचिन्त्य ओं हैं शान्तिकलायै हः हुं फडिति पूरकपूर्वकम् सुषुम्नाया याव द्वादशान्तं प्राणवायुं प्रेरयित्वा निवृत्य दक्षिणानाड्या विरेच्येत्युद्घात द्वयेन स्पर्शादिगुणद्वयेमुत्सार्य वायुं शिवशक्त्याधिष्ठान सामर्थ्यात् शोधकत्व शक्तियुक्तेन स्वविरुद्धपृथ्वी तत्वेनाभिभूतस्वरूपं तदाकारं भावयेत् । तदन्वाकाशमण्डलं वृत्तधूमवर्णं बिन्दुशक्तिलञ्छितं त्वमत्तलाञ्छनं वाह बीजं नेत्रमन्त्रास्त्रमन्त्र संयुक्त मीशान ब्रह्मणाधिष्ठितं कारणेन सदाशिवेन संयुक्तं शान्त्यतीतकलोपेत पादादिमूर्धान्तं व्यापकं .

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



संचिन्त्यैकोद्घातेन शब्दगुणमुत्सार्य शान्त्या - पम नित्या शुद्ध-
त्वादिरूपं विमुच्य शिवशक्त्यधिष्ठित परं बि - वभिक्षुतं शुद्ध
स्फटिकसंनिभं नित्यत्वव्यापकत्वशुद्धत्वादि - क्त परमाकाश
स्वरूपं भावयेत। तदुक्तं कामिके पार्थिवं मण्डल - तचै-
तास्रं वज्रलाञ्छितम्। लं बीजं ब्रह्मदै - - जात - -
यान्वितम्॥ निवृत्यात्मकलोपेतं ल्लामित्युद्घातपञ्चकम्।

आप्यबिन्दु सिताब्जाङ्कं विष्णुदैवं विबीजकम्।
वामशीर्षकसंयुक्तं कलयो तं प्रतिष्ठयन्॥
युक्तश्चतुर्भिरुद्घातैः श्री मित्या - - - पूर्वकम्।
वह्नेस्त्र्यश्रं सशाशिखं रक्ताहं रुद्रदैवतम्।
रज्ञाघोरशिवा युक्ता विद्यारव्यात्कलयान्वितम्॥
युक्तं तन्त्रिभिरुद्घातैर्दूमित्युच्चारपूर्वकम्।
वायव्यं रसकोणन्तु बिन्दुषट् - - - पितम्॥
ईशाधिपत्यायार्णतं वक्तं कवचसंयुतम्।
शान्त्या युक्तद्विरुद्घातं हैमित्युच्चारपूर्वकम्॥
सादेशाधिष्ठितं हार्णमीशास्त्वातीत संयुतम्।
एकोद्घातं हरमित्युक्त्वा यथा द्यार्न प्रयोजयेत्॥
कृत्वाभीशानमादौ तु देह देहमनन्तरम्।
दहनं वायुभूतानां परस्परविशोधनम्॥

इत्थं निर्वाहकं भूतग्रातस्य गुणक्षयवशात् क्षीणशक्तिकस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भूतसमुदायात्मकस्य आरब्धं शरीरं दोषां दक्षिणपादांगुष्ठोत्थितेन शिवशक्त्याधिष्ठित कालाग्निना हुंफडन्तास्त्रौ दग्धां भावयित्वा पुनस्तद्भस्म शान्तेन वायुना पिण्डीकृत्वा प्लावयेत् । तदुक्तं सुप्रभेदे ११ -:

पदांगुष्ठोत्थिते न्वह्निरेवा बलिदेहं९ इन्धुक्क काष्ठवत् ।
विचिन्त्य भस्मीभूतन्तु पिण्डीकृत्वानिलेन तु ॥
तस्मिन्प्रागुक्तममृतं स्रुवन्तं भस्मनि स्मरेत् ।

यद्वा- अशक्तानां संक्षेपेण भूतशोधनं कर्तव्यं तद्यथा-: ११
तद्देहं पृथिव्यादि पञ्चभूतबीजं ब्रह्मविष्णुभवामुत्पादितांकुरं पूर्वार्जितधर्माधर्ममूलं विद्येश्वरं परिपालितं कलादितत्वसारान्तनमातेन्द्रिय शाखोपशाखं शब्दादि विषयालोचन पल्लवं भाव प्रपञ्च कुसुमं बुद्ध्यध्यवसाय संकल्पफलं पुरुष विहंगोप भोग्यं भोक्तृत्वरसमेवं वटवृक्ष साधर्म्याद्वृक्ष भूतं शरीरमूर्ध्वमूलमधश्शाखं विभाव्य पञ्चमात्रा पूरक पूर्वार्धेन पार्थिवा धारणाय लामित्युच्चारपञ्चकेन पत्रपुष्प फलरहितं स्तब्धं विचिन्त्य पूरकापरार्धेन जलधारणया वामित्युच्चार-चतुष्टयेन स्निग्ध पत्रपुष्प फलोपेत विभाव्य द्वादशमात्रा कुंभकेनाग्नि धारणया रूमित्युच्चार त्रितयेन सव्यपादांगुष्ठोत्थित कालाग्निना शुष्कन्दग्धञ्च विभाव्य रेचकपूर्वार्धेन वायुधारणया यैमित्युच्चारद्वयेन भस्मीभूतं दशदिक्षु प्र लं नं भावः कलासारं विषयोपदलसंयुतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्षामित्येकोच्चारणे शुद्धस्फटिकरूपं परमव्योमरूपं चिन्तयेत्।
तदुक्तं सिद्धतन्त्रे –

स्वदेवं भूतबीजस्थ ब्रह्मविष्ण्वभिदंकुरम्।
सत्त्व भावाः कलासारं विषयोपदलसंयुतम्॥
तन्मात्रशाखया युक्तं पुं विहंगोपभोग्यकम्।

चिन्त्याविश्वसाराख्ये –

अथवा स्वशरीरस्थ वृक्षाद्यादिकं स्मरन्।
ऊर्ध्वमूलमधश्शाख कल्पसंसारपादपम्॥

कामिके – पूरकार्द्धेन पार्थिव्या हेयोपादेयवत् सुधीः।
आप्यायितं तद्वदणरं पूरकापरिभागतः॥
पत्रपुष्पफलोपेतं सिद्धं वैराग्यशास्त्रतः।
छेदयित्वा तदा वह्न्या कुंभकेन विशोष्य च॥

106a ज्ञानानलेन निर्दग्धं पादांगुष्ठादिकान्तकम्।
रेचकेनाथ वायव्याभस्मीभूयादिशो दश॥
प्रालीनमन्यथा शुद्धं निर्मलं भावयेत्तथा।

सिद्धान्तसारावल्याम् – आचार्यैरप्युक्तम्

स्वदेहं भूतबीजं हरिविधिरचितस्वांकुरं कर्ममूलं
तत्त्वं कल्यादिसारं विषयदलगतं स्वादिशाखोपशाखम्।
भावाशेषप्रसूनं व्यवसितसुफलं पुं विहंगोपभोग्यं
न्यग्रोधंच्चोर्ध्वमूलं विपदधरसमवाक् शाखनं भावयेच्च॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुंभा पूरकरेचकार्द्रयुगलैर्ह्लामादिमन्त्रान् पठन्

पृथ्व्यादिस्तगुणास्थितिक्रमयुतं पाता यथोगाद्युतात्।

दग्धोषा द्वाहकभस्म तद्विपनवाद्युद्धो नभोभावनादिति। ततोनु सर्वं बद्धकत्वात् व्यावृत्तमसत्कल्पमिति भाव्य वौषडन्तमूलेन द्वादशान्त शिवशक्त्या नित्याधिष्ठेयरूपस्य परमामृतरूपस्य सर्वाधारत्वेन स्थितस्य शिखान्तस्थस्य संशुद्धबिन्द्वात्मक सूक्ष्मदेहस्थस्यात्मनः पुनरन्तर्हृदि विन्यासार्थमाधारशक्तिधर्मज्ञान-वैराग्यैश्वर्य पद्मै रशुद्धविद्यात्मकं योगपीठमासनमकारादिमात्रा-त्रययुक्तप्रणवेन संकल्प्य तत्कर्णिकायां पुर्यष्टकं चतुष्कलेन प्रणवेनावतीर्णं भावयित्वा तस्मिन् पुर्यष्टकदेहे द्वादशान्तस्थं ज्योतिरूपं सान्तबीजमयमात्मानं पञ्चकलेन प्रणवेन पूरकेण ओं हूं हां हैं हां हूं आत्मनेनम इत्यनेन सृष्ट्या पुष्पेण समानीय तत्रस्थं जीवं सुवदमृत धाराभेदित ब्रह्मरन्ध्राधोमुख प्रणव ध्यानेन सोममण्डलात्मकं दिव्यामृतजल प्रवाहेणाभिषिञ्चेत्। तथा सर्वज्ञानोत्तरे-

धर्मज्ञानञ्च वैराग्य मैश्वर्यञ्च चतुष्टयम्।
योगपीठञ्च पद्मञ्च प्रणवेन तु विन्यसेत्॥
ततस्त्वाप्यायनं कुर्यात् प्रणवं ध्यायेदधो मुखं।
सुवन्तममृत धाराभि सुषुम्ना भिन्न मस्तकम्॥
अन्यत्र पुनराप्लावनं कृत्वा कायन्यासं समारभेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदनु विशिष्टायां शान्तमूर्तै न्यासः करणीयः तत्र क्रमः।
शिवासनमव्यक्तां शिवमूर्तिञ्च स्वमन्त्राभ्यां हृदये विन्यस्य क्रमेण
पञ्च ब्रह्माभिरङ्गाभ्यां गिवक्त्राभ्यांगिश्च विन्यस्य कलाभंगी न्यासं
श्रीकण्ठन्यासञ्च कुर्यात्। तद्यथा - मुष्टेरंगुष्ठाग्रतः ओं हों
ईशानायनम इति अंगुष्ठतर्जनीभ्यां ओं हें तत्पुरुषाय नम
इति मुखे अंगुष्ठमध्यमाभ्यां ओं हुं अघोराय नम इति
हृदये अंगुष्ठानामिकाभ्यां ओं हिं वामदेवाय नम इति नाभौ
अंगुष्ठकनिष्ठाभ्यां ओं हं सद्योजाताय नम इति पादे विन्य-
सेत्। तदुक्तं कामिके -

ईशानं मूर्ध्नि विन्यस्य मुखे तत्पुरुषेण तु।
न्यसेत्। अघोरं हृदये न्यस्य गुह्ये वामं प्रकल्पयेत्॥
सद्योजातं न्यसेत्पादे तत्तन्मुद्रा समन्वितम्।

इति दग्धभंगीन्यासः। अथ वक्त्रभंगिन्यासः। ऊर्ध्वपूर्व
दक्षिणोत्तरपश्चिमवक्त्रेषु खण्डान्येव ब्रह्माणि भंग्या न्यसेत्।
मुष्टिं बद्ध्वा भद्रमुद्रया ऊर्ध्वमूर्ध्नि पूर्वपर्वं ओं हों ईशानाय
नम इति विन्यस्य अंगुष्ठतर्जनीभ्यां ओं हें तत्पुरुषाय नम
इति पूर्वमूर्ध्नि अंगुष्ठमध्यमाभ्यां ओं हुं अघोराय नम
इति दक्षिणमूर्ध्नि अंगुष्ठानामिकाभ्यां ओं हिं वामदेवाय
नम इत्युत्तरमूर्ध्नि। अंगुष्ठकनिष्ठाभ्यां ओं हं सद्योजाताय
नम इति पश्चिममूर्ध्नि। एवं न्यसेत्। यद्वा। अखण्डान्येव

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मालाब्रह्माणि विन्यसेत्। कामिके-: "ऊर्ध्वेन्दु याम्या सौम्या-व्यक्ते च्वीबादेवी न्यसेत् इति वक्त्रांगिन्यासः कर्तव्यः। अथ कलांगिन्यासप्रयोगः। भण्यते। ओं हों ईशानस्सर्व विद्याना- -न्यैनमः। ऊर्ध्वमूर्ध्नि ओं हों ईश्वरस्सर्व-स्सर्वभूतानामगदायै नमः इति पूर्वमूर्ध्नि। ओं हों ब्रह्मा-धिपतिब्रह्मणोधिपतिर्ब्रह्मप्रायै नमः। इति दक्षिणमूर्ध्नि। ओं हों शिवोमे स्तुमरीच्यै नमः इति वाममूर्ध्नि ओं हों सदाशिवज्वालिन्यै नमः इति पश्चिममूर्ध्नि। इत्यमीशानकलापञ्चकम्। ओं हें तत्पुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्रे ओं हें महादेवाय धीमहि विद्यायै नम इति दक्षिण-वक्त्रे। ओं हें तन्नो रुद्रप्रतिष्ठायै नम इत्युत्तरवक्त्रे। ओं हें प्रचोदयान्निवृत्यै नम इति पश्चिमवक्त्र इति। पुरुष कलाश्चतस्रः ओं हुं अघोरेभ्यस्तमायै नम इति हृदये ओं हुं अथ घोरे-भ्यो मोहायै नम इति कण्ठे ओं हुं अघोर रक्षायै नम इति
1068 दक्षिणांसे-ओं हुं घोरतरेभ्यो निष्ठायै नम इति वामांसे ओं हं सर्वतश्शर्वमृत्यवे नम इति नाभौ ओं हं सर्वेभ्यो मायायै नम इति गुह्ये। ओं हिं ज्येष्ठाय नम रक्षायै नम इति पृष्ठये ओं हिं रुद्राय नमो रत्यै नम इति दक्षिणोरौ। ओं हिं कालाय नमः पाल्यायै नम इति वामोरौ ओं कल कामयायै नम इति दक्षिणजानुनि ओं हिं विकरणायनमस्संय-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



न्यैनम इति वाम जानुनी ओं हिं बलक्रियायै नम इति दक्ष जंघायाम्। ओं हिं विकरणाय नमो बुद्ध्यै नम इति वाम जंघायाम्। ओं हिं बलकार्यै नम इति दक्षस्फीचि ओं हिं प्रमथकायनमो धात्यै नम इति वामस्फीचि ओं हिं सर्वभूतदमनाय नमो भ्रामिण्यै नम इति कट्याम्। ओं हिं मनोमोहिन्यै नम इति दक्षिण पार्श्वे। ओं हिं उन्मनाय नमो मनोन्मन्यै नम इति वामपार्श्वे इति वामकलास्त्रयोदश। ओं हं सद्योजातं प्रपद्यामि सिद्ध्यै नम इति दक्षपादे। ओं हं सद्यो जाताय वै नमो ऋद्ध्यै नम इति वामपादे। ओं हं भवेद्युत्यै नम इति दक्षकरे। ओं हं अभवे लक्ष्म्यै नम इति वामकरे ओं हं अन्वादिभवे मेधायै नम इति घ्राणे। ओं हं भजस्व मां कान्त्यै नम इति शिरसि ओं हां भवस्वधायै नम इति दक्षिणबाहौ। ओं हं उद्भवाय नमो धृत्यै नम इति वाम बाहौ इति सद्यो जातकलाष्टकम्। एवं सकलीकरणवता स्वस्व रुद्राष्टत्रिंशत्कला न्यास ध्यानपुरस्सरं कुर्यान्तदुक्तं वा। वायव्य संहितायाम्। कलारूपाणि सर्वाणि त्रिणेत्राणि चतुर्भुजाः।

अभयं वरदश्चैव शूलं परशुधारिणम्॥
कलारूपेषु सर्वेषु वामाद्याश्शक्तय स्मृताः।
अष्टत्रिंशत्कलानान्तु अष्टत्रिंशच्च शक्तयः॥
एवं शक्तिसमोपेतं न्यासकाले तु विन्यसेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अष्टत्रिंशत्कलान्यासं विन्यसेन्नन्दिकेश्वर ।
ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः ॥
अघोरस्य कलाश्चाष्टौ वामदेव त्रयोदश ।
अष्टौ सद्यकला ज्ञेया मकुटादि क्रमा न्यसेत् ॥
~~अष्टत्रिंशत्कलान्यासं~~ ईशानश्चेश्वरो ब्रह्माशिवश्चेति सदाशिवः ।
तत्पुरुषो महादेवो तन्नो रुद्रप्रचोदयात् ।
तत्पुरुषो महादेवो तन्नो रुद्रः प्रचोदयात् ॥
अघोरश्चाथ घोरश्च तथा घोरस्तथैव च ।
ततो घोरतरेभ्यश्च सर्वतश्शर्व इत्यपि ॥
सर्वेभ्यश्च नमस्तेस्तु पत्त्श्चाष्टकला स्मृताः ।
वामो ज्येष्ठश्च रुद्रश्च कलवी करणस्तथा ॥
बलविकरणो बलप्रमथस्सर्वभूतदमनस्तथा ।
मनश्च उन्मनश्चैव वामदेवकला स्मृताः ॥
सद्यो जातश्च सद्यश्च भवश्चाभव एव च ।
तथा नादिभवश्चैव भवोद्भव द्भुद्भवः ॥
अष्टत्रिंशत्कला प्रोक्ताः कलाशक्तिरथोच्यते ।
शर्वानी चाम्बिका चेष्टा मरीची ज्वालिनी तथा ॥
एताः पञ्चकलाशक्ति पञ्च मूर्ध्नोपरि न्यसेत् ।
निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च ॥
एवञ्चतुष्कलाशक्ति श्चरिताश्चैक वक्त्रके ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तमो मोहाक्षयी निष्ठा धृतिक्षान्ति स्मृतिस्तथा ।
अघोरश्चाष्टशक्तिश्च वामदेवस्तथोच्यते ॥
रक्षा रक्षावति : पाल्या माया संयमिनी क्रिया ।
ध्यनं पुरस्सरं कुर्यात् । तदुक्तं वायव्य संहितायाम् ।
कलारूपाणि सर्वाणि त्रिणेत्राणि चतुर्भुजाः ॥
अभयं वरदश्चैव शूलं परशुधारिणम् ।
कलारूपेषु सर्वेषु वामाद्याश्शक्तयस्मृताः ॥
अष्टत्रिंशत्कलानान्तु अष्टत्रिंशच्च शक्तयः ।
डावं शक्तिसमोपेतं न्यासकाले तु विन्यसेत् ॥
बुद्धिकार्या च धात्री च भ्रामिणी मोहिनीति च ।
मनोन्मनीति चाख्याता वामदेवस्तयोदश ॥
सिद्धि ऋद्धि द्युतिर्लक्ष्मी मेधाकान्तिस्वधा धृतिः ।
सद्यश्चाष्टकलाशक्तिरीरिता नन्दिकेश्वर ॥
ईशान सकलाः पञ्चमौर्द्ध्वे वक्त्रादि पञ्चके ।
ऊर्ध्ववक्त्रे शान्त्यतीतां पूर्वादि पुरूषोद्भवः ॥
डावश्चतुषु वक्त्रेषु विन्यसेच्छक्ति संयुताः ।
अघोर हृदये कण्ठे सव्यवामांसके तथा ॥
नाभौ च जठरे पृष्ठे वक्षस्यपि तथैव च ।
वामदेवश्च गुह्ये च तथैव वृणद्वये ।
ऊरुद्वये च जान्वाश्च जंघायुग्मे तथैव च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



107a स्फिक् द्वन्द्वे कटिदेशे च पार्श्वयोर्विन्यसेत्क्रमात् ।
सद्यो जातं पदद्वन्द्वे पाणि द्वन्द्वे तथैव च ॥
नासिकायां शिरो देशे बाहुयुग्मे च विन्यसेत् ।
सद्यो जात कलायोज्या मन्त्रान्तांश्च कला यथा ॥

चिन्त्ये -: अष्टत्रिंशत्कलान्यास कलाशक्तिसमान्वितम् ।
कला: पुमांसस्स्युः स्त्री शान्तत्कलाशक्तयो भवेत् ॥
शिवशक्तिस्तयो सोऽहमेतांश्च निष्कलो भवेत् ।
अष्टत्रिंशत्कलाशक्तिं लिंगपूजार्कयो न्यसेत् ॥
महेशे प्रतिमादीनां त्रिंशत्कला न्यसेत् ।
अष्टत्रिंशत्कलेष्वेच देवीनां पञ्चविंशतिः ॥
अष्टत्रिंशत्कला ह्येवं सर्वेषां न्यास मुत्तमम् ।

सिद्धान्त सारावल्याम् -

मूर्धानः पञ्च वक्त्राण्यथ हृदयगलद्वंसनाभी च कुक्षी
पृष्ठोरो गुह्य शिश्नौ युगलं परं जानुयुग्मञ्च जंघे ।
द्वि स्फिक् कट्या च पार्श्वे चरणकरयुग घ्राणमौली च
स्थानानि स्युः कलानां शिव तनुकरणे त्रिंशतामष्टकानाम् ॥

अथ श्री कण्ठन्यासः — ओं अं श्रीकण्ठाय पूर्णोदर्यै नम इति कान्ते · अं अनन्ताये विरजायै नमः ललाटे इं सूक्ष्माय शाल्मै नमः दक्षिण नेत्रे ओं इं त्रिमूर्तये लोलाक्ष्ये नमः वामनेत्रे ओं ऊं महेश्वराय वर्तुलायै नमः दक्षिण श्रोत्रे ओं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ॐ अघीशाय दीर्घकोणायै नमः । वामकण्ठे ओं ॠं भारभूतये दीर्घमुख्यै नमः । दक्षिण नासा पुटे । ओं ॠं अतिथीशाय गोमुख्यै नमः वामनासापुटे ओं ऌं स्थाणवे दीर्घजिह्वायै नमः । दक्षगण्डे । ओं ॡं भारभृ कुण्डोदर्यै नमः । वामगण्डे । ओं डं चण्डीशाय ऊर्ध्वकेशिन्यै नमः । उत्तरोष्ठे ओं डैं भौतिकाय विकृतमुख्यै नमः । अधरोष्ठे । ओं सद्योजाताय ज्वालामुख्यै नमः । ऊर्ध्व दन्ते ओं ओं अनुग्रहेशाय उल्कामुख्यै नमः । अधो दन्ते । ओं अं अक्रूराय श्रीमुख्यै नमः । मूर्ध्नि । ओं अः महासेनायै विद्यामुख्यै नमः । आस्ये । ओं कं क्रोधीशाय महाकाल्यै नमः । दक्षिण बाहुमूले । ओं खं चण्डीशाय सरस्वत्यै नमः । कोर्परे । ओं गं पञ्चान्तकाय सर्वसिद्धिगौर्यै नमः । मणिबन्धे ओं घं शिवोत्तमाय त्रैलोक्य विद्यायै नमः । पाणितले । ओं ङं डकरुद्राय मन्त्रशक्त्यै नमः दक्षिण कराग्रे । ओं चं कूर्माय आत्म शक्तये नमः । वामबाहुमूले । ओं छं डक नेत्राय भूतमात्र्यै नमः । कोर्परे । ओं जं चतुर्मुखाय लम्बोदर्यै नमः । मणि बन्धे । ओं झं अजेशाय द्राविण्यै नमः । पाणितले । ओं ञं शर्वाय नगर्यै नमः । वामकराग्रे ओं टं सोमेश्वराय खेचर्यै नमः दक्षिणोरु मूले ओं ठं लांगलिने मञ्जर्यै नमः । जानुनी ओं ढं

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दारुकाय विरूपिण्यै नमः । जंघाग्रे । ओं ढं अर्धनारीश्वराय
विचारिण्यै नमः । पादतले । ओं णं उमा कान्ताय काको-
दर्यै नमः । दक्षिण पादाग्रे । ओं तं आषाढाय पूतन्यै
नमः । वामोरुमूले । ओं थं दण्डिने भद्रकाल्यै नमः ।
जानुनी । ओं दं अत्रये योगिन्यै नमः । जंघाग्रे । ओं
धं ईशानाय शंखिन्यै नमः । पादतले । ओं नं मेघाय
गर्जिन्यै नमः । वामपादाग्रे । ओं पं लोहित अं कालरात्र्यै
नमः । दक्षिणपार्श्वे । ओं फं शिखिने कुब्जिन्यै नमः ।
वामपार्श्वे । ओं बं छगलण्डाय कपर्दिन्यै नमः । पादतले ।
~~ओं नं मेघायगर्जिन्यै नमः ।~~ वामपादाग्रे पृष्ठभागे । ओं
भं द्विरण्डाय भद्रायै नमः । नाभिदेशे । ओं मं महाकालाय
जायायै नमः । हृद्देशे । ओं यं त्वगात्मने बालिने सुमु-
ख्येश्वर्यै नमः । त्वचि । ओं रं रक्तात्मने भुजंगेशाय
रेवत्यै नमः । रुधिरगोचरे । ओं लं मां मांसात्मने पिना-
किने मा पव्यै नमः । मांसे । ओं
वं मेदो मधाव खड्गीशाय वारुण्यै नमः । मेदसि । ओं शं
अस्त्यात्मने बकेशाय वायव्यै नमः । अस्थिनि । ओं षं
मज्जात्मने श्वेताय रक्षोवधारिण्यै नमः । मज्जास्थाने ।
ओं सं शुक्रात्मने भृकुटीशायै नमः । रेतसि । ओं हं
1076 प्राणात्मने लकुलीशाय लक्ष्म्यै नमः । हृदये । ओं ळं लिंगा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्मने रूपाय व्यापिन्यै नमः। लिंगमूले ओं क्षं संवर्तकाय क्रोधात्मने महामायै नमः। लिंगाग्रे। तदुक्तं चित्याविश्व- सादाख्ये-: अकारादिक्षकारान्तं श्री कण्ठादिन्यसेत्क्रमात्।

६ श्री कण्ठानन्तसूक्ष्मा च त्रिमूर्तिश्च महेश्वरः॥
अर्घीशो भारभूतिश्चातिथिशस्था स्थाणुको हरः।
चण्डीशो भौतिकस्सद्यो जातश्चानुग्रहेश्वरः॥
अक्रूरश्च महासेन स्वराणामूर्तयो भवेत्।
क्रोधीशश्च ततश्चण्ड पञ्चान्तक शिवोत्तमाः॥
ह्येकरुद्रा स्तथा कूर्म ह्येकहक् चतुराननः।
अजेशस्सर्व सोमेशौ लांगली दारुकस्तथा॥
अर्धनारीश्वरस्सोमा कान्तश्चाषाढ दण्डिनौ।
अत्रीर्मीनश्च मेषश्च लोहितश्च शिखी तथा॥
चगण्डो द्विरण्डश्च महागालस्त्वगात्मनः।
भुजंगेशः पिनाकी च खड्गीश्च बकः पुनः।
त्वक्षश्वेतकश्च लकुली शिवस्संगर्तकस्मृतः।
पूर्णोदरी च विरजा तृतीया शाल्मली भवेत्।
लोलाक्षी वर्तुला चैव दीर्घकोणा तथैव च।
शंखिनी गर्जिनी काल शती कुब्जन्यथैव च॥
कपर्दिनी तथा वज्रा जया च सुमुखेश्वरी।
रेवती माधवी चैव वारुणी वायवी तथा॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रक्षोवधारिणी चान्या तथैव सहजा च या।
लक्ष्मीश्च व्यापिनी माया चाख्याता वर्णशक्तयः॥
एताभिश्शक्तिभिस्सार्धं विन्यसेदक्षरान् क्रमात्।
अकारं मूर्ध्नि विन्यस्य आकारं मुखवृत्तके॥
इकारं दक्षिणे नेत्रे ईकारं वामकण्टके।
उकारन्दक्षिणे कर्णे ऊकारं वामकर्णके॥
ऋकारन्दक्षनासे च ॠकारं वामनासके।
लृकारन्दक्षिणे गण्डे लॄकारं वामगण्डके॥
एकारन्तु तथो देवा ऐकारमधरे ततः।
ओकारमूर्ध्वे दन्तौके औकारमधः दन्तके॥
अंकारं तालुमूले च अःकारं तालुमध्यके।
एवं विधिक्रमेणैव विन्यसेत्षोडश स्वरान्॥
कवर्गं दक्षिणे हस्ते चवर्गं वामहस्तके।
टवर्गं दक्षिणे पादे तवर्गं वामपादके
पकारं दक्षिणे पार्श्वे फकारं वामपार्श्वके।
बकारं पृष्ठदेशे तु भकारं नाभ्यधस्ततः॥
नाभौ मकारं तस्योर्ध्वे यकारादीनि सप्तकान्।
त्वगस्त्रं मांसमेदोस्ति मज्जा शुक्लादि धातुषु॥
हकारं हृदये न्यस्य लकारं गुददेशकः।
क्षकारं गुह्यके न्यस्य न्यासमन्त्र समान्वितम्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथान्तर्यजनं कुर्यात् सिद्धान्ते-:

अन्तर्यागं पुराकृत्वा बाह्यपूजामथारभेत्।
ज्योतिर्लिङ्गं हृदिस्थं तथैं बाह्यच्चर्यते बहिः॥
यस्मात्तस्मात्पुराकार्यमन्तर्यागमिहोच्यते।

शिवधर्मोत्तरे-:

अकृत्वा मानसं योगिं यो बहिर्यागमाचरेत्।
वृथा परिश्रमस्तस्य शास्त्रजालेपि निश्चयः॥
आत्मस्थं यः शिवं त्यक्त्वा बहिष्ठं यजते शिवम्।
हस्तस्थं पिण्डमुत्सृज्य लिहेत्कोर्परमात्मनः॥

कामिके-:

पूजा होमसमाधीनां स्थानानि परिकल्पयेत्।
हृदये चाविधानन्तु नाभौ होमं प्रकल्पयेत्॥
ललाटे चेश्वरं ध्यायेद्वरदं सर्वतो मुखम्।
हृदये कल्पयेद्धोम चेश्वरा वाहनक्रमात्॥
आसनं कल्पयेत्तत्र वक्ष्यमाण विधानतः।

तदुक्तं निश्वासे-:

कदली पुष्पसंकाशं हृदयं सर्वदेहिनाम्।

सुप्रभेदे-: पार्थिवांडमयस्कन्द माध्यादि नालमेव च॥
प्रधानतत्वपर्यन्तं नालं कर्णिकान्वितम्।

निश्वासे-: पद्मनालं नवाचारं समन्तात्परिकीर्तितम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नालमष्टांगुलं विद्यात् ग्रन्थिग्रन्थिरिधीयते ।

शिवधर्मोत्तरे -: पद्मपत्राष्टकं ज्ञेयमणिमादि गुणावृतम् ।

~~प्रधानतत्व पर्यन्त न्तन्नालं कर्णिकान्वितम् ।~~

-मसंहितायाम् -: आद्यतेषु दलेष्वष्टौ ओं शिवाय नमो नमः

इन्द्रादीशान पर्यन्तं न्यसेदष्टाक्षरं क्रमात् ।

108a कालोत्तरे -: मार्ताण्डोदय संकाशपोड्शौ दलशोभितम् ॥

वितस्तिमात्रं पद्मञ्च कर्णिका चतुरंगुलम् ।

पञ्चाशत्परमं बीज जगद्योनि पराचरम् ॥

निश्वासे -: अंगुष्ठ तुल्य पर्वा तु कर्णिका केसरैर्युतम् ।

मतंगे -: विद्यातत्वमयीं तस्य कर्णिकां परिचिन्तयेत् ॥

मन्त्राश्च केसराणि स्यु र्विद्यायां ये प्रतिष्ठिताः ।

निश्वासे -: किञ्चिद्विरतां सूर्यं सूर्यात्सोमस्तथैव च ॥

सोमाद्यूर्ध्वं विजानीया द्वह्नि मण्डलमुत्तमम् ।

कर्णिकायां भवेत्सूर्यस्तस्य मध्ये तु चन्द्रमाः ॥

तस्य मध्ये भवेद्वह्नि स्तस्य मध्ये महेश्वरः ।

सुप्रभेदे -: तताश्शिवमयं ध्याये दष्टत्रिंशत्कलामयम् ॥

निश्वासे -: सदाशिवो महेशस्य तस्यापि परतश्शिवः ।

उक्तञ्च -: सदाशिव महात्मानं तस्याप्यूर्ध्वं परात्परम् ॥

सितं सुनिर्मलन्दिव्य मग्राह्यं परमं शिवम् ।

कामिके -: मनसा कल्पितैः दिव्यैर्मनः कल्पे तु मन्दिरे ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मनसा भावयेन्नित्यं पूजयेत्परमेश्वरम्।
ध्यायन् गुरुतमां यद्वत् गुरुर्निर्वाणता फलम् ॥
प्राप्नोति तत तद्वापि फलमिष्टमवाप्नुयात् ।
सुप्रभेदे-: आसनादीनि सर्वाणि तथैवावरणानि च ॥
इत्यष्टौ कल्पयेद्विद्वान्यथोक्तन्तु यथाक्रमम् ।
गन्धाद्यै रुपचारैस्तु मनसा कल्प्य पूजयेत् ॥
तदुक्तं श्रीमत्किरणे -
वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः।
वानस्पत्यं पुनष्षष्ठं प्राजापत्यञ्च सप्तमम् ॥
अष्टमं शिवपुष्पन्तु शृणु तेषां विनिर्णयम् ।
वारिजं सलिलं ज्ञेयं सौम्यं घृतपयो दधीम् ॥
आग्नेयं धूपदीपाद्यं वायव्यञ्चन्दनादिकम् ।
पार्थिवं कन्दमूलाद्यं वानस्पत्यं फलान्वितम् ।
प्राजापत्यं यदन्नाद्यं श्रद्धाग्र्यं शिव पुष्पकम् ॥
इत्येतैरष्टभिर्द्रव्यै शिवं संपूजयेत्सदा ।
तथा कामिके-: पार्थिवाद्यष्टपुष्पाख्ये तत्वव्रातं समर्चयेत् ॥
पार्थिवं सकलं गन्धो भवत्यापोऽभिषेचनम् ।
ता उब पाने नैवेद्ये तैजसं दीपमालिका ॥
वायव्यं तालवृन्ताद्यं गीताद्यं व्योम संभवम् ।
उबश्चेतर तत्वानि यथा योगं निवेद्य च ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवैनैकतं ध्यात्वा तदाज्ञायां नाभिकुण्डस्थं शिवाग्निं यजेत - तदुक्तं कामिके-:

नाभिकुण्डे स्वभावोत्थे तर्पयेत्परमामृतैः।
उद्दीप्य च निजं वह्निं संरुद्धापनवर्जितः॥

चिन्त्यविश्वसादाख्ये-:

पिंगला नाभि-चारेण नाभिकुण्डे स्वकोदितम्।
शिवाग्निं पूजयेत्तत्र बलिं यजनवत्क्रमात्॥
इडया पूरकाकृष्य सुधया च शिवाणुभिः।

उक्तञ्च-: ज्ञानानलं न्यसेत्तत्र सूर्यायुत समप्रभम्॥
हृत्पुण्डरीका मध्यान्तु सुम्नेनवथानलम्।
द्वादशान्ते पदे योज्य तत्तेजः पुञ्ज पिञ्जरम्॥
तेन विन्यस्तमात्रेण सर्वकर्माऽर्हको भवेत्।
अन्तः पूजित देवाय तत्समाप्य यथाविधि।
अष्टपुष्पिकया पूज्य ततः पूजां समाप्य च।

कामिके-: स्थाणुस्थाने स्मरेल्लिंगं स्फटिकाभं महोज्ज्वलम्॥
तन्मध्यांगं शिवं ध्यात्वा तदेकं भावमाश्रितः।

तथा चिन्त्यविश्वसादाख्ये-:

शिवबिन्दुप्रतीकाशं बिन्दुरूपं महेश्वरम्।
ललाटदेशमध्यस्थं विकलं चिन्तयेत्सदा॥

शिवधर्मोत्तरे-: माज्यमानो यथा नित्यं दर्पणे निर्मलो भवेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्मला।
अन्तर्यागं समाख्यातमात्मशुद्धिः प्रकीर्तितम् ॥
अन्तर्यागोपचारेण यः पूजयति शंकरम्।
ध्यानयज्ञेन सततं स याति परमां गतिम्।
नाभिमूलोद्भवं नालमष्टांगुलमथायतम् ॥
द्वादशांगुलविस्तीर्णं सितपद्मं विचिन्तयेत्।
धर्मज्ञानं तथा नालं वैराग्यं कर्णिका गुह।
ऐश्वर्याष्टदलोपेतं कर्णिका केसरैर्युतम् ॥
तत्पद्मकर्णिकामध्ये लिंगं मणिमयं शिवम्।

स्कन्दकालोत्तरे-:

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्।
गतत्समाधिरुद्दिष्टं प्रशंसन्ति मनीषिणम् ॥

तदनु स्थानशुद्धिं कुर्यात्। नन्विदं स्थानशुद्धिं किमर्थमिति चेत्। उच्यते। उग्ररूपपिशाचरूपविघ्ननिवृत्तिरस्याः प्रयोजनम्

तदुक्तं परमेश्वरे-:

उग्रभूतपिशाचाख्या इह मे भूमिघातकाः।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

अस्यायं क्रमः- हृद्यूर्ध्वमुखौ करौ कृत्वा ओं हं अस्त्राय फडिति तालत्रयं कृत्वा छोटिकया दशदिक्षु विघ्नानुत्सार्य मन्त्रेण ज्वलदग्निवर्णं प्रकारञ्च कृत्वा तद्बाह्ये ओं ह्यैं-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



1084 कवचाय नम इति दक्षिणजानि भ्रामणेन शोधिकां कृत्वा वौषडन्त शक्तिमन्त्रेण शक्तिजालमूर्ध्वाधो विभाव्य महामुद्राञ्च प्रदर्शयेत् । कालोत्तरे -:

बाह्ययागप्रसिध्यर्थं स्थानशुद्धिमथाचरेत् ।
अस्त्रेणोच्चाटयेद्विद्वान् तालशब्दत्रयेण तु ॥
छोटिकाभिर्दिगाबंद्ध्य प्राकारञ्चास्त्रमन्त्रतः ।
खातिकां कवचेनाथ कृत्वा बाह्यान्तरस्थलम् ॥
शक्तिमुद्रां ततो बध्वा शक्तिप्रोतमयं स्मरेत् ।

अथ द्रव्य शुद्धिः - तदनु द्रव्य शुध्या किं साध्यते । जलादिद्रव्याणां स्वत एव शुद्धत्वादिति चेन्न अशुद्ध-भवनोत्पन्न माये यस्य द्रव्यजा तस्मात् शिवतया शिवभोगा-नर्हत्वात् । न च व्याप्यव्यापकः शिवसंबन्धाच्छिवेन्नतस्वेति वाच्यम् । शिवस्य पुष्करपर्णवन्निर्लेपतया द्रव्य संयुक्तत्वाभावात् ततस्तच्छुद्धिरवश्यं कार्या । तदुक्तं क्रियासंग्रहे -:

मायेयरूपसन्त्यागाद्दानन्तशक्तिस्सरूपतः ।
शिवभोग्यं भवेद्द्रव्यं सा क्रिया द्रव्य शोधनम् ॥

तद्यथा -: अशिवाश्शिव कर्माणि नैव कुर्यात्कदाचन ।
शिवेनाधिष्ठितं द्रव्यं शिवाय परिकल्पयेत् ॥
द्रव्याणि शोधयेत्तेन यज्ञार्थं कल्पितानि तु ।
अप्रोक्षितान्नदातव्यमनिवेद्यञ्च वै शिवे ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूजांग द्रव्याणि चोक्तानि । यथा सुप्रभेदे -

पाद्यमाचमनञ्चार्घ्यं गन्धपुष्पञ्च धूपकम् ।
दीपञ्चाथ निवेद्यञ्च अष्टांगं संप्रपूजयेत ॥
अष्टांगेन समायुक्तं पूजयेत्परमेश्वरम् ।

मतंगे - आकृत्सितानि यद्यार्थं पात्राणि कुसुमानि वा ।
औषध्यश्शुभदारश्शस्ता धूपाः प्राण्यंगवर्जिता ॥

सूक्ष्मे - शंखाधारञ्च शंखञ्च पाद्याधारञ्च पात्रकम् ।
गन्धपात्रसमायुक्तं पुष्पमात्रसमान्वितम् ॥
वस्त्राधारञ्च वस्त्रञ्च पुष्पाधारसमान्वितम् ।
लोहित रक्तञ्चैव काञ्चनं रक्तसंयुतम् ॥
रुद्राक्षञ्च प्रवालञ्च मुक्तमाला समान्वितम् ।
नवरत्नं विचित्रेण महाभरण शोभितम् ॥
चित्रवस्त्र समायुक्तं चित्राभरण शोभितम् ।
खण्डवस्त्र समायुक्तं लिंगबोधनसंयुतम् ॥
जल द्रोणि समायुक्तं जलोद्धारण पात्रकम् ।
स्नानवेदिञ्च पादञ्च तीर्थपात्रसमायुतम् ॥
घण्टाञ्च धूपदीपञ्च आरात्रिकमतः परम् ।
स्थितं दीपसमायुक्त माज्यस्थालीञ्च सृक्स्रु - ॥
ततः पचनपात्रञ्च तथा व्यञ्जन पात्रकम् ।
स्थलिका स्थलिकाधारं पानीयाधारपात्रकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



व्रीहि चर्मंच दर्वीञ्च काष्ठान्निपादसंयुतम् ।
नालिकेरकृतञ्चैव व्यञ्जनञ्छेद वास्तकम् ॥
पात्र संपाद्यमेवोक्तं द्रव्य संपाद्यमुच्यते ।
चन्दनागरुकर्पूर कुंकुमं रक्तचन्दनम् ॥
हिमतोयं कृष्णागन्धं गोरोचनमदद्वयम् ।
कुसुमं पञ्चपुष्पञ्च अष्टपुष्पञ्च पत्रकम् ॥
कंकणं लम्बमाला च बिल्वदूर्वाक्षतन्तथा ।
जलधारितमेवन्तु समान्वितम् ॥
पाद्य द्रव्यादि संयुक्तं धूपद्रव्यादि संयुतम् ।
कपिलाज्यं रुद्रतैलं शिरीषं पुष्पचूर्णकम् ॥
पञ्चगव्यामृतञ्चैव नालिकेर प्रयत्नतः ।
कदलीफलसंयुक्तं स्नानद्रव्या समन्वितम् ॥
वस्त्रचिह्नानि विविधं वस्त्रकन्तु प्रयत्नतः ।
पञ्चातिरेक वृत्तं वा तद्रुद्रादि च संख्यया ॥
आवृतं सप्तनालं वा पञ्चनालैक नालकम् ।
दीपज्वालासमायुक्तं गोघृतं वा सुतैलकम् ॥
द्विप्रस्थादि चतुर्द्रोणं रुद्रतण्डुलसंयुतम् ।
लवणं क्रमपथञ्च व्यञ्जनैरुपदंशकम् ॥
मरीचिलवणञ्चैव जीरकस्सर्षपन्तथा ।
क्रमुकञ्च सुपात्रञ्च श्वेतगन्धश्च चूर्णकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्माय दर्पणञ्छत्रञ्चामरन्तालवृन्तकम् ।

अंशुमति- यत्नद्रव्यमेवन्तु संगृह्य परिचारकैः ।

वामभागे तु संस्थाप्य दक्षिणे जलपात्रकम् ॥

चिन्त्यविश्वसादाख्ये-

पाद्यार्घ्यादि सुपात्राणां लक्षणं शृणु सांप्रतम् ।

पञ्चांगुलन्तदुच्छ्रायं विस्तारञ्च तथैव च ॥

ओष्ठमेकांगुलं प्रोक्तं घनमर्धार्धकं भवेत् ।

पाद्यार्घ्याचमनञ्चैव पात्रं हेमादिरुच्यते ॥

आत्मार्थे तु तदर्द्धं वा पिकारयेत् तदर्द्धं वापिकारयेत्

सर्वेषां करणानाञ्च ह्यत्रकरणमुच्यते ।

शिवधर्मे- तदर्द्धेषु पत्रपात्रञ्च रजतमर्घ्यं भवेत् ॥

कन्यसं ताम्रपात्रन्तु अलाभे मृण्मयं भवेत् ।

यदा मृण्मयं तदा प्रत्यहं नवतरं ग्राह्यम् ॥

उक्तञ्च- मृण्मयं प्रत्यहं कार्यं तच्च नूतनमिष्यते ।

एकदा संप्रयुक्तं तत् तन्निर्माल्यं यतो भवेत् ॥

109a शिवधर्मे- दारुणत्वर्घ्यपात्रेण दत्वा यल्लभते फलम् ।

तस्माच्छतगुणं पुण्यं मृत्पात्रेण प्रकीर्तितम् ॥

ताम्रपात्रार्घ्य दानेन पुण्यं शतगुणोत्तरम् ।

पलाशपत्रपद्माभ्यां ताम्रपात्रसमं भवेत् ॥

रौप्यपात्रेण विज्ञेयमर्घ्यं लक्षोत्तरं फलम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्वर्णपात्रेण विन्यस्तमर्घ्यं कोटिगुणोत्तरम् ।

सूक्ष्मे -: वामादिरर्घ्य संयुक्तं पात्रसंपूजयेत्ततः ॥

अथवा पात्रमेकन्तु पाद्यमाचमनार्घ्यकम् ।

सुप्रभेदे -: उशीरश्चन्दनोपेत दूर्वासिद्धार्थ संयुतम् ॥

चातुर्द्रव्य समायुक्तं पाद्यमेतदुदाहृतम् ।

एलालवंक कर्पूर जातिफल मुत्तमम् ॥

षडंगमाचम द्रव्य मर्घ्य द्रव्यमथोच्यते ।

आपक्षीर कुशाग्राणि तण्डुलास्सुमनस्तिलाः ॥

अर्घ्याष्टांगमिति प्रोक्तो यवसिद्धार्थकैस्सह ।

उत्तमादिक्रमेण पाद्यादिद्रव्यमानं निरूपितम् ।

प्रत्येकं धारणं श्रेष्ठं तस्यार्धं मध्यमं भवेत् ।

तस्यार्धं कन्यसं ज्ञेयं पाद्यद्रव्यं तथोदितम् ॥

पाद्यादीनि च मात्राणि तेऽवर्द्धार्द्धानि कीर्तितानि ।

तत्रैव धारणादि स्वरूपमुक्तम् ।

द्विभुजं माषकञ्चैव धरणं माषविंशतिः ।

धरणाष्टौ फलञ्चैव फलमुष्टिरिहोच्यते ॥

कारणे -: पात्राणामर्घ्यसंभवे तु शंखं वा शुक्तिकान्तु वा ।

अंशुमति तल्लक्षणमुक्तम् -:

शंखं त्रिविधमित्युक्तं पुमान्नारी नपुंसकम् ।

मूलस्थूलं भवेन्नारी अग्रस्थूलं नपुंसकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अग्रमूलसमञ्चेन्तु पुमाञ्चेति प्रकीर्तितम् ।
ताम्रवर्णोद्भवं शंखं उत्तमञ्चेति कीर्तितम् ॥
गंगायां मध्यमञ्चैव नर्मदायाञ्च कन्यसम् ।
एवं त्रिविधमित्युक्तं जातिश्रेष्ठमथोच्यते ॥
दक्षिणावर्तशंखञ्च। इति श्रेष्ठमितिस्मृतम् ।
दक्षिणावर्तकं शंखं स्वप्रमाणं विधीयते ॥

कारणे तत्र परिमाणविधिरुच्यते -:
उत्तमं प्रस्थ चूर्णन्तु मध्यमं कुडुबद्वयम् ।
कनिष्ठिकान्तु कुडुबं सुलभं शंखमुच्यते ॥

अंशुमति - पुच्छाग्रे हेमरत्नादि भूषितञ्चाति सुन्दरम् ।
शंखं च क्षालयेद्धीमान् तुषदग्धेन शुध्यति ॥
शंखपादं त्रिकोणञ्च मध्यमे वलयान्वितम् ।

निश्वासे -: शंखमन्तरशुचिकरं बहिरस्थिवदाचरेत् ॥
तस्मात्सर्वप्रयत्नेन कर्तव्यं कनकादिना ।

सूक्ष्मे -: शंखमूल धरादेवी कुक्षिणा विष्णुदैवतम् ॥

निश्वासे -: धारया घोर दैवन्तु लयं सूर्यदैवतम् ।
मुखे च सप्ततीर्थानि प्रवेशे चन्द्रदेवता ॥
त्रिपाद्यामधिदैवत्यं ब्रह्मविष्णु महेश्वराः ।
वृत्तमाधारशक्तिश्च इत्येते अधिदेवताः ॥

अथ पञ्चगव्यम् -: तस्य काल उच्यते । सूक्ष्मे -:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः।
अन्यत्पुण्यदिने चैव नित्ये नैमित्तिके तथा॥

अपि च-: प्रायश्चित्तेन जन्मर्क्षे स्नापयेत्पञ्चगव्यकम्।

चिन्त्य विश्वसारांख्ये-:

पञ्चगव्यञ्च संकल्प्य स्नपनार्थं विशेषतः।
लिंगस्य पूर्वभागे वा ईशाने वापि कल्पयेत्॥
गोमयेनोपलिप्याथ मण्डलञ्चतुरश्रकम्।
द्विहस्तं हस्तमात्रं वा स्थण्डिलं दर्भसंयुतम्॥

वातुले-: प्राक्सूत्रं युगसूत्रञ्च उदक्सूत्रन्तथैव च।
सूत्रात्सूत्रान्तरन्ताल न्तराङ्गुं वापि लेखयेत्॥
उत्तमन्तु चतुःप्रस्थं मध्यमन्तु तदर्द्धकम्।
अधमं प्रस्थशालीन्तु प्रत्येकन्तु पृथक् पृथक्॥
तण्डुलैश्च कुशैर्श्चैर्वाथ कल्पयेन्तदभावतः।
उत्तराभिमुखो भूत्वा स्वासीनः परिकल्पयेत्॥
परिस्तरेण दर्भैश्च पूर्वैश्चैव विशेषतः।
भूतसं-। कुशैश्चैव पूर्वादि परिकल्पयेत्॥
दर्भान्परिस्तरे द्वाद्य पूर्वाग्रञ्चोत्तरानुकम्।
अग्रमग्रन्तु गेशान्यं पृष्ठे पृष्ठन्तु नैऋते॥
मूलाग्रन्तु समंकुर्या द्वायुरग्निस्तथैव च।
मध्यमे शिवतत्वन्तु पूर्वकोष्ठे सदाशिवम्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्यातत्वन्दक्षिणे पुरुषतत्वं तथोत्तरे ।
पश्चिमे कालतत्वन्तु पृथ्वीतत्वन्तु पावके ॥
अप्तत्वन्निर्ऋतिकोष्ठञ्च वायुकोष्ठे मरुत्क्रमात् ।
ईशे प्रकृतिकोष्ठञ्च कोष्ठपूजा विधीयते ॥
उत्तमं स्वर्णपात्रञ्च मध्यमं कंसपात्रकम् ।
अधमं मृण्मयञ्चैव पात्रमित्यभिधीयते ॥
कालभिन्नञ्च कोणञ्च कृष्णाभञ्चैव वर्जयेत् ।
कारणे-: नव पात्रन्तु संगृह्य क्षालयेद्गन्धवारिणा ॥
प्रोक्षयेत्पुरुषेणैव कवचेनावकुण्ठयेत् ॥
१०१८ वातुले-: मध्यमे वरप्रतिष्ठञ्च सुशान्तं पूर्वमेव च ।
तेजो दक्षिणदिक् चैव स्वबोधकन्तथोत्तरे ॥
अमृतपात्रं पश्चिमायामव्यक्तञ्चेशकोणके ।
आग्नेय्यां व्यक्तपात्रं स्यात् नैर्ऋते सूर्यपात्रकम् ॥
बहिर्यास्सहिपात्रं स्यात् पात्रपूजा विधीयते ।
कृष्णाया गोमयं पात्रं नीलायाः कपिलं घृतम् ॥
शुक्लाया दधि ताम्रायाः क्षीरमाहृत्य यत्नतः ।

विश्वसादाख्ये-:

मध्ये क्षीरं त्रिकुडु - पूर्वे प्रस्तद्धृतो द्विबिन्दधि ।
घृतन्दक्षिणकेचैव कुडुबेन समन्वितम् ॥
उत्तरे प्रस्थगोमूत्रं गोमयं गोकुलाद्धृतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पश्चिमे जलसंयुक्तं पञ्च पादं भवेत्तदा ।
कुशोदकञ्चैशदेशे दृश्येच्छुद्धवारिणा ॥
षट्त्रिंशद्दर्भसंयुक्तमथवा पञ्चविंशतिः ।
द्वादशं पञ्चकं वापि त्रिभिर्वा संप्रकल्पयेत् ॥
कूर्चं प्रदक्षिणन्तत्त हस्तमात्रञ्च दीर्घकम् ।
ग्रन्थिं द्व्यंगुलमग्राणि चतुरं शुद्धमेव च ॥
तालमात्रेण वा कूर्चं कुशाग्र च कुशोदकम् ।

वातुले-: कपित्थफलमात्रेण पिष्टामलकमीरितम् ।
कदलीफलमात्रेण रजनीञ्च प्रमाणकम् ॥

कारणे-: शालीपिष्टन्तु चाग्नेय्यात् स्थापयेद्देशिकोत्तमाः ।
अमलीनिर्ऋतौ चैव वायव्यां रजनीन्तथा ॥

अंशुमति-: अलाभे दधिनि क्षीरं क्षीराभावे भवेद्दधि ।
गोमूत्रं गोमयालाभे तदलाभे तु गोमयम् ॥
पञ्चगव्येषु यस्य स्यादलाभस्तद्गृहं शुर्वै ~~दायकं च्यते~~ भवेत् ।
(दक्षिणे तु घृतं स्थाप्य गोमयञ्चोत्तरे न्यसेत् ॥
गोमूत्रं पश्चिमे न्यस्य सृष्टिन्यासः क्रमेण तु ।
मध्यमे तु घृतं *)
उत्तमे मध्यमे चैव गोमयं कुक्कुटाण्डवत् ।
अथवा चाक्षमात्रं स्यात् जलेनैव प्रपूरयेत् ॥
वस्त्रपूर्वं प्रकर्तव्यं स्थापयेद्विधिपूर्वकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मद्ध्ये क्षीरन्तु संस्थाप्य तत्पूर्वे दधिरुच्यते ।
दक्षिणे तु घृतं स्थाप्य गोमयञ्चोत्तरे न्यसेत् ॥
गोमूत्रं पश्चिमे न्यस्य सृष्टिन्यासः क्रमेण तु ।
मध्यमे तु घृतं स्थाप्य तत्पूर्वे दधिरुच्यते ॥
दक्षिणे चैव गमूत्रमुत्तरे गोमयन्तथा ।
पश्चिमे चैव गोक्षीरं स्थितिन्यासक्रमेण तु ॥
गोमूत्रं स्थापयेन्मद्ध्ये गोमयं पूर्वतो न्यसेत् ।
दक्षिणे तु दधिश्चैव उत्तरे क्षीरमेव च ॥
पश्चिमे तु घृतं स्थाप्य संहारक्रममेव तु ।
ऐशान्याञ्च कुशोदञ्च स्थापयेत्तु विशेषतः ।
विष्टमामलकञ्चैव रजनीञ्च कुशोदकम् ॥
आग्नेकोष्ठादि वायव्यं हृदा कवचमेव च ।
कालोत्तरे ! पञ्चभूतजयार्थं हि पञ्चगव्यं तथात्मकम् ॥
क्रमात्तद्गुणसंख्यातैरीशाद्यैरभिमन्त्रयेत् ।
गृहस्थो ब्रह्मचारी च दशाद्यैर्गोमयादितः ॥
वातुले- ईशानेन तु दुग्धं स्यात् पञ्चवाराभिमन्त्रयेत् ।
पुरुषेण दधिश्चैव रससंख्याभिमन्त्रितम् ।
अघोरेण घृतञ्चैव धातु संख्या प्रकीर्तिताः ।
गोमूत्रं वामदेवेन वसुभिश्चैव कारयेत् ।
गोमयं सद्यमन्त्रेण नव संख्याभिमन्त्रितम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

840 Page missing



कारणे-: पिष्टन्तु हृदयेनैव आमलं शिरसैव तु।
रजनी चर्ममन्त्रेण अभिमन्त्र्य सकृत्सकृत् ॥
कुशोदकेन गायत्र्या षड्वारं ब्रह्मपञ्चकम्।
योगजे-: दधिसृष्टिक्रमेणैव घृतं वास्थिति रुच्यते ॥
गोमयादीनि संहारमार्गेणान्ते कुशोदकम्।
कारणे-: गोमयं गोजले क्षिप्य गोजलं घृतमेव च ॥
घृत दध्नातु संक्षिप्य दधिक्षीरे तु निक्षिपेत्।
हृदयेनाथमूलेन क्षिपेत्तत्र कुशोदकम् ॥
ब्रह्मभिश्च शिवाङ्गैश्च गायत्र्या च सकृज्जपेत्।
रक्षां विधाय शास्त्रेण वर्मणा चावकुण्ठयेत् ॥
धेनुमुद्रां प्रविश्याथ पूजये द्गन्धपुष्पकैः।
धूपदीपं ततो दद्याद्दस्त्रमन्त्रं समुच्चरन् ॥
प्रायश्चित्तविषये-: मूलेनाष्टोत्तरशतमभिमन्त्रयेत्। तदुक्तम्
शिवधर्मोत्तरे-: कृत्वैकस्थं शिवेनैव जपेदष्टशतं पुनः।
अहोरात्रोषितस्नान शिवस्य पुरतस्थितः।
ओंकाराद्येकमन्त्रेण प्राङ्मुखश्च शनैः पिबेत् ॥
ब्रह्महत्यादिभिः पापैस्सर्वै रेव विमुच्यते।
केवलं हृदिना कार्यं तत्वत्रयमिति क्वचित् ॥
अन्यत्र्च-: गोशकृन्मूत्रमाज्यञ्च दधिक्षीरं कुशोदकम्।
पञ्चगव्यं हृदा लब्धं पूतं भूतगणैरिति ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तमन्तु त्रिपादं प्रतिप्रस्थं त्रिपादं मध्यमं भवेत् ।
द्विपदमधमं प्रोक्तं वैभवन्तु प्रकल्पयेत् ॥

तदुक्तञ्चिन्त्यसादाख्ये -

आत्मार्थे तु विशेषेण प्रस्थादीनि च कारयेत् ।
पञ्चगव्यमिदं प्रोक्तं पञ्चामृतमथोच्यते ॥

110a पञ्चगव्यस्य पुरतः पूर्ववत् स्थण्डिलं भवेत् ।
कोष्ठात्पात्राणि मन्त्राणि पूर्ववत्परिकल्पयेत् ॥
मध्ये दुग्धं दधि प्राची दक्षिणे घृतमेव च ।
उत्तरे मधु संयोज्य शर्करा पश्चिमे भवेत् ॥
कदली पनसाम्रञ्च गन्धोदञ्च तथैव च ।
आग्न्यादीशानपर्यन्तं स्थापयेत्तु विशेषतः ॥
पञ्चामृतं ततः स्थाप्य प्रतिप्रस्थं विशेषतः ।
घण्टाभावेक्षुसारन्तु मध्वाभावे घृतं भवेत् ॥

रौरवे -

घण्टाभावे तु संग्राह्यो भवेदिक्षुरसस्तथा ।
घण्टस्याप्यभिषेके च जलेन क्षालितो भवेत् ॥
अभिषेकः पृथक् प्रोक्तं स्तोयस्नानान्तकम् ।

सूक्ष्मे -

नित्ये नैमित्तिके काम्ये स्नानान्ते तु महेश्वरम् ।
सहस्रधारया स्नानं श्री सौभाग्य प्रदन्ध्रुवम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथवान्यप्रकारेण शृणुत्वं तत्प्रभञ्जना ।
तत्पात्रं त्रिविधं प्रोक्तं मयमन्त्रयमेव च ॥
द्वादशांगुलमेवन्तु उत्तमं परिकीर्त्तितम् ।
सप्तांगुल सुविस्तारं नीचमध्यं प्रकीर्त्तितम् ॥
पञ्चांगुल सुविस्तार नीचं नीचं प्रकीर्त्तितम् ।
त्र्यंगुलं सुविस्तारं तदधः परिकल्पयेत ॥
एवं पात्रस्य विस्तारं भिस्तैरुत्सेधमुच्यते ।
एकांगुलसमुत्सेधमुत्तमं परिकीर्त्तितम् ॥
अर्द्धांगुलसमुत्सेधमध्यमन्तु प्रकीर्त्तितम् ।
पादांगुलसमुत्सेधमेवमेव क्रमेण तु ॥
यवत्रयं घनं प्रोक्तं क्रमेणैव सुबुद्धिमान् ।
पाणिभ्यां पात्रमादाय लिंगमूर्ध्न्यभिषेचयेत ॥
स्वर्णराजत ताम्रैर्वा चतुरश्रञ्च वृत्तकम् ।
चतुरश्रं नवं कोष्ठे मध्ये सुषिरमेकयुक ॥
आवृतञ्चाष्टसुषिरं पद्मकं प्रयत्नतः ।
पद्मबाह्ये सूत्रमध्ये महाशासु विशेषतः ॥
सूचिमात्रप्रमाणेन श्वतिरन्ध्रं प्रकल्पयेत ।
अन्यानि पद्ममध्येषु द्वादशं सुषिरं कुरु ॥
अष्टोत्तरशतं प्रोक्तं पञ्चांशस्यैक हीनकम् ।
तत्पात्रं नवकोष्ठन्तु मध्यकोष्ठेषु मध्यतः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आवृतञ्चाष्टसुषिरं तद्बाह्ये तु विशेषतः ।
ऽर्के च पद्ममध्ये तु शरसंख्या च रन्ध्रकम् ॥
पञ्चाशद्रन्ध्रमेवोक्तं पञ्चाशच्चैक हीनकम् ।
तत्पातन्नवकोष्ठन्तु मध्ये सुषिरमेकयुक् ॥
अन्यानि पद्ममध्ये तु ईदृशं सुषिरं कुरु ।
चतुरश्रमिति प्रोक्तं सुवृत्तमथ चोच्यते ॥
पूर्ववत् पातमेवन्तु ह्यष्टपत्रं सकर्णिकम् ।
कर्णिका मध्यमेकन्तु पूर्वादि वसुरन्ध्रकम् ॥
तद्बाह्य दलमध्ये तु द्वादशस्सुषिरं कुरु ।
महाशास्त्रु युगं भवेत्
तद्बाह्य वृत्तमध्ये तु ~~ईदृशं सुषिरं कुरु~~ ॥
~~चतुरश्रमिति प्रोक्तं सुवृत्तमथ चोच्यते~~ ।
पूर्वं एवं सुषिरमाख्यातमष्टोत्तरशतं क्रमात् ॥
पञ्चाशत्पञ्च विंशश्च पूर्ववत्परिकल्पयेत् ।
क्षुद्रमानमिदं प्रोक्तं आत्मार्थञ्च परार्थकम् ॥
परार्थे भद्रमानन्तु आत्मार्थन्न विचारतः ।
मोहादज्ञानतो वापि भद्रपात्रेऽभिषेचयेत् ॥
आयुश्श्रीकीर्ति पुष्टिञ्च कृष्णपक्षे तु चन्द्रवत् ।
तत्पात्रं शंखतोयेन पूरयेन्मूलमन्त्रतः ॥
एवमेव क्रमेणैव प्रोक्तन्धाराभिषेचनम् ।
कामिके- चन्दनागरु कर्पूर कुंकुमं गन्ध उच्यते ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गतद्वयं त्रयं वापि कर्पूरेण चतुष्टयम् ।
काश्मीरगन्धकर्पूर चन्दनैश्च प्रकल्पयेत् ॥
प्रत्येकनिष्कमात्रं वा तदर्द्धं वा तदर्द्धकम् ।

तथा- गोरोचना कुंकुम चन्दनेला कर्पूरकृष्णा गरुदेवकाष्ठैः ।
कस्तूरिकाद्यैरभिलिप्य शंभुं प्राप्नोति पुण्यं हयमेधकोट्याः
देवं दारुमयं गन्धं शिवाय विनिवेदयेत् ।
शिवलोकमवाप्नोति कल्पमेकं न संशयम् ॥
बिल्वमूलमयं गन्धमुमा माहेश्वराय वै ।
महदैश्वर्यमाप्नोति त्वा पुरं शिवं व्रजेत् ॥
आश्वथमयं गन्धं लिपे मृत्युञ्जयेन्नरः ।
मृत्युजित्सह देवेशक्तो गाणापत्यमवाप्नुयात् ॥
तस्मात्सर्वोपचारेभ्यो गन्धपूजा विशिष्यते ।

अथ पुष्पाणि उच्यन्ते सुप्रभेदे-
श्वेतरक्ता सितानीह सात्विकादीनि तानि च ।
पुष्पाणि पीतवर्णानि मिश्रकाणि विनिर्दिशेत्
नीलोत्पलविनान्यानि तामसानि विवर्जयेत् ।
नंद्यवर्तं शिवावर्त्तं श्वेतार्कमुदये हितम् ॥

करवीरञ्च पद्मञ्च श्रोणपुष्पञ्चमध्यमे
मल्लिका कृष्णधूर्धूरं सायाह्ने चम्पकं हितम् ।
कदम्बः कनकञ्जाति द्विकर्णीचार्थरात्रिके ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्रोणञ्च श्वेतपद्मञ्च जाती च कूर्पर्णिका ।
नंद्यावर्तं श्रियावर्तं मन्दारं शतपत्रका ॥
श्वेतार्कं मालती विल्वं पुंनागं कुरवन्तथा ।
इत्यमादग्निपुष्पाणि सात्त्विकानि विनिर्दिशेत् ॥
रक्तोत्पलं तथा पद्म धुर्धुरं बृहतीद्वयम् ।
110b पलाशं पाटलादीनि राजसानि विनिर्दिशेत् ॥
कर्णिकारञ्च धर्द्धूर चंपकारश्वथादिकम् ।
इत्यमादीनि पीतानि मिश्रकानि विनिर्दिशेत् ॥
करञ्जं वकुलं शाक शिरिषं केतकी तथा ।
लांगूली डाडिमञ्चाम्लं श्रीपर्णी च विभीतकम् ॥
बन्धूकं कुन्द धूतानि कापासन्नीवि कण्टकम् ।
किंशुकञ्च मन्दन्ती च कुमुदानि विवर्जयेत् ॥
अपक्वमतिपक्वञ्च मुकुलञ्च विवर्जयेत् ।
अष्टपुष्पाणि वर्ज्यानि शिवस्य परमात्मनः ॥
केतकी माधवी कुन्द यूथिका मदयन्तिका ।
शिरीष सर्ज बन्धूक मष्टपुष्पं विवर्जयेत् ॥
सुप्रभेदे- उत्पादिषु च यातायां परिवेष क्रियासु च ।
सकलानामलङ्कारे वर्ज्या ग्राह्याश्च सर्वदा ॥
कालोत्तरे- कृष्णकाणि च पुष्पाणि महीपाक्षी च पुष्पिका ।
शिवांशुमारपुष्पाणि उमादेवीञ्च पूजयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पाशापुष्पै ब्रह् - ं तुलस्या खलु केशवम् ।
इन्द्रवल्ली च पुष्पाणि इन्द्रप्रीति कराणि तु ॥
देवराजोद्भवं पुष्पं गृहदेवाधनार्चयेत् ।
कारणे - परार्ध्वंत्पत्रपुष्पाणि दापयेत् यथा क्रमम् ॥
अतोऽन्नैमित्तिकञ्चैव काम्यञ्च - नः कारयेत् ।
[^ कृष्ण लोहञ्च निर्यास चन्दनञ्च क्रमेण तु ॥
व्योम पक्षात्त्रिभागान्त ईषत्कर्पूरमिश्रितम् ।
उत्तमं धूपमाख्यातां मधुना च परिप्लुताम् ॥
उशीरञ्चन्दनोपेतं मधुयुक्तं मधुप्लुतम् ।
भागन्तत्पूर्वमेवोक्त मध्यमं धूपमुच्यते ॥
गुग्गुलुं घृतसंयुक्तं कन्यसं धूपमीरितम् ।
॥ अथ दीपविधिः ॥ ^]
पत्र छेदैस्तु संपूजा राक्षा धानं विनाशिनी ।
पुष्प छेदैस्तु संपूजा सर्वसिद्धिकरी भवेत् ।
॥ अथ धूपविधिरुच्यते ॥
अगरुञ्चैकभागं स्यान्निर्यास द्विगुणं भवेत् ।
चन्दनं त्रिगुणं प्रोक्तमीषत्कर्पूरमिश्रितम् ॥
शीतानि नामधूपोयं मधुयुक्तः प्रशस्यते ।
गुग्गुलं घृतसंयुक्तं विल्वं वा रुद्रमिश्रितम् ॥
काष्ठं सचन्दनं वापि घृतमिश्रं सधूपयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कृष्णलोहञ्च निर्यासं चन्दनञ्च क्रमेण तु ।
व्योमपक्षातिआगान्त ईषत्कर्पूरमिश्रितम् ॥
उत्तमं धूपमाख्यातं मधुना च परिप्लुताम् ।
उशीरञ्चन्दनोपेतं मधुयुक्तं मधुप्लुतम् ॥
आगन्तत्पूर्वमेवोक्तं मध्यमं धूपमुच्यते ।
गुग्गुलुं घृतसंयुक्तं कन्यसं धूपमीरितम् ॥

॥ अथ दीपविधिः ॥

गो घृतेन च तैलेन कर्पूरं वार्तिदीपिता ।
चतुस्त्रि द्व्यंगुलायामा दीपज्वाला विशिष्यते ॥
कपिलाघृतेन दीपस्यात् सिता रक्ता घृतेन वा ।
अजा घृतेन वा लाभे शुद्धतैलेन वाहितम् ॥
कपिला या घृतं श्रेष्ठ मध्यमन्त्वन्यजं घृतम् ।
अधमं स्यादजासर्पि शुद्धतैलं तथैव च ॥
सात्विकं राजसञ्चैव तामसञ्च क्रमाद्भवेत् ।
कर्पूरवर्तिकन्दीपं दीपयेत्सर्वसिद्धिदम् ॥
श्रेष्ठयुगांगुलज्वालो मध्यमस्तु गुणांगुलः ।
अधमो द्व्यंगुलज्वालो दीपो ह्येवं प्रकीर्तितम् ॥
वृक्षबीजोद्भवस्नेहैश्शिवे दीपं विवर्जयेत् ।

॥ अथ नैवेद्यविधिरुच्यते ॥

कामिके :- शालीलान्तण्डुल श्रेष्ठ यवव्रीह्यादिमध्यमम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



व्रीहीनामवशिष्टाना तण्डुलस्याधमो भवेत् ।
सिततण्डुलकार्ये च ते सर्वे तण्डुलस्मृताः ॥
इतरे व्रीह्यः प्रोक्ताः फलन्तेषां पृथक् पृथक् ।

तथा-: इतरेकफलञ्चैव शालिर्द्विगुणं भवेत् ।
तिलै प्रियंगु शतधाप्रोक्तं नीवारन्तु सहस्रकम् ॥

(कुलशेखरनल्) गोधूमन्तु भवेल्लक्षमनन्तं वैणवं भवेत् ।

कामिके-: भक्त्या वित्तानुसारेण नैवेद्यन्तु प्रकल्पयेत् ॥
पत्रपुष्पं फलन्तोयमन्नपानाद्यनौषधम् ।
अनिवेद्य न भुञ्जीत भगवन्तं सदाशिवम् ॥
अपूपकादियद्द्रव्य भोज्यन्दत्वा शिवस्य तु ।
वर्धने तस्य तद्धान्यं फलपुष्पादयस्तथा ॥
अदत्वा तु हरस्याथ भुक्तन्तत्क्षयिते धनम् ।
अल्पे महति वा तुल्यं फलमाढ्यदरिद्रयोः ॥
यथा शक्तिप्रकर्तव्यं भक्तिरेवात कारणम् ।
यावन्तस्तण्डुलास्तत्र नैवेद्यमपि कल्पते ॥
तावद्वर्षसहस्राणि शिवलोके महीयते ।

सूक्ष्मे-: द्विप्रस्थादि चतुर्द्रोणमात्रार्थे संप्रपूजयेत् ॥

अंशुमति: उत्तमद्व्याढकप्रोक्तं षट्प्रस्थं मध्यमं भवेत् ।
अधमञ्चाढकञ्चैव नैवेद्यान्त्रिविधं भवेत् ॥
अथवान्यप्रकारेण आढकञ्चोत्तमं भवेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तमादेतत्रयञ्चैव कुडुंबान्तन्तदुच्यते ।
प्रस्थस्यर्धफलञ्चैव कुडुंबार्ध धृतं तथा ॥
तदर्द्धार्द्ध घृतञ्चैव पूर्वेणैव तु योजयेत् ।
आज्यहीनन्तु नैवेद्यमसुराणान्निवेद्यकम् ॥
॥।० तस्मात्सर्वप्रयत्नेन आज्ययुक्तं निवेदयेत् ।
काम्यार्थं तण्डुलञ्चैव नैवेद्यं स्वेच्छया ततः ॥
कारणे-: चरप्रस्थद्वयं प्रोक्तं हविराढकमुच्यते ।
प्रस्थं कुडुंब संयुक्तं पैशाचारानमुच्यते ॥
सकलानान्तु नैवेद्य भवेत्प्रस्थ द्वयाधिकम् ।
प्रागुक्तविधिनापूर्वं स्नात्वा तु परिचारका: ॥
शुक्लवस्त्रधरञ्चैव शुक्लयज्ञोपवीतका: ।
पवित्रपाणिनां कुर्याच्चरुपाकं यथाक्रमम् ॥
वस्त्रपूतैश्च तोयैश्च जलद्रोणं प्रपूरयेत् ।
पात्रशुद्धिं ततः कृत्वा क्षालयेत्तण्डुलान्हृदा ॥
जलेनैव तु बद्धकृत्वा निष्पीड्य च मुहुर्मुहु: ।
कामिके-: षडंबौ क्षालनं कृत्वा ह्यस्त्रेन प्रक्षिपेज्जलम् ॥
तण्डुलस्य प्रमाणस्य अर्द्धाधिक समञ्जलम् ।
शोधयेद्बीजमुख्येन पात्रस्थं जलतण्डुलान् ॥
कामिके-: प्रालिप्तगोमयाद्यस्तु प्रोक्षितेतमहानसे ।
धर्माधर्मभुजा२ च्छाल्लि तण्डुलैरर्चयेद्धृदा ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उद्धृत्य वामदेवेन स्थापयेद्धृदयेन तु ।
विन्यासाग्निमघोरेण वक्त्रेणाग्निं प्रदीपयेत् ॥
पिपीलिकादिसञ्जुष्टैः कोटरक्रिमिसंयुतैः ।
विस्फुलिंगयुतैश्चापि काष्ठैश्चैव न दीपयेत् ॥

कारणे- : केशकीटापविद्धञ्च शर्करा तुषसंयुतम् ।
अतिपक्वमपक्वञ्च नैवेद्यं परिवर्जयेत् ॥
त्याज्यन्तु वर्णगन्धाभ्यां शीतलं न निवेदयेत् ।

स्वायंभुवे- : आच्छादनविहीने च वीक्षणान्दर्शनन्तथा ॥
नैवेद्यं वर्जयित्वा तु तच्छेषं ग्राह्य बुद्धिमान् ।

सन्ताने- : तुषेण दारिद्र्यश्चैव पाषाणाद्व्याधिरेव च ॥
केशेन मरणं विद्यात्तद्वर्जयेत्तु विशेषतः ।

शैव वायव्यसंहितायाम्- :

हविश्च षड्विधं ज्ञेयं शुद्धमुद्गान्नमेव च ।
पायसन्दधिसंयुक्त गौलञ्च मधुनाप्लुतम् ॥
दधिमिश्रं गुलैर्मिश्रं मधुसंमिश्रकं हविः ।
ज्ञातव्यकमनेकं वा व्यञ्जनेन तु संयुतम् ॥

वीरतन्त्रे- : पायसान्नं क्रमं वक्ष्ये मुद्गं वै तण्डुलार्द्धकम् ।
द्विगुणं क्षीरमित्युक्तं पाचयेत्पायसान्नकम् ॥
गुलान्नं पाचयेद्द्विप्रक्षीरं वै तण्डुलार्द्धकम् ।
तण्डुलार्द्धं गुलं प्रोक्तमाज्यश्चैव गुलार्द्धकम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुलान्नमिति विज्ञेयं क - - शान्नमथो शृणु ।
तिलं वै चूर्णितं तत्र तण्डुलस्य चतुर्थकम् ॥
तिलार्द्धं प्रक्षिपेदाज्यं कृसरान्नमिहोच्यते ।
तण्डुलस्य चतुर्भागमुद्गं तत्रैव योजयेत् ॥
नालिकेरफलैर्युक्तं मुद्गान्नं तदिहोच्यते ।
शुद्धोदनसहस्रेभ्यः पायसञ्च विशिष्यते ॥
पायसान्नसहस्रेभ्यः - - परान्नं विशिष्यते ।
कृसरान्नसहस्रेभ्यः गौलान्नञ्च विशिष्यते ॥
गौलान्नसहस्रेभ्यः मुद्गान्नन्तु विशिष्यते ।
एवमेव क्रमेणैव क्रमेणैव सहस्रगुणितं फलम् ॥

॥ अथोपदंश विधानमुच्यते ॥

वातुले - : कदली द्वौ तथा चैव बृहती द्वौ तथैव च ।
कारवल्ली तथा चैव ठवालकद्वयन्तथा ॥
पनसद्वयं तथा वत्स कूश्माण्डद्वयमेव च ।
लाबुनी च द्वयञ्चैव कोशातकी द्वयं तथा ॥
शिग्रुमूलं वल्लिमूलं कन्दमूलञ्च सूरणम् ।
आम्रञ्च तिन्त्रिणी तत्र यथा यान्ये स्नेहद्रुह ॥

रौरवे - : द्विविधं शिवमुद्गान्नं कुलस्थं राजमाषकम् ।
माषञ्चैव गुरोर्विद्यात् सतुषं वितुषं तथा ॥

वीरतन्त्रे - : राजमाषाढकञ्चैव मुद्गं शिग्गुलस्थकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कामिके -: कूश्माण्डं पनसालाबु कालिकं बृहती द्वयम्।
लिब पुषार्करिंश्चैव स तुषं वितुषन्तथा॥
डाकैकमुपदंशानां प्रस्थस्येक फलं भवेत्।
सर्वोपदंशका भक्ता मरीचो लवणान्विता॥
जीरकादि रसोपेता यथायोगं भजेत्पृथक्।

विश्वसारख्ये -:
स्मृत्यंगुलन्तु विस्तारं विस्तारार्द्धेन वर्द्धयेत्।
ओष्ठमेकांगुलं प्रोक्तं स्वर्णतालादिभिर्जयेत्॥
तदर्द्धं मध्यमं ज्ञेयं तदर्द्धं कन्यसं भवेत्।
कामिके -: सौवर्णं रजतं ताम्रमथवा कदलीदलम्॥
कुड्मकांसेन वा कुर्यात् पात्रमादाय बुद्धिमान्।
सूक्ष्मे -: गोमयालेपनं कृत्वा देवाग्रे मण्डलं न्यसेत्॥
स्थालिका क्षालनं कृत्वा नैवेद्यञ्च प्रपूरयेत्।
व्यञ्जनैरावृतञ्चैव लवणपक्वोपदंशकैः॥
फलादि गुलसंयुक्तं क्षीरन्दधि च मध्यमे।
आज्यावृत समायुक्तमभिधानन्तु नासता॥
॥।८ नैवेद्योत्थापने मार्ग मार्जनं प्रोक्षणं कुरु।

अथ विधानमुच्यते -:

स्वर्णाद्येकतमं विशेषार्घ्ये पात्रं हुं फडन्तास्त्रेण प्रक्षाल्य बिन्दु प्रस्रुतामृत धारामयेन रुद्रतोयेन वौषडन्तहृदये-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नापूर्य वत्तद्द्रव्यं निक्षिप्य तस्मिन्नासनमूर्ति पञ्च ब्रह्मविद्या देह नेत्रमूलांगैः पुन · · लेन संपूज्य संहितया-भिमन्त्र्यास्त्रेण दिक्बन्धनं कृत्वा कवचेनावकुण्ठ्य वौषडन्तमूलेन धेनुमुद्रयामृतीकृत्य महामुद्रां प्रदर्शयेत्। ज्ञानरत्नावल्याम्-

पाद्यमाचमनञ्चार्घ्यं निरोधञ्च यथाक्रमम्।
स्वर्णाद्येकतमं पात्रं यान्त्रिकाधारसंस्थितम्॥
अर्घ्यपात्रं ततो गृह्य हुं फट्कारेण क्षालयेत्।
बिन्दुस्थानं समाश्रित्य मध्ये पद्मं विचिन्तयेत्॥
आपूर्य पञ्चभिर्ब्रह्मै शिरो · · गैश्च शिवेन च।
गन्धपुष्पसमायुक्तं तज्जलं मन्त्रसंस्कृतम्॥
स्थानेषु कल्पनीयेषु बिन्दुं बिन्दुं प्रदापयेत्।

कालोत्तरे-: पादोः पाद्यं पुरादद्या दागतस्य शिवस्य तु।
मुखे · चमनं दद्यात् शिरस्यर्घ्यं निवेदयेत्॥

मृगेन्द्रे-: निरोधान्ते विसर्गे चरोधार्घ्यमुपयुज्यते।
शिवाभिधानः पूजान्तः पाद्यमाचमनीयकम्।

दीप्ते-: पाद्यमीश्वरतत्वान्तमाचमार्घ्यं सदेशकम्॥
शिवार्घ्यं शिवतत्वान्त शेधार्घ्यं शक्तिगोचरम्।

ततोऽनेन वौषडन्त शक्तिमन्त्रेणात्मानं शिरस्यभिषिच्य गन्धादि पूजोपकरण द्रव्यजातमंगुष्ठानामिकाभ्यां सत्य तन्मूलेन चक्षुषा समालोक्य हुं फडन्तास्त्रेण पताकया संप्रोक्ष्य तेन मध्यमांगुलीना

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ताड्य शौषडन्त कवचेन उत्तान पताकया रक्षावकुण्ठनामृतीकरणानि कुर्यात् । कामिके —:

ईक्षणं मूलमन्त्रेण प्रोक्षणञ्चास्त्रमन्त्रतः ।
ताडनञ्चास्त्रमन्त्रेण वर्मणाभ्युक्षणं भवेत् ।

अत्र निरीक्षण त्रैविध्यमुक्तं पारमेश्वरे —:

दृक् क्रियेच्छात्मकैरर्क वह्निसोम विलोचनैः ।
क्रमाच्छुष्कन्तथा दग्धममृताप्लुति संयुतम् ॥
शुद्ध्यर्थं प्रोक्षितं शक्ते तेजसन्ताडनन्ततः ।
अभ्युक्षणक्रिया जातं ग्रह्यता भावसंयुतम् ॥

तथा तन्त्रसारे —:

जडचिद्भेदनं शक्ते विद्धि शिवद्रव्य निरीक्षणम् ।
प्रोक्षणं योग्यताक्लृप्ति जडाद्भिन्नस्य वस्तुनः ॥
ताडनन्तत चिद्वृत्ति र्यथा पाषाणताडनम् ।
उत्पत्ति र्विस्फुलिंगाना मभ्युक्षण मतः परम् ॥
सर्वत्र कीर्तितस्तस्य चितोचित सर्ववस्तुनि ।
जलादिगन्धपर्यन्तं सर्वद्रव्य समायुतम् ॥
निरीक्षणादिकञ्चैव सर्वशुद्धि प्रकीर्तितम् ।

इत्थं द्रव्यशुद्धिं विधाय शिरस्यर्घ्य जलबिन्दु मस्त्रेण निक्षिप्यासने ओं हां शिवासनाय नम इति पुष्पं दत्वा मूर्द्धि मूर्तिमन्त्रेण पुष्पं विन्यस्य फाले चन्दनतिलकं विधाय शिरसि मूलेन

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुष्पन्दत्वा पशुभावमुक्त्वा शिववत् शुद्धोहमिति भावयेत्।
ड्यमात्मपूजानिर्वर्त्य तदविरुद्धं मौनमवलंब्य ह्रस्वदीर्घप्लुतक्रमेण विद्यादिब्रह्मरन्ध्रान्तं द्वादशान्तं वा यावच्छक्त्यं मूलमन्त्रेण प्रणवादिनमोन्तमुच्चार्य ततो बिन्द्वन्तन्यन्यानि क्रमांगानि चेदिति तदुक्तं-:

द्रव्यशुद्धिं विधायैवं स्वशिरस्यर्घ्य सेचनम्।
कृत्वास्त्रेणाथमूलेन पुष्पमारोप्यमूर्धनि ॥
ललाटे तिलकं कृत्वा चन्दनेन सुगन्धिना।
आसनं मूर्तिमूलेन आत्मपूजाञ्च कारयेत् ॥

सर्वज्ञानोत्तरे-:

शिवस्य यादृशं रूपं तादृशं चिन्तयात्मनि।
शिवमन्त्रान्न्यासमिदमात्मनस्तु सदा कुरु ॥
प्रकृतं भावमुत्सृज्य शिवोहमिति भावयेत्।

इयमात्मनश्शिवभावना पूजाकाले अवश्यं कार्या शिवसाम्याभे पूजकत्वानुपपत्तेः। तदुक्तं शिवधर्मोत्तरे-: नारुद्रो रुद्रमर्चयेदिति। यथा - यावन्नतत्समो जातस्तावन्नाराधने।

शुद्धत्वाच्च शिवत्वाच्च देहं शिवतनुस्मरेत् ॥

चिन्त्यविश्वसादाख्ये -:

स्नाने जपे च यागे च भोजने पूजने तथा।
याने चोद्धूलने चैव सन्ध्यावन्दनकेपि च ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आवश्यकेषु सर्वेषु सदा वाच्यमिमं भवेत्।
बिन्दुनाथ शिखां प्रोक्तं मन्त्रमुच्चार्य चोदयेत्।
ज्ञानशक्तिमयो मन्त्रः शिवेनाधिष्ठितस्सदा॥
सर्वसंपत्करं तेषां बिन्द्वन्तास्सर्वकामदाः।

सन्तानसंहितायाम्-:

ओंकारं पूर्वमुच्चार्य नमस्कारान्तमेव च।
अङ्गानि च प्रासादं शिवबीजन्तथैव च॥
डाकिनीति महामन्त्रमयुताक्षरमेव च।
अन्यानि सर्व - - - शुद्धिरुदाहृतः॥

ननु - मन्त्रस्वभावतश्शुद्धवरामोघशक्तय इति वचनात् प्रकृत्या शुद्धमन्त्रास्तेषां शुद्धानामपि पुनश्शुद्धिः क्रियते। तदा-
नवस्था प्रसंगस्स्यादिति चेत्सत्यं तेषामैश्वर्याधिकारमलो विद्य
112a ते- तेन निरोहितशक्तीनान्तेषां परशक्ति संपर्कात् स्वसामर्थ्यो-
न्मीलनं शुद्धिरित्युच्यत एव नवतञ्चाज्ञानशक्तिमयमन्त्राः
निर्नैर्व्यमलान्विताः। शक्तिज्वलितसामर्थ्यास्सर्वाभीष्टप्रदा
मताः। एवं मन्त्रशुद्धिं विधाय पीठे तत्तत्स्थानेषु वृषेश्वरादि
परिवारदेवानर्चयेत्। तदुक्तमंशुमति-:

स्वेटकं नैरृते देवो गणेशस्यासनन्ततः।
सर्वेशासनञ्चैव तत्तस्थाने समर्चयेत्॥
पेटकात्सर्वेशाणा पृथक्कार्यं विचक्षणः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आच्छाद्यवस्त्रगलिता प्रोक्षये दस्त्रवारिणा ।
निर्माल्यञ्च विसृज्याथ मानसं स्नानमाचरेत् ॥
गणेशं नैरृते न्यस्य स्कन्दं वै वायुकोणके ।
महेशान्दक्षिणे देशे पूर्वाभिमुखमेव च ॥
नृत्तमूर्त्यादि देवाना मुत्तरे दक्षिणाननम् ।
चक्रन्तु दक्षिणे न्यस्य भस्मधाराक्षमालिकाम् ॥

तथा सूक्ष्मे - वृषेश्वरन्तथा पूर्वे वृष वामे तु भास्करम् ।
महेशान्दक्षिणे देशे दक्षिणामूर्ति दक्षिणे ॥
गणेशं नैरृते देशे तद्वामे कमलोद्भवत् ।
षण्मुखं वायुदेशे तु विद्यापीठं तु दक्षिणे ॥
सौम्ये तु नृत्तमूर्तिञ्च ईशाने क्षेत्रपालकम् ।
कुबेरानिलयोर्मध्ये लिंगोद्भवन्तु विन्यसेत् ॥
सोमशंकरयोर्मध्ये भक्तादीन्विन्यसेत्क्रमात् ।
भक्तानां वाम पार्श्वे तु गकाक्षरीन्तु विन्यसेत् ॥
गकाक्षर्याश्च वामे तु लकुलीशन्तु विन्यसेत् ।
पूर्वं ब्राह्मीन्तु विन्यस्य पश्चाद्ध्यानं समाचरेत् ॥
गणेशादि क्षेत्रपालान्त मर्चयेत्स्वस्वतः ।

यद्वा चिन्त्यविश्व सादाख्ये -
दक्षिणे दक्षिणामूर्ती मुत्तरे निधनेश्वरम् ।
ब्रह्मेश्वरे वारुण्यामाग्नेय्यामभिषान्तकिम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वायव्यान्दिशि गाङ्गेयं पूजयेच्च समाहितः।

एतेषां वेराणां शिलामयत्वे प्रत्यहं स्नपनं कार्यं
लोहमयत्वे पर्वणि स्नानं कारयितव्यं तदुक्तं पौष्करे-

स्नानं बेरस्य संशुद्धिं कारयेदुक्तवर्त्मना।
लोहजं यदि तद्बेरं स्नानं पर्वणि पर्वणि॥

अंशुमति- मूर्तिमावाहयेद्विद्वा तत्तन्मन्त्रमनुस्मरन्।
पाद्यमाचमनं स्वर्घ्यं चार्घ्यमस्त्रमन्त्रेण दापयेत्॥
वस्त्रं गन्धश्च माल्यञ्च पुष्पं मूर्ध्नि च विन्यसेत्।

तत्र मूर्तीरावाहनञ्च क्रमो प्रदर्शितम्।

सदाशिव महेशश्च रुद्रश्चेति त्रिधा मताः।
शिव देह इति प्रोक्तो विद्यादेह स उच्यते॥
ध्यातस्य विमला शक्ते शिवस्य समवायिनि।
सैवमूर्ति क्रिया भेदात् सदाशिव तनुर्मताः॥
तदा माहेश्वरी मूर्ती किन्तु शान्तस्वरूपिणी।
तद्वद्रौद्री समाख्याता किन्तु सोग्रस्वरूपिणी॥
आसां कुण्डलिनी शक्तिः क्रिया ख्याता तनुकारणम्
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
एते कारणदेवास्युः क्षेत्रजाः परिकीर्तिताः॥
ब्रह्माविष्णुश्च मूर्तिस्तु माया कारणमिष्यते।
रुद्रेश्वर सदेशानां क्रियाख्या तनुकारणम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्येवं द्विधा प्रोक्ता ईश्वरस्य सदा शिवः।
तस्मात् ज्ञानमयो देहः शिवस्य परिकीर्तितः॥
ब्रह्मविष्ण्वोश्च मूर्तिस्तु माया कारणमिष्यते।
तद्देहतया सिद्ध्यर्थं मूर्तिमादौ प्रकल्पयेत्॥

एवं परिवारार्चनं आवाहनं कृत्वा पुरस्सरं कृत्वा तदनु लिंगशुद्धिं विदध्यात्। तत्र तावत् स्नानवेद्यास्तु रूपं प्रदर्श्यते। तथा - सुवर्णरजतन्ताम्रै वाम धूतपुसीसकैः।

एवं बहुद्रव्यमाख्यातं स्नानवेदीं प्रकल्पयेत्॥
स्थानं पद्मजगतीं कंपं कण्ठञ्च कंपकम्।
जगतीं वाजिनं कृत्वा विस्ताराद्यामतोपि वा॥
मानशुद्धिं ततः कृत्वा वामेनान्यं प्रकल्पयेत्।

यद्वा- क्षीरतर इड न्तद्देशाश्रं हस्तसाम्मितम्॥
तदर्द्धमुन्नतं रम्यं मेखला गोमुखान्वितम्।
अंशुमति च -:

कंसञ्च दारुजञ्चैव वृत्ताकारं समन्तकम्।
नालञ्च पादसहितं तन्मध्ये चोन्नतं ततः॥
स्नानार्थं गमादाय स्नानवेद्युपरि न्यसेत्।

एवं लक्षणकं स्नानवेदीं स्नान देशे सौम्यनालमव स्थाप्य तन्मध्ये वस्त्रं प्रसार्य तदुपरि ओं हां अनन्ताय नम इत्यभ्यर्च्य ओं हां धर्माय नम

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्याग्नेय्यां ज्ञानाय नम इति नैरृत्यां ओं हां वैराग्याय नम इति वायव्याम्। ओं हां ऐश्वर्याय नम इत्यैशान्यामध्यर्ध्वोनन्तस्यैशाख्यां ओं हां पद्माय नम इत्यं षडुच्चलासनं परिकल्पयेत् तदुक्तं कारणेत्वात्मार्थ पूजायां अनन्त धर्मज्ञानादीन् पद्ममित्यच्चलासनम्। तथा कामिके -

॥२८ धर्मं ज्ञानञ्च वैराग्यमैश्वर्यञ्च चतुष्टयम्।
अनन्त पद्ममित्येव षडुत्थमासनस्थ तु॥

श्रीमत्पूर्वे च -

अनन्तञ्चैव धर्मञ्च ज्ञानवैराग्यमेव च।
ऐश्वर्यञ्च पद्मञ्च षडुत्थमिदमासनम्॥

चलप्रासादरूपं चिन्त्यविश्वसारारव्ये प्रदर्शितः।

चलप्रासादकं वक्ष्ये प्रासादकरणन्ततः॥
प्रासादकथनञ्चाष्टं हैमं वा शैलकन्तु वा।
ताम्रेण दारवोर्धेन शरवेणापि भावयेत्।
नेलेण चापि स्वतेण क्रमादेवन्तु कारयेत्।
धृतवारे बहिश्चैव मानांगुल विजृंभणात्॥
समन्ताद्वृत्तसंयुक्त ञ्चतुरश्रमथापि वा।
लिंगपीठान्ततोत्थ्राय द्विगुणं गर्भगेहतः॥
सुदृढं भक्तिकं कुर्यात् सर्वं शोभासमन्वितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आयामोत्सेधकं चापि वर्द्धयेदंगुलेन वै ।
त्लिंगपीठसमन्तन्तु कारयेल्लक्षणान्वितम् ॥
अत ऊर्ध्वं न कर्तव्यमुपानाद्यन्ततः शृणु ।
तदुच्च मष्टमधा कृत्वा वै कांशेन धरातलम् ॥
धरातलमाधिष्ठानं वसुधारं मसूरगम् ।
इतानि वेदनामानि पर्याय वचनानि च ॥
पादार्द्धन्नव सूलस्य द्विगुणञ्चेति कीर्तितम् ।
प्रस्तारञ्चरणार्द्धन्तु तत् मंगलमुच्यते ॥
वीस्तरञ्चरणायाम तस्योत्सेधन्तरर्द्धकम् ।
यद्धिष्ठानमानन्तु द्वादशांशेन भावयेत् ॥
जन्ममेकेन कर्तव्यं द्वाभ्यां वै जगती भवेत् ।
तदेव कुमुदोत्सेधं कंपमेकेन कारयेत् ॥
वक्षांशं गलमित्युक्तं ऊर्ध्वं पलमथांशकम् ।
महा पट्टी द्विभागेन वेतमंशेन कारयेत् ॥
आधिष्ठानं समाख्यातं पादगर्भमतः परम् ।
सत्मतारचतुर्भेद मेरमेकैककारकम् ॥
पादायामं चतुर्भागं वेदिमेकांशकं भवेत् ।
इकाति पाङ्क्तिभिर्वापि भूतं पंक्तिरथापि वा ॥
केवलं स्तम्भमातन्तु तादिकादि विहीनकम् ।
वस्वश्रं वा षडश्रं वा विमानाकृतिरुच्यते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ऊर्ध्वद्वारं प्रकर्तव्यमुत्तरान्तं प्रशस्यते ।
प्रोक्षयेत्पञ्चगव्येन हृदयादीन्न्यसेत्क्रमात् ॥
चलप्रासादमेवन्तु कल्पयेद्विधिवत्तमः ।

अंशुमत्यामर्थपूजायाम् । पेटकस्वरूपमुक्तम् -ः

स्वर्णरजतताम्रैर्वा दारुणा चैवनिर्मितम् ।
चतुरश्रायताश्रञ्च पेटकाकृतिमेव च ॥
अथवा वृत्तमेवञ्च गर्भगेहे च विन्यसेत् ।

एवं विधिनिर्मितचलप्रासादापेटिकाद्यन्यतमविधातमुद्घाट्य
मरुद्रं सम - - - - त् - - - उक्तमंशुमति

गर्भगेहं प्रविश्याथ विधानोद्घाटनन्तथा ।
गर्भाग्रे भीमरुद्रञ्च स्थितञ्चैव समान्वितम् ॥
चतुर्भुजन्त्रिणेतञ्च वरदाभयसंयुतम् ।
छत्रचामरसंयुक्तं भीरुद्रं समर्चयेत् ॥
तथा कामिके -ः
चतुर्भुजस्त्रिणेतस्तु वरदाभयसंयुतम् ।
पञ्चचामरसंयुक्तो भीमरुद्रस्समीरितः ॥

अंशुमति - निशाचरन्तकं देवदेवेश यजनार्थकम् ।
बद्धद्वारस्य सव्ये तु गच्छत्वं हि प्रसीदमे ॥
एवं संप्रार्थ्य तन्मध्यस्थितन्देवं महेश्वरम् ।
ओं नमो देवदेवेश सर्वलोकैकनायक ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शान्तिश्च स्नानकर्मार्थमात्म रक्षार्थमेव च ।

इति संप्रार्थ्य लिंगं हस्ताभ्यां संधृत्य वस्त्रं विसृज्य स्नानवेद्युपरि न्यसेत् । अंशुमति-:

लिंगं संस्पृश्य मतिमानस्त्रेणैव विसर्जयेत् ।

सूक्ष्मे-: लिंगं हस्तेन संगृह्य स्नानवेद्युपरि न्यसेत् ॥

तदनु पूर्वार्चितां पूजां गायत्र्या संपूज्य सामान्यार्घ्येण स्वाहान्तमूलेन सद्यादिक्रमेण नैष्ठिकं ईशानक्रमेण भोगी पञ्च शिरस्यार्घ्यं दत्वा धूपदीपं दत्वा सद्यादि ब्रह्मपञ्चकम् ईशानादि पञ्चकं कनिष्ठाद्यंगुष्ठान्तं अंगुष्ठादि कनिष्ठान्तं विन्यस्य कनिष्ठानामिका मध्ये पुष्पं संग्राह्यांगुष्ठतर्जनीभ्यां लिंगमस्तकात् पूजां हृदयेनावरोप्य तत्काले तत्पुष्पं लिंगमूर्ध्नि विन्यस्य निर्माल्यमीशान दिशि हृदा वा शुद्धपात्रे चण्डार्थं विन्यस्यास्त्रेण. लिंगं पाशुपतास्त्रेण पीठं प्रक्षाल्य सामान्यार्घ्यजलेन स्वाहान्तहृदाऽभिषिञ्चेत् । कामिके-:

लिंगमूर्ध्वगतां पूजां पूर्वकालप्रकीर्तिताम् ।
गयात्रया पूजयित्वा तु सामान्यार्घ्यं दापयेत् ॥

सूक्ष्मे च- अर्घ्योदकेन संप्रोक्ष्य वक्त्रन्यासं समाचरेत् ।
अंगुष्ठादि कनिष्ठान्तं पञ्चब्रह्ममनुं न्यसेत् ॥

अंशुमति-: ईशानादि तु सद्यान्तं वक्त्रन्यासं क्रमात्ततः ।
कनिष्ठानामिकामध्ये नवपुष्पं तु संग्रहेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अंगुष्ठ तर्जनीभ्याञ्च निर्माल्यञ्च विसर्जयेत्।

सूक्ष्मे—: विसर्जनस्य तत्काले ? पुष्पं मूर्ध्नि च विन्यसेत्॥

किरणे—: न शून्यमस्तकं लिंगं कुर्यात्तत कदाचन।

शेषान्यां स्थापयेत् पूजां प्रत्यग्रामथोचिताम्॥

113a कामिके—: अस्त्रांबुनैव संशोध्य शिवलिंगं स वेदिकाम्।

सामान्यार्घ्यजलैः पश्चात् अभिषेकं समाचरेत्॥

अस्त्राभिषेकं पाशुपतास्त्रं मन्त्रप्रयोगस्य फलम्। शाबरबावल्यां प्रदर्शितम्—:

निर्त्य पूजा समाप्तौ तु रुद्रे मन्त्रगणेश्वरे।

शान्तं रूपं गते तत्र लिंगपीठे च तत्क्षणात्॥

रौद्राविघ्नास्तथासक्ता स्थिता विघ्नं प्रकुर्वते।

भुक्तेर्मुक्तेश्च निघ्नान्ति तस्मात्तान्ते च ये पुरा॥

शिवास्त्रेण च लिंगस्थां पीठे पाशुपतेन तु।

पुनस्ताशाश्च संस्नाप्य स्नापयेद्गन्धवांबुभिः॥

तदा लिंगं वामहस्ते निधाय तदोष्ठे कृतशंखमुद्रा करणे लिंगोपरि चतुरंगलप्रमाणे गोश्रृंगाग्रं प्रमाणधारयाभिषिच्य हस्तयन्त्रोद्भव तैलेन घृतेन वा सर्वांगमभ्यर्च्य शिरीषादि पिष्ट-चूर्णेन विरूक्ष्य पुनः कोष्णतोयेनाभिषिच्य शिरसि पुष्पमारोप्य प्रतिद्रव्यमन्तरान्तरार्घ्य धूपदीपपुष्पप्रदान पूर्वकम्। पञ्चगव्यं पञ्चामृता-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दिभिस्संस्नाप्य पुनस्सुगन्धिशीतलाम्बुना सम्यगभि-
षिच्य विशेषार्घ्यशंखतोयाभिषेकसहितरुद्रमानधारया-
भिषिच्य मन्त्रपुष्पन्दत्वा चर्मणा सूक्ष्मवाससा परिमृज्यभद्र-
पीठे स्थापयेत् । कामिके—:

तैलेन हस्तयन्त्राद्यैर्भावितेन नवेन च ।
वक्षोण वासिते नाथ शुभगव्येन सर्पिषा ॥

कारणे—: तैलमस्त्रेण संप्रोक्ष्य कवचेनावकुण्ठ्येत् ।
अस्त्रमन्त्रेण संरक्ष्य तैलं हृदयबीजकम् ॥
मर्दयेन्मस्तकं लिंगं लिखेत्पीठे च देशिकः ।
मृण्मये भित्ति चित्ते च दर्पणे स्नानमाचरेत् ॥
रक्तजे लोहजे चैव कूर्चेन प्रोक्षयेद्बुधः ।

सूक्ष्मे च—: अभ्यंगञ्च ततः कृत्वा रुद्रतोयाभिषेचनम् ॥
शिरीषपिष्टचूर्णेन लिंगपीठे विमर्दयेत् ।
रुद्रतोयाभिषेकञ्च पुष्पं मूर्ध्नि च विन्यसेत् ॥
चिन्त्यविश्वसादाख्ये—:
मध्ये मध्ये च धूपञ्च दीपञ्चैव प्रदापयेत् ।
जलप्रधानं पुष्पञ्च तथैवार्घ्यं निवेदयेत् ॥
शिरसा पुष्पमभ्यर्च्य शिखाया धूपमेव च ।
नेत्रेण धूपमभ्यर्च्य घण्टामस्त्रेण ताडयेत् ॥

वातुले—: द्रव्यं प्रतिविशेषेण घण्टां सन्ताड्य चार्चयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



राक्षसाश्चासुराश्चापि पिशाचा ब्रह्मराक्षसाः।
गच्छन्ति घण्टा घोषेण देवसान्निध्यमेव च॥
स्वधान्त इदं देयेनैव कुर्यादाचमनीयकम्।

अंशुमति आत्मार्थपूजायाम्–:

क्षीरन्दधिघृतञ्चैव क्षौद्रञ्चैवान्नमेव च।
नालिकेरावकञ्चैव इक्षुसारफलन्तथा॥
गन्धोदकेन संस्नाप्य वौरवतोयाभिषेचनम्।
अर्घ्योदकेन संस्नाप्य पुष्पमूर्ध्नि च विन्यसेत्॥
गन्धञ्च लेपनञ्चैव हिमतोयाभिषेचनम्।
पञ्चब्रह्म षडङ्गैश्च बीजमुख्येन मन्त्रतः॥
शिवगायत्रिमन्त्रेण सहस्रधाराभिषेचनम्।
स्नानद्रव्ये त्वलब्धे तु घृतेनैवाभिषेचयेत्॥
सर्वद्रव्ये त्वलब्धे तु शुद्धतोयाभिषेचनम्।
अस्त्रमन्त्रं समुच्चार्य पुष्पं मूर्ध्नि च विन्यसेत्॥
शिवमन्त्रमनुस्मृत्य पद्मपीठोपरि न्यसेत्।

सूक्ष्मे आत्मार्थपूजापटले–:

पञ्चगव्यामृते स्नाप्य जलेनैवाभिषेचयेत्।
क्षीरन्दधिघृतं क्षौद्रं नालिकेरजलन्तथा॥
इक्षुसारञ्च शुद्धोदगन्धतोयाभिषेचनम्।
मन्त्रपुष्पं ततो दत्वा मन्त्रान्नञ्च निवेदयेत्॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सहस्रे -: अभिषिच्य विशोषयेत् धौतवस्त्रेण वेष्टयेत् ।

तथा रामनाथपद्धत्यां -:

वर्मणा वाससोन्मृज्य पीठे संस्थापयेद्विभुः ।

लोहबेरे स्नानविशेष सुप्रभेदे दर्शितः ।

आसनावरणं त्यक्त्वा द्वारपालार्चनं विना ।

नित्यस्नानं विना लोहे स्नानं पर्वणि पर्वणि ॥

क्षणिकलिंगस्थण्डिलभित्तिचित्रादौ यथोचितां शुद्धिं प्रोक्षणादिभिर्विदध्यात् -:

मृण्मये भित्ति चित्रे च दर्पणे स्नानमाचरेत् ।

तदनु पीठस्य वायव्यान्दिशि यागविघ्ननिवारणार्थं प्रथमं दक्षिणाभिमुखं गणपतिं पूर्ववद्ध्यात्वा ओं हां गणपतये नम इति संपूज्य तस्य वामभागे याम्यादिङ्मुखीं लक्ष्मीं पूर्ववद्ध्यात्वा ओं हां महालक्ष्मीं नम इति सम्यगभ्यर्च्य तस्य वामतः सदाशिवादिसप्तगुरून् ओं हां सदाशिवादिभ्यो गुरुभ्यो नम इत्यभ्यर्च्य सामान्यार्घ्यन्दत्वा गन्धपुष्पादिभिरिष्ट्वा देवं संपूजयामीति संप्रार्थ्य लब्धानुज्ञश्शिवं यजेत्

पौष्करे -: अविघ्नार्थन्तु यजनं गणेशस्य पुराभवेत् ।

चिन्त्य·विश्वसादाख्ये -:

ताम्रपीठे च वायव्यां पूजयेत्तत्र गजाननम् ।

दक्षिणाभिमुखं भान्य गन्धपुष्पादिभिर्यजेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



॥३८ एवं गणेश्वरं पूज्य लक्ष्मीं पश्चात्तु पूजयेत्।
ईशान्यां गुरुपङ्क्तिञ्च पूजयेन्नन्दिकेश्वर ॥
आवाहनादिकं सर्वं स्वस्वमन्त्रेण कारयेत्।
सदाशिवमनन्तञ्च श्रीकण्ठं पुनरम्बिकाम् ॥
गुहं कृष्णञ्च धातारं गुरून् सप्त समाश्रयेत्।

मृगेन्द्रे च-:

स्थित्वा पितामहस्थाने चानिलादिषु पूजयेत्।
गणेशकमलास्वामि पादुकां कुसुमादिभिः॥
प्रार्थयेदभ्यनुज्ञातः परमेशार्चनं प्रति।

अथासनपूजां कुर्यात् तस्याथं प्रकारः शिवासनस्वरूपं पूजास्तवे स्पष्टमुक्तम्। तद्यथा-:

धारिकाभिदशक्तिबीज मनंत पङ्कज कुड्मलं धर्मबोधविराग-भूतिपदं विलोम चतुष्टयम्। गतकञ्चन्दनद्वय कमलसं-केसरकर्णिकामवाक्तिमण्डल संयुक्तमहं नमामि शिवासनमिति॥

इदञ्च कमलरूपं शिवासनं सकलाध्वगर्भितं भवति। यथा तत्रैव-: पृथ्वीकन्दं कालतत्वान्तमित्यादि एवं पृथ्व्यादिभिः कल्पित कन्दनालोद्यवयवे कमलरूपे शिवासने पञ्चासन-क्रमः। कल्पनीयः उक्तञ्च योगजे-:

अनन्ताख्यासनं पूर्वं सिंहासनमतः परम्।
योगासनं तृतीयन्तु तुर्यं पद्मासनं भवेत्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



योगासनं तृतीयन्तु तुर्यं पद्मासनं भवेत्।
पञ्चमं विमलं प्रोक्तं कल्पयेदुपरि क्रमादिति॥

तानि त्रिकोणादिरूपाणि उक्तं श्रीमत्सूक्ष्मोक्तौ।

सिंहासनञ्चतुष्कोणमनन्ताख्यन्त्रिकोणकम्॥
पद्मञ्च वर्तुलाकारं षट्कोणं विमलासनम्।
योगासनञ्चतुष्कोणमासनं परिकल्पयेदिति॥

एतानि च कालानुगुणं कल्प्यानि। उक्तं श्रीमत्सन्ताने।

स्नाने सिंहासनञ्चैव अनन्तं वस्त्रवेष्टने॥
आकल्पगन्धपुष्पे च पद्मासनमुदाहृतम्।
विमलञ्च हविर्दद्या योगस्यादग्निकृत्यके॥
आसनानि तु संगाख्य ज्ञात्वा यजनमारभेत्।

एतेषां पञ्चासनानामपि सुप्रभेदे शिवासने अयं विधिकल्पनमुक्तं

यथा – इह शक्त्यादि नालान्तमनन्तासनमीरितम्।
गुणान्तं धर्मज्ञानादि सिंहाख्यन्त्वासनं विदुः॥
योगासनन्तु तत् ख्यातं परमेवास्य सर्वतः।
~~पद्मशक्त्यादि शक्त्यन्तं~~ पद्मग्रन्थिं समारभ्य केसरान्ताब्जमासनम्
शक्त्यन्तं केसराद्दूर्ध्वे कर्णिका विमलासनम्।
एवमब्जासनं कल्प्य पूजयेत्स्वस्व नामभिः॥

एवं सर्वाद्भुतमये पञ्चासनगर्भिते शिवासनं शक्त्यादि शक्त्यन्तमर्चनं कुर्यात्। तस्यायं क्रमः। तत्र प्रथमं देवस्य पीठे

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हां योगपीठासनाय नम इत्यभ्यर्च्य तस्याधो भागे मध्यतः अधः कूर्मशिलासीनां क्षीरोदसित विग्रहाम् ।
मौलौ बीजाङ्कुराकारां वरदमभयप्रदाम् ।
पाशाङ्कुश धरां शक्ति क्रियामाधाररूपिणीमिति ॥

ध्यात्वा । ओं हां आधारशक्तये नम इत्यभ्यर्च्य - प्रपञ्च व्याप्तितो ब्रह्मशिलास्थं मन्त्रनायकम् । मायापद्मासने श्वेत मनन्तं प्रणमाम्यहमिति । ध्यायन् ओं हां अनन्तासनाय नम इत्यनन्तासनमभ्यर्च्य पित्वा तदुपरि

अनन्तं नीलसंकाशं सहस्रफणमण्डितम् ।
कृताञ्जलि समायुक्तं शक्रवक्त्रश्चतुर्भुजमिति

विभाव्य ओं हां अनन्ताय नम इत्यभ्यर्च्य -र्चयित्वा पीठस्याग्नेय नैरृति वायव्येशानकोणेषु

सिंहाकार सितार्काभ्रु पीतकृष्ण निभास्त्वभाम् ।
अन्योन्य वीक्षणास्से हैरनेकैः परिवारिताः ॥
दंष्ट्राकराल वदनास्त्रिणेत्राभीमवक्त्र विग्रहाः ।
कृत त्रेतादिरूपेण शिवस्यासन पादुकाः ॥

यद्वा - धर्मस्तत्र वृषाकारो ज्ञानसिंह स्वरूपकः ।
वैराग्यं पीतभूतं स्यादैश्वर्यं श्वेत कुञ्जरमिति ॥

ध्यात्वा- ओं हां धर्माय नमः ओं हां ज्ञानाय नमः ओं हां वैराग्याय नमः ओं हां ऐश्वर्याय नमः इत्यनन्त

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सामर्थ्यरूपाद्धर्मादीन् संपूज्य अधर्मादीनि चत्वार्यपि प्रागादिषु सिंहासनस्य गात्ररूपाणि ।

कृष्णश्वेतं पूर्वभागे श्वेतरक्तन्तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ॥
चत्वारि गात्रकाण्येवमनन्ते शबलानि तु ।

अधर्मं दक्षिणशिरसमीशानपादमज्ञानं पूर्वशिरः पश्चिमपादं अवैराग्यमुत्तरशिरो दक्षिणपादं अनैश्वर्यं पश्चिम शिरः पादमिति ध्यात्वा ओं हां अधर्माय नमः ओं हां अज्ञानाय नमः ओं हां अवैराग्याय नमः ओं हां अनैश्वर्याय नमः इति गात्राणि संपूज्य पीठस्योर्ध्वमेखलायां अधो रक्तवर्णं अधश्छदनं विभाव्य नैरृते ओं हां अधश्छदनाय नमः इत्यभ्यर्च्य मेखलाया उपरितमूर्ध्वच्छदनं विचिन्त्य ईशाने ओं हां
॥५१ ऊर्ध्वच्छदनाय नम इति संपूज्य तन्मध्ये ऊर्ध्वदेशे माणिक्यसदृशं कन्दनालं नीलसमप्रभम् । कण्टकन्तु प्रवालाभं दलं वैरजन-प्रभम् ॥ केसरं हेमवर्णाभमग्रे युक्ताकृतीयुतः ॥ इति ध्यात्वा ओं हां कन्दाय नमः ओं हां बीजाय नमः ओं हां अंकुराय नमः ओं हां नालाय नमः ओं हां कण्टकेभ्यो नमः स्वल्पवते ओं हां दलेभ्यो नम इति विद्येश्वराष्ट रूपाणि दलानि सञ्चिन्त्याभ्यर्च्य तन्मध्ये पीठोपरि ~~ओं हां बीजे-~~ ओं हां केसरेभ्यो नम इत्यभ्यर्च्य पीठोन्नतभागमध्ये ~~भ्यो नम इति समस्तरूपं पद्मं विभाव्य ओं हां पद्माय नम~~ इति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



~~स्थिरासनमभ्यर्च्य पद्ममुद्रां प्रदर्शयेत । तथा कारणे-:~~

तप्तचामीकरच्छाया पञ्चाशद्बीजगर्भिताम ।
केसराणाञ्चतुष्पष्ट्या कर्णिकां बीजवेन्ततः ॥

ओं हां कर्णिकायै नमः ओं हां बीजेभ्यो नमः इति समस्तरूपं पद्मं विभाव्य ओं हां पद्माय नम इति । स्थिरासनमभ्यर्च्य पद्ममुद्रां प्रदर्शयेत । तथा कारणे ।

आधारशक्तिपद्मान्तं स्थिरासनमुदाहृतम् ।

ततः पूर्वादीशान्तकेसरेषु विद्येश्वराधीषु तिाश्शैवशक्तीरेव वामाद्यष्टशक्तिकोत्यादीत्यसमास्सर्वा जटाखण्डेन्दुमाण्डिताः । चतुर्भुजास्त्रिणेताश्च धृतचामरहस्तका ।

वरदाभयहस्ताश्च शिवासक्तकरांबुजाः ॥

इति ध्यात्वा क्रमेण ओं हां वामायै नमः ओं हां ज्येष्ठायै नमः ओं हां रौद्र्यै नमः ओं हां काल्यै नमः ओं हां कलविकरिण्यै नमः ओं हां बलविकरिण्यै नमः ओं हां बलप्रमथन्यै नमः ओं हां सर्वभूतदमन्यै नमः इत्यभ्यर्च्य कर्णिकायाम् । मनोन्मनी महाशक्ति व्योमस्थान्यो मगाशिव ।

शुद्धस्फाटिकवर्णाभा अक्षमालाधरी शुभा ॥

मकुटादि विभूषणैर्युक्ता सुप्ताना च सुयौवनामिति ।

ध्यात्वा मनोन्मनीमभ्यर्च्य दलाग्रवृत्ते ~~कोट्यादि~~

कोट्यादित्यप्रतीकाशं विंबं सूर्यस्य मिति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ध्यात्वा ओं हां सूर्यमण्डलाय नम इत्यभ्यर्च्य ·

तदधिपं पञ्चवक्त्रश्चतुर्बाहुं प्रतिवक्त्रं त्रिलोचनम्।

तप्तचामीकराभासं सर्वाभरणभूषितम्।

नमो मुद्रान्वितन्देवं सृष्टिकारणकारणम्॥

इति ध्यात्वा तु ब्राह्मणं आत्मतत्वस्वरूपिणम्। ओं हां सूर्यमण्डलाधिपतये ब्रह्मणे नम इत्यभ्यर्च्य केसराग्रवृत्ते·

कोटिचन्द्रद्युतियुतं कोटिचन्द्रसुशीतलम्। इति ध्यायन् ओं हां सोममण्डलाय नम इत्यभ्यर्च्य तन्मध्ये-चादिविष्णुञ्च नीलजीमूतसन्निभम्।

भस्मोद्धूलितसर्वांगं सर्वाभरणभूषितम्॥

एकवक्त्रं द्विनेत्रञ्च कण्ठवेष्टनभूषितम्।

चतुर्भुजं शंखचक्रं नमस्कारसमान्वितम्॥

पीताम्बरधरं विष्णुं स्थितिकारणकारणम्।

किरीटमकुटोपेतं विद्यातत्वस्वरूपिणम्। इति विचिन्त्य सोममण्डलाधिपतये विष्णवे नम इति संपूज्य कर्णिकाग्रे

अनन्ताग्निसमप्रख्यं शैवाग्निन्तत्र कल्पयेदिति ध्यात्वा ओं हां अग्निमण्डलाय नमः इत्यभ्यर्च्य

रुद्रमाणिक्यवर्णाभमेकास्यञ्च त्रिलोचनम्।

चतुर्भुजञ्जटाचूडामिन्दुरेखाप्रसूनकम्॥

भस्मोद्धूलितसर्वांगन्त्रिपुण्ड्रेन विराजितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नमो मुद्रान्वितन्देवं लयकारणकारणम् ।
यद्वा - अग्निबिंबधरश्वेतं नीलकण्ठं त्रिलोचनम् ॥
व्यालमुद्रानलज्ञान शूलहस्तश्चतुर्भुजम् ।
सर्पालंकरणन्नाग राजयज्ञोपवीतिनम् ॥ इति

ध्यायन् अग्निमण्डलाधिपतये रुद्राय नमः इत्यभ्यर्च्य तदधिष्ठाय कर्णिकामध्ये कुटिलात्मकां क्षीरोदनिभां गौरीं गायत्रीसंयुक्तामिच्छाज्ञानक्रियात्मकां शक्तिं सञ्चिन्त्य ओं हां शक्तिमण्डलाय नमः इत्यभ्यर्च्य तदधिष्ठायकमीश्वरम्

शक्तिमण्डलकेशानं व्यालयज्ञोपवीतिनम् ।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकसन्निभम् ॥
खट्वांगं त्रिशूलबाणाक्षं मालाभयकरान्वितम् ।
कमण्डलुधरन्देवं वरांबुरुह धारिणम् ॥
दक्षवामक्रमादिसिंह गजचर्म परिच्छदम् ।

इति विचिन्त्य ओं हां शक्तिमण्डलाधिपतये ईश्वराय नमः इत्यभ्यर्च्य तदुपरि क्षित्यादि कुटिलान्तव्यापिकम् इत्यासनं विभाव्य ओं हां शिवासनाय नमः इति संपूज्य पुष्पाञ्जलिं हृत्प्रदेशे निधाय ओं हां हं हां शिवमूर्तये नमः इति बिन्दुनामुच्चार्य मूर्तिं संपूज्यपरमज्योतिरूपां दण्डाकारां
॥४८ विभक्तां वा थ वा लिंगनाभे विन्यस्य तस्य मूर्तौ दण्डभंग्या मूर्द्धादि पादान्तमीशानादि विन्यस्याष्टत्रिंशत्कलान्यासं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



श्रीकण्ठन्यासश्च विदध्यात् विजयोत्तरे -

योगपीठे विभाव्यैवां मूर्तिं तस्मिन्निवेशयेत ।

कामिके - मूर्तिमीश्वरतत्वान्तु लिंगनाभेन विन्यसेत ।

हृत्संपुटस्थसन्तोयं मूर्तिमन्त्र उदाहृतः ॥

कलान्यासं ततः कुर्यात् तद्विधानमिहोच्यते ।

सदेशदेहसिध्यर्थं मष्टात्रिंशत्कला मताः ॥

अष्टत्रिंशत्कलान्यासः प्रागेव प्रतिपादितः ।

षष्ठस्वरसमोपेतं बिन्दुनादसमान्वितम ॥

सान्तं हृत्पुटितं स्मृत्वा विद्यादेहं प्रकल्पयेत ।

बेरे सदाशिवे वापि लिंगेत्येवं समाचरेत ।

क्षित्यादि कुटिलाप्रान्तं मन्त्र सिंहासन स्थितम ॥

शुद्धस्फटिकसंकाश द्वात्रिंशल्लक्षणान्वितम ।

पद्मासनस्थं पञ्चास्यं प्रति वक्त्रान्त्रिलोचनम ॥

दृक् क्रियेच्छा विशालाक्षं ज्ञान चन्द्रकलान्वितम ।

धवलेशानवदनं पीतन्तत्पुरुषाननम ॥

कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम ।

सुश्वेतं पश्चिमास्यं सद्योजातं प्रकीर्तितम ॥

यज्ञोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम ।

दिव्यगन्धानुलिप्तांगन्दिव्य पुष्पैरलंकृतम ॥

शक्त्यसी शूलखट्वांग वरश्यग्र करांबुजम ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दक्षिणे दधवामस्थे डमरुं बीज पूरकम् ।
नागाक्षसूत्रे नीलाब्जं बिभ्राणं पञ्चभिः करैः॥
सञ्चिन्त्य मूर्तेरुपरि शक्तिमात्र विजृंभणम् ।
लिंगाकारो वमर्दन भावने लिंगतान्त्यजेत् ॥

इति मूर्तेरुपरि ओं हां हं हां विद्यादेहाय नम इति नादान्तं शक्त्यन्तमुच्चार्य सदाशिवतत्वान्तव्यापकं विद्युत्प्रभं स्रुक-मञ्जलावाविर्भूतं ध्यात्वा लिंग देहं वि द्यादेहं ध्यात्वा विन्यस्य ओं हौं नेत्रेभ्यो नम इति सर्वज्ञता बीजं नेत्रं मुखपञ्चक नेत्रेषु विन्यस्यानन्तं मृजूर्ध्वकायस्सन् पुष्पै-रञ्जलिमापूर्य हृत्प्रदेशे निधाय स्वगुरूपदेशेन मूलमन्त्र मिथन्तेजः पुञ्जनिभं हृदयाग्रे परं शिवं द्वादशान्ते निष्कलं स्वप्रकाशः सर्वगुणसंपन्नं परमशिवं सञ्चिन्त्य ततो रेच-केन मूलमन्त्रमतिस्पष्टाकारोकारादिमात्रा वाच्यम् ।
पृथिव्यादि समनान्त पाशजालमतिक्रम्य उन्मनाशक्त्यतीत परमशिवमुच्चार्य वाच्यवाचकभावेन शिवस्समरसीभूतं मन्त्रमेव तेजः पिण्डं सर्वज्ञतादि षडंगोपेतं परमामृतस्यन्दिबिन्दुरूपं शिवं सृष्ट्या पूरकेण समानीय भ्रातु बिन्दौ शरदिन्दुसहस्र-वदाभाव्य रेचकेण पुष्पाञ्जलिगतन्ध्यात्वा तमावाहिन्यमुद्रया मूलेन समानीय हृदयेन बाह्यस्थापिन्या विद्या देह हृदंबुजे संस्थाप्य सन्निधान्या मूलेन मूर्तिद्वयं व्याप्य सान्निधी-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भूतं विचिन्त्य सान्निधानार्घ्यन्दत्वा निष्ठुरया निरुध्य निरोधार्घ्यञ्च दत्वा कालकण्ठ्या हुं फडन्तास्त्रेण विघ्नानुत्सार्य लिंगमुद्रां हृदा ध्यात्वा स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।

तावत्त्वं प्रीतिभावेन लिंगेऽस्मिन् सन्निधौ भवेति विज्ञाप्य स्वा- तार्घ्यन्दत्वा कवचेनावकुण्ठ्य हृदाद्यंगैस्सकलीकृत्य मूलेनैकत्वं विधाय धेनुमुद्रया महामुद्रया च शक्तिमन्त्रेणामृतीकुर्यात्। श्री परारव्ये।

एवं शाक्तं वपुं कल्प्य तस्मिन्परमकारणम्।
परमं शाश्वतं सत्यं ज्ञानानन्दसुखात्मकम्॥
व्यापकं सर्वतत्वानां अप्रमेयमनूपमम्।
वाच्यवाचकाहीत व - र्गमनातीतगोचरम्॥
युक्तं कुर्याद्विशेषेण निष्कलं सकलात्मनि।
परावाहननित्युक्तं शिवमन्त्रनियन्त्रणादिति॥

तथा - नवार्कतेजसाकानं विधायावाहनमुद्रया।
स्थापिन्या स्थापनं कुर्या शक्तिसंग्रहसंश्रये।
प्रणत्या सन्निधीकृत्य निरुध्या क्रोधमुद्रया॥
बिन्दुनादसमायुक्तं सान्तमात्रा लयान्वितम्।
115a निष्कलं परमं बिन्दुं तदूर्ध्वान्व्योन्मनान्तकम्॥
मन्त्रमूर्तिं शिवस्सूक्ष्या भ्रूमध्ये मनसा स्मरेत्।
चन्द्राबिंब समप्रख्यं स्मृत्वा पुष्पाञ्जलिस्थितम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आवाहिन्या पुनर्नीत्वा स्थापिन्या स्थापयेद्धृदि ।
सूक्ष्ममूर्तिगतन्देवं विद्यादेहसमन्ततः ॥
व्याप्यजीवमिवाश्लिष्टदेहदैत्यविभागतः ।
स्वास्मेन्द्राभिमुखीभूतं संस्मरेत्संनिधानया ॥
पूजावधिं तु तत्रेशं रोधयेन्निष्ठुरस्थया ।
निरोधार्घ्यं तदा दद्यात् संनिधानाय शंभवे ॥
कालकण्ठ्या फलन्तेन हेतिना पुष्पमुत्क्षिपन् ।
अन्तरायं समुत्सार्य लिंगमुद्रां प्रदर्शयेत् ॥
हृदा बद्ध्वा नमस्कारं कवचेनावकुण्ठ्य च ।
हृदये हृदयं शुक्लं शिरः पीतं शिरस्सु च ॥
शिखां रक्तां शिखामध्ये तनुत्रञ्चासितं हृदि ।
अग्निज्वाला - - - रक्तमस्त्र वर्गेषु विन्यसेत् ॥
इत्येवं संनिधानेन सकलीकृतिरीरिता ।
शिवैकवर्णता ध्याये कृ(?)ानां भिन्नवर्णिकाम् ॥
पुष्पमारोप्य मूलेन परमीकरणं हि तत् ।
अमृतीकरणं कुर्यान्मन्त्राणां धेनुमुद्रया ॥
महामुद्रां हृदा बद्ध्वा दीपनञ्च प्रकल्पयेत् ।
स्वागतं ते महादेवेत्युक्त्वा संप्रार्थयेद्विभुम् ॥

ननु यथावाह्यते शिवः । तदा तस्य विसर्जनञ्च भवति ।
ततस्सर्वगत्वहानिरिति चेत् नैवं व्यापकशिवस्यैव भक्त्या

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मन्त्रेणाभिव्यक्तिकरणमावाहनमुच्यते । उक्तञ्च
सर्वत्रव्यापिनं शान्तं तमुद्दे देवं सदाशिवम् ॥
अभिमुखकरणं यत्तदावाहनमिहोच्यते ।
पूजापरिसमाप्तौ तु विमुखं तद्विसर्जनम् ॥

ननु सर्वगस्य सर्वत्र सांनिहितत्वादित्ति दमपि विरुद्धमिति चेत् । नात्र तथाविधसंनिधानेन प्रयोजनाभावात् । इह पूज्यपूजकभावानुविद्धसाधकश्रद्धानुरूपमनुग्राह्यानुग्राहकलक्षणसंनिधानमावाहनन्तच्च वाच्यवाचकयोरभेदाद्वाचकस्य मन्त्रस्य विशेषन्यासाद्वाच्यस्यापि शिवस्य विशिष्टसान्निधीर्भविष्यतीति न विरुध्यते । ननु तथापि तस्य कथमेकत्राभिव्यक्तिरावाहनमिति चेत् तथापि तरवामूलाग्रस्थितवह्नेरेकत्राभिव्यक्तिवदुपपत्तेः काष्ठगतवह्निव्यक्तेर्मथनापेक्षावदस्या अपि । शिवाभिव्यक्तेरावाहनक्रियापेक्षोपपद्यते तर्हि पुनः पुनरावाहनं व्यर्थमिति चेत् न कुण्डगताग्नेर्ज्वलनाय पुनः वायवपेक्षावदुपपत्ते । यथा कामिकतन्त्रसारे –

अमूलाग्रस्थितस्याग्नेरभिव्यक्तिर्यथा तरौ ।
तद्वदेकत्र चिद्व्यक्तिर्व्यापकस्य न बाध्यते ॥

तथा कामिके – यथा काष्ठगतो वह्निर्व्यज्यते मथनादिना ।
तथा मन्त्रप्रभावेन भक्त्याभिव्यज्यते शिवः ॥
सतनुस्तनुहीनो वा सर्वगस्सर्ववच्छिवः ।

तथा सुप्रभेदे – यथा कुण्डगतस्याग्नेर्वायुना ज्वलनं भवेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथात लिंगे मन्त्रेण व्यज्यते भगवानपि ॥

कामिके-: यथात्मन स्तनु द्वारा स्यातामिहगमागमौ ।

तद्वन्मन्त्र तनुद्वार शिवस्येष्टौ गमागमौ ॥

अचिन्त्य शक्ति युक्तत्वा द्व्यापको व्यापकश्च सः ।

ननु वाङ्मनातीति गोचरस्या रूपस्या शिवस्य क · · · कतृ दृश्यतेति चेत । सत्यं तथा व्यदृश्यस्य राहो चन्द्रार्कमण्डले । दृश्यत्ववद्यार्द्रौ स्वात्मन इव काष्ठं मध्ये वन्हेरिव तोय कान्त जलस्येव सूर्यकान्तेन । तद्वन्मन्त्र जलस्येव मणिमध्ये द्युते · · घन-मध्ये विद्युत इव पाषाणे लोहस्येव क्षीरे सर्पिष इव रात्र्यन्ते अर्कोदयस्येव शिवस्यापि दृश्यत्वोपपन्तेः वस्तुतस्तु शिवस्या वाहनन्तस्मरणं विसर्जनन्ताद्विस्मरणमिति ज्ञेयम ।

यथा वातुले-:

शिवं शुद्धरूपं हि वाङ्मनोतीतगोचरम ।

कथमावाहनन्तस्य स्थापनं संनिरोधनम ॥

ईश्वर उवाच-: अपध्यान संयुक्ता वाहयेत्तु स्वरूपकम ।

अदृश्य दृश्यतामेति राहुश्चन्द्रार्कमण्डले ॥

आत्मासर्वगतो बुद्धौ दृश्यते व्याप्य संस्थितः ।

आदर्शे निर्मले लोभे निश्चैतन्येव्द्र- कम ॥

पश्यत्यात्मानमात्मा च निर्मलं यतियामपि ।

तथैव शिवरूपं हि ज्ञात्वा देह सुमध्यमे ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



काष्ठमध्ये यथा वह्निः तोयकान्ते जलं यथा ।
शक्यन्ते कोटयं यावतावद्देवो दयं गुहः ॥
गुरूपदेशमार्गेण स्मृतिशवाह्नं भवेत् ।
विस्तृतञ्च तैथ वेह विसर्जनमिहोच्यते ॥
एवमेव तु भावेन भावयेत्तु महाशिवम् ।

एतदावाहनन्त्रिविधम् । सालम्बं निरालम्बं क्रमञ्चेति तथा आवाहनन्त्रिधाप्रोक्तं तथैवोद्वासनन्तथा ।

सालंबञ्च निरालम्बं संक्रमञ्चेत त्रिधा ।
नित्यार्चनार्थंत्वालंब ध्रुवाद्यावाहनं विदुः ॥
सर्वत्र च प्रतिष्ठासु स्थण्डिलेष्टदले जले ।
स्वोपूजासु चैतासु निरालंबमनाग्नेषु ॥
उद्धृत्य संक्षिप्त्वार्चायां स्थापनं संक्रमं विदुः ।

तदनु स्वागतन्ते भवन्निति विज्ञाय विशेषार्घ्येण ओं हां हौं शिवाय पाद्यन्नम इति पादयोः पाद्यमाचमनं स्वधेति पूर्व याम्य सौम्य पश्चिमोर्ध्वमुखेषु चार्चमनं अर्घ्यं स्वाहेति ईशान पञ्चशिरस्वंगुष्ठानामिकामध्यमांगुल्येणोक्तान मुखेनार्घ्यन्दत्वा पुष्पं वौषडिति दूर्वा पुष्पाक्षतन्दद्यात् ।
अंशुमति- आवाहने तु तन्मूर्ति ब्रुवति हेम द्रव्यहेमवत् ॥

तस्माद्यावाहने काले त्वर्घ्यं न्दत्वा द्विचक्षणः ।
उक्तञ्च- पाद्यमाचमनञ्चार्घ्यं दूर्वा पुष्पाक्षतादिकम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सा स्वागत क्रिया पूर्वा मविकल्पयेन कल्पयेत् ।
तथा - समुत्क्षिप्य विशेषार्घ्यभाजनं वामपाणिना ॥
पद्भ्यां निवेशयेत्पाद्यं दक्षहस्तेन सम्मुखम् ।
मुखेष्वाचमनं दद्यादर्घ्यं पञ्चसु मूर्द्धसु ॥
दूर्वा पुष्पाक्षतादीनि पश्चालोकोपचारतः ।
नमस्कार स्वधा स्वाहा वषड्जातीयदा ह्यता ॥
चतुष्टयमिदन्तत्र पत्रिपाल्या निवेदयेत् ।

तत स्वहृदा स्वाहान्तमूलेन धूपदीपाचमनार्घ्याणि दत्वा स्त्रेण पिण्डिकाधोभागं वामहस्तेन स्प · यन् दक्षहस्तेन नव पुष्पं गृहीत्वा तेन पुष्पेण पूर्वार्चितमपोह्य तत्पुष्पञ्च विसृज्य दक्षिण हस्तं प्रक्षाल्य चलासनोक्ताभ्यंगादि स्नप- नांगानि स्थिरासनञ्चैव स्ना · विव गायत्रिमन्त्रेण हृदयेन वा जलं स्रावयित्वा ~~तेन पुष्पेण पूर्वार्चितमपोह्य तत्पुष्पञ्च विसृज्य दक्षिणहस्तं प्रक्षाल्य~~ अर्घ्यादिबिन्दुना संस्नाप्यमन्त्रेण पुष्पेणाभ्यर्च्य दीपमानाग्निशमनार्थं मन्त्रान्नञ्च निवेदयेत् ।

तथांशुमति- चलस्थिरासनञ्चैव स्नानञ्च द्विविधमेव च ॥
चलासने तु स्नानं स्यादभ्यंगादि विशेषतः ।
स्थिरासनेभ्यमावात्य मानसं स्नानमाचरेत् ॥
तत्पीठं वामहस्तेन स्पर्शयेदस्त्रमन्त्रतः ।
नव पुष्पन्तु संगृह्य तत्पुष्पन्तु विसर्जयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्पुष्पार्चित पुष्पं ञ्च वर्जयेन्तु विचक्षणः।
दक्षहस्तात्द्विशेषेण जलोपस्पर्शनं कुरु॥
मंत्रतो याभिषेकान्ते मन्त्र पुष्पन्तु दापयेत्।
मन्त्रपुष्पन्ततो दत्वा मन्त्रान्नञ्च निवेदयेत्॥
अग्ने र्दीपनमेवञ्च शमनार्थं निवेद्यकम्।
मन्त्रं रहस्यमित्युक्तं मदनादन्नमुच्यते॥
रहस्योद्योदनञ्चैव मन्त्रान्नमिति कथ्यते।

तत शिवमन्त्रमनुस्मृत्य गन्धपुष्पैरभ्यर्च्य हेमकौपीनमेखलो-पवीत मेखलो गोलका घृत वारि मकुटादिरलं कृत्य पुष्पं मूर्द्धि विन्यस्य इष्टाभिः पुष्पदामाभिः विभूष्यास्तोत्र घण्टानादाद्य धूपदीपाचमना द्यर्घ्याणि दत्वा मनोरथमुद्रान्दर्शयेत्। तथांशुमति

शिवमन्त्रमनुस्मृत्य गन्धपुष्पं न्यसेत्ततः।
गोलकाघृतवारिञ्च मकुटञ्चैव योजयेत्॥
शिवाभरण स - तं दाम बृष्याद्यलंकृतम्।
तद्दामाधार संयुक्त ञ्चित दामैरलं कृतम्॥

तथान्यत्र-:

चन्दनागरुकर्पूर कुंकुमादि विलेपनम्।
कुर्याद्दक्षिण हस्तेन द्वाभ्यां वै नैपमावतः॥
मध्ये कनिष्ठेवान्योन्यं वलिते स्वसलास्थिते।
अनामिके प्रदेशिन्यौ संगताग्रे विधाय च॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तन्मूलपर्वणोन्यस्ये ह्यंगुष्ठाग्रे मनोरथः।

तथा मृगेन्द्रे-:

चलिते मध्यमांगुल्यौ पर्वाग्रसां च हस्तयोः।

तदन्तरे स्वतलगे तर्जन्यौ संगते पुनः॥

तन्मूलपर्वणोरग्रे न्यथांगुष्ठयोस्त्वियम्।

मुद्रामनोरथानाम प्रभोस्सान्निध्यकारिका।

अजिते च-: मध्यमे प्रसृतया युक्ते तद्देशिनौ स्वयम्॥

अंगुष्ठमूल पर्वस्थं कृत्वांगुष्ठ द्वयन्ततः।

अनामिका पृष्ठसंलग्ने कृत्वाकुर्यान्मनोरमान्॥

पूजकेन प्रयोक्तव्या शिवस्सान्निध्यकर्मणि।

तदन्वावरण पूजामध्ये शिवाज्ञां लब्ध्वा पञ्चावरणमेका-वरणं वार्चयेत्। ननु नन्वात्मार्थपूजायां सूक्ष्मे -:

तन्मध्ये शिवमावाह्य पञ्चावरणमर्चयेदिति।

वचनात्। कथमेकावरणस्य प्रसक्तिरिति चेत् सत्यं तथापि

एकमावरणं प्रोक्तं नित्ये नैमित्तिको मत इति

वचनात्। एकावरणपूजा तु काम्यार्थन्तु विशेष इति सन्तान

116a बचनाच्च नैमित्तिककाम्यसाधारणस्य एकावरणस्य नित्येपि प्रसक्ति संभवात् अंशुमति आत्मार्थपूजाप्रकरणे पञ्चावरणमेकावरणं वा विकल्पेन कर्तव्यमिति स्पष्टमुक्तम्।

ईशानमूर्त्यादि रूपेण पञ्चावरणमर्चयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथवान्यप्रकारेण एकावरणमर्चयेत्।

कामिके-: एकावरणे कश्चिद्विशेष उक्तः।

एकावरण पूजायां दर्भैर्ब्रह्मभिरेव च।

अथवा केवलैरंगैः केवलैर्ब्रह्मभिस्तु वा॥ इति

ब्रह्मांगैर्लोकपैरस्त्रैर्भवेदावरण त्रयम्।

तत्रैकावरणार्चने त्रीण्यासनानि पञ्चावरणार्चने पञ्चासनानि कल्प्यानि। उक्तं सन्ताने। एकावरणपूजायां त्रीण्यासनानि कल्पयेत्।

सिंहं पद्मञ्च विमलं कल्पयेदासनत्रयम्।

तत्र प्रथमावरणार्चनं लिंगमूले द्वितीयावरणार्चनं पीठोर्ध्वभाग पद्मदलाग्रेषु तृतीयावरणार्चनं पीठकण्ठे चतुर्थावरणार्चनं पीठपार्श्वे पञ्चावरणार्चनं पीठाद्धो ब्रह्मशिलोपरि कार्यम्।

उक्तं सन्ताने-:

गर्भावरणमेकन्तु पूजयेल्लिंगमूलतः।

तथान्यत्र। अनन्ताद्यादलाग्रेषु विद्येशांस्तत्र पूजयेत्॥

पीठकण्ठे - - - स्तु केशान् पीठपादतः।

[*तत्र शिवस्य देहात् परितो वक्त्रेभ्यो वक्त्रमादायांगेभ्यों गान्यादाय दीपाद्दीपग्रहणमिव ईशानादिभिस्स्वस्वमन्त्रै रंकुशमुद्रयाकृष्य - तत्स्थाने प्रभोः शावरणानिजेत्। तत्र शिवस्य देहात्परितो*]

तदस्त्राणित्वधो देशे स्थिते ब्रह्मशिलोपरि।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अत्र चललिंगार्चने आधारशिलभावेपि ब्रह्मशिलास्थनीय पद्मपीठं एवार्चयेत्। एवं स्व - - बभेदेन ब्रह्मावरणाबिजेत्। तत्र शिवस्य देहात्परितो वक्तो वक्त्रमादायांगेभ्योंगान्यादाय दीपाद्दीपग्रहणमिव ईशानादिभिस्स्व मन्त्रै रंकुशमुद्रया कृष्य तत्स्थानेषु यजेत्। उक्तं विजये-:

पञ्चब्रह्मतदंगानि देवस्य परितस्ततः।
वक्त्रेभ्यस्तत्तदंगेभ्यो दीपाद्दीपवदाहरेत्॥

मूलेन शिवमभ्यर्च्य शिरः पञ्चकेभ्य ईशानमादाय ओं हां ईशानमूर्ध्नाय नम इति ईशान दिक्दले।

स्फटिकाभं जगद्धेतुं त्रिणेत्रञ्चन्द्रमौलिनम्।
सौम्यं प्रसंनमीशानं त्रिशूलाभयपाणिनम्।

इति ध्यात्वा पूजयेत्। ~~इत्यादेशादध्या~~ वक्त्रपञ्चकेभ्यो ~~वक्त्र~~मादाय ओं हें तत्पुरुष ~~ओं हें तत्पुरुषाय~~ वक्त्राय नम इति पूर्वदले-:

पीताम्बरोपवीतञ्च त्रिणेत्रं कनकप्रभम्।
मातुलं गाक्षसूत्रे च दधानञ्चन्द्रमौलिनम्॥

इति ध्यात्वा यजेत्। हृत्प्रदेशाद् मादाय ओं हूं अघोरहृदयाय नम इति दक्षिणदले-:

त्र्यक्षं मौलीन्दुहृत्सौम्यं कुण्डलालंकृतन्नतः।
बभ्रुश्मश्रुशिरोजञ्च दंष्ट्रालं विकटाननम्। इति ~~ध्यात्वा यजेत्~~ कपालमालाभरणं सर्पवृश्चिकभूषणम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



खट्वांगञ्च कपालञ्च खेटकं पाशमेव च।
वामहस्त चतुष्के तु दक्षहस्त चतुष्टये ॥
त्रिशूल परशु खड्गन्दण्डञ्चैवारिमर्दनम्।
ध्याये ज्जवांबुदाभासम -- र सर्वकामदम् ॥

इति ध्यात्वा समर्चयेत्। वामदेवं गुह्यमपुलादाय ओं हिं वामदेवगुह्याय नम इत्युत्तरदले-

वामं रक्तसुरक्ताभमाल्ये वस्त्रोपवीतकम्।
कुंनासाक्षोष्णीषं खड्ग खेटक पाणिनम् ॥

इति ध्यात्वावाह्येत्। पाद्याद्यंगात्सद्योजातमादाय ओं हं सद्योजातमूर्तये नम इति पश्चिमदले -

सितद्दगगन्धभूषाढ्यं सितोष्णीषं सितांबरम्।
सौम्यमालीन्दुसंपन्नं बाला कारान्तिलोचनम् ॥
सद्यो जातं सितं ध्याये द्वरदाभयहस्तकम्।

इति ध्यात्वा वाहयेत्। यद्येशानादिकान् पंचसौ स्मितान् सौम्य लोचनान्। -श्वेत स्वर्णभृंगा स्फस्निग्ध हां श्चतुराननान्।
जटामकुटशोभाढ्यान् सर्पबालेन्दुभूषणान्।
वामेनागाक्ष सूत्रौ च नीलाब्जं बीजपूरकम् ॥
शूलाभयवराशक्तिं सव्यैरीशावतः करैः।

इति विचिन्त्यावाह्येत्। सर्वज्ञता बीजात्मकं नेत्रेभ्यो नेत्रमादाय ओं हां नेत्रेभ्यो नेत्रमादाय ओं नेत्रेभ्यो नम इति ईशानस्योत्तर

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्यभागे नेत्रं। त्रिनेत्रसंयुक्तं श्वेतवर्णं दिगाननम्।

त्रिशूलञ्चाक्षसूत्रितया श्रयम्।

हृदाद्यंगोक्तवदनं करध्यार्यादि संयुतम्॥

डकारस्थं वा त्रिशूलाभिर्हस्तं योग शिवोक्षितम्।

इति विभाव्यावाहयेत्। सद्भावज्ञानात्मकं हृदयादादाय ओं हां हृदयाय नम इत्याग्नेय दले यजेत्।

सर्वशितात्मलक्षणं शिरश्शिरोदेशादादाय ओं हां शिरसे नम प्राग्दले- नेत्रस्योत्तरे - अन्यानुधीनवशित्व-रूपां शिवां शिवां याहूय ओं हूं शिवायै नम इति नैरृत दले पूजयेत्। परैरभेद्य तेजोरूपं कवचं सर्वांगादादाय ओं हैं कवचाय नम इति वायव्य पत्रे प्रतापरूपं अस्त्रं हस्तेभ्यादापूर्वादि चतुर्दिक्षु दलाग्रेषु तत्पुरुषादिभ्यो वामभागे ओं हः अस्त्राय नम इति यजेत्। नम इति तथा दक्षजानुसमीपस्थं हृदयं वह्निदं गदं वामजानुसमीपस्थमीशाने तु शिरो भवेत्। दक्षांस निकटश्चूडा वर्मवामांस सन्निधौ। पूर्वादि दिक्षु चत्वारि भीमान्यस्त्राणि विन्यसेत्। कालोत्तरे-:

हृदयं चन्द्रसंकाशं शिरश्चामीकरप्रभम्।

शिखा सिन्दूरवर्णाभं द्यं कवचं मृगभास्वरम्॥

नेत्रं विद्युत्प्रतीकाशं मस्त्रमग्नि - - प्रभम्।

ज्ञानरत्नावल्याम्-: पद्मासनस्थाम द्ध्येन्दु जटामकुट धारिणम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिलोचनांश्चतुर्बाहून् सर्वाभरणभूषितान् ।
कपालशूलहस्तांश्च वरदाभयहस्तकान् ॥
चतुर्वक्त्रांस्तथास्त्रञ्च दंष्ट्रिणं पिंगलद्युतिम् ।
क्वचित्प्रोक्ता श्चतुर्वक्त्रा श्चतुर्हस्तास्त्रियंबकाः ।
क्वचिदेकाननाः प्रोक्ता चतुर्हस्त हृदादयः ॥
हृदादीनेकवक्त्रा -ा वरदानभयप्रदान् ।
त्रिशूलाब्जधरान्वापि मनस्येव विभावयेत् ॥
शूलाभयकरञ्चास्त्रं प्रज्वलच्छिखयोज्वलम् ।

इति ध्यायेत् । तथा सर्वज्ञानोत्तरे-

ततस्तु सकुलं कृत्वा दव्यक्तं व्यक्तलक्षणम् ।
वर्णरूपकसंयुक्तं पुनः पूजां प्रकल्पयेत् ॥
ईशानपञ्चधा मूर्ध्नि वक्त्रं वक्त्रचतुष्टये ।
दीप्ततेजास्सितो त्वान पञ्चमं प्रणवेन तु ॥
हृदयांगैरघोरन्तु गुह्ये वामं नियोजयेत् ।
पादादारभ्य सर्वांगं स्सद्यो जातन्तु विन्यसेत् ॥
नेत्रं नेत्रेषु विन्यस्य ततोंगानि नियोजयेत् ॥

पौष्करे- सर्वज्ञताख्या बीजं यन्ततस्तेन निरीक्षणम् ।
सद्भावो हृदयं तस्य शिरस्सर्वाच्छिखेतो गुणाः ॥
वशित्वमपराधीनं यच्छिखासोपरिस्थितम् ।
स्वभावगुप्तमन्येषां समर्थमपि गोपने ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तेजः कवचसा धर्म्मो तन्नाम्ना व्यपदिश्यते ।
योसाहः प्रसवस्त्वंभो प्रतापो हेतिरुच्यते ॥

यथा राजा राजपुत्रैर्विना स्थि - - मपि भते ।
तथा शिवमप्येकाकी भूयस्थितो न राजते ॥

अतः स्थितः परमेश्वरस्य शोभार्थमाप्रतीरूपेणांग पूजाथक्तैव एतेषां शिववदावाहन - - न्नेत्रान्तु संनिरोध पाद्याचमनार्घ्य-पुष्प दानाख्याष्टसंस्कार पूर्वकम् यजनं कार्यं अवकुण्ठन अमृतीकरणं न कार्यम्। तदुक्तं कामिके-:

आवाहनादीन्येतानि स्वम - - क्रमादर्चयेत् ।
नावकुण्ठनमेतेषा ममृती करणन्तथा ।
संस्काराष्टकमेतेषां प्रत्येकं विहितं बुधैः ।
स्नपनन्दीपक्लिप्तश्च न पृथक्त्वांग भावतः ॥

यद्वा - संस्काराष्टकं समुदितमेव कृत्वार्घ्यन्दत्वा क्रियापूरणाय ईशानादीनां क्रमणां धेनुपद्मत्रिशूलमकरमृगाख्यामुद्राणां सान्निध्यार्थन्नमस्कारमुद्रां प्रदर्शयेत् । तदुक्तं मृगेन्द्रे-

ततः प्रदर्शयेन्मुद्रां पूरणाय क्रिया विधेः।
तस्मिन्मकरशूलाब्जसुरभ्यो क्रमणां प्रभो ॥
मनोरथा तदन्येषां न्नति स्सान्निध्य कारिणाम् ।

मृगेन्द्र पद्धत्याम्-

शिरसैक निष्ठे चान्योन्यं परस्परतलाश्रिते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अनामिके च मध्येद्वे प्रसार्यस्याग्र संगते।
तर्जनी मध्यमां पृष्ठे लग्ने प्रान्ते च कुञ्चिते॥
अंगुष्ठौ मध्यमालग्न प्रान्ते मुद्रा स्रुगीरिता।
सारवे तर्जनी युग्मे कुञ्चितेनामिका द्वयोः॥
ज्येष्ठाभ्यां पृष्ठतः क्रान्ते स्रुगेवमकरी भवेत्।

तथा श्रीजयद्रथाधिकारे।

उभयोर्हस्तयोरेव ज्येष्ठांगुलि निपीडिते।
उभयोर्हस्तयोरेव ज्येष्ठांगु: पृष्ठतो नामिके कान्वे
117a तर्जन्यौ तिर्यगानने। अंगुष्ठ च संश्लिष्ट व्याधा साका प्रसारितौ॥
दंष्ट्राकरान्तरे कार्ये अंगुष्ठौ तु कनीनिके।
मकरी नागमुद्रेका सर्व विघ्न प्रभक्षिणी॥
करयोस्तर्जनी युग्मे नागयुग्मे च पृष्ठतः।
लीने युग्मे तये श्लिष्टे नागयुग्मे च पृष्ठतः॥
लीने युग्मे तये श्लिष्टे विष्टे स्थूलं प्रसारिते।
अंगुष्ठगर्भौ संसिक्तौ पाणि पद्मं सूतांगुली॥
विदर्भ पाणि संयोज्य तर्जनी मध्यमे मिथः।
कनिष्ठानामिके चैष्टा धेनुमुद्रा ञ्जलीन्निति।

ततश्चैवाय मूलेन पुष्पन्दत्वा शुजतामस्त्व दोषपरिहाराय परमी करणं कृत्वा भोगांग द्वारेणार्चितानां सर्वेषामंशानां अंगिनां शिवेन सार्द्धमैक्यं शिवतेजसा व्याप्तत्वं भावयेत्। तदुक्तं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मोहशूरोत्तरे-: तामसी च भवेत्पूजा परमीकरणं विना ।
अत ज्ञानशिवेन भोगां विभागैक्ययोः फलमुक्तं यथा
भोगांगनार्चनमात्मनः शिवगुणप्राप्त्यर्थमैक्यं प्रभोरंगाना-
पुनर्स्वकस्य शिवसंयोगाय शुद्धात्मन इति । ततो द्वितीयावरणे-
अनन्तादीनष्टौ पूर्वादिदिक्षु संस्थितान क्रमेण पूजयेत । तत्र
विद्येश्वराश्चतुर्वक्त्रा हरवद् बाहवः । खण्डेन्दुमौलस्सम्य
पद्मस्था विविधायुधः । खड्गखेटधनुर्बाण कमण्डलवक्षास्रूलिणः ॥

वराभय करोपेता स्थूलपंकजपाणयः ।
इत्यष्टरूप भुक्ति मुक्ति फलप्रदाः ॥
हेमाग्नि नीलभृंगेन्दु श्वेतरक्तास्सिताः क्रमात ।
यद्वा वरदाभय हस्ताश्च ज्ञानमुद्राक्षमालिनः ॥
डाकवक्त्रास्त्रिणेत्राश्च शैवज्ञाता वतारका ।
तथक्षा वाक्तिखलाख्या डाकास्या वा जटान्विताः ॥

इत्यनन्तसूक्ष्म शिवोत्तमैक नेत्रैक रुद्रमूर्ति श्रीकण्ठशिखण्डि
नामकानष्टौ विद्येश्वरांध्यात्वा ओं हां अनन्ताय नम इति
~~इत्यैशानपात्रे ओं हां त्रिमूर्तये~~ पूर्वपत्रे यजेत । ओं हां
सूक्ष्माय नम इति दक्षिणपात्रे ओं हां शिवोत्तमाय नम इति
वरुणपात्रे ओं हां डाकनेत्राय नम इत्युत्तरपात्रे ओं हां
डाकरुद्राय नम इति इत्यैशानपात्रे ओं हां त्रिमूर्तये नम
इत्याग्नेय पात्रे ओं हां श्रीकण्ठाय नम इति नैऋतपात्रे

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओँ हाँ शिखण्डिने नम इति वायव्य पाते यजेत् । उक्तं सुप्रभेदे – अनन्तं पूर्वतः पूज्या त्रिमूर्तिं वह्निगोचरे ।
सूक्ष्मन्तु दक्षिणे भागे श्रीकण्ठ नैर्ऋते तथा ॥
शिवोत्तमन्तु वारुण्या शिखण्डीं वायुगोचरे ।
एकनेत्रं तथा सौम्ये एकरुद्रन्तथैशके ॥
कामिकेत्येवमुक्तम् । यद्वा पूर्वादीशानान्तं यजेत् । तदुक्तं सूक्ष्मे । विद्येशावरणं प्रोक्तमिन्द्रादीशान्तमर्चयेत् ।
ततः पीठकण्ठे पूर्वादिदिक्षुक्रमेण गणेश्वरान्यजेत् ॥
तत्र पूर्वे – रक्तो नन्दीश्चतुर्बाहुरेकवक्त्रस्त्रिलोचनः जटी ।
साक्षसूत्रत्रिशूलीश्च वराभयकरान्विताः ।
इति ध्यात्वा – ओँ हाँ नन्दिने नम इत्यभ्यर्च्चयेत् । आग्नेये
त्रिणेत्रः पीत कृष्णाङ्गो बहुश्मश्रुशिरोरुहः
मुण्डखट्वाङ्गौ खेटशूलौ महाकालो वहन् करैः ।
इति ध्यात्वा ओँ हाँ महाकालाय नम इत्यभ्यर्चयेत् ॥
दक्षिणे – निर्मांस विग्रहो भृङ्गी श्वेतो दण्डाक्षसूत्रधृत्वा त्रिणेत्रस्सशिखो देवलोकन तत्परः । ओँ हाँ भृङ्गिणे नमः । नैर्ऋते त्रिणेत्रो वामनाकारो गजवक्त्रो महोदरः । पाशाङ्कुशौ स्वदन्तश्च पद्ममाम्रफलं वहन् । शक्त्या वामकराभ्याञ्च अशाङ्गो विघ्ननायकः । इति ध्यात्वा । ओँ गणपतये नम इत्यभ्यर्च्चयेत् । वारुणे । वृषो वृषाकृतिस्त्र्यक्षो रुद्रैकगतमानसः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



साक्षाद्धर्मस्वरूपश्च - - - - निर्मला: इति
ध्यात्वा ओं हां वृषभाय नम इत्यभ्यर्चयेत । वायव्ये ।
चतुर्भुजो बालवेष: स्कन्द: कनकसप्रभा ।
शक्तिकुक्कुटहस्ताश्च वराभयसमान्वित: ॥ इति
ध्यात्वा ओं हां स्कन्दाय नम इत्यभ्यर्चयेत् । उत्तरे-
ओं हां पीठस्थितां देवी स्वलादर्भकरद्वयाम् ।
करण्डमकुटोपेता मुक्तादिभिरलं कृता । इति ध्यात्वा
ओं हां देव्यै नम इत्यभ्यर्चयेत् । ऐशान्याम् ।
चण्डेश्वरश्चतुर्बाहुश्चतुर्वक्त्रस्त्रिलोचन: ।
बिभ्रत् कमण्डलुं शूलं सूत्रं परश्वधम् ॥
महोरगोपवीताढ्यस्तान्तिचार्तित कंकण: ।
ध्यायेत वामबुदाभासस्समयादिनियामक: ॥ इति
117b ध्यात्वा ओं हां चण्डाय नम इत्यभ्यर्चयेत
विमानस्थो गणेशस्तेषा वृषकस्थो गजानन: ।
मयूरवाहनस्कन्दो वृषभ: केवलस्थित: ॥
ननु गणेश्वरस्तृतीये कौबेर्यां वादितक्रमादित्युक्तत्वा
दत्र पूर्वादिक्रमो विरुध्यत इति चेत् । न तन्त्रभेदात्
क्रियाक्रियाभेदेन विशेषाभावात् । सुप्रभेदे-
विघ्नेशानां गणेशानां कालकण्ठी - दर्शयेत् ।
ततः पीठपादे पूर्वादिदिक्षु क्रमेणेन्द्रादीन्यजेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम्।
सहस्रनयनं शक्रं वज्रपाणिं विभावयेदिति॥
ध्यात्वा ओं ह्रां इन्द्राय नमः इत्यभ्यर्चयेत्।
सप्तार्चिषञ्च बिभ्राणं अक्षमाला कमण्डलुम्।
ज्वालमालाकुलं रक्तं शक्तिहस्तं ञ्चगासनम्॥
इति ध्यात्वा ओं ह्रां अग्नये नम इत्यभ्यर्चयेत्-
कृतान्तं महिषारूढं दण्डहस्तं भयानकम्।
कालपाशधरं काल ध्यायेद्दक्षिण दिक्पतिम्॥
इति ध्यात्वा ओं ह्रां यमाय नम इत्यभ्यर्चयेत्-
रक्तनेत्र शवारूढ न्नीलोत्पलदलप्रभम्।
कृपाणपाणि मासृ-पिबन्तं राक्षसेश्वरमिति ध्यात्वा
ओं ह्रां नैर्ऋते नम इत्यभ्यर्चयेत्-
नागपाशधरं हृष्टं रत्नौघद्युति विग्रहम्।
शशांक धवलं ध्यायेद्वरुणमकरासनम्॥
इति ध्यात्वा ओं ह्रां वरुणाय नम इत्यभ्यर्चयेत्।
आपीनं हरितच्छायं विलोलध्वज धारिणम्।
प्राणभूतानां हरिणस्थं समीरणमिति ध्यात्वां।
ओं ह्रां वायवे नम इत्यभ्यर्चयेत्-
कुबेरमनुजासीनं सर्वगं स्वर्वविग्रहम्।
स्वर्णच्छायं गदाहस्त मुन्तराशापतिं स्मरेदिति ध्यात्वा

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हां वायवे नम इत्यभ्यर्चयेत् ।

ईशानं वृषभारूढं त्रिशूलं व्यालधारिणम् ।
शरच्चन्द्रवदनञ्चन्द्रमौलिन्त्रिलोचनम् ॥ इति

ध्यात्वा ओं हां ईशानाय नम इत्यभ्यर्चयेत् - ईशानस्य दक्षिणे - पीनं पीतञ्चतुर्बाहुं ब्रह्माणञ्चतुराननम् ।

हंसाधारञ्च बिभ्राणं दण्डाक्षस्त्रुक्कमण्डलूनिति ।

ध्यात्वा ओं हां ब्रह्मणे ~~ईशानाय~~ नम इत्यभ्यर्चयेत् - ~~ईशानस्य~~ दक्षिणे नैरृतेरन्तरे -:

अनन्तं पुण्डरीकाक्षं फणादशशतैर्युतम् ।
विद्युद्दामप्रतीकाशं कूर्मारूढं प्रपूजयेत् ॥

इति ध्यात्वा ओं हां विष्णवे नम इत्यभ्यर्चयेत् ।

कालोत्तरे-: लोकपावरणं ध्येत चतुर्थं परिकीर्तितम् ।

पञ्चमो लोकपालास्तं पूजयेत्तु समाहितः ।
वज्रं पूर्वे तु संपूज्य शक्तिमाग्नेय गोचरे ॥
याम्यायां तु यजेद्दण्डं खड्गनिरृति गोचरे ।
वारुण्यान्तु यजेत्पाशमंकुशं वायुगोचरे ।
सौम्यायान्तु गदामिष्ट्वा शूलं शांकरे दिशि ॥
पद्मास्तत्पूजयेदूर्ध्वमैशान्यान्दिशिमाश्रितम् ।
अधस्ताच्चक्रमापूज्य नैरृत्यान्दिशिमारुतः ।

कामिके-: शाये शक्तिगते शेये चक्रपद्मे नपुंसके ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शेषाँ पुमांसो विज्ञेया स्वायुधानां स्वरूपतः।

ततः ब्रह्मशिला स्थानीय पद्मपीठोपरि पूर्वादीशान्त
दिक्षु। वक्तन्तु पुरुषस्थूल दृढकर्कश विग्रहम्।

बलिनं वज्रमूर्धानं दीप्तं प्राक्पश्चमावृतौ॥
इति ध्यात्वा ओं हां वज्राय नम इत्यभ्यर्चयेत्-

शक्तिञ्च योषिदाकारमाग्नेर्यान्दिशिलोहिताम्।

बिभ्राणं शिरसा शक्तिं त्रिकोणस्थामुपाश्रयेदिति
ध्यात्वा ओं हां शक्तये नम इत्यभ्यर्चयेत्-

दण्डञ्च दक्षिणे भागे कृष्णं पुरुष विग्रहम्।

दण्डाकारशिरोयुक्तं वन्दे लोहितलोचनम्॥
इति ध्यात्वा ओं हां दण्डाय नम इत्यभ्यर्चयेत्। नैर्ऋत्यां

पुरुषाकारं खड्गं श्याम प्र- - - - ।

खड्गालंकृतमूर्धानमित्थं सतन्ध लोचनमिति
ध्यात्वा ओं हां खड्गाय नम इत्यभ्यर्चयेत्-

नाभ्याधो भुजगाकारं तदूर्ध्वं पुरुषाकृतिम्।

पाशं सप्तफणोपेतं मूर्द्धानं पश्चिमे गजे॥
इति ध्यात्वा ओं हां पाशाय नम इत्यभ्यर्चयेत्।

प्रपद्ये वायुदिग्भागे ध्वजमूर्ध्ने ध्वजान्वितम्॥

पीतञ्च पुरुषाकारं व्यावृतास्यं महाभुजम्।
इति ध्यात्वा- ओं हां ध्वजाय नम इत्यभ्यर्चयेत्

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कन्या रूपांगता पीतामापीन जघनस्थलाम्।

गदाकारशिरो युक्तामुत्तरस्यान्दिशि स्थिताम्॥

इति ध्यात्वा - ओं हां गदायै नम इत्यभ्यर्चयेत्

त्रिशूलं पुरुषाकारं दिव्यं श्यामं कलेवरम्।

त्रिशूलं शिरसा बिभ्रन्नामामीशान दिग्गतम्॥

इति ध्यात्वा ओं हां शूलाय नम इत्यभ्यर्चयेत् - ईशाने-

118a शंखाभं पद्मकोशांगमूर्धानं पुरुषाकृतिम्।

नौमि दीर्घं विरिञ्चास्तं शुक्लाभं शुक्ललोचनम्॥

इति ध्यात्वा ओं हां पद्माय नम इत्यभ्यर्चयेत। नैरृते-

चक्रं शतार-चक्रांगं मूर्धानं पुरुषाकृतिम्।

श्यामदेहं मुकुन्दास्तं सेवे निरृति कोणकमिति

ध्यात्वा ओं हां चक्राय नम इति संपूजयेत्। यद्वा

सर्वाण्यञ्जलिहस्तानि पद्मसंस्थानि सर्वतः।

वज्राद्यांकितशीर्षाणि भावयेत्पञ्चमावृतौ।

विघ्नेश्वरादयस्सर्वे देवस्याभिमुखास्स्थिताः॥

कालोत्तरे- अस्त्रावरणमेवन्तु पञ्चमं परिकीर्तितम्।

डावं संपूज्य विधिवत् गन्धपुष्पादिभिः क्रमात्।

सुप्रभेदे- लोकेशानं तथास्त्राणां स्थलमुद्राः प्रकीर्तिताः।

ततश्शिवादि धूपदीपमाचमनार्घ्यौ दत्वा देवस्य

पुरतः गोमयेन चतुरश्रमण्डलं परिकल्पितं पिष्टचूर्णैरलंकृत्य

Center for Shaiva Studies, Pondicherry Collection

तत्र त्रिपदीन संस्थाप्यास्त्रेण प्रोक्ष्य तदुपरि खण्डलस्सुक
पूरिकापूप कन्दमूल जीरकादि मिश्रोपदंशादि सहित तप्तघृत
सिक्त सक्षीर नालिकेर कदलीपनसाम्रादि फलसहित रक्तशाल्या-
दि सिक्त गुड पायसान्नादि नैवेद्यपरिपूर्णां स्थालिकां विन्यस्य
बेराणाञ्च पृथक् पृथक् न्यस्य तदुपरि पत्रं विन्यस्य हृदयेन
प्रोक्ष्य तालत्रय दिक्बन्धनावगुण्ठन धेनुमुद्रा विरचय्यान्नमुद्रां
प्रदर्श्य पूर्वं एकात्रिपञ्चवारं वारकपूर्णमानं जलं गण्डूषार्थ-
मस्त्रेण दत्वा अग्नौ परिविन्यस्य पत्रं विसृज्यास्त्रेण परिषि-
च्य हृदयेन प्रत्येकमापोशानं दत्वा सपुष्पैर्मध्यमानामिकां-
गुष्ठैर्गणेशमन्त्रेणपूर्वं गणपतये निवेद्य तत्पुष्पं विसृज्य
हस्तप्रक्षालनं कृत्वा स्वाहान्तमूलेन पुरुषवक्त्रे नैवेद्यं
दत्वा प्रभागिनां पृथक्पात्रे वा एकपात्रे वा निवेद्य
मनोन्मन्यादिमहेशादिबेराणां पृथक्पात्रे वा एकस्मिन् पात्रे
वा निवेद्य मनोन्मन्यादिमहेशादिबेराणां तत्तन्मन्त्रेण निवेद-
यित्वा पश्चाच्छीतलं पानीयं निवेदयेत् । तथांशुमति ।

गोमयालेपनं कृत्वा चतुरश्रसमान्वितम् ।
पात्राधारन्यसेन्मध्ये प्रोक्षयेदस्त्रमन्त्रतः ॥
नैवेद्यञ्चोपदंशञ्च स्थालिकामध्यमां न्यसेत् ।
सूक्ष्मे - व्यञ्जनैरावृतञ्चैव लवणपक्वोपदंशकैः ।
फलादिगुलसंयुक्तं क्षीरं दधिचमध्यमे ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चिन्त्यविश्वसादाख्ये -:

सूपापूपोपदंशाद्यैः फलैर्नानाविधैरपि ।
पद्यैरपद्यैस्तद्भूति परितं परिमण्डयेत् ॥
नैवेद्यं स्थापये-तस्माद्देव देवस्य पूर्वके ।

सूक्ष्मे - गण्डूषार्थञ्जलन्देयं करसंपूर्णमार्गत ।
आकनिपञ्चवारं वा विसृजेदस्त्रमन्त्रतः ।
अनेकान्नविधाञ्चैव अव- लानन्तु वाससा ।
त्रिपाद्यूर्ध्वे न्यसेच्चैव वेशणान्तु पृथक् पृथक् ॥

अंशुमति - प्रत्येकपात्रविन्यासं ओदनेनैव पूरयेत् ।
तस्योर्ध्वे विन्यसेत्पत्रं प्रोक्षयेद्धृदयेन तु ॥
तालत्रयं ततः कृत्वा दिग्बन्धञ्चावकुण्ठनम् ।
धेनुमुद्रां प्रदर्श्याथ पूर्वपत्रं विसर्जयेत् ।

कालोत्तरे -:

उत्तानौ तु करौ कृत्वा अंगुष्ठे तर्जनीद्वये ।
शेषा वै मुष्टिबध्वा तु अन्नमुद्राः प्रकीर्तिताः ॥
भक्ष्यं भोज्यञ्च पेयञ्च लेह्यशोष्यञ्च पञ्चधा ।

अंशुमति -:

परिषिच्यास्त्रमन्त्रेणापोशानं हृदयेन तु ।
मध्यमानामिका चैव मंगुष्ठाग्रेण योजयेत् ॥
दक्षहस्ते हविर्दद्यात् मूलमन्त्रं समुच्चरन् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्पुष्पन्तु समारोप्य नैवेद्यं दापयेत्ततः ।
तम्मन्त्रेण समुच्चार्य गणेशस्य निवेदयेत् ॥
तत्पुष्पन्तु विसृज्याथ हस्तप्रक्षालनं कुरु ।
तत्परं लिंग नैवेद्यं पञ्चवारं ~~त्रिवारसम्~~ त्रिवारकम् ।
~~अथवा एकवारञ्चे~~ अथवा एकवारञ्चे नैवेद्यं दापयेत्ततः ॥
पानीयन्दापयेद्धीमान् हस्तप्रक्षालनं कुरु ।
तम्मन्त्रेण तु नैवेद्यमेकवारं निवेदयेत् ॥
प्रत्येकन्तु विशेषेण हस्तप्रक्षालनं कुरु ।
गणेश्वरादिबेराणां लिंगेनैव तु योजयेत् ॥
अथवा एकवारञ्च ओदनेनैव पूजयेत् ।
नैवेद्यं दापयेच्छंभो हृदयेन तु मन्त्रतः ॥
निर्माल्यन्तु विसृज्याथ स्थलशुद्धिञ्च कारयेत् ।

ज्ञानरत्नावल्याम्-:

भोगांगानां पृथक्देव मभावादेकतो भवेत् ।

॥४८ तथा ब्रह्मशंभुवादैः तदर्थमस्य नैवेद्यं पृथक्पात्रेषु संभवे ।
पूर्वोक्तेतरमेकस्मिन्निति ।

विश्वसारोत्तरे-:

एलाचन्दनचन्द्राढ्यं पानीयञ्चाति शीतलम् ।
पाटल्युत्पलदानाद्यै र्वासितञ्च सुगन्धिभिः ॥

सुप्रभेदे-: पानीयञ्चाढकार्द्धं वा अर्द्धार्धकमथापि वा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तमादि क्रमेणैव मया भेदमिहोच्यते ।

नमोन्तमूलेन देवशिरसि पुष्पन्दत्वा अंसं चूर्णद्रव्यजातं संपूर्णं विभाव्य स्वधान्तमूलेनाचमनार्घ्यं निवेद्य हस्तोद्वर्तनं कर्पूर तक्कोल जाति फलसुगन्धिमुखवास तांबूलमर्घ्यञ्चदत्वा नमोन्त-मूलेनाभ्यर्चयेत् । तथावाचमनन्दद्या द्धस्तोद्वर्तनकन्ततः ।

हस्तोद्वर्तन सिद्ध्यर्थं चन्दनं हस्तयोर्द्वयोः ॥

मुखवासञ्च तांबूलं देवयोग्यं प्रदापयेत् ।

डालालवंककर्पूरं जाति तक्कोल चूर्णयुक् ॥

मद्यवत् खण्डसंमिश्रं मुखवासमिदं भवेत् ।

कामिके -: गन्धपुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च ।

तांबूलं मूलमन्त्रेण दद्यात्तु परमेश्वरे ।

शिवधर्मे -: पञ्चसौगन्धिकोपेतं यस्तांबूलं निवेदयेत् ॥

सुप्रभेदे -: पूगमेकं प्रतिप्रस्थं द्विगुणं त्रिगुणन्तु वा ।

अधमादि क्रमेणैव पत्रं तत्त्रिगुणं भवेत् ।

शैलचूर्णं सदा तोयमथवा शंखचूर्णकम् ।

वीरतन्त्रे -: मातुलुंग फलादीनि दद्यात्तांबूलकैस्सह ।

सूक्ष्मे -: पुनरर्घ्यं ततो दत्वा यजेद्वै गन्धपुष्पकैः ।

ततो ऽग्निकार्याधिकारिसंपन्नोऽधिकरण विशेषमग्नि कार्यं करोमीति विभाव्य लब्धानुज्ञोऽग्निकार्यं कुर्यात् । अस्या-धिकारिणः पुत्रकसाधक आचार्यश्च तदुक्तं कामिके -:

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



एवं समयदीक्षायां विशिष्टायां विशेषतः।
वह्निहोमागमज्ञाने योग्यस्संजायते शिशुः॥

सारसंग्रहे- अग्निकार्यं यथा कार्यं अभिषेकादनन्तरम्।
यतस्तेन विनाकार्यं दीक्षादौ नाधिकारिणा।
अग्निकार्यं न कुर्वन्ति दैशिकं ये प्रमादतः॥
वर्षाभ्यन्तरसंख्याया कर्तव्यं लक्षसंख्यया।
तथाहुते नैव तु मुच्यन्ते साधका जन्मबन्धनात्।

अत्र सन्यासिनोऽधिकारः। तथा देवि कालोत्तरे -
अग्निकार्यादि कार्याणि न सन्यस्य महेश्वरी।
नार्चनं पितृकार्याणि तीर्थयात्रा व्रतानि च॥

ऽचिन्त्यविश्व सादाख्ये-
आचार्याणाञ्च मध्ये वै यतीनां किञ्चिदन्तरम्।
परहिंस यतीनाञ्च तपस्सन्यासिन द्वयोः॥
अनयोरग्निकार्ये तु योग्यत्वं न विधीयते।

इदमग्निकार्यमर्चनांगमेव। अंशुमत्सूक्ष्मादावात्मार्थ पूजा प्रकरणे पूजामध्ये तद्विधानात्। अन्तर्यागेऽपि नाभिकुण्डहोमविधानाच्च। इदमग्निकार्यं याम्ये नैरृत वायव्येष्वन्यतरस्यान्दिशि कुण्डे स्थण्डिले वा कार्यं कालोत्तरे-
ततस्संप्रार्थ्य देवेशं होमागारन्ततो व्रजेत्।

ज्ञानरत्नावल्याम् - तत्र कुण्डः प्रकुर्वीत लिख्यते तद्यथा भवम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वह्निकार्यं द्विधाज्ञेयं कुण्डे वा स्थण्डिलेपि वा।
अस्त्राकृतिर्यथा कुण्डं सर्वकामार्थसाधनम्।
स्थाण्डिलं सर्वकामार्थं सिध्यर्थञ्चेति कीर्तितम्।
नित्य होमे तु वेदाश्रमाग्नेय्यां हस्तसम्मतम्।
विस्तरादुच्छ्रया दूर्ध्वं मेखला सहितं तथा।
कुर्यात्कुण्डमथैशान्यां पूर्वे वा योगपीठतः॥
शोष्टिकं सुदृढं कण्ठ खाताद्बाह्यो अंगुलस्ततः।
आद्या वेदांगुलोच्छ्राथ स्त्र्यंगुला द्व्यंगुला क्रमात्॥
मेखला च तदूर्ध्वे तु योनिरकांगुलायता।
मंगलांगुलविस्तारा नेमिरर्धांगुलोन्नता॥
ओष्ठमंगुष्ठवत् सर्वमश्वत्थ दलवत्कुरु।
योनेरभ्यन्तरे गाथ कुण्डरूपेण कल्पयेत्।
योनिमूले ततः किञ्चित् कुंभीकुंभवदुन्नत।
कुण्डरूपानुसारेण योनिः कार्या न चान्यथा।
कारणे - वक्षांगुलसमुत्सेध भुतांगुलन्तु विस्तारम्।
पद्माकारन्तथानाभिं कुर्यात्कुण्डस्य मध्यमे।
द्विभागन्दलमानन्तु एकभागन्तु कर्णिका।
इति निश्चित्य विधौ कुण्डं यथाशोभं तथा कुरु।
कुण्डस्य लक्षणं प्रोक्तं स्थाण्डिलन्त्वथनोच्यते।
गोमया लेपितां भूमिं दर्भैस्सम्मृज्य वै दृढा।

Centre for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अर्घ्योदकं समादाय प्रोक्ष्य सौम्येन विसर्जयेत्।
शुद्धदेशोत्थ सिकतै रत्नाद्रै हस्तविस्तृतम् ॥
अंगुलत्रयमानो च समं निम्नोन्नतं न च।

भीमसंहितायाम् -

अनाकर्षन्तु सिकता पांसुभिर्वा मृदापि वा।

अंशुमत्यात्मार्थ पूजायाम्। स्थण्डिले विशेष उक्तः -

गोमयालेपनं कृत्वा चतुरश्रं समान्वितम्।
द्विदर्भैश्चैव संगृह्य अमूलाग्र समान्वितम्।
११७० निकृन्तनान्तिसंख्याभिरस्त्र मन्त्रसमान्वितः।
तद्दर्भं वर्जयित्वा तु जलोपस्पर्शनं ततः।
सिकतै स्थण्डिलं कृत्वा चतुरश्रसमान्वितम्।

विश्वसारोत्तरे -

स्थण्डिलं तदभावे तु कुर्याद्गोमयमण्डलम्।
संपाद्योल्लेखनाद्यन्तु कारयेत्तु विचक्षणः।

इत्थं कुण्डे स्थण्डिलं वा समासाद्य पूर्वास्य उत्तरास्यो वा समुपविश्य निरीक्षणादि चतुस्संस्कार शुद्धे कुण्डादौ मध्ये अस्त्रेण पूर्वाग्रं रेखात्रयं कुशेन संपाद्य उकरेखामुत्तराग्राञ्च संपादयेत्। उत्तरस्याञ्चेत उत्तराग्रं रेखात्रयमेकरेखां प्रागग्राञ्च संपादयेत्। सर्वज्ञानोत्तरे -:

प्रोक्षयित्वा पुरा प्राज्ञ कुण्डमस्त्रोदकेन तु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुनरुल्लेखनं कुर्यादस्त्रमन्त्रेण षण्मुख ।

तथा कालोत्तरे-:

अस्त्रेणोल्लेखनं कुण्डे वर्मणाभ्युक्षणम्मतम् ।

श्रीमत्पराख्ये-:

रेखाः प्रागाननास्तिस्रो दद्यादेकामुदङ्मुखाम् ।

तथा सोम शंभु शिवाचार्यैरुत्तर रेखात्रयमुदङ्मुखां देकां पूर्वाननामथ । कुशेन शिवमन्त्रेण यद्वा तासां विपर्ययः । अथ कवचेनाभ्युक्ष्य सर्वसंस्कारसंपत्तिं विभाव्य । तत्र हृदयेन दर्भकूर्चाविष्टरम् । कुण्डमध्ये ओं हां वागीशी वागीश्वराय नम इति दत्वा श्यामवर्णां सर्वालङ्कारसंपूर्णामृतुमतीं ओं हां वागीश्वर्यै नम इति शक्तिमावाह्य संपूज्य रक्ताभं त्रिणेत्रं चतुर्भुजं वागीश्वराय नम इत्यावाह्य संपूजयेत् । तथा । पुनरभ्युक्षणं श्च कवचेन विधानवित् ।

कुण्डे वा स्थण्डिले वापि दर्भेण विष्टरन्न्यसेत् ।

तन्मध्ये तु संस्थाप्य वागीश्वरीं विशेषतः ॥

मृगेन्द्रे-: देवीमावाहयेद्विद्वान्विधिवद्विश्वमातरम् ।

श्यामा - - मती ध्यात्वा सद्वक्त्रां माल्यभूषणाम् ।

प्रसन्नवदनां पद्माभनयनत्रयाम् ।

यद्वा - वागीशी पद्मपुष्पाभा चतुर्हस्ता घनस्तनाः ।

व्याख्यानां पुस्तकानाञ्च कमण्डलवक्षधारिणीम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ध्यायेत्तु विशेषेण ऋतुस्नातां सुयौवनाम्।
नीलोत्पलदलाभास ध्यायेत्कर्मोक्तवत्सुधीः॥

इति ध्यात्वा ओं ह्रां वागीश्वर्यै नमः इति

वागीश्वरन्तु रक्ताभ त्रिणेत्रञ्च चतुर्भुजम्।
अभयं वरदोपेतं पाशशूलधरान्वितम्।

इति वागीश्वरन्देवं ध्यात्वा संपूज्यार्घ्यन्दत्वा पश्चादर-
ण्यादि संभवं शुद्धवेश्मजनितं वा वह्निं शुद्धपात्रे समानीय
ओं अं अस्त्राय हुं फडिति क्रव्यादंशमग्निखण्डं निरृति
कोणे निस्सार्य मूलेनाग्निं निरीक्ष्य हुं फडन्तास्त्रेण प्रोक्षणं
ताडनञ्च विधाय वौषडन्तकवचेनाभ्युक्ष्य ओं ह्रां हं ह्रां
वह्निमूर्त्यै नम इत्यनेन मन्त्रेण संहारमुद्रया स्फुरत्तार-
काकार वह्निचैतन्यमादाय पूरकवायुना बिन्द्वग्निना
सहैकीकृत्य कुंभकेन नाभ्यां नाभौ तद्बिन्दव वह्निद्वयमेकी-
कृत्यमेतदग्नित्रयं पिंगलया रेचकेन बहिर्निस्सार्य उद्भव-
मुद्रया प्रदीपकलिकोपममाग्ने बीज चैतन्यं ओं ह्रां हूं
वह्निचैतन्याय नम इति ज्वालामालप्रज्वलदग्नौ विनिवेश्य
संहितया संपूज्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रयामृतीकृत्य
कवचेनावकुण्ठ्यास्त्रेण संरक्ष्य हृदयेनाभ्यर्च्य परमेश्वरधर्म
संभाव्य कुण्डलोपायोनि क्षोभार्थं प्रदक्षिणक्रमेण वारत्रयं
परिभ्राम्य वागीशीश्वरावीशादिग्गतत शिरसा ध्यात्वा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वागीश्वरी गर्भनाड्यां आत्मसंमुखं वागीश्वरेण क्षिप्य-
माणं विभाव्य तत दक्षिणजानुस्सन् प्रक्षिपेत्। कामिके-:

शुद्धात्मतत्ववद्वह्नि मरणीजनितं क्षिपेत्।
सूर्यकान्ताद्विजग्राहात् प्रसूतमथवानलम्।
अनुकल्पविधानेन मन्त्रपूतं वियोजयेत्।
ताम्रपात्रे ··· वे च वीक्षणाद्यैषु शोधयेत्।
क्रव्यादांशं परित्यज्य प्रोक्षयेद्दर्भवारिणा।
कवचेनावकुण्ड्याथ रौद्रमाग्निमथान्यसेत्।

सिद्धान्तशेखरे-:

शुद्धमग्निसमादाय बिन्दु ··· योजितम्।
नियोज्य जाठराग्नौ तौ लीनग्नीनेकतः कृताब्।

यद्वा-: तदग्निचैतन्यं हृत्पुण्डरीकवह्निना संयोज्य। तदु-
त्कलितं सुषुम्ना रेचकेन मूलेनपरमाशिव सं- क्त ज्वलदग्नौ
नियोज्य तस्मिन् ज्ञानाग्नौ होमं कुर्यात्। तदुक्तं कालोत्तरे-:

ज्ञानानलश्चयस्तत्र सूर्यायुतसमप्रभः मप्रभम्।
हृत्पुण्डरीकमध्या तु सौषुम्नेन पथानलम्।
द्वादशान्ते परे योज्य तत्तेजं पुञ्जपिञ्जरम्।
तेन विन्यस्तमात्रेण सर्वकर्माहको भवेत्।
गर्भाधानादिकं कर्म निष्कृतिश्चाम्य पश्चिमा।
ज्ञानानलस्य पुरतः कलां नार्हति षोडशीम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



॥१८ नित्ये नैमित्तिके काम्ये कार्यं ज्ञानानलार्चनम्।
सकृत्प्रोक्षणमात्रेण स्रुक्संस्कारकृतो भवेत् ॥
एवं घृतस्य कर्तव्यमर्घ्यपात्रोदकेन तु।
सर्वसंस्कारसंपन्नं सर्वकर्मार्हको भवेत्।
अथवान्यप्रकारेण शिवाग्निं कारयेद्गुरु।
आत्मविद्या शिवाख्यैश्च त्रिधा पूज्यं प्रदापयेत्।
शिवाग्निर्जायते तेन सर्वसंस्कारवर्जितः।
निक्षिप्यवह्नि बीजेन संहितान्तु ततो यजेत्।
मूलेन वौषडन्तेन धेनुमुद्रा युतेन च।
अमृतीकृत्य संपूज्य कवचेनावकुण्ठ्य च।
अस्त्रमन्त्रेण रक्ष्याथ हृदयेन समर्चयेत्।

सन्तानोत्तरे-:

भ्रामयित्वा त्रिधाकुण्डं जानुभ्यामवनिं गतः।
कामिके- वागीशी गर्भनाड्यान्तु स्वात्मानं सम्मुखं यथा।
हृदमूलेन वा क्षिप्य स्वात्मानं विचक्षणः।

ततस्य मृद् देव्यै वासः परिधाय शौचाचमनार्घ्य जलेन त्रिधा हृदा दत्वा सद्यादिना भ्यर्च्य स्वात्मान्त मूलेनाहुति पञ्चकं दत्वा ओं हां शिवाग्निस्त्वं हुताशनेति नामकृत्वा गर्भाधानादि पञ्चसंस्कृतमग्निं विभाव्य पितरौ हृदाभ्यर्च्य विसृज्य सामान्यार्घ्यजलेन वौषडन्तकवचेन.

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुण्डमेखलासु संप्रोक्ष्यमेखला चतुर्दिक्षु पूर्वोत्तराग्रान्दश दर्भान् कवचेनास्तीर्य तत्र पूर्वपश्चिमदक्षिणोत्तरदिक्षु ओं हां ब्रह्मणे नमः ओं हां विष्णवे नमः । ओं हां रुद्राय नमः ओं हां अनन्ताय नम इत्यभ्यर्च्यान्यार्भकरक्षां विज्ञापयेत । कामिके-

तोयबिन्दूंस्त्रिधा दत्वा समाच्छाद्य तदिन्धनैः ।
दद्यच्चंद्रौच मतानि वस्त्राच्छस्तेण चार्भकम् ॥
सद्या तु ना वै दद्यात् मूलेनाहुति पञ्चकम् ।
शिवाग्निस्त्वमिति ब्रूयात् मूलमन्त्र पुरस्सरम् ॥
पित्रोर्विसर्जनं कुर्यात् सूतकस्य निवृत्तये ।
कुण्डमध्यांबुना प्रोक्ष्य प्रागग्रमुदगग्रकान् ।
दर्भानास्तीर्य कुण्डस्य समन्तादस्त्रमन्त्रतः ॥

मृगेन्द्रे- त्रिंशद्दर्भदलैर्वेणि ग्रथिता बाहुसंमितैः ।
ब्रह्मग्रन्थियुताचाग्रे वृत्तं वा विष्टरं शुभम् ॥
या वेणी केशपाशा तु स्स विष्टर इत्युच्यते ॥

मतंगे- प्रागुक्तविधिनामन्त्रे सौम्याग्रान् पर्वतान्न्यसेत् ।
पूर्वाग्रान्दक्षिण भागे पश्चिमे चाप्युदङ्मुखान् ॥
प्रागग्रानुत्तरे भागे पूर्वतश्चापि विष्टरम् ॥

मृगेन्द्रे- याज्ञीय द्रुमजा बाहु मात्राः परिधयस्स्मृताः ।
कनिष्ठिकास्थूलमूला हरिता व्राणवर्जिताः ।
गतान् पूर्ववत्परिधाय लोकपालान्यजेत ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कामिके-: इन्द्रादीन् लोकपालांश्च पूजयेत्परिधिष्वपि ।

विष्टरेषु क्रमेणैव ब्रह्माणं रुद्रमेव च ॥

विष्णुमीश्वरमभ्यर्च्य प्रागादिषु चतुर्ष्वपि ।

ततो ब्रह्मादयो देवा इन्द्राद्या लोकपालकाः ।

निवार्य विघ्नसंघातं बालकं बालगेष्वथ ।

शैवाग्निं कथ्यते विप्र शृणुतास्मिन् समाहिताः ।

पञ्चवक्त्रयुतं सप्तजिह्वा विराजितम् ।

द- स्तान्त्रिणेतञ्च सर्वाभरण भूषितम् ।

रक्तवस्त्र परीधानं पंकजोपरि संस्थितम् ।

बद्धपद्मासनासीनं दशायुधसमान्वितम् ।

कनका बहुरूपाश्च अतिरक्ता ततः परम् ।

सुप्रभा चैव कृष्णा च रक्ता चा हिरण्मयी ।

ऊर्ध्ववक्त्रे स्थिता स्तिस्र श्शेषाः प्रागादितः क्रमात् ।

इत्यग्निं ध्यात्वा ।

ओं हां अग्नये नम इति संपूज्य ओं हां हूं अग्नये स्वाहेति तिलाहुति पञ्चकं जुहुयात् । कामिके-:

अग्ने त्वमीश्वर न्तेजः पावनं परमं यतः ।

तस्मात् त्वदीय हृत्पद्मे स्थाप्य संतर्पयाम्यहम् ।

इत्याज्ञां विज्ञाप्य कुण्डप्रमाणमग्नेरोत्सितन्मुखं विभाव्य अग्नि हृत्पद्मे आधारशक्त्यादि शक्त्यन्तं सदेवं शिवसांनिध्यवत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पवित्रान्तं संपूजयेत् । कामिके-:

यथाहि लक्षितं वक्त्रं कुण्डमानं प्रकल्पयेत् ।

अजिते-: ततश्शिवासनाञ्चाग्नौ पद्ममेकं प्रकल्पयेत् ।

पद्मासनायेत्युच्चार्य नमस्कारसमान्वितम् ।

तत्र लिंगे यथा देव सदाशिव उदीरितः ।

तथा ध्यात्वा तु तन्देवं पञ्चब्रह्मांगसंयुतम् ।

आवाहनादिकं सर्वं कृत्वा होमं समाचरेत् ।

ततश्शिववक्त्राग्नि वक्त्रयोस्सन्धानं कृत्वा स्वाहान्त

मूलेन घृतादिना शतदर्धं वा यथा शक्ति हुत्वा ब्रह्मांगानां

120a दशांशं हुत्वा ओं हौं शिवाय वौषडिति ऊर्ध्ववक्त्रे पूर्णान्द-

त्वा नैवेद्याय चरुं स्वाहान्तमूलेनन्न ग्रासत्रयं ब्रह्मांगाना-

मेकैकं हुत्वा पूर्णां दत्वा चमनं चन्दनतांबूलादीनि दत्वा

भस्मपाद्याष्टपुष्पकया संपूजयेत् । कामिके-:

शतमर्धं तदर्धं वा विंशति दश एव वा ।

शिवाद्दशांशतोंगानि तर्पयेच्च द्विजोत्तमाः ॥

आत्मार्थे वा परार्थे वा ऋयहं होममाचरेत् ।

एककालं द्विकालं वा त्रिकालं वा समाचरेत् ।

वातुले-: एककालं द्विकालं वा त्रिकालं होममाचरेत् ।

त्रिकालमुत्तमं प्रोक्तं द्विकालं मध्यमं भवेत् ।

अधमश्चैककालं वा कारयेत्तु शिखिध्वज ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



समिदाज्य चरुं लाजान् सर्षपांश्च यवांस्तिलान्।
उत्तमान्येति विख्यातां मध्यमञ्च ततश्शृणु।
समिदाज्य चरुञ्चैव सर्षपं मध्यमं विदुः।
समिदाज्य चरुञ्चैव कन्यसं परिपठ्यते।
घृतेन पायसावाथ तिलैर्वा घृतमिश्रितैः।
यवैर्वा व्रीहिभिर्वापि गुल्गुलेन घृतेन वा।
नित्यहोमः प्रकर्तव्यो यथा वित्तानुसारतः।
आज्यं वै कर्षमातन्तु होतव्यं कर्मसिद्धये।
तिलान्मृग्या तु जुहुवा यवादीन् कम्बु मुद्रया।
पायसं व्यञ्जनादीनि पातकेन तु होमयेत्।

कामिके- आज्याभावे तिलैर्होमं कर्तव्यः कृष्णवर्णकैः।
व्रीहिभिर्वास्मि मुद्गैर्वा दध्नावापि यवैस्तु वा।
श्रीफलैर्बिल्वपत्रैर्वा पुष्पैर्वा याज्ञिकैश्शुभैः।
अन्यैर्होमो विधातव्यः श्रद्धा वित्तानुसारतः।
दशकं वाहुतीनाञ्च मूलेन जुहुयात्क्रमात्।
पञ्चब्रह्म शिवाङ्गैश्च प्रत्येकं होममाचरेत्।

किरणे- स्वाहाकारश्च होमे स्यात् पूर्णाद्या वौषडन्तका।

कालोत्तरे- प्रासादेन तु मन्त्रेण पूर्णाहुतिमथाचरेत्।

चतुश्शति कालोत्तरे-

ऊर्ध्वं वक्त्रो महासेन तस्मिन् प्राणाहुति स्मृताः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कामिके-: हविर्घ्यं ग्रासमात्रेण तांबूलं विनिवेदयेत ।
प्रदक्षिणं नमस्कृत्वा स्तुत्वा वा भक्तितस्ततः।
पराङ्मुखार्घ्यं दत्वा वह्निस्थं शिवमुत्थाप्य स्वमूर्तौ संयोज्य विधिवन्नाडी सन्तानेन लिंगस्थे शिवे निरपेक्षं योजयेत् ।
सर्वज्ञानोत्तरे-: विसर्जयेत्ततो देवं पुनः पूजाविधानतः।
अथ विप्रादिस्तयाणां व्याहृती चतुष्टयं जुहुयात् ।
चतुर्थश्चेन्मूलेन होमयेत् । पश्चात् ब्रह्मादिभ्यो बलिन्दत्वा वह्निं नमस्कृत्य- सप्तजिह्वान्वितं रक्तं पञ्चास्यं प्रज्वलत् शिखम्।
वागीशी गर्भसंभूतं शिवाग्निं शिवदं भजे ।
इति स्तुत्वा हुतं भुक्त्वोपरमेत्युक्त्वा ओं हां हूं शिवाग्नये नम इति निष्ठुरया वह्निं स्वहृदि लिंगे वा योजयेत् ।
तदनु-: ब्रह्मादीन् लोकपालादीनपि व्युत्क्रमेण विसृजेत् ।
यद्वा । कुण्डेवान्यद्वाग्निरुद्धृत्य नवभाण्डे वाऽजस्राग्निं संरक्षये-त्तदग्निर्न्निर्वाणन्नश्चेत्प्रायश्चित्तं कुर्यात् । कामिके-:
शिवं व्याहृतिभिः पश्चात् सन्तर्प्य शिवपावकम् ।
रोधयित्वा तु तत्रैव रक्षयेत् प्रतिवासरम् ।
सूक्ष्मे-: निष्ठुरेणाग्निमादाय मूललिंगे समर्पयेत् ।
विष्टरञ्च समादाय ग्रन्थिमुक्त्वा विसर्जयेत् ।
परिस्तरणमानीयमाल्यैनैव तु सेचयेत ।
ऽकदर्भं समादाय ... ग्रादिकन्दहेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदेकमग्नौ निक्षिप्य तत् भस्मतिलकं कुरु।

तद्भस्म धारणं पुंसां मायुश्रीकीर्ति वर्द्धनम्।

विजयं रोगनाशार्थं सर्वाभिष्टफलप्रदम्।

अंशुमति-: तद्भस्म ललाटे तु नेत्रमन्त्रेण विन्यसेत्।

तत् सहस्रे वतो हुत्य शिवाग्निन्तु स्थाप्यन्यत्र तु रक्षयेत्।। निरोधानन्तु तत्रैव कार्यं निष्ठुरमुद्रया।

-- स्थमनलं शेषं नमस्कृत्य विसर्जयेत्।

विजयोत्तरे-: वह्निं संरक्षयेन्नित्यं चतुर्वा श्रुति-क्रमतः।

यद्वा विसर्जये द्वह्निं पुनस्संस्कारयोजयेत्।

प्रत्यहं कुण्ड संस्कारो भस्मापनय पूर्वकम्।

कामिके-: यद्वा विसर्जयेत्कुण्डे वह्निमन्यत्र रक्षयेत्।

न. क- तेग्नौ तु निर्वाणे जपेद्धोरमुपोषितः।

स। शिवे पि हि निर्वाणे त्रिरात्रं समुपोषितः।

जपेद्वा जुहुया द्वाथ बहुरूप प्रशान्तये।

स्वदक्षिण दिग्भागे बल्यर्थं गोमयेन चतुरश्रमण्डलं कृत्वा मण्डलप्रान्ते पूर्वाद्युत्तरान्त दिक्षु ओं हां रुद्रेभ्यो नमः ओं हां मातृभ्यो नमः ओं हां यक्षेभ्यो नमः। ईशानादि

१२०६ कोणेषु ओं हां ग्रहेभ्यो नमः। ओं हां असु-भ्यो नमः ओं हां राक्षसेभ्यो नमः ओं हां नागेभ्यो नमः मण्डल मध्ये ईशानाग्नेय नैर्ऋतेषु ओं हां नक्षत्रेभ्यो नमः ओं हां

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हां राशिभ्यो नमः । ओं हां विश्वेभ्यो देवेभ्यो नमः वायुवरुणयोर्मध्ये ओं हां क्षेत्रपालाय नमः इत्यभ्यर्च्यार्घ्य-न्दत्वा जलमिश्रान्नेन स्वाहान्तेन - तन्मन्त्रेण रुद्रादिभ्यो बलिं प्रदायाचमनं दद्यात् । तथा कामिके -:

तेनैवान्तर्बहि - इ द्यात्कृत्वा मण्डलकं भुवि ।
रुद्रेभ्यः पर्वतो दद्यात् मतृभ्यो दक्षिणे तथा ।
गणेभ्यः पश्चिमे भागे रक्षोभ्यश्चोत्तरे बलिम् ।
गृहेभ्यश्च तथैशान्या मसुरेभ्यो ग्निगोचरे ।
पा - - स्य - फलभक्षेभ्यो नागेभ्यो वायुगोचरे ।
नक्षत्र राशिवर्गेभ्यस्त - विश्वगणाय च ।
मुसला - ग्नेये देशे बलिन्तेभ्यः प्रक्रमतः ।
वायुवारुण दिक् भागे क्षेत्रपालबलिं क्षिपेत् ।
आत्मार्थंत्येवमुद्दिष्टं गृहार्दो देव सन्निधे ।
इन्द्रादि परिवाराणां बलिन्दद्यात्पृथक् पृथक् ।

इति चेन्नादिन्द्रादिबलिमत्र नविन्दद्यात् । तथांशुमति

रुद्रेभ्यः पूर्वतो दद्यान्मातृभ्यो दक्षिणे तथा ।
गणेभ्य पश्चिमे भागे रक्षोभ्यश्चोत्तरे बलिम् ।
गृहेभ्यश्चासुरभ्यश्च राक्षसेभ्यस्तथैव च ।
नागेभ्यश्च बलिन्दद्यादाग्नेयादि विचक्षणः ।
मण्डलस्य तु तन्मध्ये क्षेत्रपालबलिन्दसेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वमन्नं समुद्धाध गकवारं बलिन्ददेत ।
तद्यथा - ओं हां पूर्वादिकपालेभ्यो वागीशभूतमातृगणरुद्रक्षेत्र
पालादिभ्यो नम इति दद्यात । अथवा नैवेद्यान्ते पार्थिवत
रुद्रादिभ्यो तदग्रे मण्डले बलिन्दत्वा तदन्वाग्निकार्यं कुर्यात।
तथांशुमति-: तदग्रे बलि दानञ्च मण्डलश्चतुरश्रकम ।
पाद्यमाचमनार्घ्यं गन्धपुष्पैस्समर्चयेत ।
बलिदानावसाने तु अग्निकार्यं समाचरेत ।
मण्डपाद्बाह्यांकणे-: ओं हां वायसादिभ्य समयभेदिभ्य
स्वाहेत्यभ्यर्च्य बलिन्दत्वा ओं हां अग्न्यादिभ्य स्स्वाहा
ओं हां सर्वेभ्यो गृहवास्तु देवेभ्यस्स्वाहेति पृथकपृथकबलिं
दत्वा हृदयेन सर्वान्विसृजेत । तथा सिद्धान्तशेखरे -:
तान्विसृज्य विनिर्गत्य बहिर्गोमयमण्डले ।
श्वभूतपतितं प्रेत काकादिभ्यो बलिं क्षिपेत ।
यदि वा संक्षेपेणानेनमन्त्रेण बलिन्दद्यात ।
ओं — ये रुद्ररौद्रकर्माणो रौद्रस्थाननिवासिनम ।
सौम्याश्चैव तु ये केचित सौम्यस्थाननिवासिनः ।
मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ।
विघ्नभूतास्तथा चान्ये दिग्विदिक्षुसमाश्रिता ।
सर्वे सुप्रीतमनसः प्रतिगृह्णन्त्विमां बलिम ।
सिद्धिं जुषन्तु नः क्षिप्रं भयेभ्यः पान्तुमां सदा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्थं बलिं दत्वा । बलिमन्त्रान् स्वहृदि विन्यसेत् ।
तदनु कुण्डगतद्रव्यजातं भस्मावशेषं विधाय तदुद्धृत्य कुण्डं
सबाह्याभ्यन्तरं गोमयं वारिणा संलिप्य पुनरपि होमकाले
कुण्डसंस्कारं विधाय तत्र स्थापितमग्निं प्रज्वाल्य तस्मिन्
पूर्ववत् शिवं संपूज्य सन्तर्पयेत् । इत्येवं प्रत्यहं विदधीत ।
तदुक्तं प्रत्यहं विहितं कर्म कुण्डस्योल्लेखनादिकम् ।
जाग्रापयेदतो नाग्निं नित्यनैमित्यकर्माणि ।
अत्र दीक्षा प्रतिष्ठेतरविहित नैमित्तिकेन कर्तव्य इति संस्कृतेः ।
प्रत्यहं कुण्डं न्यसेत् । प्राक्संस्कृतानलमिति । तथा -
शिवाग्नेर्धारणं पुण्यं यावज्जीवं शिवाज्ञया ।
कुण्डादुद्धृत्य ~~यत्नेन~~ यत्नेन स्थापयेद्भोजने दृढे ।
तुषैश्शुष्कोलपैस्सान्द्रपिण्डैर्नाग्निं संरक्षयेत् ।
संस्कृत्य पूर्ववत्कुण्डं प्रत्यहञ्च प्रतिक्षणम् ।
तत्र निक्षिप्य च · · तु तत्र सन्तर्पयेच्छिवेवम् ।
कर्मान्ते पूर्ववद्रक्षा कार्या यत्नेन दीक्षितैः ।
एवं सुरक्षितं प्राणा प्रान्तगः प्रतर्पयेत् ।
तस्य पुण्यफलं वक्तुं नकेनापीह शक्यते ।
तेनैव वह्निना कार्यं तस्यैवान्त्येष्टिकर्म च ।
न चेतरेषु तत्कार्यं नैव प्राकृतजन्तुषु ।
विसर्जनं यथा वह्नेर्दश दौ - द्यात्कवाचन ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ज्ञानाग्नौ हृदये बिन्दौ योजयित्वा विसर्जयेत्।
तदावस्थानुरूपन्तु प्रायश्चित्तं समाचरेत्।
स्वस्थे चित्ते पुनः कुर्यात् यथापूर्वमुदाहृतम्।

तत श्रोतृ वन्दनादिकं कृत्वा सकलीकृत्य सामान्यार्घ्यहस्त शिवान्तिकं गत्वा स्वासने समुपविश्य-पूजाहोमादि कार्यार्थं स्वयं कृतं धर्म्या कृतम्। तत्फलं परमेशानं मया तुभ्यं समर्पितम्। तद्गृहाण स्वयं प्रीत्या नेदं हो भावमेस्तु भो।

कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम महेश्वर।

इत्युक्त्वा स्वाहान्तमूलेन पूजाहोमादिकं पुण्यफलं देवस्य

121a वरहस्तेऽर्घ्यजलेन सह उद्भवमुद्रया भूमिषु जानुं मुमुक्षुर्निवेदयेत्। बुभुक्षुश्चेत्तत्फलमैस्तु देवेशशक्तिमुक्त्यर्थ साधनमिति पठित्वा समर्पयेत्। अंशुमति -:

अथवान्यप्रकारेण जपमेव समाचरेत्। होमे प्रकरणं वै कृत्वा दशक्तो वा तदन्यथा॥ होमसंख्यानि मन्त्राणि जप्त्वा दशगुणं तथा। तज्जपं विरहस्ते तु तत्पुण्यन्तु समर्पयेत्।

अर्घ्यन्दत्वा विशेषेण शिवमन्त्रमनुस्मरन्।

तदारूपादि निरीक्षणादिभि स्संस्कृत्य धूपदीपमुद्राश्च प्रदर्श्य धूपटामुद्रया दत्वा कण्ठ्या वामहस्तेन नादयन्तं दीपाय दत्वा शक्तिपञ्च सप्तनवति वृति युरीक्षणादि संस्कृत दीपमुद्रां प्रदर्श्य दत्वा आत्मनो वाङ्मनः कायजनित दोष

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दोषमोक्षार्थं शिवसंयोगार्थञ्च दूर्वाक्षतकुशसहित पुष्पमञ्जलौ गृहीत्वा ओं हां हौं आत्मतत्वाधिपतये शिवाय नम इति पवित्रन्दद्यात । तदुक्तम्-

पवित्रमुपदोभूतं शिरसा स्वाधिरोपयेत ।
मत्यहं वाङ्मनः काय व्यापारजनितादलम् ।
पतनात्रायते यस्मात् तस्मादेतत् पवित्रकम् ।
कारणे-: दूर्वा कुशाक्षतो पेतैं बिल्वपत्रैस्समान्वितम् ।
दद्यात्पवित्रकं नित्यं मूलमन्त्र समायुतम् ।

आत्मतत्वाधिपतये शिवाय नम इत्यपि । तद्विद्वान् शिवस्यस्य मुक्तिकामस्मरन् । पठेत । पवित्रकत्रयं मूर्ध्नि दद्यात् भोगी शिवादितः । अत्र भोगीति शब्देन भोगी भोग दीक्षया दीक्षितः । तदुक्तम् श्रीमद्रौरवे ।

दीक्षाभूतागणपति गुरोर्मण्डले जन्मवन्त-
सिद्धा मंत्रैस्तरुण दिनकूर्ममण्डलोद्भासि देहाः ।
भुक्त्वाभोगान् सुचिरममृतस्त्रीणि निकायैरुपेता
सूक्ष्मो त्कण्ठो श्शिवपदपरैश्वर्यभाजो भवति । पिविः

तृभूतस्य पवित्रदानान्तापत्रयघ्नं सकलार्थ सिद्धैः ।
इत्याचार्यैरप्युक्तम् । डातदकरणे पूजायाराजसत्वं भवति । तथामोहशरोत्तरे - पवित्रेण विना पूजा राजसी परिकीर्तिता ।
इति । - नववञ्चने कान्यतरसंरव्यकर्पूर वर्त दीपयुक्तमारातिक-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिपाद्यान् स चतुसंस्कारन्धूपदीपौ दत्वा धेनुमुद्रां प्रदर्श्य समादाय स्वाहान्तहृदयेन प्रत्येकमथो मध्वोर्ध्वक्रमेण स्त्रिः स्त्रिः परिभ्राम्य अवतार्याचमनार्घ्यौ दत्वा कर्पूरमिश्रं भस्म मृगमुद्रया संगृह्य लिंगस्योपरितिः। परिभ्राम्य शान्तिक पात्रे क्षिपत्वा देवस्य देव्यो बेशणां वा यथायोग्यमंगुष्ठा- नामिकाभ्यां वा भस्मधारयेत् । तथा निर्धूतमज्वलदंगकार पूर्णपात्रोदरभूशः। दह्यमानेन धूपेन धूपयेत्तदनन्तरम् । पञ्चसप्त नैवेन्द्वादि वर्तिभिर्घृतदीपिकम्। कालोत्तरे -:

कनिष्ठांगुष्ठसंकोच्य शेषांश्चैव प्रसारयेत् ।
धूपमुद्रा भवेदेष दीपामुद्रान्ततः शृणु ।
कनिष्ठानामिकामध्ये अंगुष्ठेन तु पीडयेत् ।
तर्जनीमूर्ध्वतां कृत्वा दीपमुद्रां प्रदर्शयेत् ।
ड नादञ्च मोक्षार्थं विरक्तानां प्रदृश्यते ।
घण्टाताडनमेवं स्यात् विनादं भोगमोक्षदम्।
जानुनाभेरधो नादं कर्तव्यन्तु न कारयेत् ।
नाभेरूर्ध्वन्तु कर्तव्यं सा घण्टा प्रताडनम् ।
उत्तमं स्निग्धघोषञ्च मध्यमं मध्यमं तथा ।
अधमं धकारघोषञ्च इत्येते मणिलक्षणम् ।

अजिते-त्रिशतिकमथो वक्ष्ये सर्वपापप्रशान्तये ।
नव दीपयुतं श्रेष्ठं पञ्च प्त्रन्तु मध्यमम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कन्यसन्त्येकदीपेन युक्तं पातं क्रमाद्भवात् ।
दीपमेकैकदीपे तु प्रोक्षयेत्तु शिवांभसा ।
बद्ध्वा तु सुरभिं पश्चा दीपस्योपरि शोधयेत ।
उद्धृत्वोपरिदेवस्य त्रिः परिभ्रामयेत्तदा ।
तन्त्रसारे- पदादि मूर्धपर्यन्तं त्रिस्त्रि भ्राम्य ततो न्यसेत् ।
ततो भस्म तु संहृत्य कर्पूरादि सुगन्धिनम् ।
गृहीत्वा मुद्रया मृग्य भ्राम्य लिंगोप त्रिधा ।
प्रक्षिप्ते दीपमाते तु ततो लिंगस्य वर्द्धनी ।
अस्त्रेण विन्यसे दीक्षा दक्षिणेन करेण तु ।
कामिके-: सितं पूतं सुगन्धैश्च निष्टालुकमनन्तरम् ।
अंगुष्ठानामिकाभ्यान्तु तिलकं पञ्चवक्त्रके ।
देवी व्यक्तस्वरूपा चेत्तिलकं च क्रमागमे ।
ततो ललाटे मूलेन हृदयेनाथवानयेत ।
वेरे ललाटे हृद्वाक्षो प्रदेशे तिलकन्नयेत् ।
तन्त्रसारे-: फाललोचनमध्ये तु रक्षायाः किं प्रयोजनम् ।
121b ललाटे नयनस्योर्ध्वे रक्षा देवस्य दापयेत् ।
ततो नन्तान्तरजलोपस्पर्शनं कृत्वा दर्पण छत्र चामर व्यजन ताल
वृन्तानि पञ्चब्रह्मभिः क्रमेण दत्वा वेदपुराणपञ्चांग श्रवण
स्तोत्र शङ्ख नृत्त सहित नृत्त गीत वाद्य ध्वनिभिस्सन्तो संतोष्य
भोगांग सहितं सन्तु शिवं ध्यात्वा मूलेन पुष्पाञ्जलि त्रिया

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



महामुद्रां प्रदर्शयेत्। उक्तं अंशुमति-:

जलोपस्पर्शनं कृत्वा दर्पणन्दर्शयेत्ततः।
चित्तचामरकञ्चैव व्यजनं वालवृन्तकम्।
पञ्चब्रह्ममनुस्मृत्य योजयेत्तु क्रमेण तु।
वेदैः पुराणमेवञ्च पञ्चांगं श्रवणं ततः।
स्तोत्रं नृत्तञ्च गीतञ्च वाद्यध्वनि समायुतम्।

शिवधर्मे-: शिवस्य पुरतो दद्यात् दर्पणस्वच्छ निर्मितम्।
कल्पायुत सहस्रन्तु शिवलोके महीयते।
शरच्चन्द्रांशु विमलं मुक्तादामोपशोभितम्।
मणिमण्टमय च्छत्र दद्यात्पाकाञ्चनामयम्।
छत्रेण सपवित्रेण धार्यमाणे न शोभितम्।
विमानव्रातसंभोगैश्चिरं शिवपुरे वसेत्।

तन्त्रसारे-: शिवाय चामरन्दद्यान्मणि दण्डविभूषितम्।
हेमरूप्यादि दण्डं वा तस्य पुण्यफलं शृणु।
चामरासक्त हस्ताग्रान्दिव्यस्त्रीपरिवारितम्।
महाभोगविमानस्थश्चिरं शिवपुरे व्रजेत्।

सुप्रभेदे-: मधुरव्यजनं कुर्याच्चमर्या चामरन्तथा।
हेमरत्नमयन्दण्डं शैल्यं ताम्रविधन्तु वा।
दन्तैर्वा दारुभिर्वापि दण्डं कुर्याद्विशेषतः।

चिन्त्यविश्वसादाख्ये-: मूलमन्त्रेण कर्तव्यं पुष्पं शिरसि निक्षिपेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



निबन्धयेन्महामुद्रां न्बोपरि भ्रामयेत्करम् ।

कामिके -: प्रार्थयित्वा जपं कुर्यादक्षसूत्रेण बुद्धिमान् ।

अक्षाणामक्षकवचान्वां नियमोयं प्रसूयते ।

दृष्टादृष्टफलावाप्त्यै रक्षसूत्रन्तदुच्यते ।

जपमालामादाय वामहस्ते विन्यस्य हृदादि निरीक्ष्य अस्त्रेण दिशो जपबद्ध्वा कवचेनावकुण्ठ्य कलान्तेरभिमन्त्र्य गन्धपुष्पान्हृदा संपूज्य मालामुद्रां बद्ध्वा आत्ममन्त्ररक्षां विधानशो कनिष्ठानामिकामूले पुष्पं संगृह्य वस्त्रेणाच्छाद्य मूलमन्त्रमष्टोत्तरशतन्तदर्द्धं तदर्द्धं वा जपेत् ।

तथांशुमति -: अक्षमालां समादाय वामहस्ते च विन्यसेत् ।

ईक्षणं हृदयेनैव प्रोक्षणं बीजमन्त्रतः ।

दिग्बन्धञ्चास्त्रमन्त्रेण कवचेनावकुण्ठने ।

कलामन्त्राभिमन्त्रेण पञ्चसंस्कारसंयुतम् ।

कालोत्तरे -: उभयोश्चन्द्रयोर्मध्ये स्वदेहञ्चिन्तयेद्यतः ।

तेनामृतमयो देह उद्भूव्य लिङ्गेऽपि ।

आत्मरक्षा समाख्याता मन्त्ररक्षा निगद्यते ।

शक्तिगर्भे न्यसेन्मन्त्रान् न पुंसि न शिवे तथा ।

अशक्ताः पुरुषस्यास्त्युर्विवशक्ता शान्ततेजसः ।

तस्माच्छक्तिगता मन्त्रा भुक्तिमुक्तिफलप्रदाः ।

नात्मनि न परे तत्त्वे योजयेद्दति वा तथा ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



न पुंसि न परे तत्वे शक्तौ मन्त्रान्नियोजयेत् ।
पुंस्तत्वे जडतां याति केवलत्वे तु निष्फलम् ।
निष्प्रपञ्चे परे तत्वे मन्त्रोभवति निष्फलम् ।
ना जप्तास्सिद्धो मन्त्रो बाहुतस्तु फलप्रदः ।
नार्चितो यच्च ते कामस्तस्मात्तेतयमाचरेत् ।
इति शक्तिराद्या परा विद्या शैवी शिव फलदा ।
शिवादभिन्ना सा ज्ञेया सर्वदा रवि रश्मिवत् ।
मन्त्रमाता पराशक्तिराद्या कुण्डलिनी तु सा ।
हृत्प्रदेशे स्थिता नित्यं रविचन्द्राग्नि सन्निभा ।
डाकालिया तु विज्ञेया इडा पिंगादि भेदतः ।
सुषुम्नान्तर्गतारूढा ज्ञाता गुरुमुखेन तु ।
अनाभे द्वादशान्तान्तं व्याप्त - - गेन वर्तते ।
विशुल्ला मार्गतो याति द्वादशान्ते तु योगिनाम् ।
गमागमप्रभेदेन याति सा शांकरे पदे ।
परं भावं समाश्रित्य परानन्द - मश्नुते ।
इति शक्त्यादिकं ज्ञात्वा मन्त्ररक्षा क्षमो भवेत् ।
षट्सहस्रिके-: ईश्वरः शतेनाष्टोत्तरेणैव उत्तमं परिकीर्तितम् ।
तद - मध्यमं शास्तदष्टोरकन्यसं हितम् ।
र- दाक्ष ज - महाक्षुत्ये मुक्तिदं परमं शुभम् ।
एकवक्त्रो स्त्रिवक्त्रैश्च चतुर्वक्त्रैश्च पञ्चभिः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



बहुवक्त्रैश्चाप्यकर्तव्यं तस्मान्मिश्रैस्तु वर्जयेत् ।
मुखे मुखं प्रकर्तव्यं मूलं मूलेन योजयेत् ।
धात्रीफलप्रमाणेन ज्येष्ठमेतदुदाहृतम् ।
बदरस्य प्रमाणेन चणकं मध्यमाधमौ ।
122a नवतीं तन्तुना - प्र - कक्षसं पूर्ववच्छुभम् ।
नागपाशान्तु सावित्रं प्रमाण्यं वाथ ग्रन्थनम् ।
प्र... र्वकन्तु मेर्वाख्यं कर्तव्यं तन्न लंघयेत् ।
क्षालयेत्सद्यमन्त्रेण वामदेवेन वर्धयेत् ।
धूपयेद्बहुरूपेण लेपयेत्पुरुषेण तु ।
मन्त्रयेत्पञ्चमेनैव प्रत्येकन्तु शतं शतम् ।
मेरुञ्च पञ्चमेनैव तथाघोरेण मन्त्रयेत् ।
मेरुञ्च पञ्चभिः पूज्य पूर्ववच्च यथा शिवम् ।
सूक्ष्मां कनिष्ठानामिकामध्ये पुष्पं संभृत्य बुद्धिमान् ।
प्रच्छन्नपटमाच्छाद्य मूलमन्त्रमनुस्मरन् ।
तथा चिन्त्यविश्वसारख्ये-:
मूलमन्त्रञ्जपेत्पश्चादक्षमाला समान्वितः ।
वामहस्ते तु कुसुमं निक्षिपेद्दक्षपाणिना ।
दक्षहस्तं पटेन्यस्य जपं कुर्याद्विशेषतः ।
मानसोपांशुभाष्याणां प्रथमञ्चोत्तमोत्तमम् ।
उपांशुर्मध्यमं प्रोक्तं वाचिकं होमकर्मणि ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मानसं मन्त्रजप्ये तु सर्वमन्त्रमुदाहृतम् ।

कालोत्तरे :

अंगुष्ठानामिका चैव नित्यमेव जपेद्बुधः ।
अंगुष्ठानामिका चैव सर्वकाम फलप्रदा ।

तथा वटसहस्रे :

अंगुष्ठानामिका ग्राह्य जपं कुर्यान्तु मानसम् ।
अष्टोत्तरशतेनैव फलं कोटि गुणं भवेत् ।
अक्षराक्षरसन्धानन्नाद्रुतन्न विलंबितम् ।
फलं सहस्र गुणितं प्राप्नुयान्नान्यतं वचः ।
भुक्तये सृष्टिमार्गेण घर्षयेदक्षसूत्रके ।
ऊर्ध्वमार्गेण मुक्त्यर्थं वर्षयेन्तु शनैश्शनैः ।
मेरुन्न लंघयेन्मन्त्री लंघनाद्दोषभाक् भवेत् ।
सहस्रं बहुरूपस्य जप्तव्यन्तेन शुध्यति ।
प्रमादात्पतितं भूमौ जप्तव्यन्तु शतद्वयम् ।
पतने च तथान्यत्र प्रायश्चित्तन्न चेष्यते ।
मेरुहीनाक्षमाला तु कर्तव्या वा प्रयत्नतः ।
न स्यादुल्लंघने दोषो यतो मेरुविवर्जितः ।

तथा । स्वमन्त्रञ्चाक्षसूत्रञ्च गुरोनपि न दर्शयेत् ।
जपकाले तु गोप्तव्या जपमाला च षण्मुख ।
परदृष्टिगता माला यदस्यान्निष्फलो जपः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



एवं यथोक्तञ्चाष्टशतं सपुष्पञ्जप्त्वा तत्पुष्पञ्जपकारि स्वदक्षिणकरतलाद्वामकरतले स्थाप्यास्त्रकवचहृदया-न्युपरि परविन्यस्य हृदयकवचास्त्रैः संपुटीकृत्यास्त्रेण रक्षितं कवचेनावकुण्ठ्य तद्दक्षिणहस्ते गृहीत्वा हृत्प्रदेशे निधाय पूर्णचन्द्रोपमं हृदयञ्च कुरशक्तिस्थं जपं ध्यात्वा सार्द्ध-जलमुद्भवमुद्रया भूमिषु दक्षजानुर्भूत्वा प्रणवहृदय संहितं श्लोक-तय मन्त्रमुच्चार्य जपं कर्म आत्मानञ्च क्रमेण चुलुकोदकेन शिवस्य वरि-दस्वे निवेदयेत्। चिन्त्यविश्वसाराख्ये-:

सव्यजानुं क्षितौ कृत्वा जपं तस्मै निवेदयेत्।
मन्त्रितं हृदयेनैव कवचेनानुवेष्टितम्।
अस्त्रेण रक्षितञ्चैव मुद्रयोद्भवसंज्ञया। इति

आजिते-: चुलुकोदकविधिं वक्ष्ये तच्छृणुष्व जनार्द्दन।
अर्घ्योदकं समादाय दक्षिणे हस्तसंपुटे।
गन्धपुष्पाक्षतोपेतं हृदिन्तं संनिवेश्य च।
पठेन्मन्त्रमिमं मन्त्रितं च्छृणुत्व समाहितः।

ओं हां - गुह्यातिगुह्य गोप्ता त्वं गृहाणास्मत्कृतञ्जपम्।
सिद्धिर्भवति मे येन त्वत्प्रसादात्वयि स्थिते।

ओं हां यत्किंचित् कर्म हे देव सदा सुकृत दुष्कृतम्। तन्मे शिवपदस्थस्य भुङ्क्ष्व क्षपय शंकर।

ओं हां- शिवो दाता शिवो भोक्ता शिवस्सर्वमिदञ्जगत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवो यजति सर्वत्र यःशिवस्सोहमेव तु ।

अस्यार्थः । कृत्यादीनि शुद्धविद्या दीनि तेषां गोप्ता त्वमेव च ।

अतस्सर्वं गोपृत्वा दस्मत्कृतञ्जपन् गृहाण ।

येन यस्मादस्मिञ्जपे त्वयेव स्थिते सति त्वत्प्रसादात् अस्माकं भुक्तिमुक्तिलक्षणसिद्धिर्भवति नान्यथा तस्मात् गृहाणेति । हे देव सुकृतं दुष्कृतं वा यत्किञ्चिन्मे कर्मास्ति शिवपदस्थस्य शिवस्य पदे । अवसाये । शिवोहमिति भावबाध्याये वसाये स्थितस्य पदं व्यवस्यति ताण स्थानलक्ष्मा श्रीवस्तु श्रीवत्समर । तत्कर्म भुङ्क्ष्वमोक्षान्तराय हरणाय सुकृतरूपं पालय दुष्कृतरूपं नाशय । अथमन्त्रान्तरम् । शिवो दाता, बोधयिता देवो धन इत्यत्रज्ञातु मत विवक्षितः । शिवोभोक्ता पालयिता शिवस्सर्वमिदञ्जगत् । ईश इति शेषः । अधितिष्ठतीति वा । यस्तु दीक्षया शिवशुद्धो भूत्वा सर्वत्र देशेष्वधिकरणेषु यजति । शोधयितृत्वादि विशिष्टं परमशिवं पूजयति । स आराधकश्शिवोहमेव । त्वञ्चाराध्य शिव इत्यनेन पूज्यपूजकयो जगन्नाथ तवास्मीति यत्स्वीकारोपदर्शनमिति स्वस्वामिसंबन्ध प्रदर्शनमुपपादयतीति । एवमर्घं समुच्चार्य स्वनाममूलमन्त्रतः ।

लिंगमूले समायोज्य क्षमस्वेति विसर्जयेत् ।

अस्त्रेण वर्मपाभ्यासात् संपुटीकृत्य चार्पयेत् ।

तदुक्तम् कारणे-ः अञ्जलिन्दक्षिणं हस्तं कुञ्चितं चतुरंगुलम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुष्पवारि गृहीत्वा तु पादमूलप्रदापयेत् ।
चुलुकोदकमितिख्यातं पूजान्ते तु प्रजायते ।
त्रिभिश्चुलुकैरिति क्वचित्तदुक्तञ्च ।
दक्षजानुं क्षितौ कृत्वा तज्जपं विनिवेदयेत् ।
शिवेन शिवसव्ये तु गन्धाम्बु चुलुकैस्त्रिभिरिति ।
अत्र त्रिधानञ्जन्मकर्मनात्मना स्थिरत्वार्थमित्यव-
गन्तव्यम् । केवलेन दावा निवेदयेत् । अथावरणस्थानां
ब्रह्मांगानान्तद्दशांशञ्जप्त्वा निवेदयेत् । तदुक्तं कामिके -
मूलाद्दशांशतोंगानां जपः कार्योऽस्मि धीमता ।
तथा चिद्व्यविश्वसादाख्ये -
शिवांगानाञ्जपंश्चापि दशांशं दापयेत्तदा ।
तदनु साध्यमन्त्रपूजकस्तदर्द्धन्तु विज्ञाप्य लब्धानुज्ञश्चैव-
लिंगमध्ये पूजितस्य शिवस्यासनभूतदलवन्तस्य दक्षिणगाम-
दक्षिणमध्येषु निरतिशयगौर्योत्कर्षसंपत्त्यर्थं प्राक्भावे स्त्री-
रूपान् गौर्यादिमन्त्रान्यजेत् । पश्चिमभागे -
सुधाकलशमध्यस्थश्वेतपद्मासनस्थितः ।
चतुर्भुजस्त्रिणेतश्च जटाखण्डेन्दुमण्डितः ।
व्याघ्रचर्मपरीधानो नागेन्द्रोरो विभूषणः ।
त्रिशूलाश्चाभयञ्चोर्ध्वे सुधाकलशमध्ययोः ।
दधानश्चषट्भुजञ्चेत् स त्रिशूलश्चाक्षमालया:

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कपालांगुलिकां वामे योगमुद्रा करद्वये ।

अनेन सदृशो मन्त्रो नास्तीति प्राणरक्षणे ।

न भविष्यति भूतञ्च सत्यमेतदुदाहृतम् ।

इति ध्यानपूर्वकं पुंरूपान्मृत्युञ्जयादीन्यजेत् । मध्ये

स्त्रीपुंरूपान् । उमार्द्धं वामभागन्तु हरार्धं दक्षिणं वपुः ।

स जटामकुटं दक्षं शश्यर्द्धांकित मूर्धजाः ।

करण्डमकुटं वाममलकेन समान्वितः ।

ललाटन्दक्षिणे भागे नयनार्धेन संयुतम् ।

पत्रन्तु वामकर्णे स्याद्वालिकेनापि संयुतम् ।

नक्रकुण्डलकं सव्ये तं विनावाथ कल्पयेत् ।

वामभागस्तनूपेतं चित्रवस्त्र परिच्छदम् ।

व्याघ्राजिनांबरं सव्यं पादं कु — मिष्यते ।

सुस्थितं वामचरणं नूपुरेणाप्यलंकृतम् ।

इति ध्यानपूर्वं उमामहेश्वरार्धनारीश्वरादि मन्त्रान्यजेत् ।

तत्र साध्यमन्त्र देवानां प्रणवेनासनमूर्तिन्दत्वा हृत्संपुटितैः

स्वस्वमन्त्रैरावाह्य सकलीकृत्य पाद्यादिभिस्संपूज्य तन्मन्त्रं

सहस्रं शतं वाष्टोत्तरं यथा शक्ति जपत्वा काम्यमन्त्रोपरक्ता-

य शिवाय समर्पयेत् । षडावरणपूजान्ते साध्यमन्त्रानभ्यराध्य

पश्चाज्जपान्ते स्साध्यमन्त्रजपं कृत्वा पूर्वोक्तवन्निवेदयेत् ।

तदुक्तं सर्वज्ञानोत्तरे — : तथाभ्यर्च्य महेशानं लिंगाग्रे स्थण्डिलेपि वा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदेकमन्त्रा मन्त्रास्तु ह्येवास्सर्वांग संयुताः।

तथा किरणे-:

दत्वाथा वरणानिष्ट्वा साध्यानां पूजयेत्ततः।
तदंगैरंकितं कृत्वा प्रणवे कमलासने।
शिवस्य दक्षिणे भागे विभवेन तु पूजयेत्।

तथा मृगेन्द्रे-:

अथाभ्यर्च्य महेशानं साध्यमन्त्रं यजेच्छ्रुतः।
सर्वथा सर्वदागुप्तं साधको वक्ष्यमाणवत्।
याम्याब्ज पत्रे प्राक्पश्चात् भागयोस्तन्नविभ्रमम्।
अघोरलोचनज्ज्योती - र्मध्ये नान्यत्र कुत्रचित्।
प्रयाति भस्मसान्मध्ये बहिर्यस्माद्विलुप्यते।

अस्यार्थः। शिवासनपद्ममध्ये साध्यमन्त्रं यदि पूजयेत्तदा भस्मी भवति तद्बहिर्यदि पूजयेत्तदा विनश्यति। तस्मात्तत्पद्म दक्षिण दल प्राक् पश्चिममध्येष्वेव साध्यमन्त्रान् पूजयेदित्यर्थः। किरणे- मुक्तामणिमयैर्माला रुद्राक्षैर्वा सिद्धिदा।
शंखस्फटिकपद्माक्षशक्राक्षैर्मध्य सिद्धिदा।
रीतिका त्रपुसी साध्ये ह्यधमा सिद्धिरिष्यते।

रीतिका। शाकुगततमा। पुत्रजीव कमला स्यात् सर्वकामार्थसाधनी।
सत्यइन्मन्त्रजप्तान्तामष्टोत्तरशतान्विताम्।
तदर्द्धं वा प्रकुर्वीत तस्याप्यर्द्धमथापि वा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्यमानामिकांगुष्ठ कर्षणात्सिद्धिरुत्तमा ।
अंगुष्ठ तर्जनी योगान्मध्यमासिद्धिरुच्यते ।
कनिष्ठांगुलियोगेन सिद्धिरुक्ता कनीयसी ।
त्रिविधस्सच विज्ञेयस्सिद्धित्रय समागतः ।
उपांशुर्मनसो भाव्यस्ततोपांशु प्रशस्यते ।

सर्वज्ञानोत्तरे–:

विस्पष्टस्तामसः प्रोक्ता राजस्सा पांशुरुच्यते ।
123a मनसा सात्विकं विद्याज्जप्यविदां वर ।
तामसं क्रूरकर्मणां वश्यादिषु–च राजसम् ।
सात्विकं दिव्यसिद्धीनां जपं कुर्याद्विचक्षणम् ।

पौष्करे–: उत्तमं मासामन्त्र म – न्व – रूपांशुना ।
अधमानपि मन्त्रांस्तु भाव्येणेह जपेद्बुधः ।

सर्वज्ञानोत्तरे–:

दिवा तु तामसं कुर्याज्जपं रात्रौ तु राजसम् ।
सन्ध्यायां सात्विकं प्रोक्तो जपस्सर्वार्थसाधकम् ।

सर्वथा साध्यम्मन्त्र जपकाले तत्तत्साध्यमन्त्र समानधर्मतात्मनश्चिन्तयञ्जपफलमचिरात् प्राप्नोति न तु श गवाहमित्यैक्यभावना तदानीं पूज्यपूजकभावस्य फलदातृसंप्रदानभेदस्य चासंभवाद द्वैत पक्षान्त्यक्त्वा भावना विशेषेण भावयेत् । तदुक्तं सर्वज्ञानोत्तरे–:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अनन्यमानसो योगी मन्त्रे तं मयतां गतः।
अचिरात्सिद्धिमाप्नोति अद्वैतं द्वैतमाश्रितम्॥

कथं पुनस्साधको-चरितेषु भूताकाशवायुप्रभवेष्वशुद्धेषु वर्णेषु शुद्धानां मन्त्राणां वाच्यत्वेन सान्निध्यं न तु साक्षात्। किन्तु तेष्वंगारकस्थानीयेषु अभिव्यक्तात् आग्निस्थानीयाः शिवकृतशुद्धवर्णास्तेषां वाचकत्वेन सांनिधि हेतवो भवन्तीत्यर्थः। काम्यमन्त्रजापको मन्त्रारंभकाले गुरुणा सिद्धसाध्यादि दृष्ट्वा देवस्साधक शिष्यस्यानुकूल्यं नाम नक्षत्र ज्ञात्वा गुरु -- त्वुपदेशः कर्तव्यः तदुक्तं कामिके-:

यस्यानुकूलो मन्त्रोप स साधकस्य स सिद्धिदः।
सिद्धस्साध्य सु सिद्धारि साधकाख्या क्रमाक्षरः।
डवमन्यत साध्यादौ चतुर्थाकल्पना मता
जपादिष्टप्रदस्सिद्धस्साध्योऽर्चा जपतर्पणैः।
सु सिद्धः पाठमात्रेण साधकारिष्टदो रिपुः।
प्रचुरश्शस्तवर्णस्तु मन्त्रो नाशकरस्मृतः।
शिष्योपि शीलसंपन्नः पुत्रो वा शिव भक्तिमान्।
तस्य देयोपि गुरुणा सहस्रान्तज्जपेद्गुरुः।
प्राप्तेषु तात्छिलाप्राप्तं ग्रहीतं गूढरूपतः।
प्रकारान्तरतः प्राप्तं जपेद्यदि विनाशकृत्।
जपार्चादिक्रिया सिद्धं मन्त्रैर्यस्साधकोन्तमः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्याल्पसाधनादन्वे मन्त्रास्सर्वत्र सिद्धिदाः।
एवं बीजजपः कार्यस्तद्द्वित्रिगुण संख्यया।
मालात्मकस्य मन्त्रस्य जपसंख्या विधीयते।
अनुक्तसंख्या मन्त्रस्य शतं साष्टसहस्रकम्।
जपाद्दशांश - - हो मस्त्वभिषेक विधौ मतः।
मूलाद्दशांशतोंगानां अर्चहोमजपादिकम्।
दशाक्षराधिकामन्त्रा स्तन्यूना बीजसंज्ञिका।
अकाराद्यक्षराणिस्थ यथा क्रमेण लिखेत्।
इन्द्वग्निरुद्रसह - वेदमार्ताण्डदिक् षट्गजबोब्बोषु।
मनक्षरास्सप्ततिथिस्थ विश्व कोष्ठप्रदेवो स्वयमेव लिख्यः।
इत्थं तत्तत्कोष्ठ स्वक्षराणि विन्यस्य। मालामन्त्रास्थ
विख्याता हुं फठ्त्यार्णा धिकास्थये। इति अथ रणिरण
भावक्रमः। नामाद्यक्षर मारभ्य यावन्मन्त्रादि वर्णकम्।
द्विषट् द्विपञ्चैक चतुर्नेति मन्त्राय दीयते।
एकत्व द्वे इति ज्ञेयं साधकाय प्रतीयते।
- - यद्येय मन्त्रोपाधिवशादधिष्ठाता शिवोपि
तावद्भेदे भिन्न उपचारेण भवति। तथा सर्वज्ञानोत्तरे-:
प्राणिनाश्चिन्तभेदन्तु मन्त्रभेदैः पराशिवः।
संस्थिता तु ग्रहार्थाय साक्षीभूतस्तु कर्मणाम्।
स्थानं कर्मच भावञ्च देवता व्याप्तिमेव च।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वर्तते वीक्ष्य विश्वात्मा फलक्षेत्रविभक्तिषु । इति।

तदनु विद्यापीठं पूजयेत्। तथा देवस्य पश्चिमभागे विद्यापीठा-न्ततो यजेत्। कामिके तु।

वायव्ये दक्षिणे वापि ज्ञानकोशं प्रकल्पयेत्।
कामिकादि शिवज्ञानं स्थानं चाम्याम शोभितम्।

कामिके-- त्रिहस्तन्तु समारभ्य नवहस्तं - - न्तकम्।
विद्याशाला विशाला स्यात् प्रासादो वाथमण्डपम्।
डक्क शालादिभेदेन शालावालक्षणान्वितः।
विद्यापीठस्य विस्तारं सप्तांगुलविशालकम्।
विद्यांगुल विवृद्ध्यान्तु स्यदेक - श दंगुलैः।
तेनायामस्समाख्यात पञ्चाशत्करजान्तकः।
चतुरश्रसमो वास्या दायताश्रस्तु वा भवेत्।
अन्यादा - द्युक्त मार्गेण सकलन्बयेत्।

शिवधर्मोत्तरे-: विद्या सिंहासन श्रीमान्नागमन्तादि निर्मितम्।
सुवर्णरत्नरचितं दुकूलास्तरणान्वितम्।
दण्डासनं वा श्रीमन्तं हेम रत्नोपशोभितम्।
नागेन्द्रदन्तरचितं रक्तचन्दनदारुजम्।
स्थाप्य पुष्पगृहस्यान्तर्गन्तपुष्पैः प्रपूजयेत्।

ओं हां कामिकादि शिवज्ञानावतारकेभ्यो आसनन्नम इति आसनं नम इति संपूज्य पश्चात्तदुपरि विद्याकोशमन्त-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



संस्थापयेत् । तदुक्तं शिवधर्मोत्तरे -:

यत्सौवर्णं सुसंपूर्णं सर्वरत्नोपशोभितम् ।
1236 सापिधानं समग्रपूर्णं विद्याकोशसमाश्रयम् ।
कारयेद्वाथ रौप्येण ताम्रेण चतुरश्रकम् ।
कांस्यारकूटलोहैर्वा शङ्खादि निर्मितम् ।
सत्कषायानुरक्तेन चर्मणाभिनवेन च ।
अन्तर्बहिश्चमये विद्धावाससहन्वकम् ।
सुद्धाकारकोपेतन्दृढ सूत्रनिबन्धनम् ।
कुर्यात्तालकसंयुक्तं विद्यारत्नकरण्डकम् ।
एवं वित्तानुसारेण कारयित्वानुरूपतः ।
प्रक्षाल्य गन्धतोयेन विद्याकोशगृहं परम् ।
कृत्वा वस्त्र - - न्दव्यमन्त्तः पुष्पग्रहासिकम् ।
विद्या सिंहासने तत्र स्थापयेद्विधिवद्बुधः ।
तस्मिन् पुण्याहशब्देन विद्याकोशगृहं न्यसेत् ।
ततस्संपूजयेद्विद्वान् महाविभवविस्तरैः ।

अत्र विद्यापीठपूजा द्विविधा । अपरोक्षः परोक्षा चेति । तत्र प्रत्यक्षलिखितकामिकादितन्त्रविषया पूजा परोक्षा । मण्डलपद्मपीठादि विषयापरोक्षा । प्रथमायामपि सर्वसंहिता वा स्वसं - - पूर्व - या । तथा ज्ञानरत्नावल्याम् -:

विद्यापीठं कोटिमात्रं पूजयेद्वा स्वसंहिताम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गन्धपुष्पादि नैवेद्य माल्याभि इशिववत्सुधीः ।
विद्यापीठेऽपि मन्त्रैवमेकोच्चारेण पूजयेत् ।
स्रग्गन्धधूपनैवेद्यैः समासकांचिरीश्वरम् ।
शिवभेदे शिवः पूज्यो रुद्रभेदे स एव हि ।

यद्वा । समुदितरूपेण ओं हां सर्वेभ्यो शिवज्ञानेभ्यो नमः इति संपूज्य -

ओं सर्वज्ञानप्रदं शंभुं सर्वज्ञानविघातकम् ।
कायेन मनसा वाचा विद्यापीठाश्रयं भज इति ।

स्तुत्वा क्षमस्वेति ब्रूयात् । चतुरश्रमण्डलपद्मे तु कर्णिकायां ओं हां शिवायनमः । ओं हां वागीशाय नम इति यजेत् । तदावृति पूर्वादि दशदलेषु ओं हां कामिकाय नम इति पूर्वे । वह्न्यादि नवदलेषु योगजादि सुप्रभेदान्तानि शिवभेदागमज्ञानानि ज्ञानार्थी पूजयेत् । शिवनाधिकरण निरपेक्षेण साक्षात्भगवता शिवभेदानामुच्चारितत्वात् अनादिरूपादि रुद्राधिकरणेन शिवेन विजयादीनान्तन्त्राणामुत्पत्तेः । अता तदावार काष्ठा दशपद्मदलेषु पूर्वादि क्रमेण रुद्रभेदान्तानि विजयादि वातुलान्तान्यष्टादश तन्त्राणि तत्तन्मन्त्रेण पूजयेत् । तथा वातुले -:

कृत्वा दशदलं पद्मं मण्डले चतुरश्रके ।
मध्ये शिवा - गीशमज्ञानार्थं पूर्वक्रमात् ।
दलेषु कामिकादीनि शिवज्ञानानि पूजयेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा वातुले-: प्रागवदष्टादशदले पद्मे पूर्वादितः क्रमात्।

रुद्रज्ञानानि तेष्वेव गुरुयागे प्रपूजयेदिति।

तदनु- गुरुं पूजयेत् तदुक्तं शिवधर्मोत्तरे-:

संपूज्यैवं शिवज्ञानं गुरुं संपूजयेत्ततः।

शिववत्पूजयेद्भक्त्या शिवज्ञानप्रकाशकम्। इति

अत्र गुरुपूजा द्विविधा। परोक्षा भावना चेति। गुरुं सपीठस्थं गत्वा पादकमले प्रक्षाल्य शिवगन्धादिभिरभ्यर्च्य पुष्पाञ्जलित्रयेणाभ्यर्च्य भक्त्या साष्टांगेन त्रिधा प्रणम्योत्थाय कृताञ्जलिपुटो भूत्वा क्षमस्वेति वदेत्। तथा

वेदाचार्यमासन्नं दूरस्थं ध्यानयोगतः।

परोक्षस्य च पीठस्थे पादुके सम्यगर्चयेत्।

षट्सहस्रे-

अथ संनिहितश्चाथ पूर्ववत् पूजयेद्गुरुम्।

शिवधर्मोत्तरे-: त्रिधा प्रदक्षिणं कृत्वा दण्डवत्प्रणवे-तौ।

विज्ञापयेत्समुत्थाय जानुभ्यान्धरणींगतः।

कृताञ्जलिपुटो भूत्वा प्रणिपत्य शिवं पुनः।

मृगेन्द्रे-: न भुञ्जानं समाधिस्थं क्रममाणं क्रियायतम्।

स्थितं गुरुसमीपे वा मतिमानभिवादयेत्।

गच्छन्तं प्रपृष्ठतो यायाद्विश्रान्तमनु संविशेत्।

तद्वशो नानुयुञ्जीत शयानन्न प्रबोधयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोत्तरे-: ईश्वरः

लभ्यते शाश्वतं ज्ञानं गुरुप्रसादेन षण्मुख ।
देवालये गुरु - - तिष्ठते वैवडानन ।
पूर्वं गुरुं वन्दयित्वा पश्चाद्देवं हि वन्दयेत ।
शिवलोपे निष्कृतिश्चास्ति गुरुलोपेननिष्कृतिः ।

षट्सहस्रिकायाम् -

गुरुपुत्रं यथायोग्यं दत्वान्यं यदि कल्पयेत ।
निष्फला तस्य वैदीक्षा महाकल्पं व्रजत्यथ ।

चिन्त्यविश्वसादाख्ये -

ज्ञानहीनं गुरुं प्राप्य कुतो मुक्तिमवाप्यति ।
तस्मात्सर्वं प्रयत्नेन संश्रयेत ज्ञानपारगम् ।
मधुलुब्धो यथा भृंगः पुष्पात्पुष्पं वानान्तरे ।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ।
तल्लब्धा विसृजेच्छिष्यो त्यधः पतति निश्चयः ।

षट्सहस्रिके -:

शिववच्च गुरुः पूज्यः पितृवद्देशिकः पुमान् पुनः ।
साधकास्तद्वदेवाहुः पुत्रकाम्श्च भ्रातृवत्सदा ।
मित्रवत्समयस्थाश्च दृश्यश्च शिवमिच्छताम् ।

अत्र दीक्षा कर्ता गुरुः व्याख्याता देशिक इति मन्तव्यः ।

ये कुर्वन्ति गुरोर्निन्दां समयी पुत्रकादिषु ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



१२५a तस्मात्स्थान व्रजेद्दूर सद्यो जातवातं स्मरेत ।
यो महाशैव वाविष्टे गुरुणा शपथं वदेत ।
ददाति चान्यो दुष्टात्मा तावुभौ नरकं व्रजेत ।
प्रणम्यपुद्व प- तेन प्रयत्नात पूजयेद्गुरुम ।
गो सहस्र फलं प्राप्य गुरोत्पादाभिवन्दनात ।
अथान्यानपि तपोधनान्सुविनीतान्गुर्वसन्निधौ ।
भक्त्या यथोचितं प्रणामं विदध्यात । तथा मतंगे-
यथानुक्रम संस्कारो ज्येष्ठानान्तु परस्परम ।
समयी समयस्थस्य ज्येष्ठा यः पूर्वदीक्षितः ।
पुत्रकस्यापि साधकस्साधकस्य च ।
गुरोरपि गुरुः प्रोक्ता समयोक्ति निदर्शनात ।
दीक्षितस्समयस्थस्य दीक्षितस्यापि साधकः ।
साधकस्याप्यथाचार्यो ज्येष्ठस्संपरिकीर्तितः ।
वन्दये दात्मन श्रेष्ठान गुरणात गणानपि ।
अथान्यानपि संशुध्याश्चैवान्यन्दे तपोधनान ।
लौकिकादिषु मार्गेषु चतुर्ष्वपि समाश्रितान ।
अपि विद्यातपोज्येष्ठान व्रतस्थेनापि वादयेत ।
संस्कारात्याधिको श्रेष्ठो व्रतीनां विवक्षासने ।
तु जाति वयो वृद्धा विद्या ज्येष्ठत्व कारणम ।
विद्यमाने विबौ ज्येष्ठे अभिषिक्ते कनीयसा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुरोश्च गुरुणा वापि कैश्चित्पश्चात्प्रतीक्षितैः।
अन्योन्य गौरवन्तस्तु कर्त्तव्यं वन्दनं विना।
तथा - दीक्षाभिषेक ज्येष्ठेन कनिष्ठस्य कदाचन।
तपो विद्याधिकस्यापि कर्तव्य · · · दनम्।
भ्रातृपुत्रो यथा वृद्धो यवीयान्गुरुपुत्रकः।
प्रत्युत्थानं गुरुस्तस्य नाभिवादनमर्हति।
अथ भावनाप्रकारः ॥

देवस्याग्नेय दिग्भागे यथासंभव मा · कमलं कृत्वा तन्मध्ये बद्धुक्तं परिकल्प्य तत्र गुरुमुक्तिमन्त्रेण विन्यस्य तस्यां शिवमावाद्यांगानि न्यस्य पाद्यादिकन्दत्वा गन्धापुष्पादिभिः शिवपदमभ्यर्च्य ध्यात्वा पाशान्विमोच्य कृपया निखिलानादि · · मां शरीरनिधने परिमुक्ति भाजम्। चक्रे समस्त शिवशास्त्र विबोध हेतु नित्यन्तमेव गुरु नाथमहं प्रपद्ये। इति स्तोत्रादिभिस्तोषयेत्। तथा देवस्याग्नेयदिग्भागे योगपीठन्ततो यजेत्। तत्रासनन्तु संकल्प्य मूर्तस्योपरि विन्यसेत्। शिवमाहयेत्तत्र स ब्रह्मांग समन्वितम्। पुष्पगन्धादिभिः पूज्य हृन्मन्त्रेण प्रयत्नतः। विधानमेतत्कथितं गुरौ शिववदे गते।
आज्ञां गृहीत्वा यत्नेन ततः कर्मसमारभेत्।
तथा किरणे-: प्रागुक्तं योगपीठन्तु कृत्वा प्रागर्चितं गुरुम्।
चतुर्थ्यन्तन्न्यसे मूर्ति सकलीकृत्य पूर्ववत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवमावाह्य तत्स्थाने न्यसेदङ्गानि पूर्ववत् ।
गन्धपुष्पादिभिः पूज्य हृदा गुरुवरं स्वकेति ।

शिवधर्मोत्तरे -:

शिवां संपूज्य विधिवत्तद्विद्यां पूजयेत्ततः ।
~~विधानमेत~~ गुरुञ्च शिवभक्त्या तुल्यमेतत्त्रयं यतः ।
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणाञ्च पूजायां सदृशः फलम् ।

अत्राचार्यो प्रसंगेन मठादौ स्थापित शिवभक्त पूजाविधान-मुच्यते । कामिके -:

शिवभक्तिसमोपेता जीवन्तो वा मृतो स्तु वा ।
तेषां प्रतिकृतिं कृत्वा प्रतिष्ठाप्य समर्चयेत् ।

तथा तत्रैव -

ततः प्रकृति मद्भक्तः पूजयेत्प्रत्यहं नरः ।
.. श्यकन्त यार्शौचं स्नानं सन्ध्याभिवन्दनम् ।
कृत्वा प्रविश्य हर्म्यन्तु परमात्मानमव्ययम् ।
वास्तुमध्ये समभ्यर्च्य भूतशुद्धिं विधाय च ।
कृतमन्त्र तनुः पश्चात् स्थान शुद्धिं विधाय च ।
परिकल्प्य विशेषार्घ्यं कुसुमाक्षत तोय युक् ।
प्रोक्षयेद्द्रव्यजालन्तु प्रागुक्तं विधिना नरः ।
प्रणवाद्यं पठेन्मन्त्रन्नमोन्तं मन्त्र शुद्धये ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्त्रतोयेन संस्थाप्य हृदा वा - वस्तुद्वये।
षडुत्थमासनं कृत्वा पूर्वोक्त विधिना ततः।
आधाराख्यमनन्तञ्च धर्माद्यानञ्चतुष्टयम्।
संकल्पमानुपं पीठं प्रणवेन प्रकल्पयेत्।
विद्यांग - - वा सस्था द्यारव्या द्वर्णस्य - नु -।
आवाहनन्ततः कृत्वा हृदयादिन्तदान्यसेत्।
पाद्याचमनञ्चार्घ्यं हृदयेन निवेदयेत्।
संस्नाप्य गन्धतोयेन पञ्चगव्यादिभि - वा।
सम्मृज्य वाससा वस्त्रं गन्धपुष्पञ्च धूपकम्।
नि - - ना नालोहे स्नानं पर्वणि पर्वणि।
दीपेन सहितन्दद्यान्नैवेद्यं सोपदंशकम्।
ताम्बूलञ्च त्रिसन्ध्यासु दद्यात् - - ञ्चयेतु वा।
दीपान्तं वा निवेद्यान्तं यजेत्त्वच्छक्त्यनुरूपतः।
शिवं पुष्पाञ्जलिं तयेण अभ्यर्च्य स्तोत्रमिदं विज्ञापयेत्।
श्रीमद्रौरवे -:

समन्त पुवान्संस्पृश्य पुष्पपूर्णाञ्जलाञ्जलीन्।
हस्ताभ्यागत रोमाञ्च प्राह वाक्यमिदं कुरु।
सुराधिपन्नमस्कृत्य शशांककृतशेखरम्।
कपालमालिनन्देवं प्रणतोऽस्मि सदाशिवम्।
कालेश्वरं महाकाल कालञ्जरनिवासिनम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालकृत्कालचेन्तारं प्रणतोस्मि सदाशिवम्।

१२म७ सकृत्सर्वस्य चेन्तारं सर्वज्ञमपराजितम्।

सर्वभूतात्मभूतस्थं प्रणतोस्मि सदाशिवम्।

मनो बुद्धिरहंकार योसृजेत्सर्वभूतानि ब्रह्माद्यींश्च पुरासुरान्।

तमहं सर्वकर्तारं प्रणतोस्मि सदाशिवम्।

धर्माधर्ममयन्देवं सुखदुःख फलप्रदम्।

बन्धमोक्षप्रदातारं प्रणतोस्मि सदाशिवम्।

मनो बुद्धिरहंकारतन्मात्रेन्द्रियगोचरम्।

प्रधानपुरुषेशान प्रणतोस्मि सदाशिवम्।

य यान्ति महात्मानो मुनयस्संशित व्रताः।

तमोंकारपरं सूक्ष्मं प्रणतोस्मि सदाशिवम्।

भक्त्या संपूज्य देवेशं यः पठेत्पयग्रतस्स्तवम्।

स्तोत्रमन्त्रमसौ याति शान्तं तत्परमं पदम्।

इत्यादिभिः परमशिवं स्तुत्वा प्रदक्षिणं साष्टांग प्रमाणं विदध्यात्। तदुक्तं कामिके-

स्तुत्वाऽनेकविधैस्तोत्रैः प्रणिपत्य पुनः पुनः।

पूजकः पूजान्ते प्रदक्षिणं न करोति चेत्तत्फलमपि न लभते तथोक्तम्- पूजां कृत्वापि यश्शंभोर्नकरोति प्रदक्षिणम्।

सा पूजा निष्फला तस्यास च पूजा विसंकुलः।

भक्त्या करोति यस्सम्यक् के न्तु प्रदक्षिणम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूजा सर्वा कृता तेन सम्यक् जप पूजकः। इति ततोऽष्टपुष्पिकया संपूज्य विशेषार्घ्यं दत्वा सद्यादिक्रमेण पञ्च शिरस्सु शिवमभ्यर्च्य शिवस्य तिरोभावार्थं निरोधार्घ्येणाधो मुखहस्तेन स्वाहान्तमूलेन पूर्ववदूर्ध्वमुखो भवेति प्रार्थ्य पराङ्मुखार्घ्यं दत्वा अस्त्रादि हृदयान्तान्यंगानि संपूज्य पूजा प्रातिलोम्येनार्घ्यं दद्यात्। यद्वा ओं हां हौं शिवाय सांगाय पराङ्मुखार्घ्यं स्वाहेति - र्घ्यं दद्यात्। अंशुमति

लयांगकयजनं कृत्वा पराङ्मुखार्घ्यं दद्येत् बुधः।
सद्यादीशान्तमभ्यर्च्य व्युत्क्रमेणैव योजयेत्।
सद्यो वाममघोरश्च पुरुषेशानकं क्रमात्।
अस्त्रादि हृदयान्तञ्च अंगान्यंशे तु योजयेत्।
चतुर्दिक्षु वस्त्रमभ्यर्च्य सोमादीन्द्रान्तमेव च।
नेत्रमग्रे समभ्यर्च्य कवचं वायुदेशके।
अग्नेय्यां हृदयश्चैव अर्चयेत्तु लयांगकम्।

तथा कामिके-: पराङ्मुखान्त तच्चार्घ्यं सद्योजात शिवावधि।
अस्त्रा हृदय पर्यन्तं गन्धधूपस्त्रगादिभिः।

सर्वज्ञानोत्तरे-:

ऊर्ध्ववक्त्रे तु दातव्यं सम्मुखञ्च पराङ्मुखम्।
संस्थितस्य स देवस्य सम्मुखं परिकल्पयेत्।
विसर्जयेत्तु गांगागे च देयमर्घ्यं पराङ्मुखम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रुद्रा इत्यैः किञ्चिदस्मिन्विशेषोऽस्ति ऊर्ध्वाननस्य
षण्मुख। मूलं सञ्चिन्त्य तद्वक्त्रं पराङ्मुखमिति स्मृतम्।
पूजास्तवे- अङ्गुष्ठ तत्त्वौघ बहिष्क्रियार्थं पराङ्मुखा इयं परमेश्वरस्य।
स्वस्मिन्नवस्थाकरणं विसर्गः कुर्वन् सदैवं परमभ्युपैति।
आवरणदेवेभ्यः काम्यमन्त्रेभ्यो दद्यात्।
हुं फडस्त्रेण करद्वयांगुष्ठ तर्जन्याग्राभ्यामूर्ध्वं पुष्पं निःक्षिपेत्।
नाराचमुद्रयांगान्युत्थाप्य संहारिण्या संहृत्य ओं गं हं हां
शिवमूर्तये नम इत्यंगुष्ठानामिकासहीत पुष्पद्वयादि -- दुवा
शिवस्य हृदयादि स्थानेषु संयोज्यावरण देवानाञ्च मूर्तौ लयं
विभाव्य काम्यमन्त्रान् स्वाध्यायपर्यो संयोज्य मूर्तिमन्त्रेण
सर्वान् मन्त्रमूर्तौ संयोजयेत्। यद्वा- सर्वमन्त्राणां मूलमन्त्र
लयं मूलमन्त्रस्य बिन्दौ बिन्दोर्नादे नादस्य ज्ञानशक्तौ
तस्याः परे लयं भावयेत्। अंशुमति
दक्षिणे मणिबन्धञ्च वामहस्तन्तमूर्ध्वतः।
मध्यमादि त्रयं गृह्य तलमध्ये तु योजयेत्।
अंगुष्ठ तर्जनी युक्तं पुष्पत्रयं विसर्जयेत्।
तत्पुष्पं वर्जयित्वा तु निरोधेन तु मुद्रया।
एवं विसर्जनी मुद्रा शिरस्यञ्जलिमाचरेत्।
सुप्रभेदे- कृत्वाञ्जलिं कराभ्यान्तु अंगुष्ठानामिकाग्रतः।
प्रसारयेत्ततश्शेषं मुद्रेयं दिव्यरूपिणी।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कामिके-: संहारमुद्रयास्त्रेण देवानावरण स्थितान् ।
उत्थाप्य मूर्तिमन्त्रेण योजयेन्मूर्ति संगतान् ।
आवरणार्चनदेवानां लिंगेनैव तु योजयेत् ।
आसनार्चनमन्त्राणि पीठे नैव तु योजयेत् ।

कालोत्तरे-: विद्युद्वद्द्युतिथितान्ध्यात्वा स्वस्वस्थाने लयंगतान् ।
लयस्थाने गतामन्त्रान्मूलमन्त्रे लयंगतान् ।
मूलमन्त्रं ततो ध्यायेत् स्फुरद्बिन्दौ लयं गतम् ।
बिन्दोर्देवि लयो नादे नादो विज्ञाव शक्तित: ।
ज्ञानशक्तिः परे लीना यो व्योम्नि व्यवस्थित: ।
तस्मात्प्रजायते मन्त्रस्तत्रैव प्रविलीयते ।

तदनु- मूलेन शिव मभ्यर्च्यार्घ्यं दत्वास्त्रेण संरक्ष्य कवचेना-
वकुण्ठ्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रां प्रदर्श्य दासोऽहमिति
मां मत्वा क्षन्तव्यं भक्तवत्सल । स्वामिन् क्षुद्रेण दासेन मली-
125a मसाधिया मया । कदर्थितोसि यद्भक्तिलेवात्प्रीत: क्षमस्व न: ।
इति विज्ञापयेत् । इदं सापेक्ष विसर्जनं चललिंगे भवति ।
स्थण्डिलादौ मूर्तीकरणानन्तरं हृदयेन पूरकसंहारिण्या हृत्पुण्ड-
रीकमध्यस्थं ज्योतिर्लिंगे शक्त्यंशे नियोजयेत् । इदमनपेक्ष
विसर्जनं उभयत्रवानपेक्षविसर्जनं कार्यं तथा कामिके-:

चललिंगे तु सापेक्षो नपेक्ष स्थण्डिलादिषु ।
सर्वत्रानपेक्षस्तु कृत्यहं विहितो यत: ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सन्ताने –: करौ संश्लिष्य देवेशि अधोमुखन्तथैव च ।

अं – बु तलमध्यस्थांगुष्ठवूर्ध्वं कृत्वा तलौ तथा ।

उद्वासनमिति प्रोक्तं सर्वकामार्थ साधनी ।

तदुद्वासनञ्च त्रिविधम् । निरालंबं सालंबम् संक्रमञ्चेति

तथा स्थण्डिलादि स्वरूपेण पूजान्ते यद्विसर्जनम् ।

– निरालंबनो द्वासं बिंबादहरहः कृतः ।

सालम्बस्थं समादिष्टेन हस्पृष्टि-चलादिभिः ।

हेतुभिरशक्तेरन्यत्र संवेशं संक्रमं विदुः ।

तत्र स्वगुरुविद्यापीठसप्तगुरून्महालक्ष्मीगणपतिं द्वारपालकञ्चार्चयित्वा तेषां पराङ्मुखन्त्वा स्वस्वमुद्रेण संहारमुद्रयात्मनि विसृजेत् । तथा शम्भुनाथपद्धत्याम् ।

सामान्यमस्त्रमाच्छाद्य पेटकस्य पार्श्वस्तेण निवेशयेत् ।

तथांशुमति –

हस्तप्रक्षालनं कृत्वा अस्त्रमन्त्रमनुस्मरन् ।

प्रत्येकं वस्त्रमादाय पूर्ववैव तु विन्यसेत् ।

गणेश्वरादिबेराणां वस्त्रेणैव पिधानकम् ।

पेटकस्यैव पार्श्वे तु विन्यसेदस्त्रमन्ततः ।

तथा सूक्ष्मे च –

स पूर्वं वस्त्रमाच्छाद्य, बेराणान्तु पृथक्पृथक् ।

कारणे तु – रक्तवस्त्रेश्चकलादित्वे तानि कृष्णवस्त्रकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चित्तवस्त्रान्तथा चैव बाह्य दृष्टांशुकन्तथा।
आत्मार्थे बेरयुक्तश्चेत् सृष्टिश्चैव न दोष कृत्।
नदीं बेरमथात्मार्थं लंघयिन्युडुपादिना।
पञ्चगव्याभिषिच्याथ यजेत्पश्चात्क्रमेण तु।
समुद्रलंघनं चेद्धि बेरं बुद्धिमथा चरेत्।
स्नपनं शान्ति होमञ्च कृत्वा सम्यक् यजेद्बुध इति

शिवमन्त्रं समुच्चार्य पद्मपीठाल्लिंगमादाय तत्तत्कालो-
चित वस्त्रेण संवेष्ट्य पेटकमध्ये विन्यस्य भीमरुद्रं स्मर-
न्नृक्षां विधाय्य विधानं कुर्यात्। तथांशुमति -

शिवमन्त्रमनुस्मृत्य लिंगं संग्राह्य देशिकः।
चित्तवस्त्रेण संवेष्ट्य पेटकामध्यमे न्यसेत्।
अपिधानन्तु संयोज्य भीमरुद्रं स्मरेत्ततः।

तथा सूक्ष्मे--

पूर्ववत्सदनं कृत्वा मूललिंगादि संग्रहेत्।

प्रयाणकालश्चेन्मूर्ध्नादिस्थानेषु लिंगादिकं सहाधारेण धृत्वा यायात्। सूक्ष्मे -

शिरः कण्ठे च कक्षौ कोर्परौ धारयेच्छिवम्।

ततश्चण्डपूजां कुर्यात्। अत्र क्रमः। देवस्येशानदिग्भागे गोमयेन मण्डलं कृत्वा तस्मिंश्च - मन्त्रेण टंकाविन्दुचन्द्रं वा लिखित्वा पद्मत्थासनं संकल्प्य ओं चण्डासनाय हुं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नम इति आसनं कल्प्य तदुपरि ओं चण्डमूर्तये हुं फण्णम
इति मूर्तिं विन्यस्य -

नीलाञ्जनसमच्छाया च्चतुर्वक्त्रार्कलोचनाम ।
सर्पोपवीतकेयूरां मुखेत्थोग्रन्नलार्चितम ।
ज्वलज्जडार्धं चन्द्रा इया मतिभीमंच्चतुर्भुजाम ।
शूलं कमण्डलुं वामे दक्षे टंकाक्षमालिनीम ।
रुद्राग्निप्रभवा ध्यात्वा मूलेनावाहयेत्परम ।

अंशुमति- यद्वा - मण्डले चण्डमावाह्य तद्रूपं भावयेत्ततः ।
द्विनेत्रं चतुर्भुजंच्चैव शुक्लवस्त्र समान्वितम ।
जटामकुट संयुक्तं चन्द्रार्धकृतशेखरम ।
लंबितं दक्षिणं पादं शयीतं वामपादकम ।
जानूर्ध्वे वामहस्तन्तु सव्यहस्तन्तु टंकधृत ।
अथवाञ्जलिहस्तञ्च ढबं रूपञ्च भावयेत ।

ओंध्वनि चण्डेश्वराय हुं फट्स्वाहेत्यावाहनस्थापनादि
विधाय ओं चां चण्डहृदयाय हुं फण्णमः ओं चं
चण्डशिरसे आ हुं फण्णमः । ओं चूं चण्डशिखायै
हुं फण्णमः । ओं चैं चण्डकवचाय हुं फण्णमः ।
ओं चौं चण्डनेत्रेभ्यो हुं फण्णमः ओं चः चण्डास्
त्राय हुं फण्णम इत्यंगैस्सकलीकृत्य मूलेन परमीकृत्य
धेनुमुद्रया मृतीकृत्य ह्दपाद्याचमनादीनि ना पूजयेत । यद्वा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आसनमूर्तिमूलैः केवलं मूलेन वावाह्याभ्यर्च्य देवाय दत्तन्नैवेद्याद्युपहृत्य विशेषार्घ्यं दत्वा लेह्य चोष्यान्नपानादि तांबूलं स्रग्विलेपनम्।

निर्माल्यभोजनन्तुभ्यं प्रदत्तन्तु शिवाज्ञयेति।

पठित्वा शिवनिर्माल्यं समर्प्य

ओं सर्वमेतत्क्रिया काण्डं मया चण्ड तवाज्ञया।

न्यूनाधिकं कृतं मोहात् परिपूर्णन्ततस्तु मे।

इत्थं चण्डेशं विज्ञाप्य पराङ्मुखार्घ्यं दत्वा पूरकान्वितमूलेन

1256 संहारमुद्रया स्वहृदि योजयेत्। तथांशुमति

आत्मार्थ यजनान्ते तु सन्ध्यां प्रति विशेषतः।

देवस्यैशान दिग्भागे गोमयालिप्त भूतले।

दर्भाग्रमर्धचन्द्राभं लिख्य चण्डस्य मन्त्रतः।

ध्वनि चण्डेश्वरायेति हुं फडन्तेन मन्त्रवित्।

तद्रूपं मध्यमे ध्यात्वा पाद्यमाचमनन्ददेत्।

विलेपनञ्च दामञ्च दत्वा तन्मूलमन्त्रतः।

नैवेद्यकञ्च तांबूलन्तन्मूलेनैव दापयेत्।

पराङ्मुखार्घ्यन्दत्वा गवं प्रत्यहमाचरेत्।

मोहशूरोत्तरे:

प्रत्यहं पूजयेद्यस्तु न स पापैः प्रलिप्यते।

अंशुमति: पराङ्मुखार्घ्यन्दत्वा तु चण्डमुद्रां प्रदर्शये इति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा चण्डासनञ्च मूर्तिञ्च संकल्प्येशाद्यणुं क्रमात्।
हृदाद्यंगं यथा स्थाने न्यस्य मूलेन चण्डपम्।
पाद्यमाचमनञ्चार्घ्यं दत्वा हृदयमन्त्रतः।
आत्मार्थे च परार्थे च सामान्यमिदमीरितम्।
नित्येज्ये च समादिष्टा भुक्ति मुक्ति फलप्रदा।
आत्मार्थपूजायां केचन चण्डपूजां नेच्छन्ति। शैवसिद्धान्ते
सर्वदा सर्वत्र शिवपूजावसाने पूजनीय इवेति नियमः।
तथाच कालोत्तरे
स्थिरे चले तथा रत्नमृद्दारौ शैलकल्पिते।
लोहे चित्रमये बाणे स्थितश्चण्डो नियामकः।
सिद्धान्ते नेतरे तन्त्रे न वामे न च दक्षिणे।
इति तथा। अव्यक्तव्यक्तके लिंगे मण्डले स्थण्डिलेऽनले।
चले स्थिरे तथारत्ने मणिचित्रादिके तथा।
...न्धान्नसंभवे लिंगे सद्भस्म फलकल्पिते।
तथा पुष्पमये लिंगे चण्डपूजा नियामकेति।
स्वायंभुवे युक्ते युक्ताः। अर्थान्यथा प्रवृत्तानां विघ्नाभिंगकारिणाम्
शास्ता चण्डेश्वरस्तेषां दीक्षितानामपि प्रभुः।
चण्डेश्वर प्रपन्ना ये न तेषां भयकारणम्।
तस्मादाराधना कुर्यु श्शैवं स्थानमाश्रिता इति।
शैवानां समस्तान्तराय क्षय हेतुत्वेन पूजाफललाभार्थत्वेन चण्डेश्वरा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शोधनस्य विशेषत उपदेशान्नित्यं पूजावसाने चण्डेश्वर पूजा कार्या इति नियमः। अत्र निर्माल्यशोधनावसरे उच्यते।

कामिके - देवस्वं देवताद्रव्य नैवेद्यञ्च निवेदितम्।

चण्डद्रव्यञ्च निर्माल्य निर्माल्यं षड्विधं स्मृतम्।
ग्रामादीशस्य देवस्व देवद्रव्यं पटादिकम्।
नैवेद्यं कल्पितं तस्मै देवोच्छिष्टन्निवेदितम्।
चण्डद्रव्यन्तु तद्दत्तं निर्माल्यं प्रेरितं बहिः।
पिण्डिकास्थाननिर्माल्यमपि देवे विसर्जिते।
भक्षणं द्विविधं प्रोक्तं निवेद्यं तदन्यथा।
देवदेवाय तत्राद्यं देवग्रामादि संभवम्।
श्रीत्यादि येन केशैर्नवोपाधीनान्दाय भक्षणम्।
करोति यस्ससंमूढो मद्भानु-स्ते यकृमतः।
तदर्थ कल्पितं वाथ तण्डुलञ्चोदनन्तु वा।
य प्रयच्छति वा भुङ्क्ते सोपिस्तेयकृदुच्यते।
नैवेद्यं कल्पयित्वा तु शिवायेति तदूर्ध्वतः।
निवेद्यमभ्यन्तच्छिष्टं भुङ्क्ते प्रत्यहमादरात्।
सोयं मत्सदृशं प्रोक्तश्चरुवित् यस्तथा भवेत्।
भक्षयेद्यो नरो भक्त्या पवित्रमिति सत्सितः।
शुद्धात्मा ब्राह्मणस्तस्य पापं क्षिप्रं विनश्यति।

तद्विधानं कारणे स्पष्टमुक्तम्। तद्यथा -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लिंगञ्चेन्मानुषं लिंगं श्लिष्टलिंगं द्विधोच्यते।
स्वायंभुर्दैविकं बाणे गणपञ्चाविकन्तथा।
श्लिष्टलिंगमिति ख्यातं पूजां पूर्ववदाचरेत।
श्लिष्ट लिंगन्तु वा चेन्तु विशेषं किञ्चिदस्ति हि।
तन्निवेदित निर्माल्यं शैवानां भोजनं हितम्।
शुभदञ्चित्तसंस्कारमायुष्यं बलवर्द्धनम्।
निर्माल्य निर्मलं शुद्धं निर्मलात्मा परिभक्षेत्।
तस्माच्छिवस्य नैवेद्यं शुद्धद्रव्यमिति स्मृतम्।
मलबन्ध शरीरस्था निर्माल्यन्तु न भोजयेत्।
शिवेन दीक्षितश्चैव शिवब्राह्मण उच्यते।
शिवश्शुद्धमरूपं हि वाङ्मनातीतं उच्यते।
तस्माद्द्विजश्शिवो विप्र शुद्धब्राह्मण उच्यते।
निर्माल्यन्तस्य योग्यन्तु अन्येषान्तु न योग्यकम्।
अन्येषां संग्रहीतश्चेत्वति कृच्छ्रं समाचरेत्।

स्वायंभुवे-:

निर्माल्यं निर्मलत्वञ्च निर्मलात्मा तु भोजनम्।
दीक्षितस्य च कर्तव्य न चान्येषां प्रशस्यते।

विप्रादीनान्तु भोजनम्।

सुब्रह्मण्यस्य नैवेद्यं भोजनञ्च जयार्थिनाम्।
उमादेव्यञ्च नैवेद्यं सर्वेषां भोजनन्ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सकलान्तु नैवेद्यं सर्वेषां भोजयेत्ततः।
विष्णुनैवेद्य यच्छुद्धं ब्राह्मणादिस्तु भोजयेत।
भास्करस्य तु नैवेद्यं भुक्तं व्याधिक्षयं भवेत।
अभोज्यं भानुभक्तानां नैवेद्यं भास्करस्य तु।

तथा वीरतन्त्रे-:

दिवाकरस्य नैवेद्यं सर्वेषां भोजनं भवेत।
126a अभोज्यं सूर्यभक्तानां ज्येष्ठा सरस्वत्ययोरपि।
श्री देवि भूमि देव्याश्च नैवेद्यं भोजनं भवेत।
दुर्गायाश्च निवेद्यं यत भोज्यमारोग्यवर्द्धनम।
ज्येष्ठायान्तु निवेद्यं यत भोज्यं तत्त्श्रीव वर्द्धनम।
नैवेद्यन्तु महा मोक्षा भोज्यं पुत्रावि वर्द्धनम।
यमनीश्चैव निर्माल्यं नरिणां भोजबोत्त्श्रिवम।
मातृणाञ्चैव नैवेद्यं ब्राह्मणानामभोज्यकम।
क्षेत्रपालस्य नैवेद्यं भोज्यं रोगवर्द्धनम।
वागीश्वरास्तु नैवेद्यं भोज्यं ज्ञानविवर्द्धनम।
ब्राह्मणानान्तु भोज्यं हि ब्रह्मणश्च निवेदितम।
निवेद्यं लोकपालानां आरोग्यं कुरुते सदा।
मन्मथस्य निवेद्यन्तत्सर्वेषां भोज्यमुच्यते।

दीप्ते-: अभोज्यं ब्राह्मणानान्तु सदाशास्तु निवेदनम।

कारणे-: 'परिवारान्तु सर्वेषान्नैवेद्यं भोजयेत्ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लिंगन्तन्मानुषं लिंगं निर्माल्यन्तु न संशयः।
प्रमादाद्भोजनं कृत्वा तद्दिनं लंघनं तथा।
शमीपत्रकुशाग्रञ्च भक्षयेत्पञ्चगव्यकम्।
पिण्डिकास्थितिं निर्माल्यमपि लिंगं विसर्जितः।
निर्माल्यं लंघनं दानं भक्षणं नरकं व्रजेत्।
प्रमादाल्लंघनं यत्र प्राजापत्यञ्चरेत्सुधीः।
स्पर्शने पाणिपादौ च प्रक्षाल्याचमनं कुरु।
तिलार्द्धं तस्य निर्माल्यन्नरकञ्चन्द्रभास्करौ।
जले वा पशुजैर्वापि भूमौ वा चाग्निमेव वा।

सुप्रभेदे-: सदाशिवस्य निर्माल्यं मनुष्याणाञ्च भोजनम्।
तद्वथन्यजनेश्चैव भोजने त्वथ दोष कृत्।

इत्यादि बहुभि र्वाक्यै र्निषेध वचन मानुष लिंगस्यैव न तु स्वार्थं भवादिति मन्तव्यम्। आत्मार्थ निर्माल्यस्वरूपमुच्यते। तद्यथा। कामिके-

स्वेष्टलिंगे च यद्दत्तं चकवक्त्तं न संशयः।
नैवद्यं भ्रातृपुत्राणां भगिनिनाञ्च दापयेत्।

कारणे च-:

आत्मार्थञ्चललिंगञ्च निर्माल्यन्तु कथ्यते।
स्फटिके बाणलिंगञ्च स्थापितञ्चलमेव वा।
तान्निवेदित निर्माल्यं न निर्माल्यं प्रकल्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



बालानां युवतीनाञ्च भोजयेद्बलवर्द्धनम् ।
स्वार्थं श्रुवे रक्तलिंगं च बाणं च सूर्यस्यैव तु दापयेत् ।
न दद्याद्गोजलादिभ्यो दद्याच्चेन्नरकं व्रजेत् ।
शुद्धे शिवप्रसादे च शुद्धित्वं यो न भावयेत् ।
सोऽपि याति नरो घोरं नरकं कालमक्षयमिति ।

अथ प्रकृतमुच्यते –

. . . मौत्यमुद्रास्य गोमय वारिणा तत्स्थानं संशोध्य ओं हं अस्त्राय फडिति संप्रोक्ष्यार्घ्यादिज्यकारादिकं प्रक्षाल्याचम्य भस्म धृत्वा संहितां जप्त्वा समस्तान्यूनातिरिक्त दोषशान्त्यर्थं . . . फललाभार्थञ्चाघोरमेकविंशतिवारं जपेत् ।
तथा कालोत्तरे वस्त्रान्नगन्धपानाद्यं निर्माल्यादिपवित्रकैः ।

विसृज्य चार्घ्यपात्रञ्च समाचम्योपसंस्पृशेत् ।
न्यासं कृत्वा यथा शक्त्या जप्तव्या शिवसंहिता । कामिके तु
स्थण्डिले संहरेत् पूजान्तेभिर्गोमयगोलकैः ।
च्युतस्खलितशुद्ध्यर्थमभ्यसेन्मन्त्रसंहिताः ।
अहन्यहनि योऽधीते विधिस्थः शिवसंहिताः ।
न तिष्ठते पापदिवा चात्र हतं ततः ।
तस्मात्सर्वप्रयत्नेन संहिता शिवमभ्यसेत् ।
एकोऽपि संहितामन्त्रो भक्त्या जप्तो विधानतः ।
नाशयत्याशु पापानि सर्वाण्येवा विचारत इति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षट्सहस्रिके—

त्रिसप्तवारमावर्त्य पूजान्ते नियमेन तु ।
पूजाफलं समाप्नोति प्राप्नुयाच्छास्त्रभाषितम् ।
अघोरान्वा परं नास्ति कलिमालाद्य सिद्धिदः ।
अघोरार्पितचेतस्थो मुक्तिभाक् स च नान्यथा ।
तस्मात्सर्वप्रयत्नेन अघोरं सर्वदाभ्यसेत् ।

अत एव पूजान्ते मन्त्रद्वयमावर्त्यकन्दमध्यमेति । एव-
मात्मार्थयजनं क्रियाकाण्डं समाचरेत् । स - - एवं दिने दिने
पू - - अर्चयेत्पूर्ववत्क्रमात् । कालोत्तरे—

किन्तु देशवशात्तत्तु यः पूजयति भक्तितः ।
स शिवस्सर्वकृत्यज्ञो जीवन्मुक्तस्स कथ्यते ।

इत्यात्मार्थपूजापद्धत्यां आत्मार्थपूजाविधिः ॥ केचिद्देवावान्ते
कपिलार्चनमिच्छन्ति तद्यथा । सुप्रभेदे—

गावः कपिलपञ्चञ्च क्षितिं प्राप्ता शिवाज्ञया ।
सुरासुरैर्मथ्यमानात् क्षीरोदकसागरोत्तमात् ।
पञ्चगावस्समुत्पन्ना सर्वलोकस्समातरः ।
नन्दा भद्रा च सुरभि सुशीला सुमनास्तथा ।
कपिलं कृष्णश्वेतञ्च धूम्ररक्तन्तथैव च ।
नन्दादि सुमनान्तानां वर्णमेवं प्रकीर्तितम् ।
सर्वलोकोपकारार्थं देवानां तर्पणाय च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गोमातरस्तथा क्षमौ स्नानार्थं हि विवस्व तु ।
गोमयं रोचना मूलं क्षीरं दधि घृतं गवाम् ।
षडङ्गानि पवित्राणि सर्वसिद्धिकराणि - च ।
गोभिर्यज्ञः प्रवर्तन्ते गोभिर्देवाः प्रतिष्ठिताः
गोभिर्वेदास्सु ऊीर्णाः स षडङ्गपदक्रमाः ।
इत्थं गावस्समालोक्य पञ्चगव्यर्थवद्भुतः ।
ग्रासपूर्वं समभ्यर्च्य स्वस्वनाम्ना ध्रुवेण - च ।
126 b गन्धपुष्पपवित्र - - - पूर्वकम् ।
ओं कपिले नन्दे नमः । ओं कपिले भद्रे नमः ओं कपिले सुशीले नमः ओं कपिले सुशीले नमः । ओं कपिले सुरभे नमः । ओं कपिले सुमने नमः । ओं सौरभेय जगन्माता देवानां अमृतं प्रदे ।
गृहाण वरदे ग्रासमीप्सितार्थञ्च देहि मे ।
वन्दितासि वसिष्ठेन विश्वामित्रेण धीमता ।
कपिले हरमे पापं यन्मया दुष्कृतं कृतम् ।
गावो ममाग्रतो नित्यं गावः पृष्ठत एव मे ।
गावो मे हृदये चापि गवाम्मध्ये वसाम्यहम् ।
एतन्नरो जपेन्मन्त्रं त्रिसन्ध्यं नियतश्शुचिः ।
विमुक्तस्सर्वपापेभ्यः शिवलोकं स गच्छति ।
अथवा - अमृतमथनोत्पन्ने सुरभे लोकधारिणी ।
इदं ग्रासं गृहाणत्वं इदं मे त्रतमुन्तमम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गवां ग्रासे यथा देव सुरभ्यां चैव तु।
तुल्यमेतत्फलं दृष्टं किन्तु मन्तं पृथक् पृथक्।
सर्वलोकधरा ह्येते जीवितान्न प्रदायिनः।
ग्रासग्रहन्तु दृष्टास्ते शतम्मे व्रतमुत्तमं।
नित्यं परगवे दद्यात् गृहीत्वा दुर्लभं व्रतम्।
रक्षन्ति च भयाद्घोरात् स्पर्शनं पापनाशनम्।
स्तुत्वैवं परया भक्त्या ततो गोभ्यो विचक्षणः।
ग्रासयेत्पञ्च गव्यानि यद्वा तासामभावतः।
एकस्यामेव गृह्णीयात् पूजा पूर्वोक्तवंबरैः।
भवेदत्रापि सर्वासां कपिलैव प्रशस्यते।
- - - निक - ल पूजाविधिः ॥ ×

अंशुमति- परार्थालयं प्रविश्याथ लिंगदर्शनमेव च।
प्रदक्षिण नमस्कारं यथा संख्या विधानतः।
लिंगस्य दर्शनं पश्चात् स्वगतं संप्रवेशयेत्।
पुराणागम वाक्यानि समालोक्य यथा मतिः।
शिवालयस्य सेवायाः क्रमं वक्ष्ये धुना स्फुटम्।

शिवालयसमीपवासी चेद्यथोक्तानुष्ठान पूजानन्तरं देवालयं सेवेन सेवार्थान्नियमेन दूरागतश्चेद्दूरते विमानन्दृष्ट्वा प्रथमस्तुत्य तदर्शनस्थाने पुण्यतीर्थे स्नात्वा शुद्धवासा कृताह्निकस्तोपवासस्सपुष्पाद्युपहारपादप्रक्षालनं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कृत्वा शिवसेवां कुर्यात् । तथा शैव पुराणे

स्वगृहादेव संकल्प्ययात्रां व्याघ्रपुरस्य तु ।
देव देवं समभ्यर्च्य भोजयित्वा द्विजानपि ।
संप्रार्थ्य तैरनुज्ञातो निर्गच्छेत भक्त संवृतः ।
परान्नं वर्जयेद्धीमान् तथा नैव प्रतिग्रहं ।
कामक्रोधादिकान्दोषा न्विशेषेण विवर्जयेत् ।
उपवास दिनं कुर्यात् कारयेद्वपनन्तथा ।
स्नानन्तु विधिवत्कुर्यात ध्यात्वा देवन्त्र्यम्बकम् ।
कृत्वा हिरण्य-श्राद्धपिण्डन्दत्वा विधानतः ।
यथा शक्ति धनं धान्यं वस्त्रञ्चान्यन्तथैव हि ।
भूमिं हिरण्यगां कन्यां वित्तशाठ्य विवर्जितः ।
दद्यात्तु शिव भक्तेभ्यो तद्द्विजेभ्यो विशेषतः ।

इतरक्षेत्रेष्वप्येवमनुसन्धाय । तत्रापि पञ्चाष्टक स्थानास्थितानि तीर्थानि परमपुण्यानि तत्तद्सालोक्यप्रदायकानि । यथा सर्वज्ञानोत्तरे-

आदिगुह्याष्टकारुद्रा अति गुह्याष्टकास्तथा ।
गुह्या द्गुह्याष्टकाश्चैव पवित्राष्टक एव च ।
स्थानाष्टकाश्च पञ्चैते नियोगाद्भूमि वासिनः ।
अनुग्रहाय लोकानां लिंगभूताः प्रतिष्ठिताः ।
तेषामेव समीपस्थं वद्य-तीर्थं षडानन ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तीर्थं परमंगुत्यं तत्र स्नात्वा शिवं व्रजेत् ।
तत्र रुद्र सालोक्य प्राप्नोतीप्सितं ध्रुवम् । मतंगे ।
तत्स्थाने भारते वर्षे मानुषाणां हिताय वै ।
निर्मितानि प्ररोधानवेषु संनिहितो हर । इति

सुप्रभेदे-: दूरतश्शेखरं दृष्ट्वा नमस्कुर्यात्तु यो नरः ।
मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नकः ।

तथा ब्रह्माण्डपुराणे-:
विमानदर्शनस्थाने स्नात्वा तीर्थे कृताह्निकः ।
शुक्लवासास्सोपहारः प्रविशेच्छिवमन्दिरम् ।
देवालयानां दृश्यन्ते विमानं गोपुराणि च ।
यावद्देवेषु पतितस्तावत् कैलासभूतलम् ।
श्रूयन्ते वाद्यघोषाश्च यावद्दूराच्छिवालयात् ।
तावच्छिवपुरं साक्षादनवद्यं मनोन्मनी ।
स्तुतस्तोत्ररवा यावद्दूरे शंभोर्जयध्वनिः ।
श्रूयते रजतगिरे शिखरं तावदुच्यते ।

सूक्ष्म अंशुमत्तन्त्रे-
स्थूललिंगं नमस्कृत्य आलयन्तु प्रवेशयेत् ।
स्थूललिंगं विमानं स्यात् सूक्ष्मलिंगं सदाशिवम् ।
बलिपीठं भद्रलिंगं लिंगत्रयमिहोच्यते ।

सूक्ष्मे-: देहप्रासादमित्युक्तं देही लिंगमिति स्मृतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उभयोरन्तरन्नास्ति तस्मादित्थं प्रभावयेत् ।
स्थूललिंग विमानञ्च सूक्ष्मलिंगं सदाशिवम् ।
सदाशिवस्य तन्मध्ये शिवमेवं विचिन्तयेत् ।
अथवान्यप्रकारेण स्थूललिंगं सदाशिवम् ।
अन्तर्लिंगे शिवं ज्ञेयः भावयेद्दैशिकोत्तमः ।
127a व्यापकव्याप्तिरूपेण लिंगमेवं विमानकम्
होमादिस्थूपिपर्यन्तं शिवरूपमिति स्मृतम् ।

आग्नेयपुराणे-:

बेरलिंगं विमाने च भूतपीठे शिवालये ।
शिवसान्निहितो बिल्वं नमस्य तत्रबं सदा ।
पुष्पाधमपि स्वार्चितं मुख्यं तथागमः ।
उत्तमं स्वार्चितं पुष्पं मध्यमं वन्यमुच्यते ।
अधमन्तु क्रियक्रीतं परं शक्त्यधमाधमम् ।
पुष्पं वनोद्भावनञ्च शिवाश्रमाद्युत्तरप्रदेशे कार्यम् ।

नान्दिकेश्वरेणोक्तम्-:

सर्वेषामेव वर्णानां शिवाश्रमनिषेविणाम् ।
शिवधर्माश्शिवे प्रोक्ता धर्मकामार्थमुक्तये ।
ब्राह्मण क्षत्रियो वैश्य स्त्रीशूद्रो वा शिवाश्रमी ।
ब्रह्मचारी गृहस्थो वा वानप्रस्थोथभिक्षुकः ।
स्वाश्रमादुत्तरे कुर्यात् पुष्पारामं सुशोभनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः।
आत्मारामोद्भवैर्वापि पुष्पैस्संपूजयेच्छिवम्।

कामिके - पुष्पाराममगादीनां स्थानं सर्वत्र कल्पयेत्।
इति वचनाद्यथासंभवदेशोद्भवं कुर्यात्। तत्र शिवालयं
शेयेत तत्रायं क्रमः।

देवालयसमीपमागम्य गोपुरद्वारबाह्यतो वा बलि
पीठस्य बाह्यतो वा वृषस्याग्नेय भागे वा पूर्वं स्थूललिंगं
नमस्कुर्यात्। अंशुमति।

स्थूललिंगं नमस्कुर्यात गोपुरद्वारपूर्वतः।
प्रणामस्थूललिंगस्य महा पीठस्य बाह्यतः।
अथवा वृष पृष्ठे तु किञ्चिदाग्नेयमाश्रितः।

तत्रैव पूजाप्रकरणे -।

स्थूललिंगं नमस्कारमालयन्तु प्रवेशयेत्।
शिवाग्रे पुरतास्थित्वा महापीठाग्र देशके।
प्रणम्य दण्डवद्भूमौ नमस्कारक्रमन्ततः।

अयमाग्नेयभागनियमः - पूर्वद्वारविषयं प्रणामकाले स्वदेहं
वस्त्रेणाच्छाद्य प्रणमेत्। शिवस्याग्र पृष्ठमार्गे वामगर्भगृहेषु
नमस्कारं न कुर्यात्। शिवालये तैलाद्ये तैलाभ्यंगादिकञ्च
वर्जयेत। तथांशुमति -:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वस्त्रेणाच्छाद्य देहं स्वं यो नरः प्रणमेत्तु माम्।
त्रिजन्माय ते – क सप्तजन्मसु निर्द्धनः।

स्वायंभुवे –

अग्रतः पृष्ठतो वामे गर्भागारे तथैव च।
जपहोमनमस्कारन्न विदध्यात्कदाचन।

उत्तरद्वारपश्चिमद्वारयो दीश्वरे नमस्कारादिकं वामभाग एव कुर्यात्। प्रत्यङ्मुखे चोत्तरदिङ्मुखे च वामस्थितोन्यत तदन्य पार्श्वे ईशानपूजाप्रणतीश्च कुर्याद्दोषाय नो चेन्नफलायता स्युः। रौरवे – प्रच्छन्नपट – न कर्तव्यं लिंगदर्शनम्।
तत्काले दर्शनं मोहात् भार्या पुत्रविनाशनम्।

स्कान्दे: तैलाभ्यंगं कृताभ्यंगं शिरसो वेष्टनन्तथा।
कञ्चुकावरणञ्चापि वर्जयेच्छिवमन्दिरे।
क्षयज – गण हक्कादि मोहनिष्ठीवनानि च।
मत्सर्गादि नीच नरो वर्जयेच्छिवमन्दिरे।
उपानत्स्नातपत्रादि रहितं-क्षमयान्वितः।

तथा रामायणे च

शिवालयमुपागम्य यस्तु इषयते नरः।
मलमूत्रञ्च निष्ठीवे स वेतालो भविष्यति।
यस्तु शिवालयं गतो वाहनाद्यधिरोहति।
स्तुतेनैव दोषेण जाति पंकुर्भविष्यति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सोपानकोपि यः कश्चित् देवालयमुपेक्ष्यति ।

स ह पादुकया भिन्न पादोः दुःखमुपेक्ष्यति ।

यदि वाभ्यर्चना कांक्षी शिवद्रव्याणि लुंपति ।

स ब्रह्मराक्षसो भूत्वा अरन्यारण्येषु रोदिति ।

तदनु ध्यानपूर्वकं बलिपीठं नमस्कुर्यात् - ध्यानपूर्वकम् ।

मुख पुच्छ समवक्त्र समनास्ति यदनन्द कण्ठ दश बाहु

दशबाहु दशवक्त्र वरधृत । दलमेकहृदयन्वतिरिक्त वर्णद्वय पाद -

मिति बलिपि भूतबलि पीठबलि हृत । अथ ध्वजस्तंभम ..

सन्ध्यानपूर्वं नमस्कुर्यात् । तथा ध्वज दण्डनमस्कारं कुर्याद्ध्यानपुरस्सरम्।

डकास्य पादान्द्विकरान्त्रिणेत्रं रोमावली राजित दर्भमालम् ।

श्वेत रा ग रूपं स्वकनासिकायामारूढ पद्मासन दण्डरूपम् ।

भत्सवे ध्यानविशेषः पतिस्तंभमिति व्याख्यातम् पद्मपटल -

मिति स्मृतम् । रज्जुः पाशमिदं प्रोक्तं त्रिविधाश्च भवन्ति च ।

डवं ध्वजदण्ड ध्यात्वा नमस्कृत्य वृषनायक ध्यान

पूर्वकं नमस्कृत्य प्रार्थयेत् । ब्रह्माण्डोपपुराणे

ईश्वराभिमुखं देवमासीनं वृषनायकम् ।

प्रणम्य प्रार्थयेद्देवं कुसुमाभ्यर्च्यताम्बिकाम् ।

आनन्दं जगतां शिवञ्च कलयन्देवेष्टमूर्ते वृषाधिष्ठानं रजता

चलेन्द्र सदश शृंगी ककुद्मान् पतिः । देवीरष्टविधैर्वर्णैः परिव्रतो

निश्वास धूतां बुधः । प्रीतोस्मानेव तु प्रसादमुखः प्राज्ञांमयो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



धर्मराट् । अन्तः प्रदेशे शिवदर्शने च शिवार्चने तत्फलसिद्धिलाभे ।

देव्यस्यनुज्ञां भगवत्प्रसन्नः त्वत्पादपद्मानि ध्यायमहम् ।

त्रिवर्गनायक संप्रार्थ्य शिवस्य पुरतो दण्डवत् प्रणमेत् ।

तथा । इति संप्रार्थ्य धर्मेशं पशुपतेः पुनः प्रणम्य दण्डवत् भूमौ साष्टांगं कुसुमं क्षिपेत् । अंशुमति-:

पशोः पशुपतेरग्रे दण्डवत्पतितो भुविः पतन्ति पातका स्सर्वेनो त्तिष्ठन्ति पुनस्सह देह संसकृत रेणूनां यावत्संख्याभिगण्यते । तावत् वर्षसहस्राणि शिवलोके महीयते । दीप्ते-:

अस्य नमस्कारस्य चातुर्विध्यमुक्तन्तथा ।
अष्टांगञ्चैव पञ्चांगं त्रियंगं चैककांगकम् ।
शिरो हस्तौ च कर्णौ च चिबुकं बाहुयुग्मकौ ।
अष्टांगञ्च नमस्कार पञ्चांगञ्च तत शृणु ।
शिरो हस्तौ च बाहू च नमस्कारं शिरसैव कृतं भवेत् ।
त्रीणि पञ्च च सप्ताभि नव द्वादश संख्यया ।
भक्त्या कृत्वा नमस्कारं शिवस्याग्रे ततो नरः ।
अश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ।
भक्ति हीनै नरै श्शाठ्या दपि वा या शिवे कृताः ।
नमस्कुर्या सकृद्वापि सर्वपाप हरीभवेत् ।
तस्माल्लिंगं सकृद्भक्त्या यो लिंगं प्रणमे नरः ।
सर्वान् कामानवाप्यासौ शिवेन सह मोदते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदनु पादान्तरित पदक्रमं निश्चलित करं स्तुतिमुखरमुखं ध्यानरसिक-
मानसधृत तैलि कुंभगर्भिणीगमनतुल्यं चतुरंगं प्रदक्षिणं पुमान्
वा स्त्रीवा कुर्यात्। कारणे-:

विप्रक्षत्रिय विट्शूद्रैः पुरुषैः स्त्रीभिरेव वा।
सुस्नातैर्भस्मलिप्ताङ्गैः सुव्रतैस्साक्षसूत्रकैः।
मौन व्रत धरैरन्य चिन्तकैः शिव वंदकैः।

प्रदक्षिणं कार्यमिति विशेषः। अंशुमति। प्रदक्षिण क्रमं वक्ष्ये

श्रृयतं रवि सत्तम। सर्वपापहरश्चैव सर्वदा न फलप्रदम्।
सर्वरोगविनाशार्थं प्रदक्षिणमथाचरेत्।

तत्र प्रदक्षिण निर्वचन श्लोकः। प्रच्छन्ति भयं सर्वं दकारो मोक्ष
सिद्धदः। क्षिकारात् क्षीयते रोगी णकारश्री प्रदायकः।

प्रदक्षिणं निसंयोगात् प्रदक्षिणमिति स्मृतम्।
पादात्पादान्तरं गच्छेत् करौ चलनवर्जितौ।
स्तुतिर्वाचा हृदिस्थानं चतुरंगं प्रदक्षिणम्।

स्वायंभुवे-: आसन्नप्रसवा नारी तैलपूर्णं यथा घटम्।

वहन्तशनकैर्यादि तथा कुर्यात्प्रदक्षिणम्।

अस्य फलं तत्रैवोक्तम्-

पूर्वाह्ने व्याधिनाशः स्यात् मध्याह्ने पार्थितार्थदम्।
सायाह्ने सर्वपापघ्नं अर्द्धयामे विमुक्तिदम्।

अजिते-: अष्टम्याञ्च चतुर्दश्यां पञ्च दश्यान्तिजन्मनी।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आर्द्रायामर्कवारे च करणे विष्टिसंज्ञके ।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
संक्रान्त्युत्सवे चैव स्नात्वा चैव प्रदक्षिणम् ।
प्रणमेद्यश्शिवं भक्त्या सर्वकामानवाप्य सः ।
लभेच्छतगुणं पुण्यमेवं स्यात् संशयः ।
एवमुक्तेषु कालेषु भक्ति श्रद्धा समन्वितः ।
सूर्योदयं समारभ्य यावदस्तं रविर्भवेत् ।
तावत्प्रदक्षिणं कृत्वा सर्वान् कामानवाप्नुयात् ।
अथाहोरात्रकं चापि कालेष्वेतेषु यो नरः ।
प्रदक्षिणं प्रकुर्वीत सोऽनन्तफलमश्नुते ।
दूरमभ्यात्समागम्य फलाशारहितोऽपि यः ।
कृत्वा प्रदक्षिणं ~~कृत्य~~ भक्त्या प्रणमेदिच्छेवमव्ययम् ।
तस्य मार्गसमुद्भूता यागतिश्चापि केशव ।
प्रदक्षिणफलन्नृणां ददात्येव न संशयः ।
प्रवसी पथि कृत्वा तु शिवलिंगं प्रदक्षिणम् ।
नमस्कृत्वा तु पूर्वोक्तात् फलं पञ्चगुणं भवेत् ।
योगजे-ः उत्सवे बलिकाले तु यथा कुर्वन् प्रदिक्षणम् ।
128a पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ।
गर्भगेहे च तस्योक्त दीक्षितस्यैव शासके ।
प्रदक्षिणन्नृणां नोक्तमतर्मण्डलके सदा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अन्तर्हारकृता प्रोक्तं फलमेक प्रदक्षिणम् ।
त्रिगुणमध्यहारे तु मर्यादा यच्चतुर्गुणम् ।
महामर्यादिकश्चैव कृतं पञ्चगुणं भवेत् ।
क्षेत्रावधिकृतं बाह्ये भवेच्छतगुणं नृणाम् ।

स्वायंभुवे -: दशाश्वमेधजं पुण्यं गर्भगेहे प्रदक्षिणम् ।
तस्माद्दशगुणं पुण्यं अन्तर्मण्डलदेशके ।
अन्तर्हारादिशालेषु तत्तद्दशगुणं भवेत् ।
सव्यापसव्यमार्गेण वृषान्ते तु प्रदक्षिणम् ।

अथ प्रदक्षिण संख्या

कृत्वा प्रदक्षिणं भक्त्या शिवस्यैकं समाहितः ।
अश्वमेधस्य यज्ञस्य सुखेन लभते फलम् ।
एकविंशति संख्यानामुत्तमन्तु प्रदक्षिणम् ।
तिथिसंख्या कृतं मध्यमधमं मुनिसंख्यया ।
पञ्चसंख्या कृतं यत्तदधमो मध्यमो भवेत् ।
अधमाधममित्युक्तं गणसंख्या कृतन्तु यत् ।
तस्मादाद्यवरं प्रोक्तं कृतमेकं प्रदक्षिणम् ।

स्वायंभुवे -: एकदण्डनमस्कारमेकञ्चापि प्रदक्षिणम् ।
लिंगविशेषफलन्निरस्यते । एकहस्त नमस्कारमेकञ्चापि प्रदक्षिणम्
~~मानुषस्य तु लिंगस्य फलमुक्तं प्रदक्षिणम्~~ ।
एकहस्त नमस्कार हन्ति पुण्यं पुरातनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शतं सहस्रमयुतं नियुतं प्रयुतन्तु वा ।
कोटिवा कारयेदिष्टसिध्द्यर्थन्तु प्रदक्षिणम् ।

लिंगविशेषफलं निरूप्यते ।

मानुषस्य तु लिंगस्य फलमुक्तं प्रदक्षिणम् ।
नमस्कारेण तस्माद्वै द्विगुणञ्चार्षके भवेत् ।
त्रिगुणं दैविके लिंगे फलं गाणे चश्चैव चतत् ।
चतुर्गुणं समुद्दिष्टं फलं पञ्चगुणं भवेत् ।
स्वायंभुवस्य लिंगस्य तथा संस्पर्शनैरवानैः ।

तत्प्रदक्षिणञ्च तुर्विधम् । सव्यमपसव्य सव्यापसव्य मंग प्रदक्षिण ञ्चेति । तथांशुमति -:

प्रदक्षिण प्रकारस्य लक्षणं शृणु सुव्रत ।
सव्यन्तु प्रथमं प्रोक्तमपसव्यन्द्वितीयकम् ।
सव्यापसव्यमपरस्तत्वं च प्रदक्षिणम् ।

प्रोक्तमपसव्यप्रदक्षिणम् । अजिते ।

सव्यापसव्यतस्सोम सूत्रं लंघनतः कृतम् ।
सव्यापसव्यमित्युक्तं दीक्षितानान्तु तद्भवेत् ।
अंगप्रदक्षिणं यत्तु सर्वांगे परिकल्पितम् ।
सोम सूत्र स्वरूपञ्चमंशुमति निरूपितम् ।
प्रासादस्य तु विस्तारं तन्मानं सोमसूत्रकम् ।
लिंगमूलस्य पार्श्वे तु योजयेत्सौम्य देशके ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यावत्सूत्रान्तमेवं स्याद्वर्जयेत्तु प्रदक्षिणम् ।
संकटे । प्रासादार्धसमं वा परिहृत्य कर्तव्यम् ।
प्रासादार्धं समं वापि प्रसादसममेवेत्युक्तत्वात् ।

कारणे-: शंभोः प्रदक्षिणं कुर्यात् सोमसूत्रं न लंघयेत् ।
लंघनादेकमेकं स्याद्लंघ्यत्व युतत्रयम् ।
अलंघ्य प्रदक्षिणं सव्यापसव्यः । विलङ्घ्यप्रक्षिणादि सव्यादावेकमेकम् । सव्यापसव्ये ऽकमयुतत्रयं भवेदित्यर्थः । धाम्नच्छायामपि सोमसूत्रं न लंघयेत् । महाधामस्य सूत्रेण छायाञ्चैव न लंघयेत् । छायायस्तात्प्रकर्तव्यं विमाने तु प्रदक्षिणम् ।

तथान्यत्र-: छायातिलंघने प्राप्ते कथं कुर्यात्प्रदक्षिणम् ।
हन्ते नियंशविहायादौ सञ्चरेद्वयंशके बुधः ।
तथा लिंगच्छायान्तु पीठञ्च प्रासादं प्रतिमान्तु वा ।
उत्सवे बलिकाले च तथैव गुरुदेविते ।
प्रदक्षिण क्रियाकाले छाया दोषो न विद्यते ।

कुत्रचिदपसव्य निषिद्धम् ।

सोमसूत्रद्वयं यत्र यत्र वा विष्णुमन्दिरम् ।
अपसव्यं न कुर्वीत कुर्यादेव प्रदक्षिणम् ।

सव्यादि स्वरूपमंशमन्तन्त्रे स्पष्टमुक्तम् ।

इन्द्रादि चेन्द्रपर्यन्त सव्यं प्रोक्तं प्रदक्षिणम् ।
यथा सव्यप्रकारेण अपसव्यं समाचरेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सव्यापसव्यमार्गेण प्रदक्षिणमत शृणु ।

यथा - त्रिप्रादि चण्डनाथञ्च वृषभं सोमसूत्रकम् ।

पुनर्वृषञ्चण्डनाथं नालदेशस्य पार्श्वतः ।

पुनः प्रयायाच्चण्डञ्च तथैव वृषपृष्ठकम् ।

एवं सव्यापसव्यन्तु प्रदक्षिणमिहोच्यते ।

एवं सव्यापसव्य प्रदक्षिणं कुर्वन्वृष-चण्डानुनैव प्रदक्षिणं कुर्यात् । तथा चागमः । आद्यन्तं वृषदेवस्य चतुस्थानमुदाहृतम् । त्रि-चण्डस्थानसंयुक्तं पक्षाभ्यां सोमसूत्रकम् । आत्मप्रदक्षिणं कुर्यात् तत्तत्स्थानैक संख्यया । तथैव नवसंख्याश्च एवमेकं विधीयते । अंगप्रदक्षिणस्वरूपमजिते प्रदर्शितम् ।

अंगप्रदक्षिणं कुर्वन् कृत्वाऽऽत्मानं निजान्तनुम् ।

दण्डवद्बाहुयुग्मेन सहबद्ध्वा कृताञ्जलिः ।

कृत्वा दण्डनमस्कारं त्रिवाग्रे तु सकृन्नरः ।

प्रदक्षिणन्तथा कुर्यात् एकं वा नवमेव वा ।

पञ्चवा सप्तवा चैव सर्वपाप निवृत्तये ।

1286 कृत्वा · · · स्तथाग्रे तु नमस्कारञ्च भक्तितः ।

उत्थाय प्रणतिं भूयो भूयः कृत्वा समापयेत् ।

अंशुमति-: करागौ बन्धयित्वा तु पादौ स्वस्तिकमाचरेत् ।

नेमिवद्भ्रमणं कृत्वा प्रासादात्परितस्तथा ।

अंगप्रदक्षिणं प्रोक्तं एवमेव प्रदक्षिणम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रदक्षिणसहस्रं स्यादेकमेकं प्रदक्षिणम्।

एवमन्यान्यपि चक्रपंक्तिसिंहशृंखलांगप्रदक्षिणान्यंशुमति द्रष्टव्यानि स्वायंभुवे-:

अपसव्यं यतीनान्तु सव्यन्तु ब्रह्मचारिणाम्।
सव्यापसव्यमार्गेण वानप्रस्थगृहस्थयोः।
स्वायंभुवो गर्भगेहेपि सव्यापसव्य विधिरुक्तः।
गर्भे प्रदक्षिणं किन्तु पूजकस्य विधीयते।
तत्रापि देव देवस्य छाया निर्माल्य लंघनम्।
सोमसूतञ्च तत्काले परिहृत्य समाचरेत्।
सव्यापसव्यमार्गेण कर्तव्यन्तत्प्रदक्षिणम्।

कालोत्तरेणैष नियमद्वयमुक्तं यथा-:

सव्यापसव्यमार्गेण अन्तर्मण्डलके कुरु।
बाह्यप्रकारदेशे तु सव्यमार्गं प्रदक्षिणम्।

अत्र पूर्वार्द्धेन सव्यापसव्या देशानियम उक्तः। अपरार्द्धेन बाह्यदेशस्य सव्यनियम उक्तः। तत्रैवापरो विशेषो युक्तं यत्र यत्रावृतौ किन्तु बलिपीठवृषास्तिष्ठेयुः। तत्र तत्रावृतौ कुर्यात् तत्प्रधानं प्रदक्षिणम्। यत्र प्रदक्षिणं तत्र बलिपीठ वृषौ न चेत्।

तद्बाह्यस्थौ समावृत्य कृती कुर्यात्प्रदक्षिणम्।
देवेश वृषयोर्वापि बलिपीठेशयोस्तु वा।
नान्तरागमनं कुर्यान्तत्तदावरणे सुधीः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इत्थं भूतं प्रदक्षिणं निर्वर्त्य पूर्ववत् शिवाग्रे नमस्कृत्य

उत्थाय भूयोभूयः प्रणम्य समापयेत्। अजिते

कृत्वा पुनस्तथाग्रे तु नमस्कारञ्च भक्तिदः।

उत्थाय प्रणतिं भूयो भूयः कृत्वा समापयेत्।

तदनु→ द्वितीयावरण द्वारपालकौ ध्यानपूर्वकं प्रार्थयेत्।

तथा ब्रह्माण्डे द्वितीयावरण द्वारपालकौ गणनायकौ नत्वाभ्यर्च्या-

न्तः प्रविशेत् स्तुत्वैव शिवभक्तिमान्। ध्यानम्।

विभ्राणौ निजबाहुभिर्वरधातादि न्तर्जनीमुद्रिका-श्वण्डांशुप्रतिमत्विषौ

गणवरौ रुद्रालय द्वारपालौ। कोटीरागत हारनूपुर कटीसूत्राधिता-

हीश्वरौ वन्देहं प्रणतार्थिनाशनकरौ गौरीशसेवारतौ। तदनु

ध्यान पूर्वं गणापत्यं नन्दिकेश्वरं प्रणम्य प्रार्थयेत्।

बिभ्राणं परशुं मृगांकरतले शैवी प्रणामाञ्जलिं

भस्मोद्धूलनपाण्डुरं शशिकलांगं गा क्वर्द्दृज्ज्वलाम्।

पर्याय त्रिपुरान्तकं प्रणम्य यश्रेष्ठं गणेन्द्रैर्वृतं

ब्रह्मेन्द्राच्युतबान्धवाद्ध्रि कमलं श्री नन्दिकेशं भजे॥

अथ प्रार्थना- अन्तः प्रवेशे शिवदर्शने मे शिवार्चने तत्फलसिद्धिलाभे।

देवस्यनुज्ञां भगवन् प्रसन्नस्त्वत्पादपद्मप्रणतायमह्यम्।

प्रार्थयित्वैवं ततः पश्चात् भावयित्वा शिवादलम्।

एवं नन्दिकेश्वरमनुज्ञाप्यान्तः प्रविश्य प्रथमं विस्तराजन्तमस्कुर्यात्

स्तोतमुच्चरन्(य) भुवि। विकीर्य पादयोः पुष्पं मस्तकाहति मुष्टिकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्तुतिं स्तुवन् प्राक्स्थितिं कुर्यात् कम्धयोरर्पितांगुलिः।

ततो मण्डपान्तः प्रविश्य देवदेवं नमस्कृत्य स्तोत्रश्चैव समुच्चरन्। मस्तके हृदये चैवाञ्जलिश्चैस्य विन्यसेत्।

नमस्कारमुद्रा सुप्रभेदे प्रदर्शिताः। यथास्तथांगुलि संलग्नौ हस्तौ हृद्देशमाश्रितौ। सर्वेषां बन्धनं कार्यं वामांगुष्ठ निपीडितः।

नमस्कारेति विज्ञेया सर्वकर्माणि कारयेत्।

तत्र द्वर्णाश्रमानुगुणं स्तोत्रं कामिके प्रदर्शितम्।

वेदाध्ययमन्यद्वा स्तोत्र पाठादिकन्तु वा।

मतद्राविड भाषाद्यंगानुवृत्तयुतन्तु वा।

अष्टादशकभाषोक्थं गानं वा परिकल्पयेत्।

विप्रादीनां यथोचितं पुष्पाञ्जलि प्रदानमंशुमति प्रदर्शितम्।

दैविकेन प्रकर्तव्या गर्भगेहे प्रवेशनम्।

पुर्वेणैवं समभ्यर्च्य शिवमन्त्रमनुस्मरेत्।

विप्रागाश्च प्रवेशश्च अर्द्धमण्टपमाविशेत्।

क्षात्रियस्य विशेषेण पुष्पाञ्जलि क्रमेण तु।

मण्टपन्तु प्रविश्याथ स्वद्वारे स्थितिर्भवेत्।

आत्मतत्व तथश्चैव अर्चयेद्गुरु मार्गतः।

वैश्याश्चैव तु स्वद्वाश्च वृषाग्रे वृष पृष्ठके।

गोमयालेपनं कृत्वा चतुरश्रसमान्वितम्।

अर्चयेन्मूलमन्त्रेण गुरुमार्गेण कारयेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शैवे-: वस्त्रं धनं भूमिं दासि दिव्यान्याभरणानि च ।
धूपदीपोपहाराद्यं महानैवेद्यमेव च ।
दत्वा देवाय देव्यै च नरश्शक्त्यानुसारतः ।
यत्किञ्चिदपि देवाय त्वणुमात्रन्तु वा नरः ।
दत्वैव प्रणमेद्देवं नान्यथा शंभुवल्लभः ।
स्नानादि रहितो देवं पत्रपुष्पफलादिकम् ।
दत्वैव प्रणमेद्देव नान्यथा तु कदाचन ।
देवालस्थ निर्माल्यन्तृणाद्यं वा मलादिकम् ।
121a विशोध्यं वापि देवेशं प्रणमे नान्यथा क्वचित् ।
सर्वाभावे वाक्सहायमपि कृत्वा नमेद्धरम् ।
शंभुभक्तो नान्यथा स्यादिति देवानुशासनम् ।
एवं कृत्वा यथाशक्ति पश्येद्देवञ्च भक्तितः ।

निश्वासे-: इन्दुनिभ पञ्चमुख हस्तदशायुक्तं शूलधरटंकमसि वज्रमभयं स्यात् ।
पाशवरदांकुशमणिदहन वामे श्वेतकमलासन सदाशिव स्वरूपम् ।
उपाङ्गं पादुकञ्चैव जगरुञ्जंघमेव च ।
कुमुदं कुक्षिरित्याह बाहुभ्यां कंपकेव च ।
कण्ठं कण्ठमिति ज्ञेयं अधरे अधरं स्थितम् ।
महापट्टिकल्ललाटं स्यात् केशान्तं घृतवारिणा ।
एवं ध्यात्वा नमस्कृत्य तत्पुष्पं वर्जयेत्ततः ।
लिंगस्य दर्शनं प्रात नैशमंहो व्यपोहति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आजन्म जन्म मध्यान्ते सायान्ते सप्तजन्मनि।
एवं यः कुरुते मर्त्य सोन्ते सायुज्यमाप्नुयात।

लिंगपुराणे च-:

यः प्रातर्देव देवेशं शिवलिंगस्वरूपिणम्।
पश्येत्सायाति सर्वस्मा दधिकं गतिमेव वै।
मध्याह्ने च महादेवं दृष्ट्वा यज्ञफलं लभेत।
सायाह्ने सर्व यज्ञानां फलं प्राप्याविमुच्यते।
अर्धमास कृतं पापं दृष्ट्वा पर्वणि सन्त्यजेत।
अष्टम्यामष्टदिवसैः कृतं पापं त्यजेन्नरः।
प्रदोषे शंकरं दृष्ट्वा सर्वपापैः प्रमुच्यते।
मानसैः वाचिकैः पापैः कायिकैश्चमहत्तरैः।
तथोपपातकैश्चैव पातकैस्सं प्रमुच्यते।
संक्रमेदेवमीशानं दृष्ट्वा लिंगाकृतिं विभुः।
मासेन यत्कृतं पापं त्यक्त्वा याति शिवं पदम्।
अयने गार्द्धमासे च दक्षिणे चोत्तरे तथा।
विषुवे चैव तद्दृष्ट्वा प्रयाति परमं पदम्।
नृत्तमूर्त्यादि देवानां तत्तद्ध्यान पुरस्सरम्।
तत्तत्पुष्पोपहारेण कुर्यात्तु प्रणतिन्ततः।

ब्रह्माण्डपुराणे-:

तत्रस्थं दक्षिणामूर्तिं सोमास्कन्देश्वरं शिवम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वृषारूढं चन्द्रचूडं नमस्कुर्यान्नटेश्वरम् ।
मातृसप्तापि दुर्गाञ्च व कं प्रातिमेद्राविम् ।
तथा अपस्मारन्तदूर्ध्वे तु स्वास्थितं सव्यपादकम् ।
कुञ्चितं वामपादन्तु सव्ये डमरुकन्तथा ।
वामे चाग्निधरन्देवं जटानामष्टसप्त च ।
सव्ये गंगाधरन्देवं वामेबिन्दुसमान्वितम् ।
सर्वावयव संपूर्णं सर्वालंकारशोभितम् ।
जपा कुसुम संकाशमेवं ताण्डव विग्रहम् ।
एकमुख वेदकर विद्रुम स्वरूपं कृष्णमृगटंकवरदाभय चतुष्कम् ।
लोचनतृतीयसित वस्त्रपरिधानश्चन्द्रधृतमौलि सह सूनुम् ।
पद्मासनं रक्ततनुं द्विनेत्रं श्वेताब्जयुक्तां स हस्तयुग्मम् !
रक्ताम्बरलेपन माल्यभूष्यं स्थितं सहांगे शिवसूर्यमीडे ।
शैवोत्तरे-: विघ्नेशन्दक्षिणामूर्तिं विष्णुमूर्तिं तथैव च ।
ब्रह्ममूर्तिञ्च दुर्गाञ्च पञ्चमूर्तिञ्च वन्दयेत ।
वटविटपि समीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात ।
त्रिभुवनगुरुमीशं दक्षिणा मूर्ति देवं
जननमरण दुःखच्छेददक्षं नमामि ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डास्सप्तमातरः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वीरविघ्नास्थितो ज्ञातः प्रणतार्थिभयावहः।

शुद्धस्फटिकसंकाशं गजवक्त्रञ्चतुर्भुजम्।

लंबोदरं त्रिणयनं पाशांकुशधरं परम्।

वरदाभयहस्तञ्च चलत्कर्णं सदा स्मरेत्।

पीता शक्तिश्च खण्टाध्वजमथकमलं कुक्कुटं प्रासदण्डौ

बिभ्राणं वायुभागे वरभय धनुर्बाण टंकांश्च हस्तैः।

षड्वक्त्रं द्वादशाक्षं शिखिनिशरभवं पाणिभिर्वा चतुर्भिः।

वक्त्रैकं शक्त्यभीष्टं भजतवरयुतं कुक्कुटञ्चादधानम्

कालवर्णं चतुर्भुजयुक्तं शूल डुण्डु भ टंक कपालम्॥

मौलि वह्नि त्रिणेत्र सलग्नं क्षेत्रपालमिमं कमस्थलम्।

ब्रह्माण्डोपपुराणे विशेष उक्तः।

इत्थर्व्वमीशस्य पठस्तवञ्च स्तोत्रावसाने ग्रहभस्मशंभोः

आदाय धृत्वा पुनरेवमेकं प्रदक्षिणान्ते किल चण्डमेत्य

प्रणम्य चाभ्यर्च्य कृतस्तुतिस्सन् स्तोत्रा सवित्वा च

करं करेण। टंकञ्च शूलमथ कुण्डिकयाक्षमालं चण्डेश्वरं

स्मरकरर्दं धृतञ्चतुर्भिः॥ यद्वा कारेण।

पीठादि चण्डपर्यन्तं सेवां कुर्यात्तु देशिकः।

ब्रह्माण्डे। अपि सकलतीर्थशास्त्रिताण्डवाञ्च द्भवभय शमनताहि

ताद्दृष्टलिंगम्। इति संप्रार्थ्य तत्पार्श्वे सन्निविष्टा

द्विनेत्रं द्विभुजञ्चैव शुक्लवस्त्रसु धारिणम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जटामकुटसंयुक्तं शशधर्द्धकृत शेखरम् ।
लंबितं दक्षिणं पादं शयनं वामपादकम् ।
जान्वूर्ध्वे वामपादन्तु शर्वहस्तन्तु टंकयुक् ।
उदङ्मुखः । पञ्चाक्षरजपं कृत्वा ध्यायन्नेव सदाशिवम् ।
डवं देवालयमपि सेवते । कामिके । देव्यालये
देव्यालयेपि कर्तव्यं पूर्वोक्तेन विधानतः ।
सिंहो वा वृषभो वापि वाहनं परिकीर्तितम् ।
ईश्वरांहि मुखन्देवमासीनं वृषनायकम् ।
1298 प्रार्थयित्वा तु तत्पश्चात् भावये द्वारनायिकौ ।
देव्यास्तु द्वारपालौ तु खड्गखेटक हस्तकौ ।
जटामकुटसंयुक्तौ रक्तश्याम विभूषणौ ।
खड्गखेटक धारिण्यौ द्विभुजौ वा चतुर्भुजौ ।
देवोक्त द्वारपालान्वा सर्वाभीष्ट फलप्रदान् ।
ततो देवीं नमस्कृत्य स्तोत्रञ्चैव समुच्चरन् ।
पद्माक्षमालाभय उग्रहस्तां श्यामांगनेत्रत्रय सुन्दराङ्ग्याम् ।
किरीटवक्त्रेन्दु जटाग्रचूडा श्रीकामकोष्ठाशिव शक्तिमीडे ।
कामिके- दिग्देवतासु देव्यास्तु रूपभेदाः प्रकीर्तिताः ।
शिवायतनदेवान्वा गणपषण्मुखोपि वा ।
यास्मिन् दिग्देवता स्थाप्या स्तद्देवी रुद्रविग्रहः ।
वामाद्याश्शक्तयो वाऽपि परिवारव्यवस्थिताः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



निर्माल्य धारिणीन्देवीं यमनीमीशगोचराम् ।

कारणे — भुजद्वयान्निणेतञ्च श्यामला शुभमेव च ।

वामहस्ते तु जानूर्ध्वे सव्यहस्ते तु पुष्पधृक् ।

अथवाञ्जलितं हस्त द्विहस्ते पुष्पधारयेत् ।

चण्डेशीं यमनीञ्चैव ध्यायेदुक्त क्रमेण तु ।

तथा कामिके —

सा देवी श्यामला हस्ता द्विधारिवेलविभूषिता ।

यमनीत्याख्यया बाता धृतनीलोत्पला वरा ।

इत्थं पीठादि चण्डं नमस्कृत्य सन्निधिं गत्वा परायनिमित्तये यथा शक्ति मूलमन्त्रञ्जपेत् ।

देव सक्षप्रवेशेव स्थितौ देवस्य संनिधौ ।

यथा पुनश्च निर्गमे प्रष्टीकरणे शंभुनान्दिनोः ।

भुक्तिं निद्रात्यतीतिश्चाभिचार क्रिया ततः ।

गोपुर प्रतिमाच्छाया लंघनस्पर्शने तथा ।

निर्माल्य लंघन स्पर्शो देव पीठान्तरागतिः ।

प्रमादाभूषणन्तत स्पर्शनं शगवीक्षणम् ।

एक हस्त प्रणामञ्च एकञ्चापि प्रदक्षिणम् ।

अकाल दर्शनञ्चैव वृथा संभाषणन्तथा ।

असत्यभाषणन्तद्व दसत्य श्रवणन्तथा ।

उत्च्छ्वासनास्थितिश्चापि संनिधावासनं परम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वृथा हासो वृथा गानं वृथागान श्रुतिस्तथा।
देवद्रव्ये रागबुद्धिस्तथा विग्रह विस्पृशी।
असतां भूषणं तद्वत् सर्वां वै भूषणन्तथा।
सोत्तरीय नमस्कार प्रदक्षिण कृती उभे।
देवस्य वामभागे तु नमस्कार क्रिया जपः।
दुर्देवतोपासनञ्चेत्य पराधाः प्रकीर्त्तिताः।
अज्ञानतः कृतानेतान् सहते करुणानिधीः।
स्वतन्त्रमावर्तयतां शतरुद्रीय जापिनाम्।
बुद्धिपूर्वं कृतवतां भोगेनैवा स न संशयः।

शैवपुराणे-: देवालयास्थितं यत्तु तृणाद्या गापि विना नाहरेत्।
देवस्थानु प्रयुन्तञ्च हत्वा यात्युल्बण न्तमः।
देवालयगतं पत्रं पुष्पाद्यञ्च तथैव च।

आग्नेय पुराणे-:

शिवचार्य विधाती च शिवद्रव्यापहारकः।
रौरवं नरकं याति यावदाभूतसंप्लवम्।
क्षणं क्षणार्द्धं बोमर्त्याः शिव कार्य परो भवेत्।
दिव्यं वर्षशतं वस्त्वेत् शिवलोके महीयते।

मतंगे-: लिंगं माहेश्वरी प्रीत्या नमस्कारेण वेष्वथ।
व्रजयान्ति नरा ययास्तेपि सिद्धा गणेश्वराः।
रमन्ति विविधैर्भोगैः प्राग्व स्थान मुमापतेः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शतरुद्रान्तिकस्थानं सकृल्लिंगार्चनाल्लभेत् ।
आलये शिवलिंगस्य भक्त्या निर्वर्त्यते शुभे ।
श्रीकण्ठपदमारुह्य सुखमत्यद्भुतं लभेत् ।
एवं भक्तिविभागेन लिंगे चाभिरतस्सदा ।
शिवधर्मोत्तरे-:
ये कुर्वन्ति नमस्कारमीश्वराय क्वचित्क्वचित् ।
संपर्कात्कौतुकाल्लोभात् तद्विमानं लभन्ति ते ।
नाम संकीर्तनं वापि प्रसंगेन शिवस्य यः ।
कुर्याद्वा तन्नमस्कारन्नतस्य विफलं भवेत् ।
इत्येता गतयः प्रोक्ता मत्त्या शिव कर्मणाम् ।
अत्यल्पाल्पतरेणापि पुंसामीशानुभावतः ।
ताराक्षपविमानानां दृश्यन्ते दृश्यन्ते खलुकोटयः ।
अष्टाविंशतिरेवोर्ध्वं सुदीप्तास्सुकृतात्मनाम् ।

इत्थं सेवां निर्वर्त्य शिवालयं निर्गत्य मार्गस्थान्वि-
ज्ञानस्तेन विरच्यास्तपरञ्जरमध्यगोब्रतं गच्छेत् । अंशु-
मत्तन्त्रे-: आयान्तं निर्गमं गत्वा स्वगृहं प्रविशेत्ततः ।
तथा कामिके-:

व्रजेदेवालया न्विप्रान् गृहस्थात्मीय मुत्तमम् ।

॥ इत्यात्मार्थपूजापद्धत्यां शिवालय सेवाक्रमविधिः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



॥ शैव सिद्धान्तश्रवणम् ॥

अथ यावन्मध्याह्नन्तावच्छैवसिद्धान्तश्रवणादिकं कुर्यात्। तदुक्तं क्रियाकाण्डे

अथ विद्यां समभ्यर्च्य पुष्पगन्धस्रगादिभिः।
सम्यक् संपूजयेद्भक्त्या गुरोश्चरणपंकजे।
मध्याह्नसमयं यावत् कुर्यात्स्वाध्यायमीप्सितमिति।

स्वच्छन्दे-:

सिंहस्थाञ्चिन्तयेन्नित्यमुभयार्थफलप्रदाम्।
आह्निकं न तु लंघेत सन्ध्याञ्चैव वरानने।
अदीक्षितानां पुरतो नोच्चरेच्छास्त्रपद्धतिम्।

तथा वीरतन्त्रे-:

अदीक्षितैर्नश्रोतव्यन्नदेयं न प्रकाशितम्।
शिष्याणाञ्चैव दातव्यं समासात्कथयामि ते।

130a चिन्त्यविश्वसादाख्ये-:

यावत्कालाच्छैवज्ञानं हृदि भवति तस्य वै।
तावत्कालञ्च कर्तव्यं श्रवणादि विशेषत इति।

कालोत्तरे-: उल्काहस्तो यदा कश्चिद्द्रव्यमालोक्यतां त्यजेत्।
ज्ञानेन ज्ञेयमालोक्य पश्चात् ज्ञानं परित्यजेत्।

ज्ञानो परज्ञानमित्यर्थः। तदुक्तन्देव्यां मते-

ज्ञानं द्विविधमाख्यातं परं वा चापरं स्मृतम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



परमञ्चैवाव बोधाख्यमपरं शास्त्रमुत्तमम् ।
अस्य ज्ञानस्योत्पत्तिप्रयोजने स्वायंभुवे निरूपिते ।

यथा —: अथात्ममलमायाख्य कर्मबन्धविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवज्ञानं प्रवर्तते ।

कामिके—: शिवरुद्रात्मिकन्तत्तं अष्टाविंशति संख्यकः ।
यद्यप्येको भवेद्वक्ता श्रोतृभेदादनेकधा ।
अवतीर्णमिदं मेरौ प्रणवा अवतारकैः ।
क्रिया-चर्या समोपेतं योगज्ञानान्वितंपरम् ।

मकुटे—: श्रोतारश्शिवभेदानां पारंपर्यास्त्रयः त्रयः ।
द्वौद्वौ तु रुद्रभेदानां बह्युत्तर बहुत्तरा ।

सप्ताधिकं द्विशतसंख्या । तदुक्तं मकुटे—:
त्रिभेदं कामिकं प्रोक्तं पञ्चभेदञ्च योगजम् ।
षट्भेदाञ्चिन्त्य तन्त्रं हि सप्तभेदन्तु कारणम् ।
अजिताख्यञ्चतुर्भेदं दीप्तञ्च नवभेदकम् ।
सूक्ष्ममेकभेदं प्रोक्तन्दशभेदं सहस्रकम् ।
अंशुमान् सूर्यभेदं स्यात् सुप्रभेदन्तु भेदकम् ।
अष्टभेदन्तु विजयं निश्वासञ्चाष्टभेदकम् ।
स्वयंभुव द्विभेदं स्या वक्ष्यते तु पृथक् पृथक् ।
ललितं गुणभेदं स्यात् सिद्धञ्च युगभेदकम् ।
सन्तानं सप्तभेदञ्च शर्वोक्तं पञ्चभेदकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पारमेशं सप्तभेदं किरणं नवभेदकम्।

वातुलं रविभेदं स्यात् वक्ष्यते तु पृथक् पृथक्।

अभेदात् क्रमात्प्रोक्ता सप्तोत्तरशतद्वयम्'

तथा सिद्धान्तशेखरे -:

सप्तार्चिर्भूतवार्द्धिमुनिजलनिधिभिर्दन्तशीतांशु दिग्भि-

र्लिङ्गार्चिस्सोमभोगैर्क्षितहुतवहैर्युग्मकामस्तु नेत्रैः।

पश्चात्सार्कं कलाभिर्मनुदिनसकला वह्निना चाब्धिधर्मै

र्बाणैर्लेखस्सरन्ध्रैस्तपनसुगुणितैरागमानां विभेदाः॥

एतानि प्रत्येकं ज्ञानक्रियायोगचर्याभिश्चतुष्पदानि। एतेषां ज्ञानपादेन तु परमेश्वरस्य स्वरूपञ्च विज्ञानकाल प्रलयकाल सकलानां स्वरूपञ्चाणव कर्म्य माया बैन्दव रोधशक्त्यात्मक पाशस्वरूपं शक्तिस्वरूपञ्च शिवशक्तिमारभ्य प्र पृथ्वीतत्वान्तरं षट्त्रिंशत्तत्वानां सृष्टिप्रकारश्चैतेरात्मनां भोगसाधितैर्भवितव्यानाञ्च भुवनानां भुवनेश्वराणां स्वरूपञ्च भुवनानां योजना परिमाणानि च प्रलयप्रथममध्यमप्रलयमहाप्रलयानां स्वरूपञ्च तत्प्रलयानन्तरं सृष्टेः कारञ्च पाशुपतमहाव्रत कपालशास्त्रवचनञ्च तत्तत्वञ्च तत्प्रोक्तार्थं पूर्वपक्षीकृत्य प्रमेयनियमश्च प्रोच्यन्ते योगपादेन तु एतानि षट्त्रिंशत्तत्वानि च तत्वेश्वराश्चात्मा च परमेश्वरश्च शक्तिश्च जगत्कारणभूतमाया महामाया प्रभावग विषयतत्व सिद्ध्य प्रेक्षणामणिमादि सिद्धि संभव प्राणायाम

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रत्याहार ध्याना धारण जपसमाधि प्रकारमूला धारादिषु धारण-
मवस्थानञ्च प्रोच्यते । चर्यापादे तु प्रायश्चित्तं पवित्रारोपणं
प्रतिष्ठा च शिवलिंग लक्षणञ्च उमामहेश्वरादि व्यक्तलिंग लक्षणञ्च
स्कन्द नन्द्यादि गणेश्वराणां लक्षणञ्जपमाल योगपट्ट दण्ड मण्डलादि-
लक्षणञ्चान्येष्टि शिवश्राद्धानि चोच्यन्ते । क्रियापादेन तु संस्कार-
निर्वाणदीक्षाभिषेकाश्च तन्त्रावतारमनाम् । भोगमोक्षोपाय दीक्षाश्च
प्रोच्यन्ते मन्त्रोद्धो न्यस्नान सन्ध्यावन्दन पूजाजप होमार्चनञ्च भूमि
परिग्रहं समयविशेष व्रतानि । अथ शिवज्ञानानि ताम्रनिर्मित
पात्रै र्वा भूर्जपत्रैर्वा श्री तालिपत्रै र्वा यथा आद्यादि संभवम्
संलक्षणानि संपाद्यतेषु सलक्षया लेखिन्या वा मष्यादिना वा
नागरादिलिपिना विलिख्य पठितव्यानि तदुक्तं सन्ताने । इदानीं
पुस्तकं वक्ष्ये समासाच्छृणु सुव्रत । द्वाविंशत्यंगुलन्दैर्घ्यमानां-
गुलेन कारयेत । तत्पुस्तकस्य विस्तारं चतरंगुलमुच्यते ।

गभिस्तुलक्षणैर्युक्तं लक्ष्मीभद्रमिति स्मृतम् ।
एकविंशतिरङ्गुल्यं विस्तरन्तुत्र्यंगुलम् ।
श्रीकरन्तं विजानीयामुत्तमा मध्यमा मध्यमान्वितम् ।
विंशत्यंगुल दीर्घं स्यात द्ववलीनं त्र्यंगुलम् ।
चन्द्रकान्तमिति ज्ञेयमुत्तमाधमान्त्विदम् ।
मध्यमस्योत्तमं वक्ष्ये शृणु सर्वांगसुन्दरि ।
अष्टांगुलायामं सार्धमद्व्यंगुलन्तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नलिनान्विति विख्यातं मध्यमं वक्ष्यतेधुना।
सप्तादशांगुलायामं तयपञ्चांगुल द्वयम।
लक्ष्मी निवासमित्युक्तं धृ धर्मोत्तममुच्यते।
130b चतुर्दशांगुलायाममंगुल द्वय विस्तरम।
उमा भद्रमिति ख्यातमध्यमस्य तु मध्यमम।
तयोदशांगुलयामं यवहीनद्वयांगुलम।
शचीभद्रमिति ज्ञेयं नवधा प्रोच्यतेधुना।
इभिर्लक्षणैर्युक्तं सर्वसंपत्करन्नृणाम।
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्शिव इव च।
कालरुद्रो नीलरुद्रः प्रलयानलसर्वदा।
अधिदेवास्समाख्याता शक्तयामधुनोच्यते।
वामज्येष्ठा च रौद्री च काली कलविकरिणी।
बलविकरिणी बलप्रमथिनी सर्वभूतमनोन्मनी।
विश्वामित्रो धवालमीकः कार्यपञ्चांगिरस्तथा।
गौतमो गालवो गर्ग्यो वसिष्ठश्शौनकस्तथा।
देवताशक्तयश्चैव ऋषयः कीर्तिताः क्रमात।
आयव्ययादि यत्कर्म यत्नेन तु परीक्षयेत।
इभिस्तु लक्षणैर्युक्तं पुस्कं संग्रहे बुधः।
भूर्जपत्रेण कुर्यात्तु मेरुपत्रमथापि वा।
अथवा तालपत्रन्तु गृह्णीयात्तु विशेषतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा चिन्त्यविश्वसादाख्ये -:

स्वप्रमाणेन कर्तव्यं तालपत्रादिना भवेत् ।
ताम्रेण वाथ कर्तव्यं सुषिरद्वय संयुतम् ।
पत्रमानञ्च तु कृत्वा तत्पुरस्तिविधं भवेत् ।
चतुरिते भागयोर्मध्ये मध्यञ्च सुषिरं भवेत् ।
आयामं पञ्चधा कृत्वा तद्द्विभागेन वा भवेत् ।
त्रिभागेनैक भागेन कर्तव्यं युक्तिपूर्ववत् ।

सन्ताने -: जाती च क्रमचं वापि उशीरन्बालिकेरकः ।
प्रायाम समं कृत्वा यावन्मात्र घनं भवेत् ।
पार्श्वयो स्तु वयोक्तव्य दर्पणोदरवत्कृतम् ।
जातिलिंग हरिश्यामो चित्रयेल्लक्षणान्वितम् ।
कार्पासस्सूत्रं गृह्णीया द्रज्जुं कृत्वा विशेषतः ।
सप्तविंशति सूत्रैस्तु उत्तमं रज्जुरुच्यते ।
अष्टादशेन सूत्रेण मध्यमं रज्जुरुच्यते ।
नवसूत्रेण संयुक्तं अधमं रज्जुरुच्यते ।

अचिन्त्यविश्वसादाख्ये -:

रज्जुप्रमाणं लेखिनं प्रमाणञ्च प्रवक्ष्यते ।
यवोदरप्रमाणेन रज्जुं कुर्याद्विशेषतः ।
षोडशांगुल विस्तारं पीपिकाकृति मध्यमम् ।
समं हि त्रीलिनान्तस्य लक्षणञ्चोदशं ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तीक्ष्णे नैव च कर्तव्यं सुदृढं दोषवर्जनम् ।
सलुत्ययोस्तु नरा च समतारं समान्वितम् ।
सन्ताने च-: लेखक्रमन्तु वक्ष्ये यथावदनु पूर्वशः ।
कुङ्कय सेन कर्तव्यं नाराचं तालमातृकम् ।
यत्र -: चतुरङ्गुल पत्ति स्या द्व्यंगुलम्ब तु पीठकम् ।
षोडशांगुलनालं स्यात् इत्येतल्लेख्य लक्षणम् ।
अथवा त्रस्विणाश्चैव कुलिकाभिर्विशेषतः ।
शिवज्ञानासनन्दोषं तन्त्रे प्रदर्शितम् ।
तन्त्रासनाय दण्डस्य दैर्घ्यमष्टादशांगुलम् ।
द्व्यंगुलञ्च परीणाहं सर्ववृत्तन्तु गात्रकम् ।
सुवर्णरजतैर्वापि ताम्रैर्वारकुटैरपि ।
दण्डाग्रे मुकुलं कुर्यात् पद्मपत्रै र्विचित्रितम् ।
पञ्चधा विहले दण्डमेकांशं चोर्ध्वजस्त्यजेत् ।
तन्मानं विसृजेत्पाद त्रिभागे रज्जुमण्डनम् ।
सुषिरद्वय संयुक्त द्वारे रज्जुविनिर्गमम् ।
नाना तन्तुसमायुक्तन्नाना ग्रन्थसमायुतम् ।
एवं तन्त्रासनं प्रोक्तं युक्त्या शेषन्तु कल्पयेत् ।
शिवधर्मोत्तरे-:
शस्यन्त्रासनासीनं तन्मध्ये पूज्य पुस्तकम् ।
एवं लिखेद्वाचयेद्वा कृत्वा पूजा दिने दिने ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चतुरस्रौ समै श्रृंगैर्नाति स्थूलैर्नवा कृशैः।
संपूर्णावयवैः स्निग्धैर्नाति विक्षिप्तसंहतैः।
मात्रानुस्वारसंयोग ह्रस्वदीर्घादिलक्षितैः।
नन्दिनागरकैर्वा - - लेखयेत्त्वथपुस्तकम्।

कामिके-: लिखेत्तु लिखया वापि देशिकश्शिल्प डाव वा।
शुभवारक्षयोगादावारभेदनुकूलके।
पशुगालैव येनैतच्छिवज्ञानं प्रयत्नतः।
नानादेश समुद्भूतैरक्षरैः कान्ति संयुतैः।
लेखये ह्जुपंक्त्यानां पुत्रीभ्रातेन लेखयेत्।
गन्धाद्यैः शिवमभ्यर्च्य मातृकां शिवरूपिणीम्।
वस्त्राद्यैर्दीक्षिकश्चेष्ट्वा पुत्रिकामपि पूजयेत्।
नाशुद्धं लेखयेद्विद्वान् यथा लिखितपाठकैः।
शिवज्ञानस्य कालेन प्रणष्टस्य प्रमादतः।
पीनातिरिक्तवर्णस्य लिखितस्य प्रमादिना।
प्रमादाधीतपाठस्य नाशतस्याल्प बुद्धिदः।
अल्पज्ञानं समोपेतैराचार्यैरशोधितस्तथा।
व्यर्थपदैरुपेतस्य पुनरुक्तं स्वपार्थतः।
पूर्वान्तरविरुद्धस्य स्वासिद्धान्त विरोधिनः।
छन्दसादिवं नष्टस्य शब्दार्थं निहतस्य च।
इत्येवमादिभिः दोषैरुपेतस्य क्वचित्क्वचित्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यः करोति पुमान् सम्यक् संस्कारन्देशिकस्सुधीः।

131a शिवतत्त्वार्थं विद्यान्यस्सविद्या परमेश्वरः। एतत् ज्ञानमवलंब्य पञ्च प्रकारोऽपि ज्ञानमन्त्र प्रवर्तन्ते। तथा शिवधर्मोत्तरे-

अध्ययनमध्यापनवाक्या श्रवण चिन्तितम्। इति पञ्च प्रकारोयं ज्ञान यज्ञः प्रकीर्तितः।

सर्वेषामपि यज्ञानां ज्ञान यज्ञो विमुक्तिद इति

तत्र प्रथममार्थिजिज्ञासकला श्रवणम्। शास्त्रार्थ प्रवृत्तिकाले तर्केण चिन्तनम्। अर्थनिश्चयानन्तरं निधिध्यासन एवं तेषु सत्सु समाप्तिकाले ज्ञानस्य तु निष्ठाभवेत्। तदुक्तन्तत्रैव।

आरंभकाले श्रवणं क्रियाकाले विचिन्तनम्।

निश्चयोद्भवानन्तरस्य निष्ठाकाले प्रसन्नतेति। अथ व्याख्यानक्रमः। जीर्णादि दोषरहिते कुरु रूपलेपनादि पवित्रते अदीक्षित श्रवणं वर्जिते भूतले तच्छादन कृतमर्यादात्मकपरिध्यन्तरस्थं परमेश्वरं गुरुं गणेश्वरञ्चाभ्यर्च्य व्याख्या क्रियोपयोगिसूत्रादिपुस्तकं गुप्तसुत्सूत्रं विधायोपरि कस्यचित् भूयादंग वस्त्रेति कृतार्षं प्राङ्मुखः प्रारभेद् गुरुव्याख्यामसंबन्धार्थोक्तपूर्वकम्। ज्ञातो भूयादनुस्रोतो भेवात्संख्यानमेव च प्रवृत्तये गुरुं स्वञ्च स्तोवि स्या त्वदकीर्तनः। स्रोतांसि कामिकादूर्ध्व सितांगादि प्रदक्षिणम्।

समोहात्युत्तरं प्राच्यान्तो तालादि सुविस्तरम्।

आव्याञ्चण्डासि धारादि चण्डनाथं परिग्रहम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शैवं मन्तोस्थ्वरं गाण दिव्यमार्षञ्च गौह्यकम् ।
योगिनो सिद्धगौलञ्च स्रोतांस्यष्टौ विधुर्बुधः ।
प्रतिस्रोतो यार्थिनोता वानिश्चूयाद्भिर्थागराः ।

मतंगे-: पठेत्तु तदनुज्ञात शुचावदेशे शुचिस्थले ।
प्रच्छन्दे प्रजने रम्ये आवितेनान्तरात्मना ।
समीपेन परस्नान्तु न कुर्या थापनं बुधः ।

तथा सर्वज्ञानोत्तरे-:
विविक्ते निर्जनेरम्ये पूज्यं विद्याधिपं गुरुः ।
जितेन्द्रियश्शुचिस्ताता शिवज्ञान तु श्रावयेत् ।
श्रोतव्यञ्च तथा भूते स्त्वचि तैस्तत्परायणैः ।
आदावन्ते च संयोज्य गुरुं सद्भावितैरिति ।

तथा किरणे-:
विधिवन्नाम्यतः पश्चात पठेद्वा शृणुयादपि ।
शिवशास्त्र मधान्यंवा सामान्यं सेश्वरञ्च यत् ।
योगपीठगुरोः कार्यं न्देर्घ्यं षट्त्रिंशदंगुलम् ।
चतुरंगुल विस्तीर्णं पत्र वल्ली विचित्रितः ।
हस्तमात्रोच्छ्रयार्दकं कृत्वा तद्गत कोणयोः ।
शंखवलय कृताटोपं बाह्ये पद्मलयोर्नलम् ।
गुरुणा वा गुरोः कार्यञ्चतुरं शक्तदंगुलम् ।
योगपीठयतः पूर्वं तत्षडंगुल विस्मृतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ततस्थं पूजयेत्पूर्वन्देवशास्त्रमिदं गुरुम्।
स्वगुरूञ्च नमस्कृत्वा व्याख्या कार्य घटादिभिः।
यथाव द्बुध्यते शिष्य स्तथा व्याख्यां समारभेत्।
शिष्योऽपि सम्मुखो भूत्वा ज्ञानप्रच्छेदिच्छिवं गुरुः।
शृणुयाद्येन चित्तोऽयं समाप्तिर्यावदेव तु।
पृष्टस्य संशये जाते पृष्टसञ्चो यथैव वा।
प्रतिबन्धनविच्छिन्नं पादाचार्यस्य सम्मतम्।
तत्समासेन विश्राम्य गुरुन्नत्वा क्षमापयेत्।

ततः प्रथमदिने त्रीणिमूलसूत्राणि द्वे वा ऽर्कं वा व्याख्याय -
स्समापयेत्। शैवानां कामिकं पूर्वं अथोद्भव चिन्त्यकम्।

करणा ज्ञानमजितं दीप्ताख्यं सूक्ष्मकं परम्।
सहस्रमंशुमान् संज्ञं सुप्रभेदमथा विदुः।
रौद्राणां विजया पूर्वं निश्वासं पारमेश्वरम्।
स्वायंभुवं तथाग्नेयं वीरभद्रं सरोरवम्।
मकुटं विमलाख्यञ्च चन्द्रभासाख्यमेव च।
मुखं बिंबकमुद्गीतं ललितं सिद्धसित्वपि।
सन्तानं नारसिंहञ्च परं किरणमेव च।
तदारभ्य चिरं नाति व्याकुर्यात्प्रथमे हनि।
प्रारंभेपि तद्संप्राप्ते प्रतिपन्नाति मातृकम्।
त्रीणि मूलाहि सूत्राणि द्वे तथैकमथापि वा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्यायोपरमेद्व्वूर्ध्वं विदान्विद्यै विरुध्यते ।
यत्र बीजं यथा स्कंधो महतन्तार्थपादपः ।
आहाति मूलसूतन्त्व यथा शब्दाद्यलंकृतम् ।
तस्याद्देशिकमन्यस्स्यात् संख्या संज्ञाति वाचकम् ।
तल्लक्षण स्वरूपो मित्तिस्तदन्यो भाव्यसंग्रहः ।
श्रूते य उवं यो धीमो तावुभौ हतकल्मषौ ।
लोकप्राप्यशो दीर्घं विशोतात्वामबांकरम् ।
तदूर्ध्वदिनेषु अध्वालक निराधार प्रमादितामसक्षात धृक् ।
व्यापकपालक गालव पौरेयानुमिति पावकाम् ।
अविचारादि नामकारिमिष्ट्वा सुशिक्षितशोधन सूतप्तस्त्वं पूर्वोक्तपीठ
यन्त्रोपरि निधाय देशिकस्वयम् । प्राङ्मुख उदङ्मुखोवासीनः
कृतार्थं शिष्यं सम्मुखमवस्थाप्यागैत्यादिनाद्य संस्कृत प्राकृतादि
131b तत्तद्देशो चित भाषारूपै शिष्यान रूपैः परम. न्तरल दिव्यमादि रूप
षट्प्रकार संबन्धाभि धेय प्रयोजन वर्णन पुरस्सरं व्याख्यामुपक्रम्य
कामिकादूर्ध्वस्रोतोसितांगादि दक्षिणस्रोत स्वं मोहादुत्तरस्रोतालादि
प्राच्यस्त्रोतश्च गुडासि धारादि पश्चिम स्रोतो रूपाणि पञ्च
स्रोतांसि प्रतिस्रोताष्टविधानि श्चैमन्तोश्वरगणादि न्यार्दगौह्य
योगिनी कौलसिद्धैकाख्यानि अ स्रोतां विवस्वगुरुक्रमञ्च
शास्त्रप्रवृत्तिहेतुं बदेत् । तदुक्तं कामिके
गोमयालिप्त भूभागे रंगरेखा समान्विते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रकीर्ण पुष्पप्राकारे सिन्धूपेन च धूपिते ।
ज्वाल दीप समोपेतरुद्र श्चैव समावृते ।
न समीपे पशूनान्तु न कुर्याद्व्याख्यां बुधः ।
अध्यापये च्छने शिष्यान् शिवभक्त प्रबोधयेत ।
शिवविद्यातु सोक्ष्म विद्यादानन्तदुच्यते ।
वस्तुतै श्राविडै र्वा मध्यदेशा भाषा प्रकारजैः ।
प्राकृत प्रभव शब्दै र्विशुद्ध स्संस्कृतैरपि ।
अत लौकिकशब्दैश्च याशिष्यमनुरूपतः ।
देशभाष्या युपायैश्च तथाभूताशमैरपि ।
प्रदेशशक्तिभिस्सर्व देशस्थं बोधये बुधः ।

तथा मृगेन्द्रे-:

व्याकुर्यात्द्विषे व भक्तेभ्यस्तत्तार्थं गतमानसम् ।
न्यायतो न्याय वर्तिभ्यः पालयत् गुरुसन्ततिम् ।
जीर्णमिलरसो द्वारे न च विण्मूत्रबाधने ।
नच्छायाध्यान्नाति सारे च न स्नातः कृत मैथुनः ।
शुते महीतले स्थित्वा पशुश्रवण वर्जिते ।
परिध्यन्तं स्थितिश्चेष्ट्या शिवं प्रणवविग्रहम् ।
गणाध्यक्षं गुरुश्चैव कारकञ्च क्रियाश्रियम् ।
पुस्तकं गुह्यमत्सूत्रं विधायोपरि कस्यचित ।
ब्रूयादंगपठस्त्वेति कृतार्थं प्रागुदङ्मुखः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रारभेत गुरुर्व्याख्यां संबन्धार्थोक्ति पूर्वकम् ।

अत्र संबन्धलक्षणं सिद्धान्तसारावल्याम्-

संबन्धाश्च परेशनाथ शिवयोरानन्द सामो महान्
सोमादेवगतोन्तरालविदितो दिव्यान्दिनिर्व्वागमः ।
देवादिव्यगतो व्यादिव्य प्ररूपितो व्युक्तो मुनीन्द्रान् नरे
तस्माच्छिव्यगतो व्यतिदिव्य इति वदशैवागमानां विदुः ।

अन्यत्र पञ्चम प्रकार उक्तः

परो महास्तथा दिव्यो दिव्यादिव्य स्तथैव च ।
अदिव्यश्चेति पञ्चैते संबन्धाः परिकीर्तिताः ।

अध्वालकादीं स्तथा दश विधाच्छिष्यान् सम्यक् परिज्ञाय तत्तत् बुद्ध्यानुगुण्येनान ध्याय दिनानि वर्जयित्वा बोधयेत् ।

अध्वालो निराधारः प्रमादी तामसोपरः ।
क्षत धृक् चापकश्चैव पालको गालव स्तथा ।
पौरथोनुमितिश्चैव पावकांबुश्च कीर्तिताः ।
शिचारवाश्च विज्ञेया शिष्यास्सन्नि तथा दश ।
सर्वतन्त्रार्थ मार्गेस्मिन् अप्राविश्यावगाहनम् ।
ततश्चैतश्च संबन्धात् असंबन्धी नचोक्तिषु ।
प्रविश्या ध्यालको योऽपि प्रोक्तस्वो ध्वालकः श्रीशुः ।
सहीतस्या व्यतार्थस्य स्थातुं नास्ति समाश्रितः ।
प्रोक्तो ह्याधार दौर्बल्यान्निरा धारो महामुनेः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नोत्सहेतत्वमालस्य श्रोतुश्चैव तु निश्चयात् ।
प्रमादी सोच्यते तन्त्रे शिष्यः कारणचोदितः ।
प्रयत्नादपि युक्तस्सन् श्रोतुं निद्रावशस्सदा ।
तिष्ठेत्स्वर्णमानोऽपि स्तात्च्छिष्यस्तामसो मतः ।
आद्यावन्ते च निपुणो यो ज्ञात्वा शास्त्रमीश्वरम् ।
ईषच्छास्त्रमनुप्राप्य विधायाप कुर्वते ।
संज्ञापक्षा तद्धक् शिष्यः पञ्चमं शिष्यवन्ततौ ।
श्रुतान्तवर्त्मनोन्यत्प्राक् प्राक्च्युतार्थं स्वतोन्यतः ।
प्रच्छेयच्छावकः प्रोक्तः शिष्या श्रावकवर्त्मनि ।
तूष्णीं नित्यं विजानोसौ न जनान्वविशकया ।
न प्रच्छेत्स्वल्पमप्यर्थं याति वागित्वमात्मनः ।
स पालक इति प्रोक्त स्ववर्त्म परिरक्षणात् ।
अवधार्य गुरोस्सम्यक् शास्त्रमाम्नाय दर्शनात् ।
न मया किञ्चिदप्यस्मात् श्रुतं स्यात् गालवाक्शिशुः ।
उतश्चेतश्च पुरतो व्याख्या काले कृतो यमी ।
उत्कृष्टवाक् सुसान्निध्यात् गुरोः पौरवत्स्तु सः ।
प्रष्टौ वाप्यथवा प्रष्टौ प्रच्छकाचार्ययोरपि ।
अजानन्नप्ययथैवं स्यात् ब्रूयादनुमतस्सदा ।
यथोक्तं गुरुणा सर्वं सुविचार्याग्निवत्सदा ।
गृहस्ते ऋजुमार्गेण स शिष्यः पावको मतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नियतो येन मार्गेण यत्र यत्र विचारतः।
प्रयाति हृष्टवदनः सोंकुरं बुद्धिवस्ततः।
प्रविचार्य यथा सम्यक् गृहीत्वार्थं गुरोस्सदा।
विचारधीस्समुद्दिष्टा प्रवराशिष्य सन्ततौ।
इति शिष्यास्समाख्याता गुरोरत्र महात्मनः।
मुमुक्षवस्सर्व इति शिवशास्त्र विशारदाः।
येन येन प्रकारेण समर्थश्चावधारितुम्।
तस्य तस्य तथा व्याख्या कर्तव्या गुरुणा सदा।
योवधारयितुं शक्तः पादोक्ति विधिदर्शनात्।
132a तस्य कृत्वा पदच्छेदस्समासश्चाव्ययनन्तरम्।
निकृष्टार्थो यथा न्यायो वक्तव्य स्सुविचारतः।
पूर्वोत्तरपदार्थानां विरोधोक्ति निदर्शनात्।
विशेषवस्तुनो यत्र कोटिद्वयपदक्रमात्।
दृश्यते यत्र तेनार्थो वास्तुना सम्यतां व्रजेत्।
तेन मार्गेत तन्त्रीयं पदं सूत्रमथापि वा।
वाक्योक्ति दर्शनात्सिद्धे वस्तुनो यत्र निर्णयः।
न दृश्यते समीपस्थो वाक्येन मुनिपुंगवः।
तत्मार्थि तेन कर्तव्य हृये ऋषीणां सुनिश्चयः।
षट्सहस्रिकायामविरुद्ध वाक्यं सन्दिग्धं मदुक्तं विषमं समम्।
शास्त्रयुक्त्या प्रकर्तव्या नास्माभि प्रायतो दिशेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अपेत: कारकाणान्तु प्रयोगे दृश्यते तदा।
स्वाभ्युदेशस्तु कर्तव्यो विभक्तानां गुरूत्तमैः।
षष्ठ्यर्थे सप्तमीयोज्य सप्तम्यर्थे तु सा पुनः।
अनेन क्रमयोगेन व्यभिचारसमाचरेत्।
अर्थात् सारतो योज्या कारका सप्तकर्मभिः।
श्रुते नानुमिते नैव तथा व्याहारतस्सदा।
व्याघ्रा कार्या प्रयत्नेन पदे वाक्ये परीहिता इति।

सर्वज्ञानोत्तरे-:

पौर्णमास्याममावास्याञ्चतुर्दश्यष्टमीषु च।
नाध्यापयेद्विरिञ्चिज्ञाना - हृगायन सान्धिषु। अत्र
सान्धिः संक्रान्तीः तथा मृगेन्द्रे-:

नाध्यापयेच्चतुर्दश्यामष्टम्यां पक्षयोर्द्वयोः।
प्रतिपत्पञ्चदश्योस्तु चतुर्थ्यामर्कसंग्रहे।
निर्घातोल्कं पवय पश्चात् छायेषु - - सनम्।
सन्ध्यास्तानेत दिग्दाह परिवेषो बलेषु च।
नीहार प्राक् धनुर्व्योम पुरेष्वेव तद्दर्शनात्।

निर्घात:; अन्तरिक्ष शब्द उल्का दण्डे कार तेजोरूपा महीकंपो भूमि कंपः पश्चात् छाया वारुण्यां दिशि धनुः। एतेष्वेकवासरो अनध्यायः- कीलके चरबिन्दुस्थे त्र्यहं सर्गानुदर्शने।

चन्द्रार्कबिम्बस्थकीलका कृत्युथाद्भुतदर्शने राहुदृष्टौ च

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्र्यहमनध्यायः। पञ्चरात्रं हरिमुखे पवित्रे च मधुद्विषः।
हरिमुख इति इन्द्रोत्सवे हरिप्रबोधादौ व परमेश्वरपवित्रारोहणे च
पश्चात् बिलालव्यालभेकेषु गतेष्वन्तरतो दिनम्। व्याले त्रिफणि
त्रियहं द्विफणि दर्शने त्र्यहम्। अन्तश्शव-श्रुतौ दाहे शवगन्धे खरा-
निलेः। तद्दिगमे विनाश्यात जन्मूर्त्यौ च वासरः। गुरौ वासं ह्रीवी-
भूते आतशिव्यादिके त्र्यहम्। चौवेशजनि सप्ताहं त्रिरात्रं पशुधर्माणि।
वद्सहस्रे-: पूर्णारिक्ताष्टमीभूतषष्ठीच प्रतिपद्वयम्।
व्यतीपातेषु संक्रान्तौ त्रिच हष्वस्कासु च।
सन्ध्यासु नव निर्घाते दिग्दाहे विशेषतः।
मृते मुनिजने सिद्धे मृते महति राजनि।
तारकोल्कानिपाते च धूमकेतु निदर्शने।
नीहारेति बले वायौ तथा काल प्रवर्षणे।
कृकलासाख्य मण्डूक मार्जारै स्त्वन्तरा कृते।
अनध्याये गते सर्पे त्रिरात्रन्दान पूजनम्।
मृतकुर्बास्वने बुद्धे समीपे स्त्री प्ररोदने।
दृष्टे तथा नृपे क्रूरे कारकाणाञ्च दर्शने।
सूद्रवाचगते वेष्टे गोष्ठ चैवं नृपोत्सवे।
गणिकारंगगीते च वान्ति-भ्रान्त्योस्तथान्तरे।
अनध्यायो मितो ज्ञेयो बोद्धव्यमर्च्चनं द्वयेति।
मतंगे-: पञ्चदश्यामथाष्टम्याञ्चतुर्दश्याञ्च पर्वसु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



महोत्सवेषु सर्वेषु सन्ध्यासु च महामुने।
पर्वसन्धिषु सर्वेषु न ध्येयं साधकाग्रणीभिः।
गुरुं विमनसं दृष्ट्वा भ्रातरं वाथ कुतश्चित्।
नाध्येयं भक्तियुक्तेन कारणं ज्ञानमुत्तमम्।
पुण्यकालेषु नाध्येयं नागोत्पत्तेषु सुव्रत।
आपत्सु शिवभक्तानां राज्ञां वा सुमहात्मनाम्।
दोषोत्थाद्यपनेकार्यस्साधकस्यमवोदितः।

मृगेन्द्रे- अनध्याये स्वतन्त्रोक्तविधिना शृणुते मृषा।
शैवं विद्याधिकंहात्यायुर्मृतप्रेतसमनुते।

इदं शिवज्ञानं परशुवास्त्रमिव वादादभिन्नक्लेशनयान्निनानीयमशुद्धजनसमवायक्लोदातरणीयम्। भक्तिश्रद्धायुता यथाशक्ति पात्रपरिशुद्धाय शिष्यायैव दातव्यम्। तथा सर्वज्ञानोत्तरे-

न जल्पाभिवशास्त्रेण प्रकुर्वीत कदाच न।
न चेदातरणं कुर्याद्दशद्धजनसंसदि।
यस्य देवे पराभक्ति निर्वा गुरौ च षण्मुख।
नान्यशास्त्रे यथा शक्ति ज्ञानन्तस्मिन्नियोजयेत्।

शिवधर्मोत्तरे- असंपूज्य शिवज्ञानं ये धीरान्ति लिखन्ति वा।
अन्यायत प्रयच्छन्ति शृण्वन्त्युच्चारयन्ति च।
1326 विक्रीणन्ति च लोभेन कुज्ञान नियमेन वा।
असंस्कृतप्रदेशेषु यथेष्टं स्थापयन्ति च।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवज्ञानकथोपेक्षां कृत्वान्यत्र प्रभाषते।
नाधीयते समर्थस्सन्यः प्रमोदं करोति च।
अशुचिश्चाशुचौ स्थाने यः प्रवृत्तिं शृणोति वा।
इति सर्वं समासेन ज्ञाननिन्दासमं स्मृतम्।

रत्नत्रये-: सिद्धान्तस्सेव्यते सद्भिः शक्तिः पादपवितितैः।

सर्वज्ञानोत्तरे-: उत्तमं सर्वशास्त्राणां शिवशास्त्रात्मजं गुह।
गुह्याद्गुह्यतरं गुह्यं रक्षितव्यं प्रयत्नतः।
नाशिष्याय प्रदातव्यं नाभक्ताय न नास्तिके।
न गुरुद्वेषिणे चैव नान्यशास्त्ररताय।
कृतघ्ना नास्तिकाः क्रूराः निस्सत्याः कलहप्रियाः।
मायाशाठ्यसमोपेतं भ्रमन्ते तन्त्रहारिणः।
पृच्छन्ति मधुरैः वाक्यैः शेषमुत्पाद्य वा पुनः।
तेषां न विश्वसेद्धीमान्यदिच्छेच्छान्तिमात्मनः।

तथा निश्वासकारिकायाम्-:
प्रकटस्वेदरज्ञानं मद्भक्तानां वरानने।
रक्षणीयं प्रयत्नेन तस्करेभ्यो धनं यथा।

मतंगे- समाप्तौ तु गुरोः पादं प्रणम्य विधिमेत्सुधीः।
कृत्वा चैवांग शुश्रूषां पादौ सम्यक् समाप्यते।
एवं यः कुरुते व्याख्यां प्रसन्नवदनस्सदा।
स योग्यो गुरुसन्तानं मार्गमत्र प्रज्ञापितुम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवधर्मोत्तरे-

अधीत्य सगुरुस्तारयेच्छिष्यान अस्मात् संसारसागरात् ।
यश्चैवं शृणुयाद्भक्त शिवार्पितमनास्सदा ।
सयोग्यो गुरुसन्धानमार्गमतत्प्रलापितुम् ।

शिवधर्मोत्तरे- शिवज्ञानं परित्यजति मूढधीः ।
सुरापानसमं ज्ञेयं तस्य पातकमुत्तमम् ।
यश्शृणोति शिवज्ञानन्यायतस्मात्प्रवर्त्ति च ।
तौ गच्छत शिवज्ञान स्थानं नरकं तद्विपर्यये ।
अपिश्लोकं तदर्धं वा शिवज्ञानस्य यः पठेत् ।
वाचयेच्चिन्तयेद्वापि लिखेद्वा लेखयीवता ।
शृणुयादेकचित्तश्च तदर्थञ्च विचारयेत् ।
अन्येभ्यः श्रावयेभ्यश्च तस्य पुण्य फलं शृणु ।
त्रिप्रदत्तां महीं पृथ्वीं सर्वरत्नैस्तु यत्फलम् ।
श्लोकार्धमीश्वरज्ञानात् परं स्तत्फलमाप्नुयादिति ।

शिवधर्मोत्तरे-

यावदक्षरसंख्यानं शिवज्ञानस्य पुस्तके ।
तात्कल्पसहस्राणि दाता शिवपुरे वसेत् ।
दशपूर्वान्समुद्धृत्य स्त्रावश्यांश्च पार्थिमान् ।
स्वर्गेस्थाप्य स्वयं गच्छे दिव्यं शिवपुरं महत् ।
मातापितृस्वसापुतभ्राता धर्मसुहृज्जनैः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सान्तः पुर परीवार सर्वभृत्य समन्वितः।
दिव्यं शिवपुरं गच्छेत् विद्यादानप्रभावतः।
यत्श्रीमपुस्तकवरं मलाख्यं विनिवेदयेत्।
शिवज्ञानाभियुक्ताय तस्य पुण्यफलं शृणु
यावन्तत्पत्रसंख्यातं संख्ययतीवशोभने।
तावद्युगसहस्राणि शिवलोकस्य पूज्यते।
या पत्रमाद्यसूत्राद्यं मषीभाजबलेखनीम्।
शरसन्नासनाद्यंगं शयस्तद्भक्त वेधनम्।
इत्येवमादि यच्चान्या तदर्द्धमुपयुज्यते।
यद्वा तद्वा महत्सूक्ष्मं विना येन तु तद्भवेत्।
तदेकमपि विद्यांगं श्रद्धावित्तानुसारतः।
निवेद्य स महाभागो शिवलोके महीयते।

सूतसंहितायामपि दर्शितः।

लेखनं शिवविद्यायाः प्रदानं पुस्तकस्य तु।
शिवभक्तिरिति प्रोक्तं शिवशास्त्र विशारदैः।
शिव पुस्तक निक्षेपस्थाननिर्माणमास्थिकैः।
शिवभक्ति रिति प्रोक्ता शिव दृष्टि विशारदैः।

उक्तञ्च पुण्डरीकपुरमाहात्म्ये-

शिवशास्त्रं विलिखितं यः पत्राणि प्रयच्छति।
द्विजाय शिव भक्ताय सशैवं लोकमाप्नुयात्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवपुस्तकं स्रुतं वा मषीं वा लेखनीन्तु वा।
पुस्तकस्य तु रक्षां वा दत्वा शिवपुरं व्रजेत्।
शिवशास्त्रन्त्वन्यदीयं रक्षित्वा राष्ट्रविप्लवे।
यः प्रयच्छति पश्चात्सः शिवसायुज्यमाप्नुयात्।
॥ इत्यात्मार्थपूजापद्धत्यां सिद्धान्तश्रवणविधिः॥

———— ॰ ————

अथ मध्याह्निके स्नानादिकं विधाय पूर्ववच्छिवं विस्तरेण पूजयेत्। अशक्तश्चेदष्टपुष्पिकया देवं संपूजयेत्। तथा गमः। मुहूर्तं पञ्चभिर्यातैः कृत्वा मध्याह्निकं विधिम्। षट्सहस्रे प्रातर्मध्याह्नसमये तथा चास्तमिते रवौ।
पूजयेत्परया भक्त्या अष्टपुष्पविधानतः।
दरिद्राणामनाथानां बालस्त्रीवृद्धेषु च।
भोगिनां व्याधिजुष्टानामर्थार्थिनाधितात्मनाम्।
शिवशास्त्रानुरक्तानां नानासिद्धिहितात्मनाम्।
अनुरक्तविरक्तानां कथिता चाष्टपुष्पिका।

अत्र क्रमः- आचम्य सकलीकृत्य अर्घ्याणि प्रसाध्य देवमभिषिच्य पीठे विन्यस्य एकेन पुष्पेणासनमपरेण मूर्तिं पञ्चभिः पुष्पैः नेत्रं विना पञ्चांगानि प्रकल्प्य मूलेन संपूज्य यथाशक्ति विशेषोपचारान् विदध्यात्। तत्र
आसने प्रथमं पुष्पं दातव्यं शुद्धचेतसा।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मूर्तिदानं हृदा कार्यं पुष्पेणैवापरेण तु ।

133a पञ्चपुष्पं प्रदानेन संपूज्य पञ्चांगानि प्रकल्पयेत् ।

शिवन्तथाष्टमेनैव कथिताचाष्टपुष्पिका ।

तथा । आसनमूर्ती मूलांगं नेत्रहीनाष्टपुष्पिका ।

एतानि चाष्टपुष्पाणि सर्वसाधारणानि तु ।

सर्वसिद्धिमिदानीह तथा सर्वाश्रमेषु च ।

यद्वा । पूर्वार्चित पीठस्थन्देवमष्टपुष्पिकया पूजयेत् । तथा क्रिया काण्डे - पूजयेत्परमेशानं कृत्वा स्नानादि पूर्ववत् ।

पूर्वार्चिते तथा देवे प्रदद्यादष्टपुष्पिकाम् ।

अथवा - प्रातः कालार्चिते देवे तत्कालसंख्ययाष्टपुष्पिकया पूजांकृत्वा विसंज्ञानं कुर्यात् रामनाथपद्धत्याम् ।

अशक्तः प्रातरभ्यर्च्य सन्ध्यां माध्यन्दिनीमपि ।

अष्टपुष्पतमेवार्चनापि कृत्वा विसर्जयेत् ।

यथा कथंचित् कृतास्थितु दैवकल्पात्परार्चिते लिंगे नित्य विधिः । क्रियते तदा यमपि तुल्या निष्ठा निध्येत् । संक्षिप्ता विधिः कार्या तन्नु कदाचिदपि मिश्रो विधिः । ~~अन~~ कर्तव्यः उक्तञ्च

अत्वरस्तु न लिंगादौ कुर्यान्नित्यं परार्चिते ।

तुल्यानुष्ठानु वाष्ट पुष्पविधिं समापये ।

क्रियाविद्भिः क्रिया कार्या सिद्धान्तोक्ता न चेतरा ।

यो मिश्रां श्रौत तन्त्राभ्यां क्रिया कुर्याद्विमूढधीः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सुरापानसमं ज्ञेयं तस्यपातकमुत्तमिति।

अथ साधारणलिंगपक्षे साधारणमन्त्रैरेवार्चनं कुर्यात्।

तथा। प्रणवो मातृकामाया व्योमव्यापि षडक्षरः।

प्रासादो घोरमन्त्रश्च सप्त साधारणा मता।

एभिस्संपूजयेद्विद्वान्सर्वसाधारणं शिवम्।

एवं मध्याह्निक विधिन्निर्वर्त्य भोजनविधीतः।

इति मध्याह्निक विधिं कृत्वा भुञ्जीत नान्यथा।

तदनिवर्त्य योऽश्नाति सवनं सुरपूजितम्।

मन्त्रास्तन्नाधितिष्ठन्ति योगपीठव्यवस्थिताः।

इत्यात्मार्थपूजापद्धत्यां मध्याह्निक पूजाविधिः।

---

॥ अथ भोजनविधिः ॥

~~सन्तानिकीं स्मृताः। तथा ज्ञानरत्नावल्याम्-:~~

~~गुरुभिर्यः क्रिया दत्तं शीर्भक्त्या~~

सन्तानिकी भिक्षा भोजनं भिक्षाभोजनमिति द्विविधम्।

सन्तानिकी भिक्षा भोजन विधिः। चिन्त्यविश्वसादाख्ये-:

शिष्यादि सन्ततिश्शैव सन्तानं तान्निवेदितम्।

द्रव्यं यद्गुरवे साहि साहि भिक्षां सन्तानिकीं स्मृताः।

तथा ज्ञानरत्नावल्याम्-:

गुरुभिर्यः क्रियादत्तं शीर्वैर्भक्त्या ह्रतन्धनम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



धान्यग्रामादिकं वन्यैर्भक्तं रुद्रैर्द्विजादिभिः।
भक्त्या दत्तं सदा ग्राह्यं नेतिरैर्मध्यमादिभिः।
देवद्रव्यं गुरुद्रव्यमन्त्यजस्वं विवर्जयेत्।
आत्मार्थं पचते यस्तु ब्रह्महा स च कथ्यते।
देवाचार्याग्निकार्यार्थं तथा च तिथिपूजके।
पाकः प्रोक्तश्च इत्युक्तः स्वयं शुक्लैश्चयेऽन्नैः।
कीटमक्ष्यादिनिर्मुक्तैः रुद्रैर्लिप्ते महासने।
स्वयं पाकः प्रकर्तव्यः शुद्धैरन्यैश्च वा ततः।
शिवधर्मोत्तरे-:
शिवाय सर्वपाकाग्रान्निवेद्याग्नौ च होमयेत्।
कलये यच्चरेज्जातमित्ययं सततं विधिः।
शिवाग्निगुरुविप्रेभ्यस्सर्वपाकाग्रमन्वहम्।
यो निवेद्यात्मना भुङ्क्ते सरुद्रो नात्र संशयः।
अनिवेद्य तु भुङ्क्ते यस्स भुङ्क्ते किल्बिषं नरः।
कृषिवाणिज्यवाणिज्यको या भृत्य जनादिभिः।
पुंसां पापानि वर्द्धन्ते सूना दोषैश्च पञ्चभिः।
सम्मार्जनञ्जनन्तोयन्धाग्नि बन्धन पेषणे।
सूना पञ्चगृहस्थानां नित्यं पापाभिवृद्धये।
शिवाग्निगुरुपूजाभिः पापैरेतैर्न लिप्यते।
अन्यैश्चापातकैर्घोरैस्तस्मात्संपूजयेत्त्रयः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवाग्निगुरुदेवेभ्य यावत्सिक्ताभि संख्यया ।

तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ।

शिवधर्मे -: देवाग्न्यतिथि भैक्षार्थं पचेन्नैवात्मकारणम् ।

आत्मार्थं यः पचेन्मोहन्नरकार्थं च जीवति ।

देवार्थं पचनं येषां सन्तानार्थञ्च मैथुनम् ।

स्वर्गार्थञ्जीवितन्तेषान्नरकार्थं विपर्यये ।

ज्ञानरत्नावल्याम् -:

सिद्धे पाके श्रुते लिप्ते पाके नीते स्रुचिर्गृहः ।

कृतन्यासो घटे स्तोये पाकं मृत्युजितो भवेत् ।

तत्पाकाग्रं समुद्धृत्य शिवायार्द्धं निवेदयेत् ।

शेषार्द्धेन ततो गत्वा ताञ्च चुल्लीं विशोध्य च ।

तत्र शानानलंकृत्वा हृदा संपूज्य तत्र च ।

क्रियाकाण्डे तु -:

अन्यार्थं चुल्लिका होम विधानोषो पकल्पयेत् ।

अत्र क्रमः - विशोध्य विधिना वह्नि चुल्लि भ्रूढलि घरका हृतम् ।

कृत्वाभ्युनग्निना चैतन्यन्ततो रेचक वायुना ।

133b वह्नि बीजंसमादाय कादिस्थानामेति क्रमात् ।

शिवाग्निस्त्वमिति ध्यात्वा चुल्लिकाग्नौन्निवेशयेत् ।

तदधिष्ठातृ वाचक सद्यो जात्युद्भावकाशादिस्थानत्यागर्ग्र्भमादित्यर्थः ।

ब्रह्म शंभुवादे चा तद्बीजेन क्रमात् सद्यवामघोर नरेश्वरान् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नित्यादि वेशयेत् ध्वय शिवाग्निरस्य चुल्लिक इति ।

॥ अथ चुल्लिकहोमः ॥

ओं हां अग्नये नमः । ओं हां सोमाय नमः । ओं हां सूर्याय नमः । ओं हां बृहस्पतये नमः । ओं हां प्रजापतये नमः । ओं हां सर्वेभ्यो देवेभ्यो नमः । ओं हां अग्नये स्विष्टकृतये नमः । इत्यादि पूर्वान्तं संपूज्य स्वाहान्तैरभिरन्नाहुतिः । दत्वा क्षमयित्वा विसर्जयेत् । ततः ओं हां धर्माय नम इति चुल्लिका दक्षिण बाहौ । ओं हां अधर्माय नम इति वामबाहौ । ओं हां सरयपरिगर्ताय नम इति काञ्चन्यादि सन्धान भाण्डेषु । ओं हां जलश्रुताय वरुणाय नम इति जल भाण्डेषु ओं हां महा विघ्नराजाय नमः । ओं हां सरस्वत्यै नमः । ओं हां महालक्ष्म्यै नमः इति द्वारशाखाय तं गृहप्रधानद्वारे मौर्द्वो दुंबरे । ओं हां सुभगे नमः । इति पेक्षिण्यां ओं हां रौद्र-कोट्ट गिरिके नम इति उलूखले ओं हां बलभद्र प्रियाय प्रहरणाय नम इति मुसले । ओं हां मृत्यवे देवचोदिताय नम इति सम्मार्ज्जन्यां ओं हां कामायुधाय नम इति शयनीय शिरसि ओं हां स्कन्दाय नमः स्थलाधिपतये नम इति स्थलमध्यस्तंभस्याधस्तात् । इति वास्तुबलि विदधीत । तथा

धर्माधर्मशरीरश्च चुल्लीं संस्थान भाण्डकम् ।
तोयकुंभं तथा यन्त्री शिला मुसलसंयुतम् ।
उलूखलं मार्जनी युक्त पेषणीं भञ्जनीन्तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अप्रधान द्वारे तु विघ्नेशञ्च सरस्वतीम् ।
लक्ष्मीञ्च द्वारशाखायां द्वारमध्ये महेश्वरम् ।
द्वारयेदुंबरे शक्तिमाधाराख्यं गृहस्य च ।
मध्यस्तंभादयस्कान्त ब्रह्मधो वास्तुनायकम् ।
कामं स्वशयनागारे तु खड्गे खड्गवत्यासनम् ।
यानुस्ववाहनञ्चैव कुमारी दीपविज्वलम् ।
गन्धपुष्पाक्षतन्तोय धूपदीपोन्नकादिभिः ।
पूजयन्त्या श्रमस्थाञ्च सर्वसंपत्कराय चेति ।

अथ धौतपाद स्समाचम्य कृतन्यासो गोमयालेपशुद्धं पिष्टचूर्णालंकृतं सवितानं सन्दीपं भोजनस्थानं प्रविश्य ब्रह्मादयः। यथाक्रमं चतुस्त्रि द्व्येकरेखां कृतयथोक्तः प्रमाणपीठास्थित ः। स्वस्व पुरोभागे हस्तमौन कल्पितं चतुरश्रमण्डलेषु भस्मकृत -चतु स्त्रि द्व्येकरेखा परिक्रिया दक्षिण पश्चिमोत्तरस्या सर्वे प्रागानना वदेविकादयः पंक्तिपावने प्रवर्णरेकपंक्त्युपविष्टा यथा संभवं कनकरूप्यताम्रलोह पात्रेषु सप्तधाभासित शोधिता घोरमान्त्रित कांस्य पात्रे वा निषेधरहितरंभादि पात्रेषु वा जानुमध्यकरवद्धीरः। स ना वावर्जितभोजनानुपयोगि वत् भुञ्जीरन् । ज्ञानरत्नावल्याम् -:

धौतपाद समाचान्तः कृत न्यासस्समाहितः ।
स्थानमासाद्य पूर्वोक्तं भोजनार्थमुपक्रमेत् ।

षट्सहस्रे -: केशानान्धारणशब्दमण्डनं वा यथेच्छया ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जटाधरस्त यतयो भस्मांगीतशरीरिणाम् ।
जटानां वेष्टनं कुर्यात शिरोमुण्डनवेष्टयेत् ।
सुप्रभेदे-: तत्स्थानं गोमयालिप्तं शुद्धं कृत्वा विशेषतः ।
विष्टपूर्णस्थलं कृत्य सवितानं सदीपकम् ।
अंशुमति - गोमयालेपनं कृत्वा चतुरस्रसमान्वितम् ।
आसनञ्चैव विन्यस्य सापिधाने स दीपकम् ।
किरणे-: भोक्तव्यञ्चेति तत्स्थाने कृतपीठे न मन्दिरे ।
पीठं तद्देशिकानान्तु कर्तव्यं लक्षणान्वितम् ।
षट्त्रिंशदंगुलं पीठं गुरोर्वा त्रिंशदंगुलम् ।
साधकस्यांगुलान्यष्टौ पुत्रकस्य तु विंशतिः ।
कर्तव्यं समवास्य चतुर्विंशत्तदंगुलम् ।
चतुस्त्रेकरेखांकं गुर्वादि समयन्तकम् ।
बाह्यं वृत्तमना कुर्यात सम्मुखं यागपीठ धृत् ।
वत्सरसे-: हस्तमात्रसन्तु वेदाश्रञ्च चतुरेखान्तु मण्डलम् ।
आचार्यस्य तु कर्तव्यं भोजनार्थे तु नित्यशः ।
एकैकरेखया हीनं साधकादिषु कीर्तितम् ।
क्रियाकाण्डे-:
अग्रे परिष्कृतिं कृत्वा परितो भस्मरेखया ।
किरणे - गुरुः पूर्वमुखस्थित्वा पुत्रकः पश्चिमाननः ।
साधको दक्षिणं चक्रस्समयी चोत्तराननः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



13अ ज्ञानरत्नावल्याम् -:

साधकस्सौम्यवक्त्रस्य शेषाः प्रत्यङ्मुखस्थिताः।
प्रागेकतमो वापि नाश्नीयाद् दक्षिणामुखः।
प्रमादाद्यदि भुङ्क्ते स व्याधिभिः परिपीडिते।

कामिके -: यो वेष्टितशिरो भुङ्क्ते यश्चैव दक्षिणामुखः।
सोपानत्कश्च यो भुङ्क्ते तद्वै राक्षस भुञ्जतः।

इति। क्रियाकाण्डे -:

शिवभक्तैस्सदाचारैरदुष्टैश्शैवैस्तपोधनैः।
परस्परमसंकीर्णैस्समुत्कृष्टैरनाकुलैः।
शुद्धाम्नायसमुद्भूतैर्विनीतैर्गुरुवत्सलैः।
सवर्णैरेकया पंक्त्या भुञ्जीतान्तमना मुनिः।

किरणे -: भोजनं यद्गुरो हैमं शैव्यं स्यात्साधकस्य तु।
ताम्रकं पालकस्योक्तं लोहजं समयार्थिनः।
अभावात्ताम्रमेवं वा कांस्यान्नहि तदा पचेत्।
अभावात्कांस्य प्रोक्तं घोरञ्जप्त्वा तु तत्समम्।

क्रियाकाण्डे -: चतुर्दिगाननो मौनी पात्राभावे तु ताम्रजे।
साधारणेऽथवा कांस्ये सप्तधा भस्मशोधिते।
मन्त्रिते बहुरूपेण पात्रे भुञ्जीत भोजनम्।

ज्ञानरत्नावल्याम् -:

रम्भपद्मपलाशाम्रमधूकैः पनसैर्दलैः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुंभी-चंपकपुंनागकूटजाति समुद्भवैः।
ऽवमादिभिरन्यैश्च प्रसिद्धैरेक जातिषु।
अश्वत्थैरण्डभल्लातन्यग्रोधार्क विभीतकैः।
बाम्थे दुंबरसज्जाद्यैन्नस्याद्भोजन भाजनम्।

किरणे-: ऽारण्डाश्वत्थ तुंबर्क प्लक्षकेतकपर्णसु।
न भुञ्जीयात् कदाचिच्च भूमौ वस्त्रे हि भोजनम्।
जानुमध्ये करौ बाऽथ बद्धवीरासनोऽथवा।

किरणे-: मौन मास्थाय भोक्तव्यं साधकादि लयेण तु।
भोक्तव्यं प्रभुणा बद्धा दाचार्येण। यथेच्छया।

अत वीरासन लक्षणं सुप्रभेदे-:

द्विभुजं पतितं वामं पादं दक्षिणतो परि।
स्थितं वीरासनं प्रोक्तं भक्तिकाले विशेषतः।

ततः पातं प्रक्षाल्य घृतेनोपस्तीर्य रुद्रान्नेनापूर्य सव्यञ्जनमन्न-मस्त्रेण प्रोक्ष्य ओं जुं सः मृत्युञ्जयाय वौषडिति सप्तधाभि-मन्त्र्याभिसानामिकेनास्त्रेण प्रोक्ष्य कवचेनाभ्युक्ष्य सव्यभागे गोमया-लिप्त मण्डले ग्रासार्द्धमात्रेणान्नेन नागादिभ्यो बलिमोन्नाग कूर्म कृकर देवदत्त धनञ्जयेभ्य उपप्राणा वायुभ्यां स्वाहेति दत्वा सव्य-हस्त कनिष्ठिका -चुलुकाग्रे गलितजलेन निवेद्य म्मार्धमग्नं शिष्टजल मों महमद्दतोवस्त्रशमासि स्वहेति निश्शब्देन प्राच्य ततः प्राणाग्नि-होत्रं विदध्या-तद्यथा। ओं हां प्राणाय स्वाहा। ओं हां अपानाय स्वाहा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हाँ समानाय स्वाहा. ओं हाँ उदानाय स्वाहा ।ओं हाँ व्यानाय स्वाहा इत्यंगुष्ठमध्यमानामिकाग्रैर्वामकरगृहीत पात्रस्सन् प्राणादीन् सन्तर्प्य शेषान्नमु - ग्निस्थित - ाग्नौ मूलेन जुहुयात् । ज्ञान रत्नावल्याम् - घोरेण सप्तधा जप्त्वा ध्यात्वा मृत्युंजयामृतम् ।

तत्राभिचार्य भक्तादीं प्रोक्ष्य मृत्युंजयादिभिः ।

नेतत्सप्तधालभ्य पानीयञ्च प्रोचयेत् ।

कामिके - ओं जुं सः इति मन्त्रो यद्देवमृत्युञ्जयाह्वयम् ।

डावमेवामृते अस्यादादौ घृतयुतन्तु वा ।

भोजनञ्चाप्य कर्तव्यं त्र्यक्षीरेणामृतीकृतम् ।

तेनामृतं भवत्याशु वागादितं मृत्युदिग्भवेत् ।

अमृतेशेन देवेन बलसंगृह्य यत्नतः ।

ब्रतजप्तं पिबेत्तोयममृती भवति ध्रुवमिति ।

पात्र प्रक्षालनं कृत्वा तन्मध्ये स्नावये घृतम् ।

गुह्यावं पूरयित्वा तु घृतन्तु रभिचार्य च ।

व्यञ्जने समयुक्तन्तत्र तदन्नं परिषिच्य च ।

आत्मनस्सव्य भागे तु गोमयालिप्त मण्डले ।

भूमौ ग्रासार्द्धमातन्तु नागादिभ्यो बलिं क्षिपेत् ।

चुलुकोदकस्त्र वेद्रीमान् नागादिभ्यो निवेदयेत् ।

परिषेचनं ततः कृत्वा अन्नं प्राणेन संस्पृशेत् ।

अमृतोपस्तरणा चैव डावमापोशनन्ततः ।

...

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा । आत्माप्राणस्थितो पानो संस्थिता भूतयोनयः।

उदाने संस्थिता देव समाने पितरस्थिताः।

व्याने च संस्थिता नागास्तथा पाताल वासिनः।

अंगुष्ठमध्यमानाग्रैर्दक्षहस्तस्त्रुवाग्रकैः।

आस्य कुण्डान्तरस्थाग्ने ज्वालामध्येवास्थितान्।

गर्भैकाहुतिभिर्दत्त्वा नस्पृशंतपयेदिमान्।

घृतव्यञ्जनसंमिश्रं शेषमीबाय होमयेत्।

प्राणाग्नि होत्रमित्युक्तमग्निहोत्रशताधिकम्।

पात्रञ्च वामहस्तेन स्पर्शयेत्तु विशेषतः।

मनास्तोत्यवसानान्तु यावद्भुञ्जीत वाग्यतः।

13мb सुप्रभेदे-: पञ्च प्राणाहुतिं हुत्वा प्राणमग्रैस्तु पञ्चभिः।

तत्पात्रस्पर्शनं कृत्वा पश्चाद्भुञ्जीत बुद्धिमान्।

सर्वज्ञानोत्तरे-:

ततः प्राणाहुतिं दत्वा शिवहोमं पुनः क्रमात्।

अस्य प्राणाग्निहोत्र यजमानपत्नी वेदी परिस्तरणकरणकानि सुप्रभेदे प्रतिपादितानि।

आत्मा हि यजमानोऽसौ बुद्धिस्तत्पत्निका स्मृताः।

हृत्पुण्डरीक वेद्याञ्च अन्तस्थाग्नौ सुपूजयेत्।

रोमदर्भान् परिस्तीर्य ओंकारशिव संयुतम्।

उच्चार्य परिषिञ्च्याथ पात्र सु-- मन्त्रवित्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अमृतोपेति मन्त्रेण चुलुकेन जलं पिबेत् ।

तत्प्राणाग्नि होत्रे त्वा अग्रञ्जन शाकादि लशुन च्छत्रकादीनि शास्त्रान्तर निषिद्धानि च वर्जयेत् ।

भुञ्जानो लवणाज्यैन दद्वीत परहस्तेनाश्नीयात् । शीतशेषं न पिबेत् । मक्षिता ममूषितेन्नो दुष्टांशमुद्धृत्य शेषं बुंनाभ्युक्ष्य भस्मना घृतेन वा विशोध्य भुञ्जीत तदानीं म्लेच्छशूद्रान्त्यजस्त्री न रज-स्वला दीना वलोकयेत् । तद्वाक्यन्न कुर्य स्वनञ्च न शृणुयात् । प्रमादादवलोकने भुक्तमुद्धीर्य जलवगाहयेत् । अद्धोच्छिष्टे दर्शने स्नानमेव कुर्यात् । तद्वाक्य श्रवणे वक्त्रस्थं विसृज्याचामेत् । परिमलं सुस्निग्धशब्द सव्य पाणिना भुञ्जीतं तथा किरणे-

त्यक्त्वाग्रञ्जन शाकाद्य लशुन च्छत्रकादिकम् ।

मत्स्य मांसादिकञ्चैव भोज्या शस्त्र विरोधिकृत ।

ज्ञानरत्नावल्याम् –

तथा च शिवपालं मुञ्च लशुनं कावकामिषम् ।

ग्रञ्जनं मधुमत्स्यं वा प्रत्यक्ष लवणन्न च ।

च च च्छत्राकं मिश्रञ्च रक्तनालं पलण्डु च ।

लशुनं श्वेतनालञ्च म - - क्षौद्रन्तथैव च ।

अत्युच्छिष्टोपरि ना दद्या दाज्य सामुद्रकन्तथा ।

नाद्यात् पर्युषितं पद्यं तैलपक्वं बितापनम् ।

पानीयं न तु पानीय क्षालिते न तु पाणिना ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पाते क्षिप्तं पिबेन्तावद्देवताध्यितानन।
परहस्तेन नाश्नीयात् पीत्वोष्णं जलं न तु।
जृंभकासन्नवेजल्पन्तिष्ठेन्दर्नैवोत्कटासनः।
मत्स्य मण्डूकजंबूक नख केश कपर्दकैः।
प्रमादान्माक्षिकाद्यैश्च दृष्टे तत्र क्षिपद्धरेत्।
शेषं भस्माम्बुनाभ्युक्ष्य संघात् क्षालित पाणिना।
असत्शूद्रान्त्यजश्वान पूयस्त्री खर सूकरान्।
चण्डाल चर्मकारादीन् तदनैवावलोकयेत्।
तद्वाक्य श्रवणन्नेष्टं तथा तत्सर्वदेहवानि।
प्रमादादवलोकश्चे ज्ञात्वा तोयेवगाहयेत्।
अशौचिच्छिष्टे यदा पश्येत् स्नानमेव तदामतम्।
श्रुत्वा तद्वाक्य मास्य स्थं त्यक्त्वैवाचामता चरेत्।
आद्यार्दैवेवमाद्यश्च वर्जयन्सम्मुपास्थितः।
स्वल्पं स्निग्ध मश्नीयात् निश्शब्दस्सव्यपाणिना।

शिवधर्मोत्तरे-:

मक्षिका केश संस्पृष्ट पादातोपहतञ्च यत्।
रजः पिपीलिकायुक्त भुञ्जानोऽन्नमवश्रुतम्।
तावन्मात्रं समुद्धृत्य प्रोक्षयेदंभसा पुनः।
आज्याभिघारणात्शुद्धिः भस्मक्षेपण वा भवेत्।

कालोत्तरे-: भोजने दुष्टकेशाश्च चिरांगारनखात्यपि।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सरीसृपाणि सर्वाणि अन्त्ये मक्षिकमत्कुणाः।

यूकाभ्रमरदंशाश्च क्षेपात्शुध्यन्ति भस्मनः।

दधिक्षीरं घृतञ्चैव तैलमधुगुलन्तथा।

नालिकेरञ्च सलिलमुदकञ्चैव दंशकम्।

केशादिभिश्च दुष्टं हि आज्यान्तं मयञ्च तत्।

तावन्मात्रं समुद्धृत्य ~~प्रोक्षयेदंभसा पुनः~~ भस्मक्षेपण शुध्यति।

शिवधर्मोत्तरे —:

गर्भादिसर्व्वसंस्कारे स्नानान्तेव भोजिनाम्।

रजस्वलादि संस्पृष्टं शिवभक्तो विवर्जयेत्।

~~षट्सहस्रे: परोच्छिष्टौ~~

मतंगे — गर्भाधानादि चूडान्त संस्काराये प्रकीर्तिताः।

संस्कारास्तेषु विप्रेन्द्रा न भोक्तव्यं कदाचन।

ज्ञानरत्नावल्याम् —: सिद्धे पाक इति किरणे —

वच्च कार्यं यथा ज्ञानात परोच्छिष्टं विवर्जयेत्।

षट्सहस्रे —: परोच्छिष्टौ न भुंजीत — भीमतैन दोषभाक्।

कालोत्तरे —: गुरुर्न भोजयित्वा तु स्वयमेव तु भोजनम्।

तद्भोजन समस्तं हि विष्ठामेव तु भोजनम्।

अधः पतिति सैनानि रौरवञ्चैव तु गच्छति।

तस्मात्सर्व प्रयत्नेन गुरुभोज्यन्तथा श्रुते।

गुरोस्तु शेषममृतं शास्त्रेस्समुदीरितम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



परोक्षे निवेद्य भुञ्जीयात् चतुरश्रमसंस्थितैः।

एवं भुक्त्वा किञ्चिदुच्छिष्टान्नमादाय प्रेतनरकवासिभ्य स्वाहेति भूमौ निवेद्याप्रक्षालितं हस्तेन चुलुकं ओं हां अमृतापिधानमसि स्वाहेति प्राश्य तच्छेषजलं कनिष्ठांगुलिना सव्यगुल्फस्थ चूर्णादिभिर्हस्तादिकं विशोध्य पादौ प्रक्षाल्यांबु त्यक्त्वा जलं विहायान्यजलेनाचम्य भुक्तदोष विशुध्यर्थं ओं हां कालाग्निरुद्राय स्वाहेति दक्षिणकरांगुष्ठाग्र प्रसृतजलेन दक्षिणपादांगुष्ठाग्रस्थ कालाग्निरुद्रमभिषिच्य भस्मना स्नात्वा सकलीकृत्य परिधा मुद्रां बध्वा नाभिं वामदेवेन नवधावर्त्य अघोरं सप्तधा जप्त्वा मौनं विसृज्य तांबूलादिना मुखं शोधयेत्। तथा प्रेतनरक
135a वासिभ्य स्वाहेत्युच्चार्य मन्त्रकम्। भूमौ क्षिपत्वाल्पमुच्छिष्टं संप्रक्षालित पाणिना॥ अंशुमति -

आपोशानाभिधानञ्च तच्छेषं भूतगं सृजेत्।
आस्यञ्च जलपातञ्च भृंगारकजलैर्युतम्।
हस्त प्रक्षालनं कृत्वा आस्यमार्जनमेव च।
कुलत्थं चूर्ण स्सम्मिश्रमथवा मुद्गचूर्णकम्।
पादप्रक्षालनं कृत्वा तच्छेषं वर्जयेज्जलम्।
पुनर्जलञ्च संगृह्य आचम्य विधिना बुधः।
यावदश्नाति पिण्डानि तावत्पापेन लिप्यते।
कल्पमेव वरो भीयात् त्राणरक्षणमात्रकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्पापस्य विशुद्ध्यर्थं दक्षपादनखाग्रके ।
कालाग्निरुद्रहृन्मन्त्री सव्यांगुष्ठेन सेचयेत् ।
चुलुकोदकमेकस्यात् स्वात्मनः पादमूलतः ।
आरोप्य वामहस्तस्य कनिष्ठान्नाभिमण्डले ।
तामेव दक्षहस्तस्य वामांगुष्ठेन योजयेत् ।
विततौ च करौ कृत्वा दक्षांगुष्ठेन से मुखे ।
परिषेधा समाख्याता दृष्टाहारविनाशिनी ।
प्राणाग्निहोत्रमित्येवन्नित्यमेतदुदाहृतम् ।
शिवमन्त्रमनुस्मृत्य वामेन संस्पृशेत् ।
अन्यग्रहभोजने न्यस्याग्रतश्शिव - - - जपपूर्वं भुंजीत ।
धर्मसंकीर्तनञ्चैव पुराणश्रवणन्ततः । यद्वा वामांगुष्ठं
दक्षिणांगुष्ठाग्राधोमुखजलेन ओं आत्मतत्वाय नम इति सेचयेत् ।
किरणे-: भुक्त्वैवं वामपादस्थमंगुष्ठं वारिणा क्रमेत् ।
दक्षहस्तसमुत्थेनांगुष्ठेनाधोमुखेन तु ।
सेचयेदात्मतत्वन्तु प्रणवादिनमोन्तकम् ॥ अत्रवाले तु
एकहस्तेन कृत्वा सान्धिविधानाच्च दक्षिणेनैकहस्तेन परिधां
उद्धीयादिति केचित् । ज्ञानरत्नावल्याम्-:
अथोद्धृत्य कृतन्यासो गुरुदेवं प्रणम्य च ।
अघोरं सप्तधा जप्त्वा मौनं पश्चाद्विसर्जयेदिति ।
इत्यात्मार्थपूजापद्धत्यां सान्तानिकभिक्षाभोजनविधिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथ नैष्ठिकासादिवृत्यर्थं भिक्षाटनं कुर्यात्।

तत्र तावद्भैक्षञ्चतुर्विधम्। सान्तानिकामयाचितं स्वयन्दत्त माधूकरमिति। तदुक्तं पौष्करे-:

भैक्षञ्चतुर्विधं प्रोक्तं साधकानां महात्मनाम्।

माधूकरमयन्दत्तं सान्तानिकमयाचितम्। तत्र सान्तानिक-भिक्षास्वरूपं पूर्वमुक्तम्। किरात अयाचित स्वयन्दत्तं स्वरूपं चिन्त्यविश्वसादाख्ये प्रदर्शितम्।

अयाचितन्तु शुद्धान्नमात्रेण समान्वितम्।

अन्नादिभूमिपर्यन्तं सा भिक्षा स्यादयाचितम्।

किरातनाकैर्गोपाल वर्त गोपालपुरुषादिभिः।

पतितैश्चाभिशब्दैश्च त्यजेद्दत्तामयाचिताम्।

भिक्षार्थे संप्रविष्टाय आमतं स्वयमेववा।

उपनीता स्वयन्दत्ता सा भिक्षानि परिग्रहः।

पौष्करे-: स्वयन्दत्तं साधकस्य भैक्षं पात्रस्य पूरणम्।

गृहाद्गृहं समुत्तोसि भैक्षं माधुकरं स्मृतम्।

अचिन्त्यविश्वसादाख्ये-:

यदा मधा तदानोपि भङ्गः पुण्यं न बाधते।

तद्भिक्षाधर्मो भूत्वा चादरीत गृहाधिपात्।

शतलक्षण संयुक्त मुपवासस्सदा मतम्।

सदोपवास श्रेष्ठं हि भिक्षान्नं नन्दिकेश्वर।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भिक्षां विधौ विशेषेण माधूकरमनुत्तमम् ।
चातुर्वर्ण्यं चरेद्भैक्षमभिशस्तं विवर्जयेत् ।
एकान्नं नैव भुंजीत बृहस्पति कुलामपि ।
प्रार्थनायुपरोधाद्वा भिक्षाकार्यन्न दोषकृत् ।
अज्ञानीनां गृहे वापि शुद्धा माधूकरी स्मृतेति ।

तथं माधूकरी द्विविधा । करण (कारण) भिक्षा पान्नभिक्षा चेति । तत्र कारणभिक्षा नाम त··· भिक्षा सा बुभुक्षुविषया पूर्वाह्न एव कार्या द्वितीया तु मुमुक्षुविषया प्रत्यक्षस्थे दिवाकरे कार्या तत्र ताम्रजलोहज श्लेष्मवृक्षादिपत्रजान् बुभुक्षु भिक्षा पात्राणि तुंब-कादीनि मुमुक्षु पात्राणि च तानि द्वादशांगुलविस्तारात्यष्टांगुलो-च्छ्रयाणि कर्तव्यानि । किरणे-

कर्तव्यं प्रयत्नाद्य मौनाद्भिक्षाटनं परम् ।
भ्राम्या पादेन तत्तावत् भिक्षा साऽस्मोनिगद्यते ।
करणभिक्षाथवा कार्या बहुदेव शिखा नव ।
तदा पाकस्वयं कार्यास्तिथामारुद्रवा यदि ।

सर्वज्ञानोत्तरे- यदा तु वित्तसंपन्नश्चेद्भिक्षुक् सततं भवेत् ।
वित्तहीनाश्चरेद्भिक्षा ~~साऽस्मिन्निगद्यते~~ कणपक्वान्नकीमथा ।
दातारव्यायामापि कणभिक्षां पक्वान्नभिक्षां वेत्यर्थः ।

इति मतंगे- अथ भिक्षाटनं वक्ष्ये निर्वर्त्य यादीभिर्यद्या ।
कर्तव्यमखिलां कृत्वा प्रत्यक्स्थेतु दिवाकरे ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्याह्नादिकरणे। भिक्षापात्रं तदावश्यं ताम्रं लोहं तथापि वा।

तदष्टांगुलकोच्छ्रायं द्वादशांगुलविस्तृतम्। तथा।

भिक्षार्थं ताम्रजं लोहं ब्रह्मवृक्षादिपत्रजम्।

बुभुक्षोर्विहितं पात्रं मुमुक्षोस्तु बकादि कम्।

भिक्षापात्रं प्रकर्तव्यं ताम्रं वा पात्रकल्पितम्।

ब्रह्मवृक्षपलाशः। तथा कालोत्तरे-:

*पालाशमधुकपत्रैश्च कर्दमाम्रश्च पत्रकैः।

वर्जयेच्च वटाश्वत्थ पिशाचाक्षादिकेसरम्।

अचिन्त्यविश्वसादाख्ये-:

1356 अलाभे लाबुकं पात्रं सकामस्य हितं भवेत्।

मुमुक्षोस्तुंबकं श्रेष्ठं पूर्वोक्तमथवाखिलम्।

अथवापादौ प्रक्षाल्याचम्य भस्मनास्नातः।

कौपीनं परिवर्त्य धृतोत्तरीयस्सन्नद्धजटस्समाचम्य कृत न्यासस्योदितं पात्रं हृदा संहत्यास्त्रेण प्रक्षाल्य निरीक्षणादिभि स्संस्कृत वचनेनाभिमन्त्र्य काषायादि शुद्ध वस्त्रेणावकुण्ठ्य तन्मध्ये डोरानमस्त्रगायत्रीभ्यां सह विनिक्षिप्य वस्त्रदण्डे गायत्रीरक्षितं विन्यस्य दक्षिणकरे पात्रं दण्डच्छत्रं वा वामकरे दधान सोपानत्कशिवं गुरुं ध्यात्वा भिक्षाटनं करोमीति विज्ञाप्य लब्धानुज्ञो गृहीतं मौनोज्वलदस्त्रेण ज्वलन्तं पात्राग्निं चिन्त्य य महास्त्रास्त्रादिकं गृह्णानः पतिताभिशस्त बिवर्ज्योप

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जीर्ण्यादि ग्रह वर्जनम्। चतुर्षु वर्णेषु शुद्धगृहेषु भिक्षामटे ददा-
निष्ठीवन कुत्सन कोप विवादानीं न कुर्वीत भिक्षार्थं स्वहस्तं
प्राप्य भिक्षां दृष्ट्वा स्वपदाङ्गुष्ठाग्रे पश्यन् स्वसंगो प्रस्तव
कालावधिं स्थित्वा गृहान्तरं यायात्। ज्ञानरत्नावल्याम्-:

किं प्रतिग्रह दोषेण किं वा दान फलेन च।
पाकायासेन किं कार्यं

गच्छन्नश्रुतो न पुनरागच्छेत् तत्रैव स्थित्वा भिक्षां
गृह्णीयात्। नव दर्व्यादि दत्तामाददीत भिक्षामटतो भिक्षां न
दद्यात्। एवमन्यान्यापि निषिद्धानि वर्जयित्वा भिक्षां गृह्णी-
यात्। ज्ञानरत्नावल्याम्-:

किं प्रतिग्रह दोषेण किं वा दानफलेन च।
पाकायासेन किं कार्यं बहुदोषाश्रयेण तु।
इत्येतेषु विरक्तश्चेन्महापुण्य जिगीर्षया।
तीर्थं श्रीलिंगाश्रये कृत्वा तृणपर्णमयीं कुटीम्।
तावत्परिकरां भूया यावत्मात्रेण वर्तते।
द्वे पादव्यवहितं प्रतीक्षन् पादमव्ययम्।
बोधानन्दमयं नित्यं विवास्त श्री विवाश्रया।
विशुद्ध भस्मना स्नातकौपीनश्चोत्तरीयकम्।
परिवर्त्य समाचम्य मौनी ध्यात्वा शिवं गुरुम्।
सर्वज्ञानोत्तरे-: हृदिना ग्रहणं कुर्यात् तस्य सततं बुधः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्षालयित्वास्त्रबीजेन कवचेन तु वेष्टयेत्।
ईशानञ्चिन्तयेन्मध्ये गायत्र्यस्त्रञ्च मन्त्रवित्।
अस्त्रन्तु जपेन्नित्यं भिक्षामावर्तयेच्छुचिम्।
अस्त्रदण्डे तु विन्यस्य छत्रो गायत्रीमेव तु।
ततो भिक्षामटे नित्यं भिक्षामावर्तयेच्छुचिम्।
अस्त्रदण्डे तु विन्यस्य छत्रो गायत्रीमेव तु।
ततो भिक्षामटो नित्यं पतिता शास्त्रवर्जितम्।
अशक्ता ग्रामण्यादयः। मतंगे-:
वैद्यनापितगोपालमण्डशौण्डककालकान्।
सन्त्यजेद्भैक्षभुङ्नित्यं गृहं ग्रामणिकस्य तु।
आसीद्वा ह्युषिकुण्ड गोलकांश्च परित्यजेत्।
वृषलीपतयश्चैव कुशलीग्रामयाचकाः।
तथा देवलकाश्चान्ये भ्रष्टशौचाश्च ये नराः।
अन्था ह्यन्तयस्सर्वेत्याज्या भिक्षाभुजां सदा।
मद्यामिषप्रमोदाढ्या न्त्यजन्त्वद्वेष्म यत्नतः।
(कुपतयश्चैव कुर्वीत ग्रामयाचकाः।
तथा देवलकाश्चान्ये भ्रष्टशौचाश्च ये नराः।
अन्या ह्यन्तयस्सर्वेत्
कुक्कुटश्च करोष्ट्रणां गृहे यत्र परिग्रहः।
तद्गृहं न प्रवेष्टव्यं यश्च स्त्री कलुषां मुने।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चातुर्वर्ण्यं मठे भिक्षां भिक्षार्थी साधकोत्तमः।
दुष्टं संगो न यत्रास्ति न स्वाम्नाय वर्जनम्।
देवाग्न्यातिथि पूजाद्यं पात्रशुद्धिश्च दृश्यते।
तस्मिंस्तु ग्राह्यामुने भिक्षा अविचार्य सुमेधसा।
तैलाभ्यक्ता च या नारी निर्गुणी वाथ कुत्सिता।
तस्या भिक्षा सदावर्ज्या नुवादेयन्तु पाणिना।
क्रियाकाण्डे-: न दर्व्या न च हस्तेन कांस्येनाददीत ताम्।
वृषली गर्भिणी म्लान वक्त्राणां न करेण वा।
तदा प्रणामन्नीष्ठव स्पर्शमुन्मार्ग सर्पणम्।
कुत्सनञ्चा न कुर्गीत त्यजेच्चानादि संकुलम्।
न लिंगिभ्यो न च श्रमा देवद्रव्योपजीवनम्।
चातुर्वर्णां शुद्धवर्णां समासाद्य गृहांकणम्।
भिक्षान्देहीति संकल्प्य पादांगुष्ठाग्रलोचनः।
तावत्कालं प्रतीक्ष्येत यावद्गोर्व · · योगतः।
प्रसवं समवाप्नोति ततोन्यत्र व्रजेन्मुनिः।
व्रजन्नपि समाहूतो नागच्छेत्तत्प्रदेशतः।
यत्रमानजनानीतां भिक्षां तत्रैव चाहरेत्।
निभिक्षाञ्चरतो भिक्षान्न दद्यान्न विगर्हिताः।
किरणे-: पात्रे प्रवर्तितं भैक्षं भुगतं यद्विवर्जयेत्।
यावत्पात्रपूरणमात्रं तृप्तिमात्रकं वा भिक्षामादाय तद्ग्रामवासिनाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जनानां शुभं स्मृत्वा स्वाश्रमं प्रविशेत् । निर्माल्याद्युपहतश्चेत

भिक्षापात्रसहित स्नायात । चिन्त्यविश्वसारारव्ये -:

भक्षित्वा पात्रपूर्णान्तमथवा तृप्तिमात्रकम् ।

जगतां शोभनं ध्यात्वा व्रजेत्स्वाश्रममुत्तमम् ।

भिक्षापात्रं शुचि स्थलेच स्थाप्य हस्तापादि प्रक्षाल्याचम्य

136a उद्धूल्य सकलीकृत्य भैक्षं हेदासं प्रोक्ष्य मृत्युञ्जयोऽभिमंत्र्य

मनसा त्रिधा विभज्य देवाय गुरवे निवेद्य शेषस्य परिमित

ग्रासै रुदरस्य भागमेकञ्जलेन भागमेकं वायुसंचारार्थं भाग

मेकञ्च पूरयन्नोदकाभ्यां पूर्वोक्तवत् भुंजीयात् । तदुक्तं

सिद्धान्तशेखरे-: ग्रासैः परिमितैः पश्चात् धूपयुक्तै र्घृतप्लुतैः ।

पूरयेदुदरस्यार्धमुदकेन च ।

प्राणवायुप्रचारार्थं तच्छेषं च न पूरयेत ।

भिक्षाभोजननियमवतो क्वचिदव्येकान्नं न भुंजीत ।

बहिर्हस्तं प्रक्षाल्य हस्तपादादि पूर्ववत्चाचामेत् पुनः ।

इदांभ प्रोक्ष्य तान्दद्यात्छिवाया गुरवे पुनः ।

भोजनं तु ततः कुर्यात् त्र्यक्षरेणाभिमन्त्रितम् ।

तेनामृतं भवत्याशु तद्भुक्त्वा मृत्युजद्भवेत् ।

मौनमास्थाय भोक्तव्यं न चात्यन्त विरोधकृत् ।

मतंगे-: स्वगृहे याचितं भक्त्या यद्दत्तं परेण तु ।

पूर्वोक्तमखिलं कृत्वा भोक्तव्यं नान्यथा क्वचित् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इति षट्सहस्रिकायां एवं भिक्षाटनं प्रोक्तं सर्वसामान्य-
लक्षणम्। नास्ति भिक्षा समं पुण्यं नास्ति भिक्षासमं तपः।
सर्वतीर्थेषु यत्पुण्यं सर्व यज्ञेषु यत्फलम्।
सर्वदानेषु यत्पुण्यं तथा चान्द्रायणादिषु।
तत्फलं कोटिगुणितं भिक्षाशी प्राप्नुयान्नरः।
परके निर्वर्तिते यत्नातिथी यदि पराङ्मुखे।
देवाश्च पितरस्सर्वे यावत्तस्मात्पराङ्मुखः।
प्राप्तकाल न्तु तु दान न्तु मविचारेण यत्नतः।
कुलानुद्धरते सोऽपि दशपूर्वान्दशापरात्।
सर्वेषाश्चैव पात्राणा पात्रञ्चैवातिथिः परम्।
हीनाङ्गो वाथ पूर्णाङ्गो व्यङ्ग्यो विरेखकः।
अविचारेण पूज्या सा सोऽश्वमेध फलं लभेत्।
संप्राप्तकाले यो भिक्षां दूरतः परिवर्जयेत्।
तस्य पुण्य फलं सर्वं गृहीत्वा याति सोऽतिथिः।
अनिष्पन्ने यदा काले योऽर्थयेदविचारतः।
प्रभवः कार्य तेजो हि बहिरुपरतारज्वाचिः।
एवं ज्ञात्वा प्रयत्नेन कार्यं भिक्षाटनं सदा।
सिद्धयस्तस्य सिध्यन्ति भिक्षाशी योजितेन्द्रियः।
सर्व प्रतिग्रहा प्रोक्तां विना भिक्षां शिखि ध्वज।
भिक्षादानं महा दानं भिक्षान्नेव प्रतिग्रहः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उभयोस्तत्फलन्तुल्यं दातृग्राहकयोरपि ।

तस्माच्छ्रद्धा समादाय भिक्षां कुर्यात् सदा व्रती ।

शिवधर्मे - माधूकरञ्च भैक्षञ्च मेकान्न परि वर्जयेत् ।

उपवासात्परं भैक्षं ह्यकान्नं ब्रह्मिणां स्मृतम् ।

अत्र तु । माध्यन्दिनेथवा नक्तं वृत्तौ भुञ्जीत नान्यथा ।

भोक्तव्यं ब्रह्मणां वारद्वयं वीर्यविवर्द्धये ।

सर्वज्ञानोत्तरे-:

आचम्य य हि निष्क्रान्तौ भक्षयेद्दन्त धावनमिति ।

कुश संबोधनं कुर्याद्यदि पर्यादिना सह ।

न सेवेद कदाचिच्च तांबूलं रागकारणम् ।

इत्याद्यात्मार्थ पूजापद्धत्यां भिक्षाभोजन विधिः ।

---

ततो यावत्सायाह्नं यथा शक्ति सिद्धान्तचिन्तनं कुर्वीत । तथा ।

सायाह्न समयं यावत् कार्यं सिद्धान्त चिन्तनम् ।

किरणे-: व्याख्यायोष्णञ्च सञ्चिन्त्य मध्याह्नं समयोत्तरम् ।

स्वशक्त्या शृणुयाद्वापि चिन्तयेद्वा पठेत वा ।

व्याख्यायेति पूर्वाह्न व्याख्यान समाप्त्यनन्तरम् ।

स्व देहस्योष्ण विचिन्त्यो परम्य माध्याह्निक विधिन्तु कृत्वा भुक्त्वा तदनन्तरम् । यथा शक्ति सिद्धान्त-श्रवणं कुर्यादित्यर्थः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सिद्धान्त चिन्तनम्

सायाह्ने त्यावश्यादिकं विधाय स्नानं वा कटिशोधनम् गात्रप्रक्षालनं वार्द्रवाससा देहमार्जनम् कृत्वा। पूर्ववदनुकूल्य सन्ध्यावन्दनार्चनादिकं विधायेवम्। ततो जपालयं प्रविश्य यावन्निद्राय शास्त्रवत् जपध्यानसमाधीन् विदध्यात्।

सर्वज्ञानोत्तरे-:

त्रिहस्तो ह्यतभूतविले शुचिस्त्वार्द्रे महीतले।
सर्वलक्षणसंपूर्णे पुरा न कृत्वा जपालयम्।
वितानध्वजसंयुक्तं पताकैरुपशोभितम्।
रुद्रावतारक्रीडाद्यैश्चित्रं कर्मविभूषितम्।
यावन्निद्रावशस्तावत् जपध्यानपरो भवेत्।

शिवधर्मोत्तरे-:

जपेन देवतानित्यं स्तूयमाना प्रसीदति।
प्रसन्ना विपुलान् भोगान्ददान्मुक्तिंच शाश्वतीम्।
ध्याता ध्यानं तथा ध्येयं यच्च ध्यान प्रयोजनम्।
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित्।
ज्ञाने वैराग्य संपन्न श्रद्दधना क्षमान्वित:।
शिवभक्तस्सदोत्साही ध्यानेर्थपुरुष स्मृत:।
ध्यै चिन्तायां स्मृतो धातु शिवाचिन्ता मुहुर्मुहु:।
अनाक्षिप्तेन मनसा ध्यानमित्याभि धीयते।
सकलस्सतनुर्ध्यान्त: सर्वज्ञस्सर्वग प्रभु:।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



1368 नानारूपविकल्पेन ध्येयास्सिद्ध्यर्थमीश्वरः।
विमुक्तः प्रत्ययः पूर्वमैश्वर्यस्याणिमादिकम्।
इत्येतन्द्विविधं ज्ञेयं शिवध्यान प्रयोजनम्।
युज्यते येन पुरुष शिव संयोजकस्मृतः।
फलेन योजयस्तस्मात् ध्यायेत्सततमीश्वरम्।
जपश्रान्तः पुन ध्याये ध्यानश्श्रान्तः पुनर्जपेत्।
जपध्यानादि युक्तस्य शिवक्षिप्रं प्रसीदति।
यदर्थमात्र निर्हासं स्तमितो दधिगात्स्थितम्।
स्वरूपशून्यमध्यात्म न्तत्समाधिरिहोच्यते।

अथ निद्रावशश्शयन स्थानं प्रविश्य स्वस्वोदितां विधिवन्निर्मितां शय्यामारुह्य गृही चेत् पूर्वशिरः तपस्वीति याम्यशिराश्शयनमुद्रां प्रदर्श्य स्वपेत्। सर्वज्ञानोत्तरे

नवैकादशहस्तं वा सप्तहस्तमथापि वा।
प्रागुदक्प्लवनं कुर्यात् शयनस्य सदा बुधः।

किरणे-: स्वपेत्पूर्वशिरां शय्यामथवा दक्षिणा शिराः।
सा चतुष्कर दीर्घा स्याद्विहस्ता रस्यात्तदर्धतः।
तत्समश्चोपधानं स्या द्वादशाङ्गुल विस्मृतम्।
तस्यां स्वपे द्गृहस्थोय तपस्वीवा तपास्थितः।
संजाते वा भ्यतस्तस्य प्रोक्ता मुख्य कटिलिका।

अत प्रासंगिकेन. बाल पर्यङ्क मुच्यते। तदुक्तं कामिके-:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पर्यङ्कमेतत्कथितं काळपर्यङ्कमथ्यथ ।
प्रोच्यते शिवया यद्वत् कर्ण निर्गम वर्जितम् ।
खट्वा पादसमायुक्तं पट्टाकारेन संयुतम् ।
पादमूले विनिक्षिप्त क्षुद्रवक्त्र समन्वितम् ।
निम्बादि तरु संसिद्धं काळपर्यङ्कमीरितम् ।
आचम्य सकलीकृत्य भूमौ भस्म कुशास्तरे ।
प्रस्तीर्य चाजिनं कण्ठान्तत सौम्याननं विशेत ।

कालोत्तरे – प्रतियाम्य शिरस्सुप्यात पूर्वमूर्ध्ना मही तदा ।
रमोनान्ति धारयेति पश्चाभ्यां योनिमुद्रया ।
कूश्माण्डादि जयन्तस्य न कदाचिद्भवेदिति ।

यद्वा शयनमुद्रां प्रदर्शयेत् । कालोत्तरे –
वामेवे दक्षिणाङ्गाय अंगुष्ठौ चैव बन्धयेत् ।
शयनमुद्रां भवेदषां शयनकालेषु दर्शिताम् ।
अल्पसत्व पिशाचाश्च सर्वलूनादि लक्षणम् ।

ततश्चतुष्काल पूजा नियमवता न्दिवासंसुभृत जलाद्यैः पूर्ववत्सन्ध्यामुपास्य शिवार्चनं विधेयम् । चतुष्काल पूजा नियमरहित आचार्यश्चेदर्द्धरात्रे सन्ध्यामुपास्य अन्तर्यजनं विधाय पुनस्सुप्त्वा प्रबुद्धः पूर्वोक्त मार्खिलञ्चरेत् ।

सर्वज्ञानोत्तरे –
अर्द्धरात्रेति समये तथैव समुपासयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शयनञ्च तथा भूयं प्रबुद्धस्य तथा जपम् ।
गतिन्देवस्य विज्ञाय जपाद्ध्यानादिकं क्रमात् ।

प्राणात्मनो देवस्य गतिं ज्ञात्वा तत्संचारानुगुण ध्यानजपं वा कुर्यादित्यर्थः। चिन्त्यविश्वसादाख्ये -

कुर्याद्वाचापि सा सन्ध्या ज्ञानिनाञ्च विशेषतः।
पूर्वपश्चिमयोमध्ये शतौ तु दशनासिका।
स्वापकालमिति प्रोक्तं पश्चात्पूर्ववदाचरेत्।
तथा दिवैव नीत तोयाद्यै रर्द्धरात्रे तु पूर्ववत्।
संध्यां शिवार्चनं कुर्यात् अन्तर्यागमथापि वा।
पुनस्सुप्त्वा समुत्थाय पूर्वोक्तमखिलञ्चरेत्।

इत्यात्मार्थपूजापद्धत्यां सायन्तन विधिः॥

—— ० ——

पूजाविधानमेवोक्तं क्रिया संख्याक्रमं शृणु।
प्रातःकाले समुत्थाय शिवं संचिन्तयेत्क्रमात्।
आवश्यकरणञ्चैव शौचमाचमनं ततः।
स्नानकर्म विधानञ्च सान्ध्ये इष्टविधि क्रमम्।
पूजागारप्रवेशञ्च स्थानशुद्धिक्रमन्ततः।
प्रासादकल्पनञ्चैव द्रव्यं संग्रहणन्ततः।
सौरपूजाविधानञ्च पादप्रक्षालनन्ततः।
स्वासनस्यार्चनञ्चैव न संन्यासकर्म ततः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



करशुद्धि क्रमश्चैव प्रणवार्घ्यन्तथैव च ।
भूतशुद्धिं ततः कृत्वा न्यासक्रमविधानतः ।
अन्तर्याग क्रमश्चैव सामान्यार्घ्य विधानतः ।
पाद्यादि क्रममेवञ्च विशेषार्घ्यमतः परम् ।
खेटकालं कृतिश्चैव द्वारार्चनमतः परम् ।
बेराणामासनञ्चैव बेरविन्यासमेव च ।
लिंगस्नानार्थमादाय स्नानवेद्युपरिन्यसेत् ।
वस्त्रान्यासास्थमेवञ्च निर्माल्यस्य विवर्जनम् ।
चण्डेशार्घं प्रकल्प्याथ अभ्यंगादिविशेषतः ।
बोधनं लिंगपीठस्य आसनार्चनमेव च ।
विद्यादेहञ्च संकल्प स्नानमार्ग क्रमन्ततः ।
पश्चान्निवेश्य तल्लिंगं पद्मासनं तथोपरि ।
पश्चात्त्रिशिरासनं कल्प्य पञ्चासन क्रमन्ततः ।
आवाहनाद्युपचारञ्च मानसं स्नानमेव च ।
137a अंगार्चनञ्चमेवञ्च आवरणार्चनमेव च ।
धूपदीपं ततः पश्चान्नैवेद्यं बलिरेव च ।
नित्यं पवित्रमेवञ्च पञ्चांग श्रवणन्ततः ।
आरात्रीभसितञ्चैव तांबूलन्दर्पणन्ततः ।
चित्रञ्च चामरञ्चैव व्यजनं तालवृन्तकम् ।
वेदैः पुराण श्रुत्यर्थं पञ्चांग श्रवणं ततः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्तोत्रं नृत्तञ्च गीतञ्च वाद्यध्वनि समायुतम् ।
अक्षमालाजपञ्चैव तज्जपस्य समर्पणम् ।
लयांगं पूजयेत्पश्चाद्द्विधा पीठार्चनन्ततः ।
चुलुकोद (?) प्रदानञ्च पश्चात्पूजां विशेषतः ।
शिवतत्वे परे सूक्ष्मे कुर्यात्तल्लिंग भावनम् ।
स्तोत्र पाठन्तु तत्पश्चा चण्डेशार्चनमेव च ।
गुरोराराधनं पश्चाद्द्विधा पीठार्चनमेव च ।
परालयं प्रविश्याथ लिंग दर्शनमेव च ।
प्रदक्षिणनमस्कारं यथा संख्या विधानतः ।
भोजनान्ते प्रकर्तव्यमात्मनश्चुलुकोदकम् ।
धर्मसंकीर्तनं पश्चात् पुराणश्रवणन्ततः ।
एवं नित्यावश्यकाख्यं यथाशास्त्रोक्तमार्गतः ।
एवं नित्यं प्रकर्तव्यं पूजकस्सर्वमाचरेत् ।
शिवाचारं समाख्यातं यावज्जीवान्तमाचरेत् ।
॥ इत्यात्मार्थ पूजापद्धत्यां उक्ते विधिः ॥

— . —

श्रीमद्व्याघ्रपुरवासि वेदज्ञानमुनेः पुरो
श्रीपादपंकज द्वन्द्व धूली धूसरमस्तकः ।
तन्नामधारी दाद्दिश्य (?) स्वागमोक्त निदर्शनैः ।
आत्मार्थपूजाव्याजेन कृतवांश्चैव मालिकाम् ॥
॥ इत्यात्मार्थ पूजा पद्धति नित्य विधिस्समाप्तः ॥

T. 321 (identical) ends here (1st book)

— . —

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अजिते-ः लिंगपूरविधिं वक्ष्ये सर्वकामार्थसाधनम्।
यत राष्ट्रे तु विधिना क्रियते लिंगपूरकम्।
तत्र मृष्टान्नपानादीन् लभते सततं प्रजाः।
शालि नीवार गोधूम यवाद्यंत्र सुसंस्थितम्।
नवमृत्पात्रसंसिद्ध दध्याभ्याज्यां परिप्लुतः।
संपाद्य तेन कुर्वीत तेषां वै तंडुलैर्नवैः।
तिलैः कृष्णैश्च सिद्धार्थैः क्षालितैश्शोधितैस्ततः।
गव्येन नवनीतेन सर्वगन्धमयेन वा।
क्षौद्रेण वारिगन्धैश्च पुष्पैर्नानाविधैरपि।
फलैः स्वादुदुरैश्चापि पत्रैर्बिल्वादिभिस्तथा।
~~बिल्वावसाने चारब्येन नवनीतेन सर्वगन्धमयेन वा।~~
नित्यावसाने चाप्यष्टि सहस्रादिषु संभवैः।
कलशैरभिषिच्येशं कृत्वा पू रोषतः।
मूर्तिहोमं क्रियाहोमं शान्तिहोमम् अथापि वा।
कारयित्वा हविर्दत्वा परमान्नं घृतप्लुतम्।
प्रभूतञ्चाथ तांबूलं मुखवाससमान्वितम्।
दत्वा देवस्य पार्श्वे तु तद्द्रव्यैः पूरणं भवेत्।
तानि पात्रेषु संभृत्य प्रोक्षयित्वा शिवांभसा।
पुण्याहं वाचयित्वाथ पंचाभ्यस्तेण मन्त्रवित्।
स्थलशुद्धिं ततः कृत्वा अभ्युक्ष्य गन्धोदकेन च।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चंपकोत्पल जात्यादि नानापुष्पाभिरम्यया ।
मालयावेष्टयेल्लिंगमभितस्सर्वतस्समम् ।
वेष्टयित्वाथ पीठान्तं पश्चाद्दत्वार्घ्यमुत्तमम् ।
दत्वा चाचमनं तत्र ततः पूरणमाचरेत् ।
पूरयेद्गर्भगेहन्तु यथालिंगं न दृश्यते ।
स वेदिकं ततश्चापि मालाभिः परिवेष्टयेत् ।
संवत्सरात्मकं मन्त्र तत स्सर्वात्म संज्ञकम् ।
पठेन्मन्त्रं तदा मन्त्री नमस्कृत्वा मुहुर्मुहुः ।
स्तोत्रमंगल वाद्यैस्तु गीतं नृत्तं समाकुलैः ।
शंख भेर्यादिनी घोषैस्तत्तत्काले द्ध्ययनं भवेत् ।
कवाटयोगं कृत्वाथ कृत्वा चैव प्रदक्षिणम् ।
पतित्व दण्डवद्भूमौ निर्गच्छेद्देशिकस्सुधीः ।
अष्टम्याञ्च चतुर्दश्यां पञ्चदश्यां सितेतरे ।
आर्द्रायामर्कवारे च ह्येवं कुर्यात्सकृन्नरः ।
सर्वयज्ञ तपो दान तीर्थ सेवेषु यत्फलम् ।
तत्फलं सकलं लब्ध्वा शिवेन सह मोदते ।
फलपूरप्रदाने तु फलन्दश गुणोत्तरम् ।
भक्त्या वित्तानुसारेण चललिंगे यथा चले ।
तुल्यमेव हि तत्प्रोक्तं फलमाढ्यदरिद्रयोः ।
इत्यात्मार्थपूजा पद्धत्यां लिंगपूरविधिः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कारणे -: अतः परं प्रवक्ष्यामि पूजां वैशेषिकां शृणु।
सर्वरोगविनाशार्थमायुरारोग्य वर्द्धनम्।
मोक्षदं कामदं पुण्यं सर्वशत्रु विनाशनम्।
चिन्त्यविश्व काल नियम प्रदर्शितः।
नैमित्तिकञ्च कर्त्तव्य नित्यान्ते त्वविरोधितः।
वर्तमानेन नित्ये तु यदा नैमित्तिकं भवेत्।
समाप्य कल्पिते काले नित्यं नैमित्तिकं चरेत्।
1376 सन्ध्या परार्द्ध काले चेत् पूर्वार्धो विद्यते यदि।
कार्यं नैमित्तिकं काले त्वविचार्य विशेषतः।
अन्य कालेन संध्यां वै अपरार्द्धे समाचरेत्।
ततोऽन्यात्यनुष्ठानमुभयत्र समाचरेत्।
धूपान्तं वाथ नैवेद्यं पर्यन्तं नित्यमेव वा।
विधाय प्राप्तकाले तु नैमित्तिकमथाचरेत्।
नैमित्तिकं महच्छ्रेष्ठं समारभ्य स्वकालके।
द्वाराद्यावरणान्ते तु सन्ध्यान्ते तु शेषं समाप्य च।
वेदिश्च कलशं देवं स्नपनं कारयेत्क्रमात्।
नैमित्तिकद्वयं प्राप्तौ महदादौ समाचरेत्।
लघ्वन्ते सदृशं तच्चेत् कामचारो विधीयते।
कालोऽपि द्विविधः प्रोक्तो नैमित्तिकविधौ पुनः।
अल्पानल्प विभागेन स्वल्पं स्याद्दयनादिकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ग्रहणान्निर्महाकालस्वल्पकालोऽग्रतो भवेत्।
आदित्ये ग्रस्यमाने तु मुच्यमाने निशाकरे।
अविच्छ्यत्वयने दक्षे चोत्तरेतिरकालके।
विषुवे मध्यमे काले स्नपनाद्यं समाचरेत्।
कन्यायां मिथुने मीने मधुव्यन्ते समाचरेत्।
सिंहे च वृश्चिके कुंभे वृषौ चादौ समाचरेत्।
अर्धमेक द्वयञ्चापि यामं वा घटिकामपि।
आद्यावन्ते च गृह्णीयात् स्नपनादिषु कर्मसु।
कारणे-: पूर्वाह्णे चैव मध्याह्ने सायाह्ने वा विशेषतः।
अथवा मध्यसन्धौ तु प्रशस्तं दक्षिणोत्तरम्।
गोक्षीरेणैव संपूज्य क्रमेणैव विशेषतः।
घृतेनवाऽभिषेकञ्चेत्तद्द्रव्येषु च विधिष्यते।
इक्षुसारेण संपूज्य मधुना चैव पूजयेत्।
सर्व गन्धेति संपूज्य स्नानविशेषेति कथ्यते।
शिवाग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैश्शुभैः।
गन्धपुष्पादिना पूज्य हृदयेनैव मन्त्रतः।
शरावे ताम्रपात्रे वा स्थापयित्वा घृताधिकान्।
पञ्चगव्यं च संस्थाप्य पंचामृतञ्च कल्पयेत्।
पुण्याहं वाचयित्वा तु पूजयित्वा विशेषतः।
त्र्यंबकेति मन्त्रेण कुर्याच्चैवाभिषेचनम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवांगैश्चैव विद्यांगैर्ब्रह्मपञ्चकमुच्चरन् ।
शिवमन्त्रेण संपूज्य कुर्यात्गव्याभिषेचनम् ।
व्योमव्यापि षडंगेन पञ्चामृतेन पूजयेत् ।
जलेन पूरयेत्पश्चात् प्रासादेन तु मन्त्रतः ।
आसनावरणादीनि पूजयेद्देशिकोत्तमः ।
नित्य पूजावसानान्ते पूजा वैशेषिका भवेत् ।
अर्चयित्वा विशेषेण यथा शास्त्रोक्तमार्गतः ।
सर्वगन्धसमायुक्तं धूपदीपसमान्वितम् ।
नैवेद्यमर्पयेत्पश्चा यथाशास्त्रानुसारतः ।
गुलखण्डसमायुक्तमाज्ययुक्तन्दधिप्लुतम् ।
निवेदयेद्बुदा विद्वान् तांबूलञ्च प्रदापयेत् ।
नीराजनं ततः कृत्वा शास्त्रदृष्टेन कर्मणा ।
कृत्वाग्नौ कारयेद्धोमं सर्वकामार्थसाधनम् ।
शीवमन्त्रं जपेत्पश्चात् यथाशक्तिविशेषतः ।
आचार्यं पूजयेत्पश्चा हस्तहेमांगुलीयकैः ।
एवं विशेषपूजां च कृत्वा सम्यग्विशेषतः ।
दिनमेकत्रयश्चैव पंचाहं सप्तमेव वा ।
नवाहं द्वादशाहं वा पक्षविंशद्दिनं तु वा ।
सप्तविंशति संयुक्तं मासं चैव तु पूजयेत् ।
अर्कवारादि संयुक्तं सोमवारादि संयुतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जन्मर्क्षे वाथ कर्तव्य माद्यन्ते वा विशेषतः।
संक्रान्तौ मास नक्षत्रे अमावास्यांञ्च पूजयेत।
ग्रहणे विषुवे चैव आर्द्रौ वा पूजयेद्बुधः।
भक्तानां परिवाराणां यथा शक्ति प्रदापयेत्।
ब्राह्मणान् पूजयेत्पश्चात् स पुण्यां गतिमाप्नुयात्।
आत्मार्थे च्येवमेवं स्यात् पूजयेत्परमेश्वरम्।
॥ इत्यात्मार्थ पूजा पद्धत्यां विशेष पूजाविधिः॥

---

॥ अथ मृत्युञ्जय पूजाविधिः॥

उत्तरस्वायंभुवे-:

अथ वक्ष्ये विशेषेण मृत्युञ्जय विधिं परम्।
जन्मान्तर कृतं पापं अपमृत्युर्भविष्यति।
अपमृत्यु विनाशार्थं नियमेन श्रुतं मया।
कालनिग्रह देवेशमपूजयेद्विधि पूर्वकम्।
शान्ति स्यात्संपदं प्राप्य चिरं कालमवर्द्धत।
कर्तृजन्मादिने वापि आर्द्राश्रवण एव च।
पर्वद्वये च संक्रान्ते सर्वमासे प्रशस्यते।
त्रिपञ्च सप्त दिवसा उत्तमा मध्यमा धमाः।
निश्चित्यादिवसात्पूर्वे प्रातस्सन्ध्यावसानके।
देवीकस्सकली कृत्य स्वगुरुं पूजयेन्ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अभीष्टं प्रार्थयित्वा तु गणेशं पूजयेत्क्रमात्।
देवदक्षिण दिग्भागे प्रपांकृत्वा स ‥ क्षणाम्
सत्पात्रे जलमापूर्य कर्पूरेण विमिश्रयेत्।
पूर्वास्यश्चोत्तरास्यो वा तर्पयेन्मूलमन्त्रतः।
ओं जुं स इति मन्त्रेण पूज्यो मृत्युञ्जयश्शिवः।

अस्य मन्त्रोद्धारः। रव स ‥ मम। कर्णयुतो इन्द्रवान् कु-पञ्चमो बिन्दुयुतो ध्रुवां कर्म न स्वमृत्युञ्जयात्मन स्फुटं समीरणम्। साधकरक्षणक्षमम्। अष्टोत्तरशतन्तर्प्य नैवेद्यन्तु निवेदयेत्। गण्डे वा स्थण्डिले वापि होमं कुर्यात् यथा विधिः।

धनुर्मास पूजा १३४०

नालिकेर गुलञ्चैव कदलीफलमेव च।
तण्डुलन्तिलमिश्रञ्च अष्टोत्तरशतं पृथक्।
वह्निस्थं देवमादाय तद्बिंबे योजयेत्सुधीः।
धूपदीपसमायुक्तमुपचाराणि सर्वशः।
मायाकृतञ्च यत्कर्म निर्विघ्नत्वं प्रसीद मे।
एवं गणेश पूजाञ्च पूर्ववन्नित्यमर्चयेत्।
तद्दिने चैव कर्तव्य सौरपूजा पुरोक्तवत्।
प्रातस्सन्ध्यावसाने तु साधकस्सकलीकृतः।
विघ्नेशं पूजयित्वा तु संकल्प्य इति बुद्धिमान्।
पुण्याहं वाचयित्वा तु पश्चाद्द्रव्यन्तु साधयेत्।
पञ्चामृतं ततस्थाप्य स्थानद्रव्याणि साधयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वीरशृंगाररगाद्यैश्च न द्याते स्तुरगादिभिः।
तत्तन्मन्त्रञ्जपेद्धीमान् तत्तद्ध्यानपुरस्सरम्।
विभवस्यानुसारेण स्नपनं कल्पयेत्सुधीः।
नीलोत्पलञ्च दान्तञ्च विल्वपत्रञ्च मिश्रकम्।
सुगन्धान्यन्यपुष्पाणि गन्धपात्रे प्रपूरयेत्।
सशिवोऽहं जपेद्धीमान् पंचविंशति संख्यया।

षट्सहस्रिकायाम्—:

प्राच्यां वाह्ये द्वारं तन्मुखं पश्चिमाननम्।
पूर्वोन्मुखेन कर्तव्यं लिंगं अंगारकास्थितः।

स्वायंभुवे—: द्वारपूजां ततः कृत्वा लिंगशुद्धिं समाचरेत्।
स्नानकाले विशेषेण मृत्युञ्जयमनुस्मरन्।
कालनिग्रहमूलेन स्नपनं कारयेत्प्रभुः।
मन्त्रान्न मन्त्रपुष्पञ्च तं मन्त्रेणैव शापयेत्।

कालोत्तरे—: अथवा स्थण्डिले कार्यं यजनं कृत्तिकासुत।

किरणे—: ध्यानं तस्य सितं कार्यं शीतस्पर्शं चतुर्भुजम्।
कपालशूलवरदं सिध्यमानं सुधालयैः।
कर्पूरक्षोदद्गन्धांगं सितपुष्पं सितांबरम्।

कालोत्तरे—: ओं जुं सः त्र्यक्षरेणैव परतन्त्रनिवेशयेत्।
वौषडन्तेन मन्त्रेण कुंभमुद्रां प्रदर्शयेत्।

किरणे—: अंगानां ब्रह्मणा सोन्ते वौषडन्ते र्नियोजयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्विष्वंगानि विन्यस्य दिक्ष्वस्त्रं योजयेत्पुनः।

स्वायंभुवे -

महाहविक्रमेणैव नैवेद्यञ्च प्रदापयेत्।

कालोत्तरे-: पूजां कृत्वा तु सर्वत्र पुष्पधूपादिभिस्सह।

स्वायंभुवे-: दक्षिणे पश्चिमे वापि उत्तरे वाग्रकेपि वा।

हस्तं द्विहस्तकं वापि कुण्डं प्रागुक्तवत्कुरु।

मृत्पात्रे जलमापूर्य त्रिपाद्युपरि विन्यसेत्।

कुंकुमागरुकर्पूरं तज्जलैर्मिश्रमेव च।

सुगन्धपुष्पैरभ्यर्च्य अमृतां भावयेच्छतम्।

शतार्द्धमर्द्धमर्द्धं स तर्पयेत्कालमन्त्रतः।

ततो होमं प्रकर्तव्यमाग्नेकार्योक्तमार्गतः।

कालनिग्रहं देवेशमाग्निमध्ये सुपूजयेत्।

किरणे -: जुहुयात् क्षीरदूर्वाज्यं मधुयुक्ता पुनर्नव।

पावं क्षीरवृक्षस्य समित्प्रादेश संमितः।

तथा अमृतावटनिलदूर्वापयो घृतं पायसं क्रमेणाति सप्तमन्त्या-

न्युक्तान्येभिर्जुहुयात्। पृथक् सहस्रतसम्। स्वायंभुवे सूत्रे।

तर्पणत्रिगुणाधिक्यन्द्रव्यं प्रतिविशेषतः।

कालनिग्रहमूलञ्च कला मूर्तिञ्च मूलकम्।

मृत्युञ्जय द्वयञ्चैव क्षुद्बीवोहं त्रियक्षरम्।

त्रिपञ्चाष्टनवञ्चैव ङकाक्षरक्रमेण तु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूर्णाहुत्यन्तमेव स्यात् प्रायश्चित्तं हुनेत्क्रमात् ।
वह्निस्थं देवमादाय शिवलिंगे सु पूजयेत् ।

किरणे-: जुहुयाज्जपं सहस्रान्तु होमं तद्भाववेदिहं ।

स्वायंभुव सूते । देविकस्या ~~आद~~ ज्ञया चैव कर्तव्या पुष्पं प्रगृह्य च । मृत्युञ्जयेन चाभ्यर्च्य अष्टाधिक शतं स्मरन् । तदन्ते धूपदीपश्च उपचाराणि पूर्ववत् ।

तत्र देवेशमाराध्य अपमृत्यु विनाशनम् ।
इति विज्ञाप्य देवेशं तत्प्रसादं प्रगृह्य च ।
आचार्यं पूजयेत्तत्र वस्त्र हेमांगुलीयकैः ।
गो भूहिरण्यकैश्चैव आचार्याय प्रदापयेत् ।
चण्डेश्वरं समभ्यर्च्य यथाशक्ति जपेद्बुधः ।
यदुक्तं कारयेद्धीमान् तत्सर्वं कामिकोक्तवत् ।

॥ इत्यात्मार्थपूजापद्धत्यां मृत्युञ्जय पूजाविधिः ॥

— ० —

## ॥ अथ धनुर्मास पूजा विधिः ॥

धनुर्मास पूजाविधिः

स्वायंभुवे-:

अथ वक्ष्ये विशेषेण अरुण पूजाविधिक्रमम् ।
विरुद्ध षिकरायानां देवैर्युद्धे प्रवर्तिते ।
असह्य देवतास्तत्र विष्णुमूर्तिमुपाश्रयन् ।
देवदेव ~~नमस्तुभ्यं~~ नमस्तुभ्यं सर्वरक्षाय ते नमः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



इति विज्ञाप्य सर्वेशान्तोषयेच्छंभुमादरात् ।
दक्षिणान्ते प्रभातं स्यात् तत्काले शिवमव्ययम् ।
संतोष्य शिवरूपेण राक्षसादीन्प्रदर्शयेत् ।
असुराणां क्षयन्दृष्ट्वा अच्युतादीन् क्रमेण तु ।
प्रभो राज्ञां समावेश्य लोकरक्षाय ते नमः ।
सिद्धिद्वयं यथाकामं तत्काले शिवमर्चयेत् ।
तस्मात्सर्वप्रयत्नेन अरुणपूजां समाचरेत् ।
तत्पूजा द्विविधं चैव नित्यं नैमित्तिकं भवेत् ।
अब्दं प्रति विशेषेण मार्गमासे विशेषतः ।
नैमित्तिकमिति प्रोक्तन्तत्पूजात्वधुनोच्यते ।
भास्करस्योदयात्पूर्वं त्रिपादेन त्रिनाडिका ।
नन्द्यावर्तञ्च दान्तञ्च गन्धादीन् संग्रहेत्ततः ।
पूजोपकरणं सर्वं सम्यक् संपाद्य यत्नतः ।
नित्यस्नानं यथापूर्वं सकलीकृतविग्रहः ।
देवदेवाय विज्ञाप्य इमां पूजां समारभेत् ।
विज्ञाप्य प्रथमं पूजा स्नानद्रव्यञ्च साधयेत् ।
द्वारपूजां ततः कृत्वा स्नानशुद्धिं समाचरेत् ।
स्नानद्रव्याणि सर्वाणि स्नानकालेभिषेचयेत् ।
तदन्ते मन्त्रपुष्पञ्च हृन्मन्त्रेण प्रदापयेत् ।
मन्त्रान्नन्दापयेच्छंभोस्तन्मन्त्रैर्वा बुद्धिमान् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वस्त्रादिभिरलंकृत्य स्थलशुद्धिं समाचरेत् ।
स्थालिकामध्यमे चान्नं पयश्शुल्कञ्च पूरयेत् ।
अन्यानि रसवस्तूनि दध्याज्यादीनि निक्षिपेत् ।
व्यञ्जनैः पूर्यपरितस्तदूर्ध्वे स्रावयेद्घृतम् ।
तथैव विघ्ननैवेद्यमेकपात्रे प्रदापयेत् ।
परिवारामरादींश्च पूर्वोक्तविधिना सह ।
निवेदयेद्धृदामन्त्री पानीयन्दापयेत्ततः ।
हृदाचाचमनन्दत्वा चण्डेशाय प्रदापयेत् ।
138b निर्माल्यञ्चाथ विसृज्याथ स्थलशुद्धिं समाचरेत् ।
तांबूलञ्च निवेद्याथ धूपदीपं ददेद्गुरुः ।
मुखवासञ्च कर्तव्यन्दर्पणादीन्प्रदर्शयेत् ।
श्रीदान्तन्द्यावर्तञ्च अरविन्दञ्च ⋯ कम् ।
एकपात्रे समापूर्य तत्काले शिवमर्चयेत् ।
श्रीकण्ठाय नमस्तुभ्यं गंगाधर नमो नमः ।
पिनाकिने नमस्तुभ्यं शूलपाणे नमो नमः ।
एवं मन्त्रं गृहीत्वा तु गुणसंख्या समर्चयेत् ।
उपचाराणि सर्वाणि पूर्ववत्कथितं मया ।
एवं संपूजयेद्देवं नियमात्मा सदाशिवम् ।
स याति परमं स्थानं प्राप्यमैशं परं पदम् ।
॥ इत्यात्मार्थपूजापद्धत्यां धनुर्मास पूजाविधिः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



॥ अथात्मार्थं प्रायश्चित्तविधिः ॥

श्रीमद्रौरवे-:

अतः परं प्रवक्ष्यामि पवित्रारोहणं परम्।
सर्वपापहरञ्चैव सर्वसिद्धिप्रदायकम्।
आचार्यसंकरञ्चैव तन्त्रसंकरमेव च।
निर्माल्यसंकरञ्चैव मन्त्रलोपञ्च संकरम्।
क्रियालोपञ्च पूजांगहीनञ्चैव तथान्यकम्।
संवत्सरकृतं सर्वं पवित्रेण विनश्यति।
पवित्रं कारयेत्तस्मात् प्रतिसंवत्सरं गुरोः।

ज्ञानरत्नावल्याम्-:

अथ नित्यं यदुक्तं तत् मन्त्रद्रव्य क्रियान्वितम्।
प्रमादा दैवतो मोहात् कार्यव्यग्रतयापि वा।
राजचोर भयालस्य देहव्यसनतस्ततः।
अवश्यञ्जायते छिद्रं तच्छिद्रपरिपूर्तये।
नृणां हिताय नित्यांग पवित्रकमथोच्यते।
देवर्षिभिरिदं प्राप्तन्तपसा दुष्करेण यत्।

तथा मृगेन्द्रे-:

सर्वाच्छिद्रहरश्चान्यो विधिरेव निगद्यते।
यः प्राप्तस्तपसो देवैर्हरात्स्वविधिपूरये।

कामिके-: दुरितस्य विनाशार्थं संवत्सरकृतस्य तु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रायश्चित्तमकुर्वाणो मन्त्री विधिविलंघनात् ।
सिद्धिभ्रंशमवाप्नोति लोके दोषभाक् भवेत् ।
पुत्रको मुक्तिभाक् न स्यात् जन्मनैकेन शोधनात् ।
समयी समयस्थोपि नैवं यस्मात्पवित्रकम् ।
विधातव्यं प्रयत्नेन येन केन प्रकारतः ।
प्रत्यहं वाङ्मनः कायव्यापारजनितादलम् ।
पतनात्त्रायते तस्मा-त्तस्मादेतत्पवित्रकम् ।

अत्र पावत्र शब्देनाशनिरुच्यते । संसाराख्यो यः पवित्रः संसार परिवस्त्राय इति पवित्रम् । यद्वा । शब्दापतन वाची संसारार्णव ~~पारजनितादलम्~~ पतनाद्विशेषेण त्रायत इति पवित्रम् । तथा । आत्मनो वाङ्मनः कायः कर्मभिस्तु प्रमादतः ।
पवित्रं पततस्त्राण मिति । तथा । चिन्त्यविश्वे-स पू-- पवन धात्वर्थे त्रापालनियुते पिवा ।
शुद्धिं रक्षाञ्च कुरुते पवित्रमिति कीर्तितम् । इतत्पवित्र मात्मार्थपरार्थभेदेन द्विविधं भवति । तथा सूक्ष्मे -:
स्वसिद्धिं सर्वसिद्धिञ्च द्विविधं तत्पवित्रकम् ।
नित्यादिभेदेन प्रत्येकं त्रिविधं भवति ।
आत्मार्थं यजनं कुर्यात् स्वसिद्धिरिति चोच्यते ।
परार्थेव्यर्चयेद्धीमान् सर्वसिद्धिरिति स्मृतम् ।
इवं स्वसिद्धिपरसिद्धिभेदेन द्विविधञ्चैतत्पवित्रकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नित्यादिभेदेन प्रत्येकं त्रिविधं भवति। तथा कारणे

नित्यं नैमित्तिकं काम्यन्तद्भेदास्त्रिविधो भवेत्।
दूर्वांकुराक्षतो पेतैर्बिल्वपत्रैस्समन्वितम्।
दद्यात्पवित्रकं नित्यं मूलमन्त्र समन्वितम्।
आषाढ - त्रिमासेषु कुर्यात्संवत्सरं प्रति।
नैमित्तिकमितिख्यातं पूर्वोक्तविधिना चरेत्।
आषाढमासे नक्षत्रे कर्तुर्जन्मदिनेपि च।
अभीष्टफलदश्चैव भोगमोक्षफलप्रदम्।

नित्यादित्रितयेषु नित्यस्य प्रतिदिनमनुष्ठेयत्वात् न कालपरीक्षा। नैमित्तिकस्य तु निमित्तापेक्षत्वात् तत्स्वरूपम्। कामिके प्रदर्शितम्। तद्यथा -

आषाढादित्रयोमासा ज्येष्ठमध्यम कन्यसः।
अश्विनी कृत्तिकामासा वथवा संप्रकीर्तितौ।
पूर्वपक्षे चतुर्दश्यामथाष्टम्यां पवित्रकम्।
इतरेषु च मासेषु पक्षयोश्शुक्ल कृष्णयोः।
चतुर्दश्यामथाष्टम्यां पवित्रं विधिनाचरेत्।
कृत्तिकादीपतः पश्चात् नैव कार्यं पवित्रकम्।
शुक्लपक्षे चतुर्दश्यां प्रतिरस्त भयोरपि।
कर्तुः कारयितुश्चानुकूलर्क्षे वा नवामतः।

सप्तभेदे विशेष उक्तः। सप्ताहश्चैव पंचाहं त्रियहं वापि कारयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्वितीयादि चतुर्थ्यान्त षष्ठ्यादि च विशेषतः।
अष्टम्यन्तं प्रकर्तव्यं पवित्रं सर्वसिद्धिदम्।
अष्टम्यादि दशम्यादि द्वादश्यादि च वा बुधः।
चतुर्दश्यान्तकं कार्या पवित्रारोहण क्रिया।
सप्तम्यां वा त्रयोदश्यां रेवत्यां कृत्तिकान्विते।
आर्द्रायां रोहिणी युक्ते कारयेत्तत्पवित्रकम्।
अंशुमति-: शेते विष्णुस्सदाषाढे भाद्रे च परिवर्तने।
कार्तिके च प्रबुध्येत शुक्लपक्षे हरेर्दिने।
मैत्र च श्रवणोपेते पावने च परिकीर्तिते।
आषाढसित पक्षे तु मैत्र श्रवण रेवति।
आदिमध्यावसानेषु भवेषु द्वादशीषु च।
ते पावन स्वप्नायोगा कथ्यते रविसत्तम।

मोहश्शोत्तरे-:

दीक्षादिस्थापनञ्चैव पवित्रादि शतक्रतौ।
अधिमासेन कुर्वीत यदिच्छेच्छुभमात्मनः।
सुप्ते चैव हृषीकेशे दोषभागन्यथा भवेत्।
मोहादज्ञानतो वापि अप्रसुप्ते जनार्दने।
पवित्रं कारयेद्यस्तु स पापं पापमोहितः।
पश्चाहञ्च निराहारो जपेत्पञ्चायुतं हरे।
शुचिमेव समभ्येति नान्यथाति कदाचन।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



(*सर्व कर्मसु तन्त्याज्य चैत्र वैशाखयोर्विना ।*)
आद्रादूर्ध्वन्न कुर्वीत सिद्धान्ते दोषभाक्भवेत् ।
लक्षद्वयमघोरेण जप्त्वा चैव विशुध्यति ।
ज्योतिषे त्वतिमासविषये विशेष वचनमुक्तम् । तद्यथा ।
अमावस्या द्वयं यत्र यत्र पर्वद्वयं भवेत् ।
सर्वकर्मसु तं त्याज्य चैत्र वैशाखयोर्विना ।
1310 अत्राधिकारस्वरूप निर्णयविषयेऽपि कल्पं वदन्ति गुरवः ।
केचिन्नित्यमिति वदन्ति अन्ये नैमित्तिकम् । अपरे काम्यम् ।
इतरे प्रायश्चित्तम् । केचिद्विधेः पूरणमिति नित्यवादिन डव-
माहुः । इदन्तावन्नित्यम् । चातुर्मास्य विधि-श्रवणात् । चातुर्मास्य
विधि प्रकारस्तु श्रीमत्पौष्करे प्रदर्शितः ।
संकल्प्य चतुरो मासान्स्नानमाश्रित्य वाग्भिरेतम् ।
कार्यो नियमतस्तैस्तु मृद्भस्मादि परिग्रहः ।
आर्द्रच्छेदमथा द्वानं गुरुरन्यत्र वर्जयेत् ।
योगजे केशादिवपनं दीक्षासंस्कारञ्च प्रतिष्ठम् ।
सूचि कर्मादिशलञ्च दिनेष्वेतेषु वर्जयेत ।
किरणे–:
आषाढे श्रावणे वापि यथा संभवतो भवेत् ।
शुक्लपक्षे चतुर्दश्यां तयो दश्यामथापि वा ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अवधीं कार्तिकीं कृत्वा नवमं मासमेव च।
पक्षमेकं दशाहं वा पञ्चरात्रमथापि वा।
न गन्तव्यन्तु यत्स्थानात् यावच्चैव पवित्रकम्।
पवित्रं स्थापयेत्तावद्धारयेद्विधिवत्ततः। दीक्षे नियम विधिरुक्तः। तद्यथा-
यावत्पवित्रमावर्ज्यं तावत्कालं व्रतञ्चरेत्।
क्षारं लवणवर्ज्यं स्यान्नखरोम निकृन्तयेत्।
ग्रामान्तरञ्च गन्तव्यं निशि न स्वपेत्।
आत्मार्थे त्वेवमेवं स्यादेकहोमन्तु कारयेत्। इति तदाकरणे प्रत्यवाय-श्रवणात् नित्यत्वश्रवणाच्च। नित्यस्वरूपं कालोत्तरे प्रतिपादितम्। स्नानं पूजा जपो होमो ह्यर्चनं चैव तु पंचकम्। इति नित्यं सदा कुर्यादिति क्रियाकाण्डक्रमावल्याम्। प्रत्यहं न विधेयत्वान्न्यायं नित्यविधिर्मत इति।

ननु नैमित्तिकमिति पक्ष एव साधुः। उक्तं तत्रैव। तस्मान्नियत कालत्वान्नैमित्तिकमिदं मतम्। मोहशरोत्तरे- अस्माभिर्दृष्टञ्चेदं शिवागमे। तस्मान्नैमित्तिकं नाम पवित्रकमिति स्मृतम्। इति चेत्तन्न दीक्षा चैव प्रतिष्ठा च नैकेमिदं द्वयमिति। कालोत्तरे श्रवणात्। पवित्रस्य तदन्यतरत्वाभावात्।

ननु काम्यं भविष्यति। फलस्य श्रवणत्वात्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विघ्नापहारपूजादि फलमस्योपयोग इत्युक्तत्वादिति चेत् प्रसिद्ध्यादि फलमुद्दिश्य क्रियमत्वात्। अणिमादि प्रसिध्यर्थं काम्यन्तदपि विस्मृतमित्युक्तत्वात्। न तु प्रायश्चित्तपक्षो गणीयन्यथा नियताद्यनुष्ठान भंगे प्रायश्चित्तं श्रूयते। तथा स्यात्करणेपि प्रायश्चित्त श्रवणात् प्रायश्चित्तञ्च भवति। तथापि प्रायश्चित्तत्वे अस्याकरणेपि लोभाम्मोहात्तथा ज्ञानात् यो न कुर्यात् पवित्रकः। स तिष्ठेन्नरके घोरे यावदाभूतसंप्लवम्।

शिवेच्छया यदा सृष्टिः पुनर्भवति तात्विकी।

तदा सौमर्त्य मायाति श्वानयोनि शतं व्रजेदिति।

बालज्ञानरत्नावल्याद्युक्त दोषश्रवणन्नेव पद्यते। ज्ञातदकरणे प्रायश्चित्तमपि कालोत्तर श्रूयते।

मासत्रयान्तरे चैतत्कृत्वा चैव पवित्रकम्।

लक्षत्रयं जपेद्धोरं शुचिश्चान्द्रायणे न तु। इति

तस्मादिदन्नित्यांगम्। उक्तञ्च षट्सहस्रिकायाम्।

दीक्षांगं संस्मृतन्नित्यं नित्यन्तु त्रितयात्मकम्।

द्रव्यमन्त्रक्रियोपेतं विकलं विफलन्नृणाम्।

अतो नित्यांगमेवाहुः पवित्रारोहणन्नृणाम्। ममतम्।

उक्तकैवल्यघोरात्पुनात्येव पवित्रकम्।

तस्मात्काले प्रकर्तव्यं प्रागुक्तं परमेष्ठिनः।

तेन सांवत्सरी पूजा संपूर्णा जायते स्फुटम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यस्तु संपूजयेद्भक्त्या लिंगैकं महेश्वरम् ।
तस्य पुण्यफलं वेन शक्तोऽस्मि शिखिध्वज ।
ब्रह्मोपेन्द्रादिभिर्देवैस्तपसा पूजितं पुनः ।
आयाय परमं स्थानं तस्मात्को व न पूजयेत् ।
पूजांगत्वा प्रकर्तव्यं नित्यमेव पवित्रकमिति ।

तथा कामिके -

पवित्रं नित्य पूजांगं पूर्वाद्यैः परिकल्पयेत् ।

नित्यांगानि कालोत्तरे श्रूयते । इति

नित्यांगं समाख्यातं नित्यांगं प्रोच्यतेऽधुना ।
अष्टम्याश्च चतुर्दश्यां पक्षयोरुभयोरपि
पञ्चदश्यां व्यतीपाते संक्रान्ता चोत्तरायणे ।
मासवृद्धौ दनक्षये बहशीति मुखेष्वपि ।
रवीन्दुग्रहणे द्विगुणाच्चाजपादिकम् ।
श्रीमन्मये चतुर्दश्यां तथाष्टम्यां पञ्चदश्याश्च पक्षयोः ।
मासवृद्धि दिनक्षये व्यतीपाताष्टकादिषु ।
रवीन्दुग्रहणे पूजा जपादिद्विगुणं भवेत् । इति

नित्यांगमेवोक्तमिति । किरणे

चतुरो वार्षिकान्मासान् नियमेन भवेद्द्विज ।
नियमोऽपि क्रियांगत्वा कार्यो दोषोऽन्यथा भवेत् ।

अथ सूत्रलक्षणं कालोत्तरे -:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कृते रत्नमयं कार्यं त्रेतायां हेम संभवम्।
पट्टजं द्वापरे शस्तं कार्पासन्तु कलौ मतम्।
यतिभिर्मनसं कार्यं दार्भं वा वाल्कलं हितम्।
क्रियाकाण्डे-: पट्ट वल्कल पद्मोत्थं क्षौमदर्भ शणोद्भवम्।
मौञ्ज्यादि संभवं सूत्रं पवित्राय प्रशस्यते।
कार्पासा संभवं पट्ट क्षौमाद्यायस्तु ग्राह्याः।
मौञ्ज्यादिकं दरिद्राविषयमेव । शैरवे ।
चातुर्वर्णोद्भवे स्त्रीभिस्सूत्रितं तु चरं भवेत्।
तदलाभे तु वाणिज्य गृहसूत्रन्तु विन्यसेत्।
ज्ञानरत्नावल्याम्-:
द्विज कन्या कृतं सूत्रमन्यद्वा सुसितं शुभम्।
नातिस्थूलं कुशाच्छिन्नं बहुसान्धिं सगुह्मकम्।
1348 समलान्य दोषाढ्यं दूरतः परिवर्जयेत्।
समलं जनयेत्पापं दग्धं राजभयं करम्।
स्थूलं व्याधिकरं प्रोक्तं कुशद्रव्यक्षयं भवेत्।
मृत्युदाच्छिन्न तन्तु स्यात्सान्धितं गुन्मयुक्तया।
ग्रन्थी केशाद्यमप्यस्मान्निर्मल दृढमाहरेत्।
सन्ताने-: तुषास्थैलणानीह धातुरोमाणि चैवहि।
पीतं कृष्णं तथासूतं पौरांगांश्च विवर्जयेत्।
व्याधितन्तुपके देवी तृणेनमरणं भवेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विरोमं कुलक्षयं विद्यात पीतं वै धननाशनम ।
आभिचारन्तु कृष्णं स्यात पौरुणं क्षतिनाशनम ।
स बीजं सुकरन्देवि धान्यनाशं भवेदिह ।
बीजस्य लोष्टसंयुक्तमधनाशं भविष्यति ।
केशस्तु बन्धुनाशं स्यात एतान्दोषान्विवर्जयेत ।
अपक्वं गर्भनाशं स्यात दोषानेता विवर्जयेत ।
श्रेष्ठं ब्राह्मणकन्या च ब्राह्मण्या मध्यमं भवेत ।
शिरसा शोधयित्वा तु ततो नेत्रेण संग्रहेत ।
सद्यो जातेन मन्त्रेण त्रिगुणीकृत्य कुब्जकम ।
अस्त्रेणैव तु मन्त्रेण पिण्डवत्सं प्रकल्पयेत ।
उत्तमादिभेदेन संहितायाम ।
वैकंकतमया वापि खादिरं वा विशेषतः ।
पिप्पलं जातिवृक्षस्च कीलं तत्रैव कारयेत ।
तात्त्रिंशदंगुलं दैर्घ्य उमुत्तमं कील मुच्यते ।
चतुर्विंशमध्यमं स्यात अधमं विंशदंगुलम ।
पंचांगुलपरिणाह मुत्तमं कीलमुच्यते ।
मध्यमं चतुरंगुल्य मधमं त्र्यंगुलं भवेत ।
शिताग्रं तदधस्तान्तु नमोन्नत विवर्जितम ।
शिरोमन्त्रेण देवेशी कीलं वै स्थापयेद्देशिकः ।
दक्षिणे पश्चिमे चैव उत्तरे च विशेषतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कीलञ्च उत्तमं स्थाप्य तच्छान्तिकमिति स्मृतम्।
कीलन्तु मध्यमं स्थाप्य तत्पौष्टिकमिहोच्यते।
अधमं कीलकं स्थाप्य भोगश्चेति कीर्तितम्।
तत्कीलकं समावृत्य सूत्रलक्षणसंयुतम्।
तन्तुजाम समायुक्तं सर्वसंपत्कराय च।
अन्यथा कारयेद्यस्तु अभिचारं भवन्ति वै।
उत्तमोत्तम सूत्रन्तु स्थिरलिंगे प्रदापयेत्।
उत्तमा मध्यमा देवि चललिंगे प्रदापयेत।

सुप्रभेदे- सौवर्णं राजतं वापि ताम्रं वा धातु पवित्रकम्।
नवषोडश विंशाद्विंशं अधमत्रयमेव च।
पञ्चविंशच्च द्वात्रिंशत् षट्त्रिंशत् मध्यमत्रयम्।
पञ्चाशत् सप्ततिश्चैव नवतिश्चोत्तमत्रयम्।
एतेषान्तु यथाशक्त्यं पवित्रं लक्षणान्वितम्।

सन्ताने- ग्रन्थि प्रमाणमुक्तम्।
कार्पासान्यन्यसेन्मध्ये अक्षबीज प्रमाणतः।

सुप्रभेदे- ग्रन्थयोस्तन्तु संख्याता स्थूलगर्भान वामताः।
यथेष्टग्रन्थयो वापि समास्सर्वत्र शासिताः।
एकद्वित्र्यंगुलं वापि ग्रन्थिमानमिहागमे।
ग्रन्थयास्त्विष्टदेवो वा विधातव्या विचक्षणैः।

चित्रविरिञ्चे- यथाशोभमन्तरालमेकद्वि चतुरंगुलम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सुप्रभेदे-: प्रशान्त्येति मन्त्रेण ग्रन्थयित्वा पवित्रकम्।
दशमध्ये दशग्रन्थिं बध्वा सूत्रेण देशिकम्।
नवसप्ताष्टसूत्रैर्वा ग्रन्थिं कृत्वा विचक्षणाः।
इन्द्रादि लोकपालांश्च ग्रन्थिनामधिदेवताः।
आत्मार्थेष्वेवमाख्यातं सूत्रसंग्रहणः क्रमात्।

रौरवे-: ग्रन्थिश्चाष्टादशश्रेष्ठस्तस्यार्द्धमध्यमं भवेत्।
सप्तग्रन्थियुतं यत्तदधमं परिकीर्तितम्।
गंगावतारकेत्वष्टादश ग्रन्थीनामधिदेवतास्ता उच्यन्ते।
शशिनी शाकिनी लक्ष्मी कामिनी च प्रभा तथा।
पुष्पिणी सुप्रभा चैव कुमुदा कुमुदा तथा।
अश्वासी शायिनी विद्या मोहिनी च प्रमोहिनी।
विवर्द्धिणी तथा सौम्या अमृता बोधनी कला।
शेषग्रन्थि इत्यस्येह शिवशक्ति प्रकीर्तितेति।
प्रकृतिः पौरुषी चैव गुणाविराजिता।
जिता च विजिता चैव प्रमदा च विशेषतः।
मनोन्मनी च विज्ञेया तदन्ते विन्यसेत्ततः।
क्रमाद्वै विन्यसेद्देवी ग्रन्थीनामाधिदेवताः।

ग्तत्तत्व पवित्रविषयम्।

ब्रह्मविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
सोमसूर्याग्नि देवाश्च विन्यसेन्नव तन्तुषु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नवग्रन्थौ कृते यद्वा नामाद्या श्शक्तयस्तथा।
अधिकावा यथा शोभं कर्तव्या ग्रन्थय ग्रन्थयस्तथा।

इति सूक्ष्मे ॥

अथवान्यप्रकारेण तन्तु संख्या शृणुत्वथ।
डकाद्येकैक वृध्या तु तन्तूनान्विष्ट संख्यया।
ग्रन्थयस्तन्तु संख्याना यथेष्ट ग्रन्थि संयुताः।
महा पवित्रं वक्ष्यामि गंगा गौर्यावतारकम्।
ग्रन्थयस्तन्तु संख्या वा गंगा गौरीव तारके।
अष्टादश ग्रन्थियुक्तं कुर्यात् गौर्यावतारकम्।
स गंगावतारमात्मार्थे यजने तु पवित्रकम्।
परार्थ यजनार्थाय कुर्याद्गौर्यावतारकम्।
पञ्च ग्रन्थिसमायुक्त नामान्तेण पवित्रकम्।
ग्रन्थ्येकं न व सूत्राढ्यं द्वादशांगुल मायतम्।
कृत्वा ग्रन्थ पवित्रं तत् माना - न विवर्जितम्।

वह्नसम्भकालोत्तरे -:

त्रितयं मूर्ध्नि लिंगानां शिवविद्यात्म संज्ञकम्।
लिंगमूर्ध्नि परीणाहन्तथा भागद्वयं विना।
तस्माद्भागद्वयं न्यूनं शिवाख्यं यत्पवित्रकम्।
मस्तकात्पिण्डक शतन्तु चतुर्थं सर्वदैविकम्।
अचले तु चले कार्यमष्टकाब्दयंगुलायतम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कृत्वा कंकणं वत्र दर्भाग्रान्थि समान्तरम् ।

मस्तकात्पिण्डकां तन्तु चतुर्थं सर्वदैविकम् ।

कामिके- रक्तचन्दनकाश्मीर - गैरिकगरु चन्दनैः ।

कुष्ठ कर्पूर संयुक्तं हरिद्रा कृष्णगन्धयुक् ।

रञ्जयेद्धृदयेनैव रक्तसूत्रादिभिस्तु वा ।

मोह शूरोत्तरे-

दर्भकुञ्जादिभिर्वा च सूत्राभावे पवित्रकम् ।

कर्तव्यं सेश्वरे लोके प्रायश्चित्तमथान्यथा ।

स्थण्डिले चललिंगे च बाणलिंगे स्वयं भुवि ।

लोहादौ नियमो नास्ति यथा पूर्वमुदाहृतम् ।

1408 अष्टोत्तरशताद्दूर्ध्वं न कर्तव्यं कदा चन ।

सर्वेषां नियमं चाक इत्याज्ञा पारमेश्वरी ।

अष्टोत्तरशतैः कुर्यात् स्थण्डिलादौ पवित्रकम् ।

तस्याद्धेन तदर्द्धं वा यथा लाभेन वा हरे ।

रत्नलिंगविषये कश्चिन्नियमस्सूक्ष्मे प्रदर्शितः । तद्यथा -

मणिमये चललिंगे तु यंत्रलिंगन्तु कारयेत् ।

करवेणुरज्जुसमायुक्तं यन्त्रलिंगैक हस्तकम् ।

छत्राकारं शिरः कुर्यात् लिंगं वै स्थापयेद्बुधः ।

तथा सन्तानसंहितायाम् - स्थिरलिंगविधिः प्रोक्तश्चललिंगे तु कौतुके ।

~~प्रोक्तश्चललिंगे~~ तु मध्यमं स्थापयेद्देवी पूजयेद्विधिपूर्वकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वज्रलिंगे प्रकर्तव्यं तन्मध्ये पूजयेत्ततः।
वेणुना सूत्रसंयुक्तान्त्रितालं चोच्छ्रितं भवेत्।
परिणाहश्चतुस्तालन्नव वस्त्रेण वेष्टयेत्।
एवं लक्षण संयुक्तं चललिंगे विधीयते।
यन्त्रलिंगप्रमाणं वा पुष्पलिंगमितन्तु वा।
क्षुद्रलिंगे पवित्रं स्यात् स्थण्डिलादौ यथा विधिः।
श्रीमन्मये- स्थण्डिले चललिंगे वा बाणलिंगे स्वयं भुवि।
सूत्राणां नियमो नास्ति सर्वं बाह्या पवित्रकम्।

षट्सहस्रिकायाम्-
ग्रहलिंगानलस्थाना त्यागस्था मृण्मयात्मता:।
स्रुक्स्रुवाभ्यान्न्यसन्त्यागं पादुका योगपट्टकौ।
(×पुराणान्यदृष्टैव नपकादि स्रुवन्तथा।
करणानि च सर्वाणि त्रिवृत्सूत्रेण वेष्टयेत्।

षट्सहस्रिकायाम् ।×)
वितानञ्चात पत्राणां परित्यागो विधीयते।

ज्ञानरत्नावल्याम्।
सूर्यकुंभाग्नि चण्डानां गणेश स्कन्द शंभुवत्।
सर्वेषां लोकपालानां वसुतन्तु युगांगुलम्।
पुस्तके तत्प्रमाणं स्यात् शृंगात्पृष्ठानगं वृषे
ऽक्कतन्तुकल्पश्चे देतेषां परिकल्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षट्सहस्रिकायाम् -:

चण्डेश क्षेत्रपालाभ्यां लोकेश वरतन्तुभिः ।

घटाक्षसूत्रयोस्तद्वत् पवित्रं चतुरंगुलम् ।

रौरवे -: भक्तानां नवसूत्रेण परिचारगणान्तथैव च ।

गुर्वात्मनोः प्रकर्तव्यं नाभ्यन्तन्नव तन्तुकम् ।

सप्तविंशति सूत्रेण आचार्यस्य प्रदापयेत् ।

त्रयस्त्रिंशति सूत्रेण नृपतेः परिकल्पयेत् ।

किरणे -: सर्वेषामेव देवानां त्रिंशत्सूत्राकृतिर्भवेत् ।

अथाधिवासनविधिः । कामिके -:

गर्वं निश्चित्य पूर्वेद्युरधिवासनमारभेत् ।

दीप्ते -: पक्षयोरुभयोश्चैव सप्तम्याञ्चाधिवासनम् ।

अष्टम्यान्तु विशेषेण पवित्रमधिवासयेत् ।

त्रयोदश्याञ्चाधिवासं स्यात् चतुर्दश्यामथापि वा ।

सूक्ष्मे -: तद्दिनस्य च पूर्वेद्युरंकुरार्पणमारभेत् ।

प्रासादस्याग्रदेशे वा चोत्तरे दक्षिणेऽपि वा ।

यागशालां समारभ्य सर्वं पूर्ववदुच्यते ।

कामिके -: मण्टपं चतुरश्रं तत् चतुस्त्रिंशत्करान्तकम् ।

षोडशस्तंभसंयुक्तं रविस्तंभयुतन्तु वा ।

सर्वालंकारसंयुक्तं मण्टपं विधिवत्कुरु ।

प्रतिमा बेरस्य स्थापने प्रोक्षणेऽपि च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पवित्राण्याधिवासे तु विमानप्रोक्षणेऽपि च।
एकादशपदेकार्यं मण्टपे रवि सूत्रके।
यन्मण्टपे क्रियां कुर्यात् प्रतिमाद्याधिवासरे।
तन्मण्टपे तु कर्तव्यं पवित्राण्याधिवासनम्।

अत्र मण्टपनिर्माणप्रकारः।

पवित्राद्याधिवासार्थं दक्षिणोत्तरान्तं पश्चिमपूर्वान्तञ्च शालविष्टादृकार्पास रविसूत्रास्फालनेन एकविंशत्छत्पदं भवति। तन्मध्ये नव पदकृत वेदिकायां गौरी तिलकादिमण्डलं ब्राह्मणादि वर्णानुगुणेन विन्यस्य तद्बाह्य षोडशपदेषु कुण्डं विधाय तद्बाह्य चतुर्विंशत्पदेषु दन्तकाष्ठाद्याधिवासन द्रव्याणि विन्यस्य तद्बाह्ये द्वात्रिंशत् पदं सञ्चारार्थं परिकल्प्य तद्बाह्ये चत्वारिंशत्पदेषु द्वारादि कुंभसंस्थापनार्थं च चतुर्द्वारपरिकल्पनार्थञ्च विदध्यात्। तथांशुमति -

आनुसूत्रात्समुद्भूतन्त्वेकविंशतं पदम्।
मध्ये नवपदं वेदिरूपवेद्यास्समान्वितम्।
उपवेद्यास्तु परितः कुण्डं कुर्याद्यथा विधि।
इन्द्रे वायोक दिग्भागे त्वेक कुण्डं प्रकल्पयेत्।
तद्बाह्येक पदावृत्वा सञ्चारार्थं विलोप्य च।
तद्बाह्यपदभागेषु दिक्षु द्वारार्थकापदम्।
त्रीणि त्रीणि पदानि स्युश्शेषं पूर्ववदेव हि।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मण्डपाधिप देवांश्च यजनार्थं परिग्रहेत् ।
चुल्लिकायाः स्वरूपन्तु कारणे तु प्रदर्शितम् ।

तद्यथा -: अब्जद्वयसमायुक्ता पूर्वे शिरसि संयुता ।
पश्चिमाभिमुखी कार्या चैकैकं पर्वतांगुलम् ।
अग्रत्र्यंगुलविस्तार चुल्लिरत्र विचिन्तिता ।

अंशुमति -:

दक्षिणे चुल्लिकां कल्प्य स्थाली पाकार्थमेव हि ।
प्रधान कुण्डपश्चिमया पवित्राण्यधिवासनम् ।
कुण्डस्य परितः कुर्यात् भूतानां द्रव्य साधनम् ।
शेषं पूर्ववदुद्दिष्टं पवित्रारोहणान्तकम् ।
तन्मण्टपे क्रियां कुर्यात् दमनारोहण क्रमम् ।
सर्वं पवित्रवत्कार्यं स्थाली पाकादिकं विना ।
चतुर्द्वार समायुक्तश्चतुस्तोरण भूषितम् ।

तस्य लक्षणं विजयोत्तरे -:

त्रिकरा स च पञ्चभ्य पादं पादविवर्द्धनात् ।
उत्सेधार्द्ध विशालानि किञ्चिन्न्यूनाधिकानि वा ।
तोरणानि पयो वृक्ष जाति भेदेन चैकतः ।
तत्सर्वे शाखाविस्तार बाहुल्या त्र्यंगुलाद्या षडंगुला ।
अष्टांगुला त्करान्तानि शूलश्रृंगाण्डयोपरि ।
ऊर्ध्वशाखा ललाटस्य मध्यमे तु विनायकम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्सभ्ये वामभागे च श्रियं वागीश्वरीमपि ।

1808 अभावे पादपानान्तु यथालाभ प्रमाणतः ।

आत्मार्थे वा परार्थे वा तोरणादि प्रकल्पयेत् ।

अष्टमंगल संयुक्तं वस्त्राद्यायुध संयुतम् ।

अंशुमति -:

अष्टदिक् ध्वज संयुक्तं दर्भ माला स ग्रन्तम् ।

पुष्पवृक्ष कदली पूग स्तंभौ द्वारस्य पार्श्वगौ

चित्रवस्त्रैरलं कृत्य पूगपुष्पाद्यलं कृतम् ।

गात्रवेष्टन संयुक्तं मुक्तादामैरलंकृतम् ।

अर्द्ध-चन्द्राकृती युक्तन्दर्पणादि वितान युक् ।

मण्डपालंकृतिस्त्वेवन्नानादीप समान्वितम् ।

चिन्त्यविश्वे -:

सप्तम्याञ्च तयोदर्श्यां कृत नित्यविधिश्शुचिः ।

रक्तक्षौमैश्च पुष्पैश्च भूषयेन्मुख मान्दिरम् ।

सन्ध्या नैमित्तिकं कुर्यात्तर्पणञ्च विशेषतः ।

सूक्ष्मे -: गोमयेनोप लिप्याथ पुण्याहप्रोक्षणं कुरु ।

शालिभिस्स्थण्डिलं कृत्वा तन्मध्येऽब्जं समालिखेत् ।

तण्डुलैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत् ।

पञ्चचूर्णैरलंकृत्य दर्भमालैरलं कृतम् ।

अंशुमति - द्वाराणामुभयोः पार्श्वे अष्टाविंशत्सदा वृतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूर्वद्वारे तु नन्द्यादि तत्र शान्त्युक्तकं क्रमात्।
नन्दीन्द्रौ भानुवह्नी च यमं विघ्नविनायकम्।
विद्याकलाञ्चाग्नि कोणे सप्तैते पद भागिनः।
भृङ्गी र्वास्तोष्पतिर्विष्णु र्निरृतिं लक्ष्मीं गुहस्तथा।
निवृत्तिश्चैव सप्तैते नैरृते पद भागिनः।
अस्त्रमुखश्च वरुणं पवनोथ गणेश्वरः।
चण्डेशश्च प्रतिष्ठा च वायु कोणे च सप्तके।
देवी सोमेश चतुर्वीशौ विरिञ्च कालशान्तिकौ।
ईश कोणे च सप्तैते पदभागाष्टविंशतिः।
पताकाश्च दशास्त्राणि दिग्गजाष्टकमेव च।
मण्टपावृत देशे तु द्वारपार्श्वस्थितिः क्रमात्।
इत्यन्देवता विन्यास क्रमस्वरूपन्तु अंशुमतोमतमिति द्रष्टव्यम्।
स्वार्थं भुवे विप्रादीनाञ्चतुर्णां मण्डलविधिरुच्यते।
अथात्मार्थ पवित्रे तु मण्डलं विधिना कुरु।
गौरी तिलकभद्रौ च शशिं स्वस्तिकमेव च।
आत्मार्थे तु प्रकर्तव्यं विप्रादिषु यथाक्रमम्।
गौरीतिलकमतुलं सूत्रैस्सप्तदशात्मकैः।
मध्ये श्वेत व्यामपदं श्वेतञ्चतुर्दिशि।
लिंगपीठञ्च कम्पञ्च कण्ठं कंपञ्च पीठकम्।
चतुष्षष्ट्यंग नेत्रैश्च चतुष्षड्भिः पदैः क्रमात्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मुखवर्णैश्च संशुद्ध्य वेदवेद पदैः पुनः।
विदिक्षु पञ्च पुष्पाणि भिन्न वर्णैः प्रकल्पयेत्।
प्रत्येकं सर्वकोणेषु पञ्चविंशत् पदैः क्रमात्।
नानाविधैः प्रकर्तव्या लतावर्णैर्मनोरमा।
गौरीतिलकमाख्यातं भोगमोक्षफलं भवेत्।

इत्यमर्थमेव सिद्धान्तसारमप्याचार्यैरुक्तम्। अथ भद्रमण्डलं सिद्धान्त सारावल्यामुक्तम्। तद्यथा -:

क्षेत्रे रुद्रपदे - - तेन ग्रहपदैर्मध्ये सितां पंकजं कुर्यात्।
कोण चतुष्टयेष्टपदकैः स्वर्णप्रभान् स्वस्तिकान्
दिक्ष्वादित्यपदेष्ववर्धालयलयैर्लिंगानि पीठानि वै।
शेषं भिन्नरजो विलेपमतुलं भद्राख्यमण्डलम्।

अथ शशिमण्डलमुच्यते -, यद्वा पवित्रारोहणे महामण्डलं वा कर्तव्यम्। तथा षट्सहस्रिकायाम्। पवित्रारोहणे शास्त्रदीक्षा यच्च विशेषतः। महामण्डल संज्ञान्तु शिवस्य हृदयप्रियाम्।

अथ स्वस्तिकमण्डलविधिरुच्यते।

प्रागग्रमुदगग्रञ्च पञ्चसूत्रं प्रधारयेत्।
लिंगमेकपदं विद्धि त्रिपदं पीठमेव च।
चतुर्लिंगसमायुक्तं मुखवर्णैश्च भूषयेत्।
तन्मध्ये श्वेतवर्णन्तु भोगमोक्षफलं भवेत्।
सर्वं ज्ञात्वा तु मन्त्रज्ञ सर्वकर्माहको भवेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कामिके-: कृतशौच विधिस्नानं संध्यावन्दन तर्पणम्।
तद्दिनस्य तु पूर्वद्युरधिवासनमारभेत्।

दीप्ते-: नित्यकर्म समाप्तौ तु नैमित्तिकमथाचरेत्।

तथा वह्निसंहितिकायाम्।
नित्यं निर्वर्त्यते पश्चान्नैमित्तिकमथाचरेत्।
तत्रादौ पूजयेत्सूर्यं नित्यवद्विधिपूर्वकम्।

अंशुमति-: एवं सौरं समभ्यर्च्य बहिर्निर्गत्य मण्टपात्।
प्रक्षाल्यपाणि पादौ च समाचम्य विधानतः।
भस्मसन्धारणं कृत्वा सकलीकरणं कुरु।
सामान्यार्घ्यञ्च संकल्प्य पूर्वादिषु यथाक्रमम्।
द्वाराभ्यस्त्रेण संप्रोक्ष्य द्वारतोरणमर्चयेत्।

चिन्त्ये-: स्थित्वैव मण्टपाद्बाह्ये तोरणानि समर्चयेत्।
ओं हां शान्ति तोरणाय भद्राय नमः।
ओं हां भूतितोरणाय विजयाय नमः।
ओं हां बलतोरणाय वज्राय नमः।
ओं हां आरोग्यतोरणाय नीललोहिताय नमः।

इति पूर्वद्वाराद्युत्तरान्तं समर्चयेत्। तदनु द्वाराण्यस्त्रेण संप्रोक्ष्य त्रिपदकृत द्वारा दुत्तरपद कुंभे ओं हां शान्तिकलाद्वाराय नमः। दक्षिण द्वारपूर्व कुंभे ओं हां विद्याकलाद्वाराय नमः। पश्चिमद्वार दक्षिण कुंभे ओं हां निवृत्तिकलाद्वाराय नमः। उत्तरद्वारपश्चिम

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुंभे ओं हां नन्दिने नमः द्वारस्य दक्षिण कुंभे ओं हां
महाकालाय नमः दक्षिण द्वारविद्यापूर्व कुंभे ओं हां भृंगिणे
नमः पश्चिमकुंभे ओं हां विनायकाय नमः पश्चिमद्वारे
निवृत्तिदक्षिण कुंभे ओं हां वृषाय नमः। उत्तरकुंभे ओं हां
स्कन्दाय नमः। उत्तरद्वारे प्रतिष्ठा पश्चिम कुंभे ओं हां
देव्यै नमः पूर्वकुंभे ओं हां चण्डाय नमः

इत्थं संपूजयेद्विद्वान् स्थण्डिले कलशेऽथवा।
ध्यानपूर्वं स्वमन्त्रेण बाह्याद्यन्तकं यजेत्।

स्वायंभुवे -

निवृत्त्पश्चिमद्वारे द्वारपालार्चनं नयेत्।
दिव्यान्तरिक्ष भूमिष्ठान्विघ्नानुत्सार्य तद्बलात्।
वामशाखां समाश्रित्य द्वारस्याभ्यन्तरे ततः।
प्रविश्य पश्चिमद्वारे अस्त्रराजं समर्चयेत्।
1M1a प्रदक्षिण्य वशात्कृत्वा निर्ऋतौ वास्तु पूजनम्।

ओं हां वास्त्वधिपतये ब्रह्मणे नमः। कामिके -

संपूज्य गन्धपुष्पाद्यैर्वस्त्रप्राकारकल्पितान्।
वर्मावकुण्ठनाद्यैस्तत् गेहं संरक्ष्य देशिकः।

तत कूर्चेषु - ओं हां पृथिवीतत्वाय नमः। तृणेषु ओं हां
जलतत्वाय नमः। बन्धेषु ओं हां अग्नितत्वाय नमः।
वंशेषु ओं हां वायुतत्वाय नमः। आग्रेषु ओं हां

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आकाशात्मने नमः वितानेषु ओं हां रुद्राय नमः।
वर्गेषु ओं हां जाह्नव्यै नमः दर्भमालायां ओं हां वासुकये नमः
इत्यभ्यर्चयेत्। अंशुमति।

वेदी दक्षासने स्थित्वा गुरुरुत्तरदिङ्मुखः।
भूतशोधनमन्त्रश्चान्तर्यजनं स्थानशोधनम्।
दण्डभंगी वक्त्रभंगी कलाभंगी यथा क्रमम्।
अष्टत्रिंशत्कलाभंगी मातृकादीन्यथा न्यसेत्।

अत्र आदिशब्देन अन्तर्यजनहवनध्यानतालत्रयादिना ग्रामसंरक्षण-
मुच्यते। स्वायंभुवे

अर्घ्यसंस्थापनं द्रव्य शुद्धिमात्रार्चनन्ततः।
मन्त्रशुद्धिश्च कृत्वा तु न्य स्वदक्षिण करे तले।
वामांगुष्ठ कृते लिप्ते चन्दनेन षडुत्थकम्।
न्यस्त्वा सदाशिवं मूर्तिं मूलेनावाह्य निष्कलम्।
सांगं संपूज्य तद्धस्तं स्वकीये मस्तके न्यसेत्।
तालप्रमाणं षट्त्रिंशद्दर्भजं सप्तधा स्मृतः।
जप्तं ज्ञानासिमादाय स्थापयेत्पञ्चगव्यकम्।

स्कन्दकालोत्तरे -:

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्।

कामिके-: लाजचन्दन सिद्धार्थ भस्मपुष्प कुशाक्षताः।
हेमयोस्त्रेण दातव्या हुं फडन्त विमिश्रिताः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नैर्ऋत्यां मण्टपे । स्थित्वा संस्कृती मण्टपस्य तु ।
आर्यावीशातगक्तस्तु संस्कारे दीक्षणादिभिः ।
सूक्ष्मे-:
विकिरानस्त्तमन्त्रेण विकीर्य कुश कूर्चकैः ।
संगृह्य शिवगायत्र्या वीरोदीशानगोचरे ।
आसनञ्चास्त्र वर्द्धन्यो कल्पयेत्कल्पवित्तमः ।
पश्चिमद्वारपालस्योत्तर कुंभे ओं हां महालक्ष्म्यै नमः । इति संपूजयेत । डेशान्यां विधिवन्निर्मित वेदिकाया सांगं भगवन्तं संपूज्य तद्दक्षिण वर्द्धनीं पूजयेत । वीरतन्त्रे
वेदिमध्ये न्यसेदु कुम्भं व्योमव्यापिन समुच्चरन ।
द्वारस्याभिमुखं चैव विन्यसेद्यागमूर्तिनम ।
वर्द्धनीं विन्यसेद्वामे गौरीबीजेन मन्त्रतः ।
पूर्वादीशानपर्यन्त मष्ट कुंभांश्च विन्यसेत ।
अनन्तादि शिखण्ड्यन्तं विन्यसेद्धतमध्यमे ।
अर्चयेदिन्द्र पुष्पाद्यैः स्वस्वनाम्नैव मन्त्रवित ।
स्वायंभुवे-:
कुंभे चलासनं दत्वा शिवं सांगं समर्चयेत ।
वर्द्धन्यां संयजेत्पाशुपतास्त्रं सांगपूर्वकम । अत्र क्रमः ।
ओं हां अस्त्रासनाय हुं फण्णमः । इत्यासनन्दत्वा ।
चतुर्भुजान्त्रिणेत्रञ्च कृष्णपिंगोर्ध्व केशकम ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्त्रं पाशधरन्देवं ज्ञानखड्गगदान्वितम्।

इति ध्यात्वा ओं अस्त्रमूर्तये हुं फण्णमः। ओं श्लीं पशुं हुं फडस्त्राय हुं फण्णमः।

ध्यात्वा पाशुपतं देवं सांगं संपूजयेद्बुधः।

सितं वस्त्रादिनोभयं विभूष्योत्थाय मण्डपस्योत्तरदिग्भागे इन्द्रादीन् पूजयेत्। चिन्त्यविश्वे।

वाहनायुधदीप्ताश्च दिक्षु शक्रादिषु। स्थितान्।

विष्वक्सेनान्तान्दश संपूज्य नमस्कारैः स्वनामभिः।

सूक्ष्मे-: विरिञ्चमीशदक्षस्थं विष्णुन्निरृति वामगम्। प्राच्यां महाकालसूर्ययो मध्ये ओं हां अग्नये नमः। गोपस्य पश्चिमायां ओं हां यमाय नमः ओं हां निरृतये नमः। स्कन्दस्योत्तरे ओं हां वरुणाय नमः ओं हां वायवे नमः। चण्डस्य पूर्वकुंभे। ओं हां कुबेराय नमः। ओं हां ईशानाय नमः। तत्कुंभस्य दक्षिणे ओं हां ब्रह्मणे नमः निरृति कुंभस्योत्तरे ओं हां विष्णवे नमः। इति संपूजयेत्। चिन्त्यविश्वे-

वर्द्धनीं गुरुरादाय कुंभाग्रानुगमो मुखीम्।

अविच्छिन्नां बुधाश्च भूयेच्च प्रदक्षिणम्।

मुखमण्टपरक्षार्थं मूलमन्त्रं समुच्चरन्।

कामिके-: भो भो शक्र त्वया स्वस्यान्दिशि विघ्नोपशान्तये।

सावधानेन यागान्तं यावत् स्थेयं शिवाज्ञया।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वेषां लोकपालानामनेन क्रमयोगतः।
शिवाज्ञां लोकपालेभ्य श्रावयेद्देशिकोत्तम।
विन्यसेत्कुंभवर्द्धन्यौ पूर्ववत्तदनन्तरम्।
स्थिरासनञ्च संपूज्य देवदेवीञ्च पूजयेत्।
मूर्तिं विद्यातनुं स्वांगं शिवं सावरणान्तकम्।
अस्त्रेण ताडयेत्पश्चात् प्राणवासनसंस्थिताम्।
पूजयित्वा तयोरैक्यं कल्पयेच्चोद्भवमुद्रया।
अंगुष्ठेन स्पृशेत् कुंभं हृदा मुष्ट्या तु वर्द्धनीम्।
उमायै भगरूपिण्यै लिंगरूपधराय च।
शंकरायनमस्तुभ्यमिति स्तुत्वानुमोद्य च।

ज्ञानरत्नावल्याम् - यथा शान्ति जपं कुंभे वर्द्धन्यां तद्दशांशतः।
कृत्वा निवेद्य देवाय ज्ञानखड्गं समर्पयेत्।

कामिके- यज्ञस्यास्य पतिस्त्वं हि मूर्तिरेषा तवा चला।
ऽपते ज्ञाननिस्त्रिंशास्त्र ग्रहणस्त्व मायुधम्।
मयाप्रवर्तितश्चायं यज्वना भवतः क्रतुः।
रक्षणीयस्त्वयैतर्हि समाप्तिर्यावदस्य हि।
यज्ञरक्षा धुरन्तस्मिन्नेवं विज्ञाप्य देशिकः।

तत्र निरोधार्घ्यं साध्या घोरेण दत्वा तत्पात्रन्तत्रैव
स्थाप्य यागगृहमपसारितारोप विघ्नमासमन्तात् भावयेत्।

अंशुमति- वायव्यान्दिशिमासाद्य यजेद्विघ्नविनायकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



निर्विघ्नत्वं प्रसन्नोऽसि त्वत्प्रसादाद्गजानन। इति
गणपतिमभ्यर्च्य

गुरुमिष्ट्वा तथैशान्यां लब्धवानुज्ञां प्रसन्नधीः।

आद्यादिगुरुपर्यन्तं पूजयेद्देशिकोत्तमः। इत्यभ्यर्च्य
लब्धानुज्ञः स्वेष्टलिंगे विभवानुसारेण विशेषपूजां विदध्यात्।
तथा कामिके-:

१।१८ परिगृह्य गुरोर्देव समीपे स्वासने स्थितः।

आसनार्चनमारभ्य कुर्यादावाहनान्तकम्।

कर्म पञ्चामृतोपेतं विशेषस्नपनादिकम्।

समस्तोपचारसंयुक्तं भक्ष्यभोज्यान्नसंयुतम्।

पूजां विशेषतः कुर्यात् मण्डलार्चनमारभेत्।

ब्रह्मस्थाने ब्राह्मणाद्यनुक्रमेण गौरीतिलकादिके गन्धविरचित-
मण्डले वा परमकारणम्। शिवं स्वेष्टलिंगपूजान्तं वा समा-
राधयेत्। सूक्ष्मे-:

वेदिकोर्ध्वे शिवं यष्ट्वा परिवारसमन्विताम्।

गन्धपुष्पादिनाभ्यर्च्य धूपदीपादिकं ददेत्।

कामिके-: इत्थं कृत्वा पुनश्चुल्लिं वीक्षणाद्यैर्विशोधिताम्।

धर्माधर्मशरीरान्तां जप्त्वा शस्त्रेण सप्तधा।

तत्र निक्षिप्य वै वह्निं संप्रज्वाल्य सदिन्धनैः।

तदग्रे मण्डले स्थाण्डीं क्षालितामाज्यवारिणा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षडुत्थासनके कृत्वा मूर्तीभूतां तदन्तरे।
मनसा शिवमभ्यर्च्य पुष्पैरभ्यर्च्य सर्पिषा।
मूलस्याष्टशतं लब्ध्वा द्रव्यं शाल्यादि तण्डुलम्।
यथा पाकानुरूपान्तं निक्षिप्याथ - धाय - च।
त्रिसूत्र्यावृत्य तत्कण्ठं वर्मास्त्रेण कुशैश्च वा।
धर्माधर्म शरीरायां च्चुल्यामारोप्य यत्नतः।
शिवग्राहहृदा चालनं पचेत्पूर्वाननश्चरुम्।
स्विन्ने संहिता मन्त्रैः कृत्वा मन्त्राभिधारणम्।
स्वाहान्तैस्तत्र तच्चुल्यां स्रुवमापूर्य सर्पिषा।
उत्तार्यमले धृत्वा स्वेति हेति प्रयोगतः। हृदा संमृज्य लेपयेत्
शीताभिघारणं कृत्वा वौषडन्त शिवाणुः।
चुलुस्थं धूपदीपार्थं वह्निं संरक्ष्य यत्नतः।
कुण्डाग्रे मण्डले धृत्वा स्वेतिहेति प्रयोगतः।
अग्नौ चरौ स्रुवाज्येन संपातस्य त्रिसप्तधा।
ओं हों हां हीं हूं हैं हः शिवाय स्वाहा इति संहिता।
अभिमन्त्र्य संरक्ष्य प्रचोच्याथ त्रिधा भवेत्।
कामिके-: शिवांगमग्निभागञ्च महवाज्याभ्यान्तु मिश्रितम्।
कुर्यादात्मीय भागन्तु केवलेन घृतेन च।
हृदा देवांशमभ्यर्च्य तमादाय शिवान्तिकम्।
तत्र शिवाय कल्पितं भागं पञ्चधा विभज्य शालकर्करीमपुल

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्वेष्टलिंगाधिकरणस्थाय शिवाय भाग-चतुष्टयं निवेद्य शेषमावरणाय निवेदयेत । अभ्यर्थं कल्पितं भागं चतुर्धा विभज्य एकं भागमग्नये निवेद्य तच्छेषं हुत्वा द्वितीयेनान्तबलिन्दत्वा तृतीयमग्नौ पवित्रारोपणकाले हुत्वा तुर्येण बलिर्देयः। तथा तमभागं कर्मान्ते प्राश्नीयादिति पूर्वं विधिवन्निर्मितपवित्राणि शुद्धपात्रे निधायाग्निसन्निसमानीय कुण्डपश्चिमभागे दर्भसंछित प्रापवासन कल्पितमण्डले संस्थाप्यास्त्रेण संप्रोक्ष्य गन्धपवित्रकेन नवतन्तुषु । ओं हां प्रवाय नमः। ओं हां चन्द्राय नमः। ओं हां वह्नये नमः ओं हां ब्रह्मणे नमः। ओं हां नागाय नमः। ओं हां गुहाय नमः ओं हां रवये नमः। ओं हां सादरूयाय नमः। ओं हां सर्वदेवेभ्यो नमः। इवं विन्यसेत । यद्वा कालोत्तरे-: उक्तवत -:

अजं विष्णुञ्च रुद्रञ्च ईश्वरञ्च सदाशिवम ।
सोमसूर्याग्नि देवांश्च विन्यसेन्नव तन्तुषु । अथवा

वामादि शक्तिन्यसेत । तत्त्वपवित्रक ग्रन्थिषु । ओं हां प्रकृतये नमः। ओं हां पौरुष्यै नमः। ओं हां विरायै नमः। ओं हां पराजितायै नमः। ओं हां जयायै नमः। ओं हां विजयायै नमः। ओं हां अजितायै नमः। ओं हां सदाशिवायै नमः। ओं हां मनोन्मन्यै नमः ओं हां सर्वतो मुख्यै नमः। इति विन्यस्य गंगावतारके । ओं हां वशिन्यै नमः। ओं हां शाकिन्यै नमः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं हां लक्ष्म्यै नमः। ओं हां कामिन्यै नमः। ओं हां प्रभायै नमः। ओं हां पुष्टिप्र्यै नमः। ओं हां सुप्रभायै नमः। ओं हां कुमुदायै नमः। ओं हां अश्वास्यै नमः। ओं हां शायिन्यै नमः। ओं हां विद्यायै नमः। ओं हां शक्त्यै नमः। इत्यष्टदश ग्रन्थिषु विन्यसेत्। यद्वा अकाराद्युन्मनी पर्यन्त षोडशकलां शिवशक्ति सहितं विन्यस्य पवित्र-चतुष्टये मण्डल-चतुष्टयं साधिपञ्च न्यसेत्। सन्ताने-

शरावाकृतिरूप स्यात् दर्पणोदनवद्वयम्।
सौवर्णं रजतं वापि मृण्मयं वापि कारयेत्।
शिवबीजेनमन्त्रेण तत्पात्रं प्रोक्षये-त्ततः।
गलातर्वं कतककोल मुशिरञ्चन्दनन्तथा।
समालोस्य विशेषेण लेपयेत्पात्र डाव-च।
ऊर्ध्वपात्रमधः पात्रं लेपयेन्तु विशेषतः।
डावं ज्ञात्वा महादेवी सूत्रं पात्रे तु विन्यसेत्।

कामिके-: तत्र संस्थापयेत्पात्रे पवित्राव्यथ वैशके।
संस्थाप्यार्घ्योदकेनैव प्रोक्ष्यसंहितया लभेत्।
कृष्णाजिनादिना-च्छाद्य स्थापयेत्पावकान्तिके।
संवत्सरात्मकं सर्व कृत्य साक्षिणमव्ययम्।
गोप्तारं साश्रयं कर्म फलप्राप्ति निबन्धनम्।
स्वेति हेति प्रयोगेण मन्त्रसंहितया ततः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिसप्तकृत्वा संपातं तथैव जुहुयात्ततः।

सूक्ष्मे-: अघोरेण शतं हुत्वा अस्त्रेणैव शतं हुनेत्।

मूलेनाष्टशतं हुत्वा स्पृष्ट्वा गन्धपवित्रकम्।

कामिके-: अस्त्रेण प्रोक्षितं वाममन्त्रितं हृदयार्चनम्।

धेनुमुद्रामृतीभूतां शिवाङ्केऽपि निवेदयेत्।

1520 ततस्सूर्याय चरुं दत्वा निवेद्य गन्धपुष्पदूर्वाद्यक्षतान्वितम्।

गन्धपवित्रन्धूपयित्वा ओं। समस्तविधिवाच्छिन्द्रपूरणाय स्वं प्रति।

स्वभावान्मन्त्रयामित्वान्त्वदिच्छा व्याप्तिकारक।

तत्सिद्धिमनुजानीहि यजतश्चित्तचिन्त्यते।

सन्ततं सर्वदा सूर्य नमस्तेऽस्तु प्रसीद मे।

इति पठित्वा तन्मूलेन स्वाहान्तेन दत्वा परमीकृत्य जपं निवेद्य प्रणम्याचम्य कृतसकलीकरणो यागधामादि पूजोपकरणादि कवचमन्त्रमुच्चार्य सूत्रेणावेष्ट्य द्वारपाल वास्तुनाथ लक्ष्मीभ्यः पवित्रन्दत्वा लोकपालास्त्रेभ्यः स्वाहान्तैः स्वस्वमन्त्रैर्गन्धपवित्र निवेदयेत्। कामिके-:

तदेतानि पवित्राणि भगवन् संस्कृतानि हि।

अर्पयामि परस्ताय शिवाय ध्येयवर्येदिति।

कामिके-: एकग्रन्थिसमायुक्तमल्पतन्तु विनिर्मितम्।

धूपितं पुष्पसंयुक्तं समादायाञ्जलौ गुरुम्।

आमन्त्रण पवित्रन्तत् सुधामुद्राप्रशोचितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



श्रीमन्मये-: शिवे समर्पयेन्मूर्ध्नि रेचकेनामृतीकृतम्।

पठेन्मन्त्रोत्तमं विधानामन्त्रिण पदान्तकम्।

समस्तेत्यादि शिवशक्तीनां प्रत्येकनामविशिष्टमामन्त्रणं पठित्वा स्वाहान्तशिवमन्त्रेण कुंभास्त्रवर्द्धन्योश्चरुन्निवेद्य गन्धपवित्रकन्दत्वा निवेदयेत्। यद्वा

आमन्त्रितोसि देवेश सह देव्या गणेश्वरैः।

मन्त्रेशैर्लोकपालैश्च सहितं परिवारकैः।

निवेदयाम्यहं तुभ्यं प्रभाते तु पवित्रकम्।

नियमश्च करिष्यामि परमेश तवाज्ञया।

जपं कृत्वा समावेद्य प्रणिपत्य क्षामापयेत्।

गुरुमिष्ट्वा च नैवेद्यन्दद्याद्गन्धपवित्रकम्।

सुप्रभेदे-: मण्डले वर्तयें तस्य मध्ये पूर्वोक्तमार्गतः।

पूजाविध्युक्तमार्गेण तस्मिन्यस्मात्सदाशिवम्।

हविं निवेदनं कृत्वा फले भक्ष्यान्यनेकधा।

दत्वा गन्धपवित्रन्तदामन्त्रिणमनुं पठन्।

पञ्चावरणदेवानां पवित्रं हृदयेन तु।

अन्येषाञ्चैव देवानान्दापयेत्तु पवित्रकम्।

तस्याग्रे तु पवित्राणि तद्रात्रौ चाधिवासयेत्।

तदनु देवसमीपं गत्वा स्वासने समुपविश्य संपूज्य व्रतचर्याद्यंगानि विज्ञाप्य तत्तत् स्थानेषु निवेशयेत्। सूक्ष्मे-:

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कर्त्तिका दन्तकाष्ठञ्च तालुशोधनमेव च ।
सूचिका-श्रोत शोधी च नखशोधनमेव च ।
पूर्वभागे न्यसेद्धीमान् पौरुषमन्त्रमुच्चरन् ।
कौपीन खण्डवस्त्रञ्च तैलमामलकन्तथा ।
चन्दनं पश्चिमे देशे स्थापयेत् सद्यमन्त्रतः ।
ओष्ण्याणं योगपट्टञ्च भिक्षापात्रं कमण्डलुम् ।
व्याघ्राजिनं वेणुदण्डं चामरं छत्र दर्पणम् ।
भसितं पादुकञ्चैव मात्रादण्डञ्च खड्गकम् ।
उत्तरे विन्यसेद्धीमान् वामदेवमनुस्मरन् ।
अस्त्रेण प्रोक्षितं वामा वकुण्ठित हृदाचितम् ।
धेनुमुद्रामृतीभूतं शिवोशाय विनिवेशयेत् ।
श्रीमन्मयो क्तवद्वापि कारयेदधिगासनम् ।
दन्तकाष्ठन्यसेत्प्राच्यां विध्युक्तं पुरुषं स्मरन् ।
भस्मदक्षिणतश्शङ्ख पात्रे घोरेण देशिकम्ः ।
पश्चाद्दद्यामृतं शुद्धां सद्यो जातेन च स्मरन् ।
श्रीफलमुदकगर्भे पञ्चगव्यं निवेदयेत् ।
यदस्मपन्नमेतेषां मनसा तत्प्र~~कामयेत्~~ कल्पयेत् ।

ज्ञानरत्नावल्याम् -:

ऐशान्यां कुसुमं दद्यात् आग्नेय्यान्दारी रोचनम् ।
अगरुन्नैर्ऋतशायां वायव्याञ्च चतुस्समम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अत्र चतुश्शब्देन चन्दनागरुकर्पूरकुंकुमान्युच्यन्ते। डोरान्या
दिविदिक्षुशिरो हृच्छिखावा वर्ममन्त्रैर्निवेशयेत। किरणे-

स्थापयेत्पञ्चरात्रं वा त्रिरात्रं रात्रिमेव वा।
एवं पवित्रकं कार्यं शिवाचारयुक्तैर्नरैः।

मोहशूरोत्तरे-

चतुर्मासद्विमासं वा मासं वा पक्षमेव वा।
दशाहं सप्तरात्रं वा पञ्चाहं वा दिनत्रयम्।
दिनद्वयमथैकाहं प्रतिष्ठां कारयेद्बुधः।

कामिके- दत्वा वह्निस्थं देवाय तृतीयांशञ्च रं गुरूमः।
आमन्त्रण पवित्रञ्च दद्यात्तस्मै च पूर्ववत्।

रामनाथपद्धत्याम्

दत्वांगानञ्च तददत्वा मूलेनाष्टोत्तरं शतम्।
हुत्वांगानान्दशांशञ्च दत्वा पूर्णां यथा पुरा।

कामिके- स्वाहान्तमन्त्रेण इन्द्रादिभ्यो बलिन्ददेत्।
अन्येषाञ्चैवमुक्तानुक्रमा दद्या द्वहिर्बलिम्।
वायव्यां क्षेत्रपालाय दत्वाचम्य बलिं पुनः।
प्रायश्चित्तं ततो दत्वा पूर्णां ~~यथा पुरा~~ हुत्वा ततो गुरुः।

~~कामिके~~- धर्भं वस्त्र पदैर्हस्तैस्समस्तैरपि होमयेत्।
मण्डलस्थ शिवेनैव पावकस्थ शिवन्ततः।
नाडीसन्धान मार्गेण योजयेद्भावयेच्छिवम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सिद्धान्तपुस्तके दत्वा स्वगुरोश्च पवित्रकम्।
नित्यस्य यागधाम्नस्तु समाचम्य व्रतुर्गुरुः।

षट्सहस्रिकायाम् -

बाह्येति मण्डलं कार्यं कपिला गोमयेन तु।
प्राशयेत्पञ्चगव्यन्तु पश्चिमे सव्यपाणिना।
सकुशं त्रिः पिबेन्तत्र समाचम्योपसंस्पृशेत्।
सा मा कां क्षीरसंसिद्धिं प्रति घण्टपरिप्लुतम्।
अघोरहृद्य संपन्नञ्चरुन्दन्तान्न संस्पृशेत्।
समाचम्य ततः पश्चात् दन्तकाष्ठं तृतीयके।
समाचम्योप संस्पृश्य न्यासं कृत्वा तु पूर्ववत्।
कुशशय्यां समारुह्य पूर्वदक्षिण मूर्द्धिकः।
रात्रौ जागरणं कार्यं नाना वाद्यादि नर्तनैः।

ज्ञानरत्नावल्याम् -

सहस्रैर्यतिभिस्तत्र जपस्तोत्र प्रदक्षिणैः।
तदनन्तगुणं ज्ञेयं शिवजागरजं फलम्।
द - र्भे भस्मनिवासुश्च्य यदि जागरणक्षमः।
गव्यमात्रं घृतेः स्यात्रं न प्राश्यञ्चरुभोजनम्।
विनाधिवासनो कार्यं पवित्रारोहणं शिवे।
शय्याधिवासनं वा स्यात्तदा गव्यञ्चरुं विना।
यद्येकस्मिन्दिने कार्यं यन्दत्य-श्रुतया तया।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गोदोहान्तरितं कृत्वा साधिवासं पवित्रकम्।

॥ इत्यात्मार्थ पूजापद्धत्यां पवित्राधिवासनविधिः॥

— ० —

कामिके- अथ प्रातः कृतावश्य स्नानंसन्ध्यादि तर्पणम्।
अविसर्जित देवेशात् पवित्राण्यवशेषयेत्।
तानीशमण्डले पात्रे चण्डेशार्थं प्रकल्पयेत।
दत्वाष्टपुष्पिकां देवे लिंगादेवं विसर्जयेत।
समाचम्य कृतन्यास सामान्यार्घ्य करो गुरुः।
कृत्वा नित्यविधिं सम्यगा च - न्तो मन्त्रविग्रहः।
द्वारद्वाराधिपान्यष्ट्वा प्रविश्यास्त्रालु कुंभयोः।
दिक्पालानाञ्च सास्त्राणां क्रमेणाभ्यर्चनं नयेत्।
स्वासने धीपसंक्लृप्ते सौम्यास्योर्ध्वं सितास्थितिः।
मन्त्रकायो विशेषार्घ्य द्रव्यशुद्धिसमान्वितम्।
शिवहस्तञ्च संकल्प्य पञ्चगव्यन्तु पूर्ववत्।
विशेष स्नपनोपेतं पञ्चामृत समान्वितम्।
पञ्चगव्यसमायुक्तं विशेषेण शिवं यजेत्।
जपं कृत्वा समावेद्य यायात्कुण्डान्तिकं गुरुः।
कुण्डमस्त्रेण संप्रोक्ष्य मेखलोपरि स्थितान्।
संपूज्य स्रुक्स्रुवावाज्यं संस्कृत्यापि विधानवत्।
दत्वा पूर्णाहुतीन्देवमावाह्याभ्यर्च्य तर्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रायश्चित्तं ततो हुत्वा पूर्णाहुतीमथाचरेत्।
दत्वा भानो पवित्रन्तु समाचम्याणुदेहयुक्।
नन्द्यादिभ्यः पवित्रन्तु दत्वान्तस्थं प्रविश्य च।
ब्रह्मणे कुंभवर्द्धन्योः क्रमाद्दद्यात्पवित्रकम्।

सन्ताने-: परिवारन्तु सर्वेषां स्वस्वनाम्नाधिरोपयेत्।

कामिके-: गत्वा देवान्तिकं स्वस्य चासने संप्रविश्य च।

सुप्रभेदे-: मण्डलस्थं शिवं यष्ट्वा गन्धाद्यैरनुपूर्वशः।

कामिके-: कृत्वा विशेषपूजाञ्च विभवस्यानुरूपतः।

तथा मृगेन्द्रे-: यथाविभवतं पूजां कुर्यान्नित्यादनन्तरम्।

सुप्रभेदे-: पूजनं पूर्ववत्कृत्वा स्नपनान्ते विशेषतः।
मृत् चूर्णलेपनं पूर्वं भस्मना लेपनन्ततः।
दन्तकाष्ठैश्च दन्ताग्नि यावये देशिकोत्तमः।

सूक्ष्मे विशेष उक्तः-:

पूर्वभागस्थितं द्रव्यमानीयान्तः प्रविश्य च।
कर्त्तृकां हृदयेनैव दद्यात्तेनैव देशिकः।
शिरसा दन्तकाष्ठञ्च शिरसा तालुशोधनम्।
सूचिकां कवचेनैव नेत्रेण श्रोतृशोधनीम्।
नखशोधनमस्त्रेण दद्याद्वै देशिकोत्तमः।
दक्षिणे स्थापितान्द्रव्यानानीयान्तः प्रविश्य च।
कौपीनादि रजन्यन्तं सद्यादीशानकं ददेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



व्योमव्यापीं समुच्चार्य पञ्चगव्यामृतेन च ।
संस्नाप्य देवदेवेशं स्नपनैरभिषेचयेत् ।
वस्त्रखण्डेन संमृज्य लिंगं पीठं विशेषतः ।
नाथिमे स्थापितान्द्रव्यानानीयान्तः प्रविश्य च ।
ईक्षाहारं हृदा चैव धूकाहारास्त्रमन्त्रतः ।
नैवेद्यं दापयेच्छंभो धूपदीपादिकन्ददेत् ।
दद्याद्घोरेण मन्त्रेण केशशोधनमञ्जनम् ।
युवं वस्त्रेति मन्त्रेण वस्त्रेणाच्छादयेत्प्रभुः ।
यज्ञोपवीतञ्च हृदा पुष्पमाभरणन्तथा ।
चन्दनेन समालिप्य गन्धद्वारेति मन्त्रतः ।
नैवेद्यं दापयेच्छंभो धूपदीपादिकं ददेत् ।

कामिके- स्वमूर्तौ गुरुपंक्तौ च दत्वा स्थूलं शिवं स्मरन् ।

ज्ञानरत्नावल्याम्-

पुष्पदूर्वाक्षतोपेतं सधूपामोदपेशलम् ।
पवित्रमञ्जलौ कृत्वा किञ्चित्कुंभेश संमुखः ।
विज्ञापयेदिदं वाक्यं शिवं कालात्मकं स्मरन् ।

तथा कामिके-

कालात्मना त्वया देव यद्दृष्टं कामके विधौ ।
कृतं क्लिष्टं समुत्सृष्टं हृतं गुप्तञ्चमत्कृतम् ।
तदस्तु क्लिष्टमक्लिष्टं कृतं पुष्टमसत्कृतम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वात्मना मुना शंभो पवित्रेण त्वदिच्छया ।
पूरयेति द्विराचम्य मुखं व्रतपदन्ततः ।
नियमेश्वरायेति पदं स्वाहाजात्यन्तमुच्चरन् ।
एवं पूरय पूरय मखव्रत नियमेश्वराय स्वाहा ।
ततः प्रकृत्यन्त व्याप्तिके ब्रह्मकारण पालिते ।

आत्मतत्वे ओं हां हौं आत्मतत्वाधिपाय शिवाय पवित्रं स्वाहेति वदन् मायान्तमुच्चार्य रुद्रविद्यान्त व्याप्तिके । विष्णुकारण पालिते विद्यातत्वे ओं हां विद्यातत्वाधिपाय पवित्रं स्वाहेतीश्वरान्तमुच्चार्य शिवान्तव्याप्तिके रुद्रकारण पालिते शिवतत्वे ओं हां हौं शिवतत्वाधिपतये शिवाय पवित्रं स्वाहेति शिवान्तमुच्चार्य क्रमेण दूर्वापुष्पाक्षतोपेतं लिंगमूर्ध्नि पवित्रत्रयन्दद्यात् । इतम्मुमुक्षुविषयम् । बुभुक्षुस्तु पूर्वं शिवादिकमुच्चार्य पवित्रत्रयं दद्यात् । तथा क्रियाकाण्डे-:

आत्मतत्वे प्रकृत्यन्ते पालिते पद्मयोनिना ।
मूलमायान्तमुच्चार्य पवित्रेणार्चयेच्छिवम् ।
विद्यातत्वे च विद्यान्ते विष्णुकारणपालिते ।
ईश्वरान्तं समुच्चार्य पवित्रमधिरोपयेत् ।
सर्वकारणपालेषु सर्वतत्वेषु सुव्रत ।
मूलाद्यन्तं समुच्चार्य शिवविद्यात्मकान् पुनः ।
सर्वतत्वेश्वरायेति दद्याद्गंगावतारकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कर्माङ्गेभ्यः पवित्राणि दद्यात्तु तदनन्तरम्।
पुष्पाञ्जलिपुटे भूत्वा भक्त्या विज्ञापयेत्प्रभुम्।
त्वं गतिस्सर्वभूतानां संस्थितस्त्वञ्चराचरे।
अन्तश्चारेण भूतानां द्रष्टात्वं परमेश्वर।
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम।
मन्त्रहीनं क्रियाहीनं द्रव्यहीनञ्च यत्कृतम्।
जपहोमार्चनाहीनं कृतं नित्यं मया तव।
अकृतं वाक्यहीनञ्च तत्पूरय महेश्वर।
1530 सुसूक्ष्मस्त्वं सुवेशान पवित्रं पापिनाशनम्।
त्वया पवित्रितं सर्वं जगत्स्थावरजंगमम्।
खण्डितं यन्मया देव व्रतं कैवल्ययोगतः।
ऽखण्डं भवतु तत्सर्वं त्वदाज्ञा सूत्रगुम्फितम्।
सूक्ष्मे-: ओड्याणमीशमन्त्रेण योगपट्टं तु वर्मणा।
भिक्षापात्रमघोरेण वामेनैव कमण्डलुम्।
व्याघ्राजिनन्तु सद्येन हृदये न तु वेत्रकम्।
चामरं शिरसा चैव छत्रं वै शिखयाणुना।
भसितं कवचेनैव पादुकां नेत्र मन्त्रतः।
मात्रां दण्डमथास्त्रेण खट्वाङ्गं मूलेन दापयेत्।
कामिके-: जपं कृत्वा निवेद्यास्मै दत्वा नियममीश्वरात्।
स्वीयात्प्रयतो भूत्वा चतुस्त्रीण्येकमासिकम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अर्द्धमासञ्च सप्ताहं पञ्चाहं त्रियहन्तु वा।
अथ वैकालमारब्धं कर्मान्तं नियमं नयेत्।

मोहचूरोत्तरे-:

अविसर्जीत पूतस्तु न सीमानं विलंघयेत्।
दैवतोऽप्यथवाप्नोति शिद्धिभ्रंशः पदे पदे।
न गन्तव्यं सहस्राक्ष पवित्रेत्वविसर्जिते।
विसर्जिते तु विसर्जिते तु गन्तव्य स्वेच्छं वै यत्ररोचते।

कामिके-: शाकभुक्त्या व्रतं सर्वं शक्त्यानुष्ठेयमीश्वरात्।
व्रतं गृहीत्वा कर्तव्यं यवत्सूत्रावरोहणम्।
शास्त्रेभ्यो दिक्पतिभ्यस्तु सूत्रं दत्वाग्नि संस्थिते।
शिवे पवित्रं तुर्यन्तु दत्वा व्याहृतिभिर्गुरुः।

ज्ञानरत्नावल्याम्-:

शतमष्टोत्तरं सांगं हुत्वा पूर्णां यथाविधि।
न्यूनातिरिक्त दोषघ्नं शतं शास्त्रेण पूर्णया।

कामिके-: वह्निर्निरुध्य स्विष्टान्तं हुत्वा कृत्वा बलिन्ततः।
देव संपूज्य गुरवे सिद्धान्त पुस्तकेपि च।

सन्ताने-: पञ्चब्रह्मेण चार्चोव्यमाचार्यस्य पवित्रकम्।
शिष्यस्य तु षडंगेन अन्येषां हृदयेन तु।

कामिके-: मण्डलस्थञ्च संपूज्य ततो देवं क्षमापयेत्।

सुप्रभेदे-: यतीनां शुद्ध शैवानां अन्यथाहेश्वरात्मनाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विप्रेभ्यो भोजनं दानं कुर्यात्तत्रैव शक्तितः।

योगजे - ततस्तत्पावित्रं पूज्य आच्छाद्येनं समाचरेत्।
कौपीनमुत्तरासंगं योगिनान्तु प्रदापयेत्।

कामिके -: संपूज्य दीक्षितान् ब्रूयात् प्रीयतां मे सदाशिव।

दीप्ते -: संध्या पूजन काले तु सूत्र मा - - बुद्धिमान्।
पवित्रं पंचगव्येन प्रोक्षयेत्पश्च गव्यकैः।
निर्माल्योद्वासनं पश्चात् पूज्यस्नानादिना बुधः।
पुष्पपूजान्तकाले तु पवित्रं पुनरासयेत्।
ङव - - दिन चा ह्नि प्रति संधिषु योजयेत्।

तथा कामिके -:
लिंगात्पवित्र मुद्धास्य निर्माल्यापनये कृते।
स्नाते चिते तदारोप्य माविसर्गं दिने दिने।
प्रवान्ते प्रातरभ्यर्च्या व्यतीते तदिवात्त्द्येवम्।
मन्त्र तर्पण कर्मान्त कृत्वा निष्कृति माचरेत्।

स्वायंभुवे -: जयादिरभ्याधानञ्च राष्ट्रभृच्चैव होमयेत्।
अग्न्यर्धं देवमादाय कुंभमध्ये तु योजयेत्।
तत्कुंभस्थजलेनैव - - वेशमभिषेचयेत्।

कामिके -: व्रतं निवेदयेदुक्त्वा ममास्तु फल साधकम्।
मुक्तिकामस्तु कर्मेदं मास्तु मे नाथ बन्धकम्।
भसितं वंदयित्वाथ वह्निस्थं योजयेत् शिवम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वह्नेर्मन्त्रांस्तु संग्राह्य नीत्वा न द्वादशान्तके।
हृदये संनिवेश्याग्निं विसृज्यो द्वास्थ विष्टरान्।
परिधींश्च बलं दत्वा समाचम्य गुरुश्शुचिः।
शिवकुंभास्त्र वर्द्धन्यो मन्त्रान् संहृत्य योजयेत्।
ईशेसापेक्षमुक्त्वैव क्षमस्वेति विसर्जयेत्।
दिक्पालानस्त्र संयुक्तान् द्वारवारवास्तु संस्थितान्।
स्वव्यन्तर्हि विसर्ज्याथ पवित्राणि हरेत्ततो बात्।

मृगेन्द्रपद्धत्याम् –:

ईकादौ मंडले चण्डं स्थाण्डिले वा समर्चयेत्।

स्वायंभुवे –: स परार्थमाख्यात मात्मार्थञ्च तत श्शृणु।
मानं पूज्य चण्डेशं निजापूजावसानके।
पवित्राणि हुनेत्तत चण्डनाथं विसर्जयेत्।

ज्ञानरत्नावल्याम् –:

अभ्यर्च्य पूर्ववत्तस्मै दत्वापूत चतुष्टयम्।

ओं आत्मतत्वाय ध्वनि चण्डेश्वराय हुं फट् स्वाहा। इत्यादयो मन्त्राः प्रयोक्तव्याः

धूपदीपादि नैवेद्यस्संतोषार्थं निवेदयेत्।
शिवोच्छिष्टप्रसादं यत् पवित्रार्थं शिवाज्ञया।
तत्कृपया नाथ प्रविष्टत्वं सतण भो।

अनेन मन्त्रेण निवेद्य चण्डाग्निं परिकल्प्य तत्र चण्डमाराध्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तन्मन्त्रेण शतं हुत्वा इमं मन्त्रं पठेत्।

(शिवोच्छिष्टं प्रसादं यत् पवित्राद्यं शिवाज्ञया।×)

इति वह्नौ च संतर्प्य नत्वा पुष्पाञ्जलि स्थितः।

ओं यत्किञ्चिद्वार्षिकं कर्म कृतन्यूनाधिकं मया।

तदस्तु परिपूर्णं मे चण्डनाथ शिवाज्ञया।

समयाचारहीनानामनाथानां गतिर्भवेत्।

आचारहीनं पतितं रक्षमां चण्डनायक। इति विज्ञाप्य

ओं चण्डेश्वराय स्वाहेत्यर्घ्यं दत्वा चण्डास्त्राय हुं फण्णम इति

नाराचमुद्रया मन्त्रानुत्थाप्य चण्डमूर्तिमन्त्रेण दिव्यमुद्रया।

1432 मूर्तिस्थं कृत्वा तन्मूलेन विसर्जयेत्। कामिके-:

निर्माल्यादिकमन्यच्च पवित्रं न कृतं यदि।

लक्षञ्चाघोरमावर्त्य दशांशं होममाचरेत्।

ज्ञानरत्नावल्याम्-

प्रक्षाल्य पादौ हस्तौ च समाचम्य शुचिस्ततः।

संशुद्धे भूतले लिंगे संस्नाप्याभ्यर्च्य नित्यवत्।

क्षमयित्वा महद्भक्त्या देवदेवं विसृज्य च।

नद्यां गर्ते ह्रदादौ वा तं निर्माल्यादिकं क्षिपेत्।

गोमयेनाम्बुना स्थानालिप्त्वा तत्रोप संविशेत्।

~~सुशुद्धे भूतले लिंगे~~ यदा त्वेकदिने शंभोः पवित्राद्यं विनिर्वृति।

कृतनित्यस्तदा संध्यां कृत्वा नैमित्तिकं सकृत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सम्यक् गन्धपवित्रञ्च दत्त्वोपरिपवित्रकम्।
उद्धृत्य दत्त्वा चण्डाय लिङ्गं संस्नाप्य पूजयेत्।
स्थण्डिले योऽर्चयेदीशं तस्य नैव भवेद्विधिः।
आचार्यं पूजयेत्पश्चात् वस्त्रालंकारदामभिः।
वित्तशाठ्यं विना तस्मै दद्यादाचाय दक्षिणाम्।
तुष्टेन गुरुनाथेन तुष्टो भवति - करः।
पवित्रं सफलन्तस्य यस्य तुष्टो गुरुस्स्वयम्।
अन्यथा निष्फलं प्राह भगवाञ्छङ्करः।
पञ्च योजन संस्थोपि पवित्रं गुरुसंनिधौ।
कुर्यात्तदाज्ञया सर्वं स्वस्थाने वाथ बुद्धिमान्।
अन्यथा निरयं यान्ति इत्याज्ञा पारमेश्वरी।

दीप्ते-: एवं यः कुरुते मर्त्यः पवित्रं विधिपूर्वकम्।
संवत्सरकृतं पापं विनश्यत्युपसाञ्चिकाम्।
यः पवित्रन्तु संयुक्तं दम्भलोभविवर्जितम्।
करोति कारयेद्वापि शास्त्रदृष्टेन कर्मणा।
पितृजैर्दं दशभिस्सार्धं मातृजैर्दशभिः कुलैः।
हित्वा समस्तपापानि शिवलोकं स गच्छति।

॥ इत्यात्मार्थ पूजापद्धत्यां पवित्रारोपण विधिः॥

सूक्ष्मे-: अतः परं प्रवक्ष्यामि दमनारोपणं परम्।
सर्वपापहरञ्चैव सर्वशत्रुविनाशनम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्मात्सर्वप्रयत्नेन दमनारोपणं कुरु ।
आत्मार्थञ्च परार्थञ्च द्विविधञ्च प्रकीर्तितम् ।
आत्मार्थं चललिंगे स्थिरलिंगे परार्थकम् ।
ब्राह्मणादि चतुर्णान्तु वृद्ध्यर्थं चैत्रमासके ।
सितपक्षे चतुर्दश्यां पञ्चदश्यामथापि वा ।
कृष्णपक्षे प्रतिपदित्वथमन्तु प्रकीर्तितम् ।
त्वाष्ट्रेण सहिते यस्मिन् चतुर्दश्यादिके वरः ।
वापं विधिप्रकारेण आत्मार्थञ्च परार्थकम् ।
लिंगे च प्रतिमायां वा भित्तिचित्रे पटेपि वा ।
स्थण्डिले मण्डले चाग्नौ जले वा सूर्यमण्डले ।
नवेष्वेतेषु चैत्रेषु आत्मार्थं पूजयेत्सुधीः ।

कामिके- ईश्वरः ।

दमनारोपणं वक्ष्ये चैत्रमासे फलप्रदम् ।
पूजयिष्यन्ति ये मर्त्या देवन्तत्पल्लवादिभिः ।
ते यान्ति परमं स्थानं दमनस्य प्रभावतः ।
ये पुनर्नि-- रिष्यन्ति दामं पर्वणि मानवाः ।
तेषां तु चैत्रमासोत्थन्दत्तं तस्मै फलं मया ।

इति श्रवणा द्दमनारोपणाकरणे चैत्रमास पूजा फलावाप्ति रपि तस्या तस्मा द्यानोक्थ विधिस्सायके रवश्यमनुष्ठेयः [एतास्सव निष्कला गव प्रासादेवा ग्रहादिके । देवं संपूज्य विधिवद्दशाहोमन्तु कारयेत् ।x]

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यद्दमनार्चनमपि आत्मार्थेचावश्यं कर्तव्यमन्यथा प्रत्यवाय-श्रवणात्
तथा कामिके। आषाढादिषु मासेषु कार्त्तिकान्तेषु पञ्चसु।

पवित्रारोहणे हीने वर्तन्ते तत्र याः क्रियाः।
तास्सर्वा निष्फला एव प्रासादे वा गृहादिके।
देवं संपूज्यविधिवद्दमनार्चन्तु कारयेत्।
दमनारोपणेत्येवं कीर्त्यते विधिरग्रजाः।
प्रीतेनाथ - वै नोक्तो विटपो भवभूतले।
तान्तनुन्त्वनुप्राप्य मज्ञोगाय भविष्यसि।

चैत्रमासे शुक्लपक्षाद्यो सप्तम्यां वा त्रयोदश्यां दमनान्तिकं
गत्वा तमस्त्रेण संशोध्य संहितया संपूज्य गन्धपुष्पादिकं दत्वा
प्रणम्य शिववाक्येनामन्त्रयेत्। कामिके-:

सप्तम्यां वा त्रयोदश्यां गत्वा दमनकान्तिकम्।
शोधयित्वास्त्रमन्त्रेण पूजयेत्संहिताणुभिः।
गन्धपुष्पपवित्राद्यैर्धूपदीपादिभिस्सुधीः।
अथ संबोधयेद्दामं शिववाक्येन मन्त्रवित्।
ओं हरप्रसादसंभूत त्वं अत्र सन्निधी भव।
शिवकार्यं समुद्दिश्य नेतव्योसि शिवाज्ञया।
एवन्दमनमामन्त्र्य संरक्ष्य भवनं व्रजेत्।
यदि दूरन्तदानीन्तं समूलन्त्वतिकान्वितम्।
पुनरारोप्य मृत्पूर्ण पात्रे संसिच्य वारिणा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गृहेत्यामन्त्रणं कार्यं पूर्वोक्तविधिना बुधैः।

सायाह्नसमये प्राप्ते विदध्यादधिवासनम्।

आहृत्य यागवस्तूनि कृतस्नानादि सत्क्रियः।

दीप्ते-: नित्यकर्म समाप्तौ तु नैमित्तिकमथाचरेत्।

षट्सहस्रिकायाम्-:

स्वयं नित्यवदभ्यर्च्य द्वारतोरणमर्चयेत्।

सूक्ष्मे-: मण्टपं विधिवत्पूज्य भान्वादिगुरुपूजनम्।

कामिके-: यथाविधि समभ्यर्च्य भानुशंकरपावकान्।

सूक्ष्मे-: दमनन्तु पृथक्शोध्य प्रोक्षयेत्तु कुशांभसा।

पञ्चधा विभजेत्तत्र प्रत्येकं पात्रके न्यसेत्।

तदुक्तं ज्ञानरत्नावल्याम्-:

फलं पुष्पञ्च पात्रञ्च मूलनालन्तदुद्भवम्।

गन्धौ चन्दन्त काष्ठञ्च भस्म भल्लातकी फलम्।

।ममa सवान्यादुत्तरान्तास्तु दिक्षुपात्रेषु विन्यसेत्।

सूक्ष्मे-:

पञ्च ब्रह्म षडङ्गैश्च गन्धपुष्पादिभिर्यजेत्।

शिवकुंभस्य पश्चिमस्थापयेद्धृदये न तु।

समिदाज्य चरुं लाजा सर्षपांश्च यवांस्तिलान्।

पञ्चब्रह्म शिवांगैश्च दशाक्षरेणमन्त्रतः।

क्रमेण जुहुयाद्विद्वान् प्रत्येकं पञ्चविंशतिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्रव्यान्ते व्याहृतिं हुत्वा प्रासादेन स्पृशेद्बुधः।
एवमेव विधानेन कारयेद्देशिकोत्तमः।
सर्वालंकारसंयुक्तं सर्वतोद्यसमान्वितम्।
गन्धमादनमारोप्य सूर्यादीनामनुक्रमात्।
कामिके-: पञ्चांगमञ्जलौ कृत्वा दामं पुष्पाक्षतान्वितम्।
आमन्त्रयेज्जगन्नाथं दमनारोपणं प्रति।
आमन्त्रितोसि देवेश प्रातः काले मया प्रभो।
कर्तव्यन्तु यथालाभं दामपर्वं शिवाज्ञया।
अथ सद्योधिवासश्चेत् सद्यः कालेप्युदीर्यताम्।
इति विज्ञाप्य देवस्य मस्तके कुसुमाञ्जलिम्।
गन्धदामन्तु संयोज्य शिवमन्त्रेण देशिकः।
हविर्निवेदयेत्पश्चात् प्रासादेन तु मन्त्रतः।
शेषपात्रे विनिक्षिप्य द्वितीयेन विधायतम्।
पवित्रस्य विधानेन कवचेनावकुण्ठयेत्।
एवं सुरक्षितं कृत्वा शिवायनिवेदयेत्।
हविस्तदनुभुञ्जीत यदि वा पापनाशनम्।
रात्रौ जागरणं कृत्वा स्तोत्रगानजपादिभिः।
प्रातः स्नात्वा जगन्नाथमष्टपुष्पं समर्चयेत्।
नित्यं नैमित्तिकञ्चैव कृत्वा पूजां विशेषतः।
दमनैः पूजयेद्देवं पञ्चांगैरविखण्डितः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शेषमञ्जलिमादाय दूर्वागन्धाक्षतान्वितम् ।
ध्यायन्नभिमुखन्देवं पञ्चवक्त्रं सदाशिवम् ।
आत्मविद्या शिवैस्तत्त्वैर्मूलाद्यैरीश्वरान्तकैः ।
पवित्रकविधानेन क्रमेण शिवमर्चयेत् । ओं हां हौं
आत्मतत्त्वेश्वराय शिवाय नमः । ओं हां हौं विद्यातत्त्वेश्वराय
शिवाय नमः । ओं हां हौं शिवतत्त्वेश्वराय शिवाय नमः ।
चतुर्थाञ्जलिमन्त्रस्तु प्रणवं शिवमन्त्रकम् ।
मखेश्वराय च मखपूरयेति च रीप्सितम् ।
शूलपाणिं चतुर्थ्यन्तं नमस्कारान्तमाचरेत् ।
ओं हां हौं मखेश्वराय मखं पूरय पूरय शूलपाणिने नम इति
प्रणम्य शिवमभ्यर्च्य पावकञ्च विधानवित् ।
सर्वेषां सकलादीनां स्वस्वनाम्नैव पूजनम् ।
विज्ञापयेच्छिवे वं भक्त्या प्रार्थयेत्तार्थ फलप्रदम् ।
भगवन्नतिरिक्तं वा हीनं वा यन्मयाकृतम् ।
सर्वं तदस्तु संपूर्णं सर्वदादमकम्मम ।
एवन्दामविधिः कृत्वा कुर्वीत च गुरुपूजनम् ।
परितोष्य च तत्पश्चात् दीक्षितानपि पूजयेत् ।
आत्मार्थं पूजने काले पञ्चभागन्तु पूर्ववत् ।
एकांशं भास्करस्योक्तं विघ्नेशस्य ततः परम् ।
तृतीयां शिवस्योक्त पिण्डिकाञ्च चतुर्थकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शेषांशं पञ्चभागश्च सम्यक् कुर्याद्विचक्षणः।
एकांशञ्च गुरौ दद्यादपरश्चार्चकस्य तु।
अग्नौ तृतीयकं दद्याद्भक्तानान्तु चतुर्थकम्।
पञ्च — गं पैतृकादीनामेवमेव क्रमाददेत्।
आत्मार्थे चैव सार्द्धञ्च मद्वाक्यात् प्राक् समारभेत्।
प्रथमारंभदिवसे अधिवासनमुच्यते।
अवरोहण कालस्तु तिथिकालं न लक्षयेत्।
तिथिप्रधानमारोहण्यवरोरोहेन दोषभाक्।
नित्यं साध्यावसाने तु महाव्योमेन मन्त्रतः।
दमनारोहणं कुर्यात् यथावृतमशेषतः।
निर्माल्यं न भवेन्तत इति शास्त्रस्य निश्चयः।
एवं भूचिरकाले तु कुर्याद्वै स्थावरे बुधः।
आत्मार्थे त्वेकरात्रान्तु कुर्याद्वै सर्वदा बुधः।
अघोरास्त्रेण मन्त्रेण संख्याते वर्जयेद्बुधः।
चण्डेश्वरस्य दातव्यश्चण्डमन्त्रमनुस्मरन्।
स्नपनं कारयेद्धीमान् प्रासादेन तु मन्त्रतः।
पञ्चगव्याभिषेकन्तु शुद्धस्नानन्तु कारयेत्।
अर्चयेद्गन्धपुष्पाद्यैर्महाव्योमेन मन्त्रतः।
यावद्दिनं विसृज्याथ तावदग्निश्च रक्षयेत्।
महाव्योमेति मन्त्रेण अष्टोत्तरशताहुतिः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



घृतेन चरुणा चैव होमं कुर्याच्छिवं प्रति।
अवरोहण काले तु पूर्णाहुति शिवेन तु।
प्रभूतञ्च हविर्दद्या देवदेवस्य बुद्धिमान।
सकलानान्तथान्येषां प्रभूतन्तु हविर्ददेत।
भित्ति चित्रे पटे वापि दर्पणोपरि लिंगकम्।
हस्तमात्र प्रमाणेन मूल धामानुरूपतः।
कारयेत्तु विशेषेण कुर्याद्दमनकं बुधः।
क्रिया परिसमाप्तौ तु दर्पणं दर्शयेत्शिवे।
एवं विधिप्रकारेण कुर्याद्वै चित्रके बुधः।
स्थाण्डिले मण्डले कुर्यात् यन्त्रमार्गेण देशिकः।
अग्नौ दमनकं कृत्वा जले त्वत्र विनिक्षिपेत।
सूर्यमण्डलके व्योम्नि दमनं दापयेत्सुधीः।
आत्मार्थे च परार्थे च एवमेवं हि कारयेत्।
अनुक्तं यदि कुर्याच्चेदात्मार्थे हीनजातिषु।
अन्यत्सर्वं समानं स्यात् प्रभक्षाख्यविशां क्रमात्।
अन्ते महोत्सवं कुर्यात् परार्थे तु विशेषतः।
अनुक्तं यद्भवेत्किञ्चित् पवित्रं सर्वमाचरेत।
दमनकर्म पवित्रञ्च प्रकरणञ्च तथोत्सवम्।
शीतकुंभं तथास्नान घृतस्नानन्तु कंबलम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चिरकालात्कृतश्चान्यत् समानन्तेषु सर्वतः ।
अर्चको देशिकश्चैव ब्रह्मचर्यं समाचरेत् ।
अक्षारलवणाशी स्यात् यावत्कालाव्रतञ्चरेत् ।
ग्रामान्तरं न गन्तव्यं गन्तव्यं निशि न स्वपेत् ।
।४४८ अन्यस्मिन् सर्वकाले तु गतागतं न दोष भाक् ।
अवरूढार्पणकात्पूर्वं व्रतस्थो देशिकोत्तमः ।
आत्मार्थ विषये काले अर्चकस्य गुरुस्तदा ।
एवमेव क्रमेणैव कुर्यादारंभके बुधः ।
प्रमादाद्व्रतहीनस्थो होमं न कुरुते यदि ।
महाव्योमेति मन्त्रेण द्विसाहस्रकञ्जपेत् ।
दशाक्षरेण वा कुर्यात् प्रासादेनाथवा पुनः ।
एवमेव प्रकारेण कुर्यादारंभके विधौ ।
अन्यथा यदि कुर्याच्चे द्राजराष्ट्रं विनश्यति ।
आत्मार्थेऽप्यर्चकश्चैव नाशं भवति निश्चयम् ।
ब्रह्मचारी गृहस्थो वा य इमं कुरुते विधिम् ।
पूजा जपादिकं तस्य सफलं चैत्रमासजम् ।
इत्यात्मार्थपूजापद्धत्यां दमनकाविधिः ।

— ० —

अतः परं प्रवक्ष्यामि घृतकंबल लक्षणम् ।
सर्वलोकहितार्थाय सर्वभूतहिताय च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गोब्राह्मण नृपादीनां शीतं कुर्वन्ति धर्मके।
माखमासे मघर्क्षे तु पौर्णमास्यां विशेषतः।
घृतकं बलकं कुर्यादर्के वा चान्द्रमासके।
दिवापर्वाणि संबन्धे रात्रौ नक्षत्र संयुते।
तस्मिन्दिवैव कर्तव्यं पर्वसंबन्धकारणात्।
सर्वपापक्षयं पुंसां सर्वकर्मार्थसाधनम्।
स्नेहद्रव्यादि पोषार्थं माघमासे यजेत्क्रमात्।
शिप्रीतिकरं साक्षादपमृत्युविनाशनम्।
श्वेतादीनां गवाञ्चैव घृतसंग्राह्य बुद्धिमान्।
लिंगे वै कंबलन्यस्य गन्धपुष्पादिभिर्यजेत्।
आत्मार्थेषु परार्थेषु गोलकान्तस्य विन्यसेत्।
निरोमाग्नियुतं शुद्धं क्रिमि कोटरवर्जितम्।
ब्रह्मचारी चतुर्वर्णं गोक्षीरं हि च संग्रहेत्।
सौवर्णादिषु पात्रेषु वस्त्रपूतेन बुद्धिमान्।
हृदयेन तु मन्त्रेण अग्निकर्मादि कारयेत्।
आम्रेणैव समायुक्तं यावद्वै घनतां व्रजेत्।
तावत्पात्रेषु संपूज्य प्रासादेनैव मन्त्रतः।
पचनालयदेशे तु अन्यस्मिन् वा मनोरमे।
आत्मार्थे त्वैश दिग्भागे पूजास्थानस्य पूर्वके।
मण्डलं पूजयेत्तत्र वृत्तं वा चतुरश्रकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्य मध्ये न्यसेत्पात्रं हृदयेनैव मन्त्रतः।
तस्मादन्येषु पात्रेषु दधिं संगृह्य देशिकः।
हृदयेन तु मन्त्रेण पूजयेन्तु शिवांभसा।
वस्त्रेणैव तु हस्ताभ्यां मर्दयेत्पुरुषेण तु।
यावद्वै भिन्नतां याति तावद्वै मथनाक्रिया।
अन्यपात्रेषु मतिमानानीय नवनीतकम्। पवनदेशेतु
अग्निमन्त्रेण दाहयेत्। शुद्धपात्रेण मतिमान् संगृह्णेद्धृदयेन तु।
सहस्रपुस्तकर्मारभ्य शतप्रस्थान्तकं क्रमात्।
प्रत्येकं नवधामानं कार्यं द्विभवानुगम्।
अथवा हीनमानन्तु दशप्रस्थान्तकं क्रमात्।
तदभावे तु मतिमान् प्रस्थान्तं वा क्रमेण तु।
एवं बहुप्रकारेण आत्मार्थे वा परार्थके।
आत्मार्थे क्षुद्रमानं स्यात्प्रभूतं स्थावरे बुधः।
कामिके-: कापिलं केवलं त्वाज्यं क्रिमिकीटान्तिवर्जितम्।
नीरोमभूतनं शुद्धं सुगन्धा दाहयेन्ततः।
वस्त्रेण नि - - - ये गारुडं बीजमुच्चरन्।
तदाज्यं पिण्डवत्कृत्वा कुंकुमागरुसंस्कृतम्।
हरिद्रा चूर्णकर्पूर चूर्णाभ्यामपि संस्कृतम्।
सूक्ष्मे-: सर्वालंकारसंयुक्तं शंखध्वनि समान्वितम्।
नानावाद्य समायुक्त न्नानागेय समान्वितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सुगुप्ते मण्टपे स्थाप्य प्रासादेन तु मन्त्रतः।
प्रासादस्याग्रतः कुर्यात् मण्टपञ्चतुरस्रकम्।
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्।
ब्राह्मणादिक्रमेणैव मण्टपं वा प्रभान्तया।
मण्टपस्य त्रिभागैकं मध्ये वेदीं प्रकल्पयेत्।
वेदिका पूर्वदिग्भागे होमकुण्डं हि कारयेत्।
स्थावरे तु चतुर्दिक्षु होमं कुर्वन्तु देशिकः।
आत्मार्थेत्वेकहोमं स्यात् ब्राह्मणादि क्रमेण तु।
अंशुमति-: कंबलं रोमजं तत्र उत्तमादि विभेदतः।
विचित्रकंबलं वापि सितकंबलमेव वा।
आढकाज्यन्तु संगृह्य लेपयेत्कंबलन्ततः।
कर्पूरं शालि-चूर्णन्तु युक्तं सघृत कंबलम्।
सूक्ष्मे-: घृतकंबलकात्पूर्वं नवके सप्तपञ्चके।
अंकुरार्पयेद्दिक्षां त्वधस्तदृष्टेन कर्मणा।
अंकुरार्पणकात्पूर्वं घृतं संगृह्य देशिकः।
अधिवासनरात्रौ तु पात्राणि पूरयेज्जलैः।
सर्वगन्धसमायुक्तं पञ्चब्रह्म षडंगकैः।
अथवा चजल द्रोण घटे वा पूरयेत्क्रमात्।
दशपात्रं पञ्चपात्रं वा त्रीणिपात्रमथापि वा।
एकपात्रन्तु चापे तु आत्मार्थे त्रीणि वै कृतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दशपालेगरु कर्पूरैः हरिद्रश्चूर्ण संयुतम ।
कर्पयेद्दीशमन्त्रेण देशिकस्तत बुद्धिमान ।
पश्चात्पिण्डत्वमायाति प्रासादेन धृतः क्रमात ।
सौवर्णेषु च पात्रेषु प्रत्येकं संग्रहेद्बुधः ।
~~तेषां मध्यप्रदेशेमूर्ति स्यात पञ्चमूर्तिश्च पश्चतः ।~~
एवमेव क्रमेणैव स्थापयेद्वेदिका बहिः ।
नव वस्त्रेण संवेष्ट्य पात्राणामास्य देशिकः ।
तज्जले शीतवत्कृत्वा तज्जले तु घृतं क्षिपेत ॥२॥
तेषां मध्यप्रदेशे तु घृतपिण्डांश्च निक्षिपेत ।
नववस्त्रेण संवेष्ट्य प्रासादेनार्चयेद्बुधः ।
विशेष पूजां कृत्वा तु विशेष स्नपनान्वितम ।
तत्पूर्व स्थण्डिले धीमान्तर्पयेच्छिवपावकम ।
पलाश समिदाज्यानि लाजांश्च तिलसर्षपान ।
शतमष्टोत्तरं हुत्वा पूर्णामन्ते विधाय च ।
घृते संपातहोमञ्च पवित्रारोह वर्त्मना ।
कृत्वा संस्थापयेदाज्यं स्थण्डिले सविधानकम ।
सूक्ष्मे :- आत्मार्थत्वेक होमन्तु रक्षाणामेकहोमकम ।
बलिन्तत्र प्रकुर्यान्तु वेदिबाह्ये बलिं क्षिपेत ।
पश्चाद्देवञ्च देवीञ्च अर्चनोक्त क्रमाद्यजेत ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



1M5a

हविर्निवेदयेत्तत्र तांबूलन्दापयेत्ततः।
रात्रावधिं वसेत्तत्र पञ्चगव्यामृतैस्सह।
एवं विधिप्रकारेण कारयेदावासनम्।
प्रभाते देशिकस्स्नात्वा पश्चाद्यजनमारभेत्।

कामिके -: संपूज्य पूर्ववद्देवं स्नपनादि समान्वितम्।
विशेषानर्चयित्वा तु सर्वालंकारसंयुतम्।
हृदयेनैव मन्त्रेण कृतकंबलकं यजेत्।
लोकपालान्समभ्यर्च्य होमं कुर्यात्तु पूर्ववत्।
अन्ते पूर्णाहुतिं स्यात् प्रासादेन तु मन्त्रतः।
धाम प्रदक्षिणं कृत्वा शिवमन्त्रं समुच्चरन्।
सर्वालंकारसंयुक्त नृत्तगेय समान्वितम्।

कामिके -:

लिंगं सर्वत्रचालिय पीठान्तं सर्वविग्रहम्।
भास्करे प्रथमं न्यस्य पश्चादात्मार्थके यजेत्।
गन्धाद्यैरर्चयित्वा तु कंबलेन च वेष्टयेत्।

सूक्ष्म -: घृतकंबलमात्रे तु ~~अकम्मात्रे तु~~ शतात्परं यदि।
प्रत्येकं संस्कृतं गव्यं द्वाषिंणी त्रीणि सप्त च।
अतः परं न कर्तव्यमात्मार्थे तु परार्थके।
आत्मार्थे स्फटिकाद्येषु स्थण्डिले मण्डलादिके।
घृतकंबलकं न्यस्य भित्तिचित्रे तु दर्पणे।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यदेवं तद्वत्कर्तव्यं अग्नौ होमञ्च कंबलम् ।
सूर्यमण्डलकं व्योम्नि कंबलं शोधयेद्बुधः ।
जलदेशे जले न्यस्य स्वेस्वेमूलेञ्च बुद्धिमान् ।
एवमेव विधानेन कारयेदुक्तमार्गतः ।
कंबलन्देव देवस्य चण्डेशाय प्रदापयेत् ।
चण्डमन्त्रमनुस्मृत्य कंबलञ्च परित्यजेत् ।
घृतकंबलकं सर्वं गोषु चाप्सु विनिक्षिपेत् ।
अग्निना दाहयेत्तत्र चण्डमन्त्रमनुस्मरन् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ।
॥ इत्यात्मार्थ पूजापद्धत्यां घृतकंबल विधिः ॥

---

आत्मार्थ प्रायश्चित्तम्

अथात्मार्थ लिंगाश्रय प्रायश्चित्तम् ।

कालोत्तरे श्रूयते । तद्यथा

लिंगाश्रयमथो वक्ष्ये प्रायश्चित्तं शिखिध्वज ।
स्वयं वै स्वेष्टलिंगेषु अपराधे विशोधनम् ।
परैः कृतोपराधस्तु शुद्धिस्तत्र विधीयते ।
स्वेष्टलिंगे साधकैश्च स्वयं द्वयं स्यात् विशोधनम् ।
अपराधो द्विधा ज्ञेया स्वकृतेश्चापरैः कृतः ।
एकैकन्तु द्विधाज्ञेयस्सकामा कामभेदतः ।
स्वेष्टलिंगे पराधस्तु परेणैव कृतो यदा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



द्विगुणं स्वकृते प्राहुः प्रायश्चित्त विशुद्धये।
निष्कामस्य सकामस्य स्वयमेवापरोऽपि वा।
ज्ञात्वा ज्ञात्वा प्रकर्तव्यं प्रायश्चित्तं शिवद्विजान्।
साधकेभ्यो देशिकस्य साधनाद्द्विगुणं मतम्।
लिंगाग्रतानान्दोषाणां प्रमाणं कथ्यते पुनः।
येषु सञ्जातमात्रेषु प्रायश्चित्ती भवेन्नरः।

कामिके-: दिनपक्षाद्यलग्नादि प्रेक्षणं नात्र सा मतम्।
प्रायश्चित्तकृते सद्यो यदि श्रेष्ठं प्रकीर्तितम्।
मध्यं पञ्चादिनादर्वाक् सप्ताहादधमं भवेत्।
तस्मान्मासावसानं तु हीनमित्यभिधीयते।

चिन्त्यविश्वसादाख्ये-:

आत्मार्थे च परार्थे च व्यामिश्रश्च शृणुः क्रमात्।
राजचोरभयादौ च देहे व्याध्यादि बाधिते।
देवाग्नि गुरुकार्ये हि नित्यहानि र्न दोषभाक्।
आषोडशान्तं बाल स्यादशीत्यादि वार्धकम्।
स्थविरश्च भवेदेवं प्रायश्चित्तं तयोर्न हि।
रोगार्तास्य स्त्रियो वापि प्रायश्चित्तार्थ योग्यकाः।
तत्रापि च परीक्ष्यैवं ज्ञात्वार्धन्तु प्रकल्पयेत्।
स्वयं कर्तुमशक्तश्चे दन्येन द्विगुणं भवेत्।
देशकालमवस्थांहि जाति शक्ति क्रियादिभिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पुण्यक्षेत्रस्य देशस्थात् गुरोरीक्षण देशिकैः।
सुविचार्य प्रदातव्यं प्रायश्चित्तं गुरूत्तमैः।
शैवाचाराविरोधेन यथा दृष्टं यथा श्रुतम्।
गुरुभिः कल्पितं यत्तु तच्च्युतिश्चात दोषकृत्।

षट्सहस्रिकायाम्:-

त्रिपञ्च सप्तदशभिशाचार्यैश्शास्त्र पारगैः।
स्वशास्त्र नियताभ्यासैः प्रायश्चित्तं प्रदापयेत्।
न मुखैर्दीर्घसूत्रैर्वा नास्तिकैर्वाथ हैतुकैः।
यथा शास्त्रोपदिष्टन्तु न न्यूनं नाधिकं क्वचित्।
न्यूनाधिकप्रदानेन देशिको नरकं व्रजेत्।
तस्मात्सर्वं प्रयत्नेन यथोक्तन्तु समाचरेत्।

चिन्त्यविश्वसादाख्ये:-

ऽकसन्ध्या विलोपे तु सद्यो जातं शतं जपेत्।
द्विसन्ध्या लोपके चैव द्विशतं जपमुच्यते।
त्रिसन्ध्या लोपके चैव त्रिशतञ्जपमुच्यते।
कालोत्तरे:- चतुर्थ्यामपि सन्ध्यायां पूर्ववच्च चतुर्गुणम्।
वह्नि दैवासिके नष्टे होमगस्सूपवासकैः।
सरुजस्य सहस्रैकं निरुजस्यायुत स्वयम्।
अकामतस्समाख्यातं कामतो द्विगुणं चरेत्।
सूक्ष्मे:- आत्मार्थ यजनं हीने त्रिगुणञ्चान्य सांधिके।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रासादेनैव मन्त्रेण शतञ्जप्त्वा यजेच्छिवम्।

कालोत्तरे- डाकाहशूजालोपे तु सहस्रन्दक्षिणञ्जपेत्।

अकामतः प्रमादाच्च कामतो द्विगुणं चरेत्।

उपवासद्वयोपेतमेवं शुद्धिरुदाहृतम्।

त्रिकालपूजनं येषां डाककालमथापि वा।

प्रायश्चित्तसमं तेषां न न्यूनं नाधिकं भवेत्।

त्रिकालपूजकानान्तु ह्येककालं विलोपयेत्।

सहस्ररूपिणं कामात् सोपवासस्त्वकामतः।

डाकाहं वै समारभ्य यावत्पंक्ति दिनावधि।

त्रिशतोत्तरया वृद्ध्या वर्तयेत्प्रतिवासरम्।

पूर्वकालक्षणैर्युक्तं होमं वै गडुकादिकम्।

डाकाक्षा दिनादूर्ध्वं यावत्पक्षं समाप्यते।

तावद्विलोपे मन्त्रज्ञो स्त्र्ययुतं दक्षिणं जपेत्।

द्विगुणं मासि लोपे तु द्व्ययुतं वर्द्धयेत्ततः।

मासि मासि महासेन यावत्संवत्सरावधि।

वत्सरोर्ध्वं विलोपे तु दीक्षयैवं विशुध्यति।

1458 नित्यवह्निमलोपे तु प्रायश्चित्तं समाचरेत्।

शिवाग्निं धारयेद्यत्नात् शान्तश्चेत्प्रमादतः।

अघोरस्यायुतञ्जप्य स्तया शुद्धि र्न शुध्यति।

चान्यथा। सेवाश्वर द्विगुणो जपः कर्तव्यस्तु विशेषतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चोरमूषिककाकादि-श्वानवानरकादिभिः।
सर्पमत्स्यादिभिश्चैव हृते नष्टे तथैव च।
दग्धे चललग्ने तु दृष्ट्वाचात्मार्थ लिंगके।
एकाहमुपवासश्च पश्चान्नक्ताशनी भवेत्।
अघोरलक्षं सञ्जप्त्या द्विधिना लिंगकान्तरम्।
गुरुणादत्तलिंगञ्च ज्येष्ठेनापि तथैव च।
अन्यलिंगन्तु संगृह्य पूर्ववद्विधिना यजेत्।
एवञ्च पिण्डिकायान्तु प्रतिष्ठाप्याथ पूजयेत्।

तथा तिलकपारमेश्वरे-:

स्वेष्टलिंगे परिभ्रष्टे नष्टेनष्टे दग्धे हृतेपि वा।
नीतेवा मूषिका तायिका काकोलैर्व वानरैः।
जप्त्वालक्षमघोरस्य विधिना लिंगकान्तरम्।
प्रतिष्ठाप्य भवेच्छुद्धिः पिण्डिकायान्तथैव च।

कामिके-: स्वेष्टलिंगे परिभ्रष्टे नष्टे दग्धे हृतेपि वा।
नरवानरकाकाद्यैर्लक्षा घोरजपान्ततः।
हृते - - ष्टे निपतिते महागर्ते प्रमादतः।
श्वगर्दभकालीदिते लिंगेनीते गृद्ध्रद्रुणारसुभिः।
हृतेवाग्ना तस्करै र्वा श्वपचैर्वाथ सेविते।
विरुद्ध वर्ग हितय स्पृष्टेयागो विधीयते।
लक्षैन्तु जपेद्यत्ना-त द्रूपं स्थापयेत्पुनः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदा शुद्धिमवाप्नोति साधको दग्धकिल्बिषः।
अन्यथा नैवमुच्येत विधिवैकल्य संभवात्।
एवं वै चाक्षसूत्रस्य प्रायश्चित्तं समाचरेत्।
तन्तुच्छेदितार्द्धेन शुद्धिस्तत्समादिशेत्।
लिंगपादेन घ दाम पवाख्या न लिंगवत्।
प्रायश्चित्तं प्रदातव्यं गुरुणातत्व वेदिना।
परिवर्द्धित इत्यादि।
परिवर्तिते च लिंगे तु सहस्राद्धोरत श्शुचिः।
विच्युते उत्थिते लिंगे वर्तिते च महीतले।
शुद्धिस्याच्चायुतेनैव लक्षात् स्वभ्रे च ने शुचिः।
अभिघाते तु संजाते ह्ययुताश्शुद्धिमादिशेत्।
अदुरादभि वण्र्ते तु त्ययुतेनैव शुध्यति।
लिंगपादेन संस्पर्शे लंघिते चायुतद्वयम्।
तथा पादरजस्पर्शे शुद्धिरुक्ता कपर्दिना।
त्ययुता श्रेष्ठ दुष्टे तु ह्ययुताच्च तदंभसा।
कृतमूत्रोदके नैव लक्षात् पादं विना शुचिः।
रक्तशुक्ल रजस्पर्शाल्लक्षात्छुद्धि रुदाहृता।
तत्संयुक्तोदक स्पर्शात् पादोनाल्लक्षत श्शुचिः।
विष्ठास्पर्शाद्विलक्षान्तु पादहीनं तदंभसा।
निर्माल्यगर्ते लक्षेण पतनाच्छुद्धिमादिशेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विष्ठागर्ते निपाते तु लक्षमध्याधिकं जपेत्।
ब्राह्मणादि-चतुर्वर्णैः शिवदीक्षाविवर्जितैः।
स्वेष्टलिंगं यथास्पृष्टं प्रायश्चित्तं समाचरेत्।
ङाकिङ्किति-चतुष्षान्ते शतैश्शुद्धिरुदाहृता।
कैवर्तवर्गैस्संस्पृष्टे स्वेष्टलिंगे प्रमादतः।
अयुतश्शुद्धिमाप्नोति साधकेनान्यथा शुद्धिः।
स्पृष्टे काकादिवर्गेण त्वयुताश्शुद्ध्यते नरः।
वेदायुतेन संशुद्धिर्दृष्टेतुश्च पचादिभिः।
डाम्भिस्तु स्पर्शिते लिंगे सार्द्धद्विगुणतश्शुचिः।
स्वस्त्रो नो दीक्षितैर्लिंगं स्पृष्टे तत्र न दोषभाक्।
वामदक्षिणमार्गस्थैः स्पृष्टे लिंगे युतं जपेत्।

आचिन्त्यविश्वसादाख्ये –

द्विजात्यदीक्षितस्पर्शे लिंगे जप्यं चतुश्शतम्।
व्रातस्पर्शे तु साहस्रं प्रतिलोमे तु लक्षकम्।
कापालैर्भैरवैश्चैव वाममार्गसमन्वितैः।
महाव्रतयुतैश्चैव स्पृष्टे जप्यं चतुश्शतम्।
स्पृष्टे पाशुपतैश्चापि चतुश्शतमथा जपेत्।
हस्तादेवः पते लिंगे त्र्यंगुला-त्तद्विवृद्धितः।
सहस्रघोरं वृद्धिः स्यात् सहस्र प्रभृतिः क्रमात्।
साधारे पतिते लिंगे ताले ताले युतं जपेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



त्रिगुणन्तु निरोधार्थ कल्पनीयं क्रमेण तैः।
एकहस्ता द्विहस्तान्ते पातने घोरमन्त्रतः।
जप्त्वा दशसहस्रन्तु पञ्चगव्यामृतादिना।
संस्थाप्य पूजयेद्देवं विशेषेणार्चयेद्बुधः।
द्व्यहस्तादूर्ध्वतः पाते त्वव्यंगे लक्षजापतः।
संस्कारेणैव शुद्धिः स्यात् प्रतिष्ठा चैव सम्मता।
अकामतो यदा लिंगं विशीर्णं पिण्डिकाथवा।
प्रागुक्त द्विगुणं कुर्यात्कामतो निष्कृतिर्नहि।

चिन्त्यविश्वसादाख्ये -:

कामतो लुठनञ्चैव पातनो विजीर्णकम्।
न तस्य प्रायश्चित्तं वै महापातकिनस्तु वै।
लिंगञ्च वेदिकाञ्चापि विभज्य स्थापनं यदि।
लक्षन्तु बहुरूपेण जपं कुर्या द्विजद्वये।
आत्मार्थे च परार्थे च लिंगे वैषम्यतं यदि।
राजादिभिश्चतुष्पादै घोरैश्चावादि बातमे।
सन्त्यज तत्तदेवांगं जप्त्वा घोरन्दशायुतम्।
अन्यलिंगं प्रतिष्ठाप्य पूजयेन्नन्दिकेश्वर।

कालोत्तरे -:

बाल बालिश वृद्धानां भोगिनां व्याधितात्मनाम्।
स्त्रीणां वै कारुकादीनां प्रायश्चित्तं न विद्यते।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्त्रीबालायतो वाथ लिंगार्चनरता यदा ।
व्यतिक्रमे समुत्पन्ने प्रायश्चित्तं प्रदापयेत ।
दशांशेन जपाद्धोमो विप्रार्थ्यंशेन गव्यकान ।
सत्यव्रतं ब्रह्मचर्यं भूशया बक्त भोजनम ।
अतैलस्सत्यवादी स्यात्अ भिद्यान्नो जपावधि ।
1268a पञ्चगव्यं सदा पेयं समाप्तौ च विधानतः ।
प्रायश्चित्ते समाप्ते तु देशिकं पूजयेत्सदा ।
इत्यात्मार्थ पूजापद्धत्यां आत्मार्थ प्रायश्चित्त विधिः ।

---

रौरवे चललिंग लक्षणम्

प्रतिष्ठमिष्टलिंगस्य लक्षणञ्चकरोजसा ।
संक्षेपेणैव तत्सर्वं कथयामि समासतः ।
सर्वकामार्थकञ्चैव सर्वकामफलप्रदम ।
अत प्रतिष्ठालिंगपूर्वकत्वा तल्लिंगं मिहोच्यते ।

तथा कालोत्तरे-ईश्वरः-

शजाधाराणि वक्ष्यामि समासात्कृत्तिका सुत ।
योगिनां वा स्वमूर्तौ तु पूजनं विहितं सदा ।
स्वमूर्तौ पूजनं कार्यं पूजारंभे प्रयत्नतः ।
लिंगमाश्रित्य सिद्ध्यन्ति मानवा नान्यथा क्वचित ।
तस्मा लिंगाश्रिता ज्ञेया स्सिद्धयो मनसेप्सितम ।
तल्लिंगं चलाचलभेदेन द्विविधं योगजे प्रतिपादितम ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्यथा—:

द्विविधं लिंगमुद्दिष्टं चलं चैवाचलं तथा ।
स्थिरं प्रासादकं लिंगं चलं सर्वैश्च पूजितम् ।

तथा सूक्ष्मे—:

लिंगन्तु द्विविधं ज्ञेयं स्थावरञ्जंगमन्तथा ।
नागरादि विमानेषु स्थापितं स्थावरं भवेत् ।

नागरादि विमानलक्षणं अस्मत्प्रणीत शिवालय निर्माण दीपिकायां द्रष्टव्यम् ।

क्षत्रियाश्चैव वैश्याश्च शूद्राश्चैव तथैव च ।
जंगमं पूजयेत् बिल्वमात्मार्थं तु विशेषतः ।

अत्र चललिंग प्रस्तावत्वात् तल्लक्षणमत्रोच्यते ।

तालादंगुलपर्यन्तन्तल्लिंगं चलमुच्यते ।

तदुक्तमंशुमत्काश्यपे -

रत्नजं लोहजं वाथ लिंगं कृत्वा सयोनिकम् ।
लिंगद्रव्यमथान्यं वा योनिकृत्वा सलक्षणम् ।
शिरसो वर्तनोपेतं लक्षणोद्धारवर्जितम् ।
वृत्ताकारमशेषन्तु कृतलिंगोदयाद्धिकम् ।
उदयैनैकभागं वा वेद्यांशश्चमथापि वा ।
पीठे प्रवेशयेच्छेषं दृश्यमान समान्वितम् ।
गमागमक्षमञ्चेष्टं देशेन्यस्त्वोपलक्षणम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तल्लिंगं चलमित्याख्यमचलं स्यात्तु भागिकमिति ।

सुप्रभेदे –

क्षणिके चललिंगे च स्थण्डिले मण्डलेपि च ।
कौतुके भित्ति चित्रे च आत्मार्थार्चनमारभेत् ।
स्फाटिकं क्षणिकं शैलं बाणलिंगञ्च लोहजम् ।
चललिंगं समाख्यातं स्थण्डिलं शालितण्डुलैः ।
सिकतैर्वा समाख्यात मण्डलं करमानतः ।
गोमयालेपिते तत्र संलिख्याब्जदलाष्टयुक् ।
मण्डलमिति विख्यात द्वादशप्रतिमार्चनम् ।
कौतुकमिति विख्यातं भित्तिचित्रं तथैव च ।
आत्मार्थं यजने ख्यातं यथा युक्त्या प्रकल्पयेत् ।

।चिन्त्यविश्वे विशेष उक्तः ।

आत्मार्थञ्चललिंगञ्च तद्विशेषं शृणुष्व च ।
शैलजं लोहजञ्चैव रत्नजञ्च त्रिधाभवेत् ।
शैलजञ्चैकभेदं स्यात् भोगमोक्ष फलप्रदम् ।
रत्नजञ्चाष्ट -- स्यात् लोहजञ्च तथैव च ।
माणिक्यञ्च प्रवालञ्च वैडूर्यस्फाटिकन्तथा ।
वज्रं मरकतन्नीलं पुष्यरागन्तु रत्नजम् ।
माणिक्यं श्रीपदं ज्ञेयं प्रवालं वश्यदं भवेत् ।
वैडूर्यं पुत्रसंसिद्धि स्फाटिकं सर्वसिद्धिदम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शत्रुक्षयकरं वज्रं मरतकं पुष्टिवर्द्धनम् ।
धनधान्यप्रदं नीलं पुष्यरागं तु भोगदम् ।

सिद्धान्तशेखरे स्फाटिकत्रैविध्यमुक्तम् ।

स्फाटिकं त्रिविधं ज्ञेयं सूर्यो-चन्द्रोभयात्मकम् ।
मध्याह्नसमये तीक्ष्णे सूर्यरश्मौ धृते मणौः ।
जाते सूर्यान्तु तूलेग्निरक्तत्सूर्यकान्तकम् ।
संपूर्ण चन्द्राकिरणे निशीथे विद्रुते मणौ ।
तस्मात्पातितपानीयं चन्द्रकान्तन्तदुच्यते ।
न ज्वलत्यर्कर्श्मौ च चन्द्ररश्मौ स्रुवत्यपि ।
सामान्यं स्फाटिकं प्रोक्तं तच्चतुर्विधमुच्यते ।
शुक्लं रक्तञ्चपीतञ्च कृष्णञ्च ब्राह्मणादिषु ।
अंबुबिन्दुनिभं स्वच्छा समं स्वच्छप्रभान्वितम् ।
अशेष दोषनिर्मुक्त स्फटिकं सर्वकामदम् ।
निष्प्रभं निर्मुखं रूक्षं बहुवर्णञ्चराचरम् ।
तुषाकारणसन्त्रास रेखाद्विबिटसंयुतम् ।
गर्भञ्च कीलकोपेतं शर्करावृतसंयुतम् ।
अन्त्यजाति समाक्रान्तं सदोषं स्फटिकं त्यजेत् ।

सुप्रभेदे[११]-: ~~स्वसम्मुत्सेधं पीठस्य~~। यथालाभप्रमाणेन स्फटिकादीनि कारयेत्
शैरवे-: मौक्तिकं पद्मरागञ्च सूर्यकान्तेन्दुकान्तकम् ।
स्फटीत्वा लिंगवाल्लिंगं स्वयोनिं वान्ययोनिकम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लिंगस्य नाहं त्रिगुणं योनिनाहं प्रकीर्तितम् ।
लिंगायामं त्रिभागैकमन्वयोनि स्वनिर्गतम् ।
योनिपीठमिति ज्ञेयं वेदाश्रं वृत्तमेव वा ।
अन्ययोनि समायुक्तं कारयेदष्टबन्धनम्
लोहयोनि समायुक्तं शैलजाहेस्य बन्धयेत ।

अजिते -: उत्तमं स्वस्वयोनि स्यात् मध्यमं स्वर्णयोनिकम् ।
अधमं रौप्य योनिं स्यात् तदभावे तु ताम्रजाः ।
तस्याभावे तु शैला स्यात् रत्नलिंगस्य पिंडिकाम् ।
आयामसदृशं नाहं तत्समापीठविस्तरम् ।
विस्तारसमुमुत्सेधं पीठस्यापि विशेषतः ।
शिरसावर्तनं कुर्यात् पूर्ववद्देशिकोत्तमः ।
चतुरंशे तु तल्लिंगं त्रिभागमूर्ध्वमुच्यते ।
भागमेकं स्थितं पीठे निश्चलश्चैव कारयेत ।

वातुले -: द्व्यंगुलादिषु भूतान्त मात्मार्थे संप्रपूजयेत् ।
भूतांगुलान्तदूर्ध्वं तु तत्परार्थं प्रकीर्तितम् ।

कालोत्तरे -:

लोहरत्नमयं लिंगं गृहिणान्तु सुखेहितम् ।
अंगुलो दिवितस्त्यन्तं नोर्ध्वं नाधो विभूतये ।
रत्नजे नियमो नास्ति यथालाभं प्रकल्पयेत् ।
तेजोत्कटत्वं रत्नानां वास्यते संनिधौ तथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



1868 दीप्ते-: अंगुल्याद्विवितस्त्यन्तं कुर्याल्लिंगन्तु रत्नजम् ।
अंगुल्यारभ्य हस्तान्तं यथेष्टं लोहजं कुरु ।
स्वप्रमाणेन कर्तव्यं पिण्डिकारत्नलोहयोः ।
स एव योनि पीठस्यात्तदलाभे विधीयते ।
रत्नजं लोहजं पीठ धातुन्चैव तु धातुजे ।
लोहजस्यैव लिंगस्या - - का श्वभ्रवर्जितामः ।
रत्नजानान्तु लिंगाना स्वयोनिश्वभ्र वर्जिताः ।
श्वभ्रं कुर्याद्विधानेस्तु चतुर्भागैक भागयोः ।
त्रिगुणं लिंगतान्तु पिण्ठिकायास्तु विस्मृतम् ।
चतुर्गुणं वा कर्तव्यं उत्सेधं तत्समं भवेत् ।
चतुरस्त्रा विवृत्त वच्चललिंगस्यपिंडिकाः ।
कारणे-: स्वप्रमाणेत कर्तव्यं रत्नलिंगस्य पिण्डिका ।
चतुरस्त्रं वाथ वृत्तं वा चललिंगस्य पिण्डिकाः ।
तल्लक्षणं दीप्ते-:
उत्सेधं पिण्डिका यस्तु षोडशांशेन भाजयेत् ।
पट्टिका चाश्वि भागा पञ्चांशात्पञ्चतुण्डकम् ।
कण्ठमान द्वयं पश्चात् शस्याच्चतुर्भागोर्ध्व पञ्चकम् ।
द्व्यंशेन तु महा पट्टी चांशेन घृतवारिणी ।
पीठतारं त्रिभागैकं नालसप्तमुच्यते ।
कृत्वा तु निश्चलं लिंगं प्रतिष्ठां कारयेत्ततः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वज्ञानोत्तरे-:

अंगुलद्व्यंगुलं वापि कुर्यात्तु चतुरंगुलम्।

अष्टांगुलं वितस्तिं वा मणिरत्नमयं शुभम्।

तस्य चतुरं लान्तमधमम्। तदूर्ध्वमष्टांगुल मध्यमम्।
तदूर्ध्वं वितस्ति तमुत्तमम्।

सिकतं रत्नलिंगानां प्रासादेन विधीयते।

प्रासादे वा गृहे रम्ये यथेष्टं सं प्रपूजयेत्।
शैलादिलिंगवत् कनिष्ठादिभेदेन प्रासादभेदो न रत्नलिंगानान्त विधीयते।

बाणरत्नादिकं लिंगं सं प्रासादपीठकमिति।
कारणे-: अंगुलयादि वितस्त्यन्तं कुर्याल्लिंगन्तु रत्नजम्।
चिन्त्यविश्वे-:

रत्नजे लक्षरेखानां लोहेन सरिद्भक् भवेत्।

ईद्धाश्च चले लोहे करणामंगुलेन वै।
मनोल्लवे- करणामंगुलेनैव देहलब्धांगुलेन च।

याने च शयने चैव मञ्जपर्यकमासनम्।

मानांगुलैर्गृहार्चानां प्राणैरपि मानयेत्।
पौलस्त्ये प्रमाण ह्यायं प्रतिमा लक्षणमुक्तम्। तद्यथा-

आरभ्यर्गंगाधरनेत्र पक्षान्तमक्षांगुलमानवृत्या।

गृहार्चनाया प्रतिमाप्रमाणं यस्समानांगुलिनोपसंयुतम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा अत्र केचिद्विकल्पं वदन्ति । तद्यथा -

आत्मार्थं च गृहार्चानां मात्रांगुल्येन चोदितम् ।
तद्यवेनाल्पमानञ्च गृहार्चानां विशेषतः ।
एवं मानानि संस्थानां मर्यादां न परिकल्पयेत् ।
जन्मनामर्क्षयुक्-श्रेष्ठ कर्मर्भं मध्यमं भवेत् ।
अधमं नामनक्षत्रं त्रिविधं कारयेद्बुधः ।
आ - - यक्षवारादि चलबिंबे तु नेष्यते ।
अचले बहुशुभं वीक्ष्य कारयेदधिकं शुभम् ।

सुप्रभेदे- सर्वावयव द्रव्यत्वात् प्रतिमा चेति चोच्यते ।
एतत्प्रतिमादिकं जीर्णं चेत् तद्द्रव्येण कर्तव्यम् । श्रेष्ठद्रव्येण न तु हीनेन । तदुक्तं सूक्ष्मे-

शैलजाल्लोहजं श्रेष्ठं लोहजं रत्नजं शुभम् ।
सर्वेषामपि वर्णाना हेमजं बेरमुत्तमम् ।
सर्वं बेरप्रमाणेन कुर्याद्धीनन्न कारयेत् ।

लोहजम् । सौवर्णं रजतं ताम्रं कांस्यं चैवारकूटकम् ।
आयसं सीसकं चैव त्रपुकं चैव लोहजम् ।
सौवर्णं श्रीप्रदं ज्ञेयं राजतं राज्यसिद्धिदम् ।
ताम्रं पुत्रप्रदं चैव विद्वेषं कांस्यमेव च ।
उच्चारणं चारकूटं क्षयकारणमायसम् ।
सीसकं रोगकरणं त्रपुरायुविवर्द्धनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



निश्वासेऽप्यष्टविधमुक्तम् ।

सौवर्णं राजतन्ताम्रं कांस्य-चारकूटकम् ।
आयसं त्रपुसंसीसं लोहमष्टविधं भवेत् ।
आत्मार्थं वा परार्थं वा पूजयेच्छिवमादरात् ।
दुष्टानां निग्रहार्थाय शिष्टानां पालनाय च ।
प्राणिनां रक्षणार्थाय पूजयेच्छिवमादरात् ।
एवं लोहसमाख्यातं शैलजं पुनरुच्यते ।
शैलञ्च एकभेदं स्यात् भोगमोक्षफलप्रदम् ।
नर्मदायास्तु तीर्थेषु संयमेषु समुत्थितम् ।
यल्लिङ्गं तत्तु बाणाख्यं तल्लिङ्गं नैष्ठिकार्चनम् ।
तल्लिङ्गं पिण्डिकायुक्त भुक्तिमुक्ति फलप्रदम् ।
तस्मात्तु भौतिकञ्चैव नैष्ठिकोपि तथैव च ।

पद्मसंहितायाम् -:

कार्मुकन्तु परित्यज्य मृगे रविगते दिने ।
गंगायमुनयो र्योगे गत्वा बाणन्तु मध्यमे ।
उद्धृत्योपल कन्तत बाणलिंगमिहोच्यते ।
बाणस्सदाशिवो देवो बाणो बाणासुरेपि च ।
तेन तस्यैकृतं य स्यात् बाणलिंगमुदाहृतम् ।

कामिके-: श्रुत्वा स्वयंभुलिंगानां फलस्थावर पूजने ।
बाणास्तु तदारभ्य तपस्तेपे सुदारुणम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तपो वेगेन सहसा सान्निधीकृतमीश्वरम् ।
प्रार्थयामास लिंगार्थं स्तुत्वा नत्वा मुहुर्मुहुः ।
सोपि तद्भक्तिभावेन लिंगान्यादाय शंकरः ।
आकारैर्भूयस्सुसंस्कृत्य ददौ कोटिश्चतुर्दश ।
संस्तत्य श्रद्धया सोपि संपूज्य बहुभिः करैः ।
संहितासु फलं लब्ध्वा कालान्ते तानि निक्षिपेत् ।
श्रीशैलादिषु पुण्येषु क्षेत्रेषु गिरिशाज्ञया ।
लिंगाद्रौ कालिका गर्ते श्री नागे कन्यकाश्रमे ।
कन्यातीर्थे च नेपाले महेन्द्रेचामरेश्वरे ।
अन्यत्र च नदी मध्ये पर्वते च विशेषतः ।
पादां लिपिवृध्या तु गृहीत्वा याज्ञा यदृच्छया ।
इतद्बाण लिंगन्तु चला-चलभेदेन द्विगुणं भवति ।

तथा कालोत्तरे-:

बाणलिंगस्वतस्सिद्धश्चलाचल विभेदतः ।
योग्यप्रमाण संयुक्तमचलं प्रागमुच्यते ।

1272 सूक्ष्मे-: अथ चान्यप्रकारेण बाणलिंगन्तु वक्ष्यते ।
पर्वते वा वने वापि नद्यां वापि जलेपि वा ।
इष्टलिंगं गृहीत्वा तु पश्चात्पीठं प्रकल्पयेत् ।
[इष्टलिंगस्य पूजायां] लिंगस्य नाहसदृशं पीठविस्तारमुच्यते ।
लिंगोद्भवे घमं पीठं कण्ठमानेन वा पुनः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लिंगानुरूपशैलेन तु कारये स्त्रीशैलेन तु कारयेत् ।
इष्टलिंगस्य पूजायां इष्टमाप्यमवाप्नुयात् ।
इष्टलिंगसमं ज्ञात बाणभेदमत न विद्यते ।
तस्माल्लोकेषु संपूज्य बाणलिंग विशेषतः ।
परार्थे लक्षणैर्युक्तमात्मार्थे तु न लक्षयेत् ।
भक्तिरेव विशिष्टा स्यात् भुक्तिमुक्ति फलप्रदम् ।
तस्मात्सर्वप्रयत्नेन सर्वज्ञात स्समाहरेत् ।
उत्तमं बुद्बुदाकारं मध्यमं खण्डजाकृतिम् ।
अधमं वृषभस्कन्धमित्येतल्लिंगलक्षणम् ।

ज्ञानरत्नावल्याम्-:

पक्वजंबूफलाकार कुक्कुटाण्डसमाकृतिः ।
भुक्तिमुक्ति प्रदंचैतत् बाणलिंगमुदाहृतम् ।
रौरवे-: श्वेतलिंगं भवेद्विप्र क्षत्रियो रक्तवर्णकम् ।
पीतवर्णं भवेद्वैश्यः कृष्णवर्णन्तु शूद्रकम् ।

कालोत्तरे-:

अथवत्कृष्णवर्णन्तु सर्वजातिषु सिद्धिदम् ।
सूक्ष्मे-: ब्राह्मणस्य तु वृत्तं क्षत्रियस्य षडश्रकम् ।
चतुरश्रन्तु वैशान्य वैश्यानां वस्त्रस्यै व तु वृत्तकम् ।
सर्वजातिषु कर्तव्यं वृत्तपीठं प्रशस्यते ।
शिवशास्त्रोक्तमार्गेण पीठबन्धं प्रकल्पयेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मानसारे-ः

आत्मार्थलिंग पीठस्य लक्षणं वक्ष्यतेऽधुना।
पीठतुंग समं वाथ त्रिपादं चार्धमेव वा।
लिंगायाममिति प्रोक्तं नाहं पीठविशालवत्।

अत्रवत्कारम्मत्स्ये ः।

नदी पर्वतदेशेषु लिंगसंभवणं भवेत्।
श्वेतरक्तं तथा पीतं कृष्णवर्णश्चतुर्विधम्।
भूसुरादि चतुर्णान्तु वर्णानां लिंगतः क्रमात्।
अथवा कृष्णवर्णन्तत् सर्वजात्यर्थकं भवेत्।
उन्नते तु शिरो भागं प्रवरो पाद उच्यते।
उन्नतः प्रवणाभावे शोडवन्तु यताशिरः।

कारणे-विशेष उक्तः।

पञ्चवार्षिकां कन्यां अलं कृत्यविशेषतः।
तया संस्थिते लिंगे तम्मुखञ्चेति कीर्तितम्।
क्रियाकरणमण्डन पद्धत्यामप्युक्तम्।
कृशं लिंगस्य मूलं स्यात् स्थूलन्तस्याग्रमिष्यते।
उन्नतं तु मुखं विद्याल्लिंग तच्चेदनुत्तमम्।
अभ्यर्च्य कन्यकां विप्रवंशायां पञ्चहायनाम्।
तया स्पृष्ट प्रदेशेषु मुखं स्यादितरत्परम्।

शैवोत्तरे-ः स्थूलं शिरः कृशं मूलमुन्नतं तु मुखं भवेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ईदृशं लक्षणं दृष्ट्वा तज्जले ऽधिवासयेत् ।

ज्ञानरत्नावल्यां तस्य परीक्षालक्षणमुक्तम् । तद्यथा -:

त्रिपञ्चावरणं यस्यै तुला सम्यक् न जायते ।
तथा बाणं समाख्यातं शेषं बाणसमं भवेत् ।
कर्कशो बाणलिंगश्चेत् पुत्रदारक्षयो भवेत् ।
द्विविधे व्रजिते तस्मिन् स्वदेहभंगो भवेद्ध्रुवम् ।
डाकपक्षाश्रये येन पुत्रदारधनक्षयः ।
शिरसि स्फुटिते तस्मिन् व्याधिर्वा मरणं भवेत् ।
छिद्रादि दोष संयुक्तमन्त्यजे रूप सेवितम् ।
बाणलिंगं त्यजेत्ताद्दृक् लोहलिंगन्तथैव च ।

कारणे -: रेखावै वर्ण्यसन्त्रास तुषारकनिकान्चितम् ।
कलंकशर्कराबिन्दु दोषाकान्तं विवर्जयेत् ।
वृषपातवदाकारास्सूत्रपातवदायताः ।
सूर्यरश्मिवदाकारा रेखावै त्रिविधा स्मृता ।
स्तन चूचुक संकोशो जंबूफलसमप्रभः ।
बिन्दुरेव समाख्यातो द्विविधायां प्रजापते ।
बर्हि पिञ्छ समाकारं कृष्णाभ्रक समप्रभम् ।
कृष्ण लोहवदाकार कलंकत्रिविधं भवेत् ।
शातकुंभमयञ्चैव दरीकृत समप्रभम् ।
कंसाभं विमलं प्रोयेवं सर्वदोषकरं परम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कालोन्तरे-: अष्टांगुलन्तथा लोहं तदर्धञ्चेद्गृहे हितम् ।
तद्वच्छैलं दारुजं वापि स्वगृहे परिवर्तयेत् ।
विस्तारं नाम नाहन्तु बाणलिंगस्य नेष्यते ।
रेखाबिन्दुकलंकादि रहितं युक्तमेव वा ।
सर्वेषामपि लिंगानां बाणलिंगं प्रशस्यते ।

कालोन्तरे-: चलाचलानि चान्यानि विविधानि च ।
मृण्मयं द्विविधं कार्यमपक्वं पक्वमेव च ।
अपक्वात्पक्वजे पुण्यं ज्ञेयं दशगुणन्ततः ।
पक्वाद्दान्तमये पुण्यं ज्ञेयं दशगुणं सुता ।
दारुजे शैलजे पुण्यं ज्ञेयं दशगुणं स्मृतः ।
तस्माच्छतगुणं लोहे लोहाद्रत्नमनन्तकम् ।
रत्नं मणिमये लिंगे फलं लक्षगुणं मतम् ।
उत्तमाधममध्यानां रत्नानामुत्तरोत्तरम् ।
शैलप्रधानामणवो रत्नं श्रेष्ठ तथा पुनः ।
संस्कृतं बाणलिंगन्तु रत्नात् कोटिगुणं भवेत् ।
रसलिंगं ततो बाणात् फलं ~~लक्षगुणं मतम्~~ कोटिगुणं स्यते ।
~~उत्तमाधममध्यानां रत्नानामुत्तरोत्तरम्~~ ।
कोटिगुणं रसलिंगस्य वक्तुं शक्नोति शांकरे ।
सिद्धयो रसलिंगे तु अणिमाद्यास्सुसंस्थिता ।
रसलिंगेऽर्च्यते मुक्तिस्स्याद्वै शिवसंपदा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्माद्रससमवं लिंगं पूजयेत्तु प्रयत्नतः।
रसलिंगे तु वै पूज्य सर्वपापक्षयो भवेत्।
दर्शना दुरितं हन्ति नमस्कारेण दुर्गभान्।
सर्वान् कामानवाप्नोति रसलिंगस्य पूजनात्।
संपूज्य रसलिंगे तु प्राप्यते परमं पदम्।
तस्मात्प्रयत्नतः पूज्यं रसलिंगं शिवध्वज।

वातुलोक्तेन विधिना इत्यादि। वातुलोक्तविधिना रसबन्धन्तु कारयेत्। मान्योमानप्रमाणादि न तस्य परिकल्पयेत्।

सुप्रभेदे-:

113b पूजान्ते क्षणिकास्त्याज्यास्त्यजेदन्यानि तत्क्षये।
रत्नजे लोहजे चैव प्राणलिंगे चले स्मृतः।

स्थण्डिलाविधिः। कालोत्तरे - निर्विघ्नार्थस्थण्डिले तु शिवास्तं पूजयेत् सदा। पूजयेत्सूर्यबिंबस्थं दर्पणे प्रतिबिंबितम्।
तद्वद्वै सोमबिंबस्थं पूजयेन्मृत्युपञ्चने।
--वत् स्थण्डिले पूज्यन्दशवत् कलशोभितम्।

सर्वज्ञानोत्तरे-:

दीक्षादि स्थापयेद्विद्वान् कुंभ एव शिवं भजेत्।
स्थण्डिले चललिंगे च सर्वथा न तु मण्डले।
प्रायश्चित्तं भवेत्तस्मा द्दलोभंगे तु लिंगवत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथमण्डल लक्षणम् ॥ सुप्रभेदे –:

अथातस्संप्रवक्ष्यामि मण्डलं सर्वकामदम् ।
मण्डलं सारमित्युक्तं सर्वदेवालयः ।
मण्डलं तेन विख्यातं शिवेनपरमात्मनः ।
प्रागुदक्प्रवरे देशे मण्डलन्त्वालिखेद्बुधः ।
सूत्रामन्तरतास्थित्वा द्विविभागान्तु लक्षयेत् ।
वामदेवेन मन्त्रेण सूत्रपातस्तु कारयेत् ।
पूर्वपश्चिमदिग्भागे सूत्रन्दत्वा समाहितः ।
तत्र सूत्रप्रसार्याथ दक्षिणोत्तरगं शुभम् ।
चतुरश्रं समं कृत्वा नवभागविभज्यतम् ।
मध्य भागेन पात्रस्य कर्णिकान्तु समालिखेत् ।
चतुर्भागै स्तु तत्पद्म मष्टपत्रोपशोभितम् ।
प्रथमं कर्णभागन्तु द्वितीयं केसराणि वै ।
तृतीयन्दल सन्धौ तु दलाग्राणि चतुर्थकम् ।
प्रतिमावरण रेखान्तु पद्मबाह्ये तु बुद्धिमान् ।
पद्मस्यैव प्रमाणन्तु दानन्दत्वाच्छिवस्य च ।
स्वपेस्वल्प – – – व्यं विस्तरैर्विस्तरं भवेत् ।
विधिपद्मार्थमानेन पद्ममानेन वा पुनः ।
न स्थूलं न कृशं हीनं वक्रं बिन्दुवर्जितम् ।
देव देवस्य भवनं कृत्वा तत्क्षणसिद्धिदम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थूलं सर्वभयोद्योक्त वक्त्रे कमलवाद्दिशेत ।
हीने तु सिद्धहीनन्तु बिन्दे स्त्रातु भयप्रदम् ।
कुवौ व्याधिसमुत्पन्न दुर्भिक्षं वर्णमिश्रितम् ।
सान्निध्यं न भवेच्छोभ रजस्त्वतिसूत सूतलंबने ।
तस्मात्सर्वप्रयत्नेन कर्तव्यं लक्षणान्वितम् ।
कृष्णाजिनस्य सूत्रैस्तु मनाशिलाद्यैश्च चूर्णकैः ।
तेषामलाभे तु चूर्णाना शालितण्डुल चूर्णकैः ।
पक्त्वेष्टकाद्या चूर्णैश्च दग्धतण्डुल चूर्णकैः ।
ततो हारिद्रचूर्णैस्तु कारयेद्दवमृत्यु वै ।
कर्णिका पीतवर्णेन पुष्करा हेमसन्निभैः ।
यवमात्रोन्नता स्त्रस्तं पश्चाद्विंशति पुष्करः ।
सेकरा गुणसंकाशास्त्वधोध्ये रुक्मवर्णकाः ।
पद्मस्याष्टदलं श्वेतं कृष्णरेखान्तरेषु वै ।
रेखापार्श्वे तु रक्तन्तु तथैव प्रतिवारणम् ।
रक्तवर्णेन वीथ्यस्यात पद्मस्य परितस्ततः ।
द्वाराणि पीतवर्णानि कर्तव्यौ द्वारपार्श्वयोः ।
शोभाश्चाप्युपशोभाश्च सर्ववर्णैस्तु कारयेत ।
एवं समालनालिने शिवमावाहयेद्बुधः ।

वत्सहस्रिकायाम् —:

मध्ये पद्मे शिवः पूज्यो लोकेशाश्च पदेषु च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्त्राणि बाह्य विविधौ भक्त्या संपूज्य यत्नतः।
अश्वमेध सहस्राणि वाजपेय शतानि च।
शतन्मण्डल पूज्यायाः कलान्नार्हन्ति षोडशीम्।
नासौ लिप्यति पापेन पद्मपत्रमिवांभसा।
नित्ये नैमित्तिके काम्ये कर्तव्यं भुक्तये।

सुप्रभेदे –

चित्रं चित्रार्धभेदन्तु चित्राभासान्तथैव च।
सर्वावयव संपूर्णन्दृश्यते चित्रमुच्यते।
अर्धावयव सन्दृश्यमर्धचित्रन्तथैव च।
पटे भित्तौ च ये लिख्य चित्राभासमिहोच्यते।

कामिके – स्थिरञ्जलं वापि त्रिविधं मण्डलन्तथा।
पटं वा भित्तिचित्रं वा पीठं वा मन्त्रसंस्कृतम्।
नद्यांबु गुरुवृक्षाद्यं विद्यापीठमथापि वा।
विशेषतस्त्वबा सिद्ध पाषाणं रक्तमेव वा।
अन्यद्वा लिंगकल्पोक्तं सैकताद्यं विशेषतः।
शतत्सर्वं शिवोद्देश्यं यथायोग्यं प्रकल्पयेत्।
इत्यात्मार्थपूजापद्धत्यां चललिंगलक्षण विधिः।

— o —

तत्र लिंगे प्रतिष्ठा पञ्चभेद उच्यते। प्रतिष्ठास्थापनं स्थितिस्थापनंमास्थापनमिति। तत्र ज्ञानशक्तिमे लिंगे क्रिया

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शक्तिमया पीठस्य प्रतिष्ठा योगः। प्रतिष्ठा भवति' बाण-
लिंगादेः पीठे यथायोगं निवेशनम्। स्थापनम्। अत्र पीठस्थ
लिंगस्य स्फटिकादेः स्थापनम्। स्थितिस्थापनमास्थापनमिति +
इतिरुत्थापनम्। पूर्वपीठमास्थाप्य तस्मिन् व्यक्तलिंगप्रतिमासु
निवेशनमास्थापनम्। तथा वरुणपद्धतौ।

प्रतिष्ठास्थापनञ्चैव स्थितस्थापनमेव च।
उत्थापनञ्च संप्रोक्तं तथा स्थापनमेव च।
लिंगे ब्रह्मशिलान्यास पूर्वके योन्यपिण्डिके।
बाणादौ चापृथक्पीठे जीर्णे व्यक्तेष्वनुः क्रमादिति।

एवमुक्तं पञ्चविधा प्रतिष्ठाविधिषु स्थापनास्थितस्थापनोत्थाप-
नानि त्रीण्येव संभवति। तत्रोत्थापनविधिरस्माभिः कृत जीर्णो-
द्धारप्रकरणे द्रष्टव्यः। स्थापनस्थितस्थापनयोः स्वरूपं क्रिया
1484 क्रमद्योतिकायामाचार्यैः स्पष्टमुक्तम्। तद्यथा-:

चललिंगे पृथक्पीठे भक्तेशे पञ्चभिस्त्रिभिः।
द्वौ भागौ भागमेकं वा विन्यसेत्पिण्डिका वटे।
तत्रार्चांशो भवेत्र्यंशो लिंगं वाथ स्वशंबरैः।
चूर्णवत्संस्कृतौ बाणे चले पीठे च संस्कृते।
क्रमात् ज्ञानक्रिया शक्ति न्यसेदित्यादि पूर्ववत्।

इति स्थापनमाख्यातम्। स्थितस्थापनमुच्यते। ~~स्वपीठे चललिंगे~~
स्व पीठे चललिंगे च प्रकृत्यास्फाटिकादिके।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्राग्वत्सर्वो विधिः किन्तु लिंगपिण्डिकयोरिह।
अभेदात्संस्कृतिः कार्यं मण्टपे वा गृहेऽथ वा।
किञ्च ब्रह्मशिलारत्न प्रभृतेश्च निवेशनम्।
योजनं पिण्डिकायाश्च मनसा परिकल्पयेत्।
चले च संस्कृतिः प्राग्वत् बाणलिंगे च रोहके।
मण्टपे वा गृहे वाथ सर्वपीठाश्रयं च ते।
प्रागुक्त स्थिरबाणादि न्यासन्यासोक्तवत्स्मृतः।
धातुजं रत्नजं वापि स्वयोन्यथ वियोनि वा।
स्थापयेत्स्थिरबाल्लिंग शिलारत्नादिमानसम्।

अथ चललिंगप्रतिष्ठा कालदेशमण्टपादीनि विज्ञाय प्रयोगं विदध्यात्। तथा कामिके—:

रत्नजञ्च प्रतिष्ठायां लोहजञ्च तथामतम्।
सहजं वाथ भिन्नं वा लिंगं श्रेष्ठस्वयोनिकम्।
रत्नजे लोहजेष्वेवं पार्थिवेपि तथामतम्।
सर्वेषामपि चैतेषां प्रतिष्ठादि निगद्यते।
शैललिंगप्रतिष्ठाया कालश्रेष्ठ उदाहृतः।
चललिंग प्रतिष्ठायां प्रतिमादौ च मध्यमः।
बाणादौ अधमः प्रोक्तो मुमुक्षोस्सर्व एव हि।
मासपक्षनक्षत्रवासादि विधिषो चेक्षनेष्यते।
तथैव बाणलिंगस्य किन्तु कालोधमोऽथवा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विधाय वज्रबन्धाद्यन्तत स्थापनमारभेत ।

वीरतन्त्रे चललिंग प्रतिष्ठा प्रकरणे ।

रोहिण्याश्च पुनर्वस्वो पुष्यं मृगशिरस्तथा ।

हस्तश्च रेवतीचैव स्वातीचैव त्रिरुत्तराः ।

स्थिरराशिषु कर्तव्य मुभयात्मकमेव वा ।

कालोत्तरे -

भूमिगाशो ध्वजान्वन्तां शमीकृत्योपलिप्य च ।

तत्र वास्तुं समभ्यर्च्य मण्टपं कारयेद्बुधः ।

अन्यथा शिवतुल्योपि विघ्नैरेवाभि भूयते ।

किरणे - यद्वास्तु पूजितञ्चात्र गृहप्रासादकल्पने ।

एकाशीति तदाख्यातं चतुष्षष्टि पदंततः ।

अयं देवालये प्रोक्तो द्वितीये मन्दिरे मतः ।

वीरतन्त्रे -

उद्याने शुद्धदेशे वा गृहे दीक्षादिमण्टपे ।

इशेच्छया न्तरन्यक्ष्या गृहलिंगं गृहाग्रतः ।

जयाख्यो दशहस्तं स्यात मण्टपं न तु कोणकम् ।

दीप्ततन्त्रे - रत्नलिंगादि प्रतिष्ठा प्रकरणे -

रत्नलिंगा मण्टपं चललिंगाना प्रवक्ष्यामि महानल ।

नदी तटाक तीरे वा पर्वते वा वनान्तरे ।

गोष्ठे देवालये चैव गृहे वा पूजकस्य तु ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नवाष्टहस्तकं वापि सप्तहस्तमथापि वा ।
षोडशस्तंभसंयुक्तं चतुर्द्वार समन्वितम् ।
तोरणादि समायुक्तं ताम्रपल्लवशोभितम् ।
मण्टपस्य च मध्ये तु वेदिं कुर्याद्विहस्तकम् ।
तालमात्र समुत्सेधन्दर्पणोदर सन्निभम् ।
परितः कल्पयेत्कुण्डञ्चतुर्दिक्ष्वपि देशिकम् ।
चतुरश्रन्धनुर्वृत्तान्त्रिकोणं पञ्चमेव च ।
प्राक् देश कल्पयेत्कुण्डमेक होमे विशेषतः ।
पिण्डिकाकृतिवत्कुर्यात् कुण्डं तत्र प्रमाण युक् ।
अग्निकार्यन्ततः कुर्यात् कुण्डले वा स्थण्डिलेथवा ।
वीरतन्त्रे -:

उद्यान रुद्रक्षेत्रेवा गृहे दीक्षादि मण्टपे ।
पूर्व पश्चिमयोश्चैव यदि स्यान्नैव सिद्धिदः ।
मण्टपं भूषयेद्विद्वान् पूर्वोक्तेन विधानतः ।
लिंगाधिवासनात्पूर्वे तोरणादीनि चार्चयेत् ।

सन्ताने-चललिंग प्रतिष्ठा प्रकरणे

अधिवासं प्रवक्ष्यामि चलस्थापनमुत्तमम् ।
पूर्वेद्युरधिवासं स्यात् अपरेद्युः प्रतिष्ठितः ।
सर्वलोकहितार्थाय सर्वव्याधिविनाशनम् ।
सर्व धान्य समृद्ध्यर्थं ग्रामारिष्टविनाशनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अधिवासनार्थमिष्टलिंगं मण्टपाद्धृत्वा पञ्चगव्येन मत्वा संस्थाप्य गन्धमाल्यादिभिरलं कृत्य पश्चान्नद्यादिषु श्वभ्रे घटे वा जलाधिवासनं विदध्यात्। तथा वीरतन्त्रे–:

प्रतिमां क्षालयेद्विद्वान् पञ्चगव्यं हृदयेन तु।
वापी कूपतटाकादौ वारुण्यमेव मण्टपम्।

सन्ताने–: गेहस्य पुरतः कुर्यात् मण्टपस्याष्टसप्तषट्करमिति शेषः।

मण्टपद्वयसंयुक्तं सर्वालंकारसंयुतम्।
शिल्पिना कारयेत्सर्वं पूजयित्वा विसर्जयेत्।
गन्धमाल्यैरलंकृत्य कुर्याद्ग्राम प्रदक्षिणम्।
वितानध्वजसंयुक्तं सर्ववाद्यसमान्वितम्।
प्रवेशेन्मण्टपं तत्र जले चैवाधिवासयेत्।

शैवोत्तरे इष्टलिंग प्रतिष्ठा प्रकरणे–:

पर्वते वा वने वापि नद्यां वापि जलेऽथवा।
इष्टलिंगं गृहीत्वा तु जले चैवाधिवासयेत्।

दीप्ते–: मण्टपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत्।
हस्तमात्रप्रविस्तारं मेखलाद्वय भूषितम्।
विस्तारोत्सेधमानं यत्प्रत्येकं चतुरंगुलम्।
नालमुत्तरभागे तु कल्पयेत्तु सुवृत्तकम्।

वीरतन्त्रे–: तत्र भाण्डे जलं पूर्य सर्वगन्धैः समान्वितम्।
लिंगं वस्त्रेण संवेष्ट्य कूर्चेन सहयोजयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गन्धपुष्पादिनाभ्यर्च्य हृदयेन च मन्त्रतः।
प्रासादेन च मन्त्रेण जलभाण्डेऽधिवासयेत्।
वर्धनाडिकया वाथ डाकरात्रेऽथवा पुनः।
त्रिरात्रं वाथ समयापि जले चैवाधिवासयेत्।
।५४६ होतव्यं प्रत्यहं स्वस्वमन्त्रैर्होमं शतं शतम्।
शिवकुंभादि पूजाञ्च दिक्बलिञ्च निवेदयेत्।
जलादुत्तीर्य पूर्वेद्युर्लिंगं प्रक्षालयेत्ततः।

सन्तानसंहितायाम्:

वाल्मीकेन त्रिधाशोध्य भस्मना च त्रिधा पुनः।
घृतेन मधुना स्नाप्य प्रासादेन जलैस्ततः।
कषायेण ततोद्धृत्य स्थापयेत्पञ्चगव्यकैः।
प्लक्षाश्वत्थोदुम्बराश्वत्थ वटश्चेति चतुष्टयम्।
चूर्णयित्वा त्वचन्तेषां कषायमिति कीर्तितम्।
शंखभेर्यादि निर्घोषैर्लिंगं प्रक्षालयेत्ततः।

दीप्ते: जलादुत्थाप्य देवेशं स्नापयेत्पञ्चगव्यकैः।
पूजयित्वा हृदामन्त्री गन्धपुष्पादिभिः क्रमात्।
मण्टपं प्रोक्षयेद्धीमान् अण्डजाद्यैरनुक्रमात्।
यस्यास्तत्स्थकलश्य स्तत्र पूजयित्वा स्वनामतः।
शयनाय न्यसेल्लिंगं प्राक्शिरस्कमथोमुखम्।
पूजयित्वा हृदा मन्त्री गन्धपुष्पादिभिः क्रमात्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



यस्यानर्थे विद्येश्वरसमान्वितम्।
स्थापयित्वा यथा न्यायं पूजयेत्स्वस्व नामभिः।
गुरूपदिष्टमार्गेण मन्त्रमुच्चारयेच्छनैः।
नादशक्तिमयं सूक्ष्मं घण्टानादविसर्पिणम्।
कारणत्यागमार्गेण ब्रह्मरन्ध्राद्विनिर्गतम्।
दिवाकरसहस्राभं विद्युत्कोटि समप्रभम्।
स्फुर द्रश्मि विधानेन प्रदीपित दिगन्तरम्।
मन्त्रेण मनसा भिन्नं प्राप्तानन्दमहोदयम्।
द्वादशान्ता समानीय निष्कलं व्यापकं शिवम्।
अष्टत्रिंशत्कलोपेतं सहस्रकिरणोज्वलम्।
सर्वशक्तिमयं सांगं ध्यात्वा स्वाबलिसमं निभम्।
तेजो बिंब ललाटस्थं घण्टिकाद्वारमानयेत्।
सुषुम्ना निर्गतं ध्यात्वा स्फुरन्तरकसमार्पिणम्।
शिवान्तं ब्रह्मरन्ध्रेण सकले व्यापकन्न्यसेत्।
जीवन्यासो भवेदेवं लिंगे सर्वार्थसाधकम्।
स्थापकं संनिधानञ्च संनिरोधावकुण्ठने।
मुद्रया स्थापनं पाद्यमाचमोर्घः प्रयुज्यते।

पीठे-ः ओं ह्रीं क्रिया शक्तये नमः। इत्यथवा शक्त्युचार्या-
वाहाद्य संस्थाप्य प्रत्येकं भस्म दर्भ तिलैः प्रकारत्रितयं कृत्वा
पाद्याद्युपचाराणि दत्वा पायसान्नं निवेद्य हरिद्रादन्नै शिवबीज

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मुचार्य बलिन्दत्वा पश्चात् स्वस्वादिक्स्थितान् लोकपालानाराध्य रक्षां विज्ञापयेत् । अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।

घटस्थाखिलवह्निस्थनाडीसन्धानमाचरेत् ।

तद्यथा :- ऊर्ध्वा तन्तुनिभा नाडी मुदितेन विनिर्गताः ।

अनुदितेन विशन्तीन्तां निर्गता मुदितेन च ।

आत्मनोनुदितेनैव विशन्तीं चिन्तयेन्मिथः ।

इत्थं विभाव्य तत्सन्धानार्थमाहुतीत्रयं दत्वा शक्तिं संपूज्यात्मकवचीन मत्वाहुतित्रयं जुहुयात् । सन्ताने :-

समिधानीशमन्त्रेण पुरुषेणाज्यमेव च ।

अघोरेण चरुं हुत्वा लाजं वामेन चैव हि ।

सर्षपं सद्यमन्त्रेण हृदयेन यवन्तथा ।

तिलं वै शिरसा हुत्वा मुद्गन्तु शिखयान्ततः ।

कवचेनैव माषं स्यात् हूयते क्रमशो धुना ।

अथ त्रिमधुरैर्हुत्वा सद्यो जातेन देशिकः ।

पुरुषेणैव तथा हुत्वा मध्यभागन्तु संस्पृशेत् ।

अघोरेण तथा हुत्वा शिरोभागं स्पृशेद्बुधः ।

वीरतन्त्रे :-

अष्टोत्तरशतं मूलं पञ्चाशत्पञ्चविंशतिः ।

प्रोक्षणे चैव द्रव्यान्ते व्याहृतिञ्जुहुयान्ततः ।

रात्रौ जागरणं तत्र स्वप्नानि हि परीक्षयात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ततो निर्हरणादि न्यूनाधिक दोषनिर्हरणार्थं शिवेनाघोरेण सिना शतं पूर्णान्तं हुत्वा चरुन्दत्वा पूर्णां विधाय आचमनवन्दन तांबूलादिकन्दत्वा शिवन्निरुध्य व्याहृतिभिर्हुत्वा बलिं कृत्वा श्रोत्रवन्दनं कृत्वा सकलीकृत्य शिवसमीपं गत्वा "ओं नमो भगवते रुद्राय रुद्ररौद्रनमोस्तुते । कर्मपूर्णमपूर्णं वा स्व-वक्त्यापूर्यवृद्धताम् ।" इति विज्ञापयेत् । इत्यधिवासनविधिः ।

---

अथ प्रातस्नातः कुण्डसमीपं गत्वा संपादनार्थं छिद्रपूरणाय अघोरेणासिना शिवेन शतञ्जुहुयात् । श्लोके--

आचार्यो मूर्तिपैस्सार्धं स्नानं कृत्वा यथाविधिः ।
निद्रा कुंभादि संपूज्य सलिलन्देशिकोत्तमः ।
घृताहुतिन्ततः कुर्यात् पञ्चविंशति संख्यया ।
सद्यादीशान पर्यन्तञ्चर्वादीनि हुनेत्क्रमात् ।
स्नानवेद्यान्यसेल्लिंगं हृदयं मन्त्रमुच्चरन् ।
कलांशानि न्यसेत्तास्मिन् पूजयित्वा यथा विधि ।
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समुच्चरन् ।
उद्धृत्य शिवकुंभन्तु वर्द्धन्या सह देशिकः ।
कुंभाद्बीज समादाय लिंगस्य शिरसि न्यसेत् ।
वर्धन्यां वर्धनी बीजं पिण्डिकायान्तु विन्यसेत् ।
अनन्तरदिशि खण्ड्यन्तमष्टविद्येश्वरान् क्रमात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूर्वादीशानपर्यन्तं पिण्डिकायान्तु विन्यसेत्।
पञ्चगव्यैः शिवाद्भिश्च स्थापयेद्व्योममन्त्रतः।
शुद्धदेशे समानीय विन्यसेद्विष्टरे बुधः।
एकावरणमार्गेण यजेदिन्द्वादिभिर्बुधः।
पायसान्नं हृदा दत्वा गुलखण्डसमन्वितम्।
शिवायाचमनं दद्यात् निर्माल्यञ्च विसर्जयेत्।
तांबूलन्दापयेत्पश्चात् हृदयेन तु मन्त्रतः।
५१a शिष्याय दापयेल्लिंगं मन्त्रमुद्रासमन्वितम्।
तेनैव पूजयेल्लिंगमेकावरणमार्गतः।
अर्चनोक्तं समभ्यर्च्य निवेद्यान्तं विशेषतः।
ब्रह्मांगैराहुतिं कृत्वा प्रत्येकं दशसंख्यया।
एवं यः पूजयेन्नित्यं यावज्जीवं प्रतिज्ञया।
इहैव धनवान् भोगान्पुत्रवान् कीर्तिमान् भवेत्।
अमुत्र मोक्षमाप्नोति शिवान्ते हैव तत्सुखम्।

कारणे रत्नलिंगप्रतिष्ठा प्रकरणे -:

मन्त्रमुद्रा क्रियाश्चैव शिष्यस्योपदिशेद्गुरुः।
तत्र लिंगन्ददेत्पश्चात् शिष्याय गुरुगुरुत्तमः।
नमस्कृत्वा तु विधिवल्लिंगमादाय बुद्धिमान्।
तद्दिनां मरणान्तन्तु प्रतिज्ञां न्न कारयेत्।
गुरुः त्रिकालं वा द्विकालं एककालमथापि वा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूजयेत्क्रमेणैव अर्चनाञ्च विशेषतः। क्रियाक्रमद्योतिकायां प्राणलिंगप्रतिष्ठाप्रकरे यजमानो यावज्जीवं पूजां संकल्प्य प्रत्यहमुक्तवत् पूजयेत्।

मृद्भस्मगोशकृत् पिष्टगुलखण्डादि जन्मनाम्।
तत्कालिकानां लिंगानां बीक्षणाद्यभिमन्त्रणैः।
विशोध्य विधिना नित्यमर्चनादेहिकं फलम्।
प्राप्नुते वत्सरान्तेन विसृज्यात्स प्रवाहके।
यदप्रस्तकले स्थानान्दर्पणे स्नानमाचरेत्।
धारणाभिविशुद्धिः स्यात् स्थापने लेख्यचित्रयोः।
नेत्रोद्घाटनमन्त्रेष्टमानसादि प्रकल्पनम्।
स तेषां यस्तदस्पर्शात् पुष्पैः पूजा निरंबुभिः।
धूपमात्रं न दोषाय बिलरत्नादि मानसम्।

कामिके–:

अनेनैव प्रकारेण स्थापनं रत्नजे मतम्।
स्वर्णादिलोहजे वापि मृत्सम्भूतेपि कीर्तितम्।
क्षुद्ररत्नप्रतिष्ठा च सूक्ष्मतन्त्रे प्रदर्शिता।
आत्मार्थे च परार्थे च लिंगं सम्यगर्चयेत्।
तत्र रत्नप्रतिष्ठायां विशेषं शृणु तत्वतः।
जलाद्द्रोण्यां गृहार्चायां क्षुद्ररत्नं विशेषतः।
पूजास्थानस्य चैशान्यां स्थण्डिलं चतुरस्रकम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गन्धपुष्पादिभिः पूज्य कुर्यादर्घ्यं ..कोत्तमः।
विन्यसेत्तत्र लिंगादीन् पूजयेद्धृदयेन तु।
ऽस्त्रकुण्डेन कर्तव्यं क्षुद्रस्थले विशेषतः।
पूजा चैव देशे तु स्थिरलं पूजयेत्सुधीः।
सर्वेषामेवशास्त्राणां प्रधानं स्थलमुच्यते।
तस्मात्स्थूलं समभ्यर्च्य आत्मार्थे च परार्थके।
वज्रादिकान् परार्थे तु आत्मार्थे स्थलमर्चयेत्।

अस्यार्थत्वप्रतिष्ठायामधिकारि निरूपणम् कामिके प्रतिपादितम्।
तद्यथा-: स्वार्थेष्टाचललिंगस्य प्रतिष्ठा यत्र यस्मृतः।
स्थलेऽपि रुद्रदीक्षायां स्वार्थे च चललिंगके।
बाणलिंगे क्षणेवापि स्थापको यदि नैष्ठिकः।

सर्वज्ञानोत्तरे-:
अज्ञात्वा विधिवच्छास्त्रं कुरुते यस्तु लोभतः।
कर्तव्यश्च तथात्मानमिह मुद्रां विनाशयेत्।
तस्मात्सर्व प्रयत्नेन विधिवत्कारयेद्बुधः।
कर्ता कारयिता चैव ततो याति परांगतिम्।

तदनु - चण्डेश्वरनतद्धर्माणौ पञ्चोपचारेण जपान्तं संपूर्ण-जपान्तं संपूज्यनिर्माल्यं निवेद्य "न्यूनाधिकञ्च यत्किञ्चित् कृतज्ञानतो मया। त्वत्प्रसादेन चण्डेश तत्सर्वं परिपूरय" इति विज्ञाप्य प्रक्षालनभस्मस्नान सकलीकरणानि विधाय कृता-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



व्रतपूरणार्थं पुनश्शतं सहस्रमर्धं वा अघोरेणाग्निणा शिवेन शतं शतं हुत्वा पूर्णान्दत्वा-चमनन्चन्दन तांबूल भस्मगन्धनादि - कृत्वा विसृज्य बलिं दत्वा कुंभान्विसृज्य स्वहस्ता स्थितं ऊर्ध्व क्षेपणमन्त्रं विसृज्या-चम्य सकलीकृत्य वीवान्तिकं गत्वा कर्म समर्प्य समाप्ति विज्ञाप्य रुद्रादिभ्यो बलिन्दत्वा तान्निरोधयेत :

यावत्कालं महादेवो लिंगमाश्रित्य तिष्ठति ।
तावत्कालञ्च रक्षार्थं यूयं तिष्ठत सर्वदा ।

इत्थं लिंगं प्रतिष्ठाप्य पश्चादेव्यादीनां प्रतिष्ठाकारयेत ।

तथा देवी प्रतिष्ठाकारणञ्च विशेषस्कन्दपूर्वकान ।
तत्तन्मन्त्रोक्त विधिना प्रतिष्ठाप्य समर्चयेत ।

कारणे- सरस्वतीं श्रियां दुर्गां मातृश्चैवान्य शक्तितः ।
अनेनोक्त प्रकारेण तत्तन्मन्त्रैस्सदा वृते ।
- - व्य पूजयेन्नित्यं स्वतन्त्र परतन्त्रके ।
आत्मार्थे वा परार्थे वा स्नपनोत्सव संयुतम ।
पवित्रारोहणे द्युक्तं वस्त्रे वा यत्र कुत्र चित ।
प्रासादे वा गृहे वापि पूज्य सिद्धिं समृच्छति ।

कारणे- विघ्नेश्वर प्रतिष्ठा प्रकरणं -

अथात स्सं प्रवक्ष्यामि विघ्नेशस्थापनं परम ।
द्वयं परार्थमाख्यातं आत्मार्थं शृणु सुव्रत ।
प्रतिमां वा पटे-चापि क्षणिके मण्डलेपि वा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थण्डिले वा जले वापि स्वयमानीय चार्चयेत्।
परिवारद्वारपूजाञ्च हित्वा सर्वं समाचरेत्।
एककालं द्विकालं वा त्रिकालं वा यजेद्बुधः।
एवं यः कुरुते मर्त्यस्स पुण्यांगतिमाप्नुयात्।
निर्विघ्नं सर्वकाले तु भयं सर्वत्र नश्यति।

भीमसंहितायाम्–

एवं परार्थमाख्यातमात्मार्थं शृणु सुव्रत।
त्रिकालाद्येककालं वा आत्मार्थे पूजयेद्गुह।
सकलस्थापनादौ तु विशेषमजितोदितम्।
समानं कर्मनिर्दिष्टं स्वतन्त्रपरतन्त्रयोः।
1898 विशेषोयं स्वतन्त्रस्य सिद्धेदानीं विधिरुच्यते।
महेश्वराणां रुद्राणां येषाणामपि लिंगवत्।
द्वारपूजा प्रकर्तव्या शेषाणान्तु दिवौकसाम्।
ये प्रोक्ता द्वारपालास्तु वाहनानि तथैव च।
पूजयेत्स्वस्व नाम्ना तु स्वस्व संस्थान संस्थितान्।
बलिदानाग्निकार्ये च रौद्रं माहेश्वरेपि च।
अन्येषां परतन्त्राणां घोराणाञ्च जनार्दन।
यस्य यस्य तु ये देवा परिवाराः प्रकीर्तिताः।
तस्य तेषां बलिन्दत्वा वह्नौ तु जुहुयात्ततः।
यथा चैव तथा वह्नौ हो स्यात्समिदादिभिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नित्योत्सवं न कर्तव्यं तत्तन्मन्त्रेण चार्चयेत्।
महोत्सवं न कुर्वीत नव भेदे यथेच्छया।

कारणे शास्त्राराधनमुक्तम्।

आत्मार्थञ्च परार्थञ्च द्विविधं परिकीर्तितम्।
ग्रामादीनां हितार्थाय शास्त्रस्थापनकं परम्।
भक्तस्य गुरुणा दत्तं बिंबं पद्मासनन्तु वा।
पटे वा भित्तिचित्रे वा आत्मार्थार्चनमारभेत्।
विप्रक्षत्रिय विट्शूद्रैर्दीक्षितैश्च विशेषतः।
आत्मार्थयजनं कार्यमयोग्यमितरैर्जनैः।
॥ इत्यात्मार्थपूजापद्धत्यां इष्टलिंग प्रतिष्ठाविधिः॥

———— ० ————

चिन्त्यविश्वे- मठप्रतिष्ठां वक्ष्यामि शृणुत्वं नन्दिकेश्वर।
मण्डपं मण्डलं कुण्डं पूर्ववत्कारयेद्गुरुः।

स्कन्दकालोत्तरे-

अष्टषष्टिमहाक्षेत्रं स्थलं स्वायंभुवं स्मृतम्।
···स्सम ञ्च जपं दानदेवार्चनन्तु यत्।
अक्षयं फलमाप्नोति मृते सायुज्यमाप्नुयात्।
देवालयं प्रपाञ्चैव सभास्थानं मठन्तथा।
वापीकूपतटाकानामक्षयं फलमाप्नुयात्।
पञ्चक्रोशात्मकस्थाने वासः कुर्यो मनीषिभिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथा सर्वज्ञानोत्तरे -

आदिगुह्याष्टका रुद्रा अतिगुह्याष्टकस्तथा।
गुह्या गुह्याश्चैव पवित्राष्टक एव च।
~~स्थाण्वष्टकाश्च पञ्चैव नामध्येयं फलमाप्नुयात्।~~
पञ्चगुह्याष्टकस्थाने
स्थाण्वष्टकानां पञ्चैते नियोगाद्भूमिवासनः।
अनुग्रहाय लोकानां लिंगभूताः प्रतिष्ठिताः।
उक्तेष्वेकतमे चैव मठादीनि प्रकल्पयेत्।

मठशब्दनिर्वचनं कामिके प्रतिपादितम्। तद्यथा -

आगन्तुकानां सर्वेषां नैष्ठिकानां निवासभूः।
अन्नपानीय संयुक्ता केवला वा मठा मताः।

मोहशूरोत्तरे -

मठञ्च दक्षदिग्भागे लिंगिनां स्थापयेत् बहिः।
यतस्ते दक्षिणाशायां वसेयुश्शिव भाविताः।
पुष्पाराममठादीनां स्थानं सर्वत कल्पयेत्।

इतत्कामिकवचनं दक्षदिग्भागासंभवविषयम्। शिवधर्मे -

मृण्मयं दारुजं शैलं मैष्टिकं वासुकल्पितम्।
कृत्वा गृहं मठं वापि यथाविभव संभवम्।
सर्वोपकरणोपेतं सर्वधान्यैश्च पूरितम्।
शिवायेत्थं गृहं मत्वा दत्वा सर्वान् कामानवाप्नुयात्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थावरञ्जंगमश्चेति द्विविधं लिंगमुच्यते।
स्थावरं स्थापितं लिंगं जंगमं दीक्षितं विदुः।
जंगमस्यावमानेन स्थावरं निष्फलं भवेत्,
तस्माल्लिंगद्वयं प्राज्ञो नावमन्येत सर्वदा।
कृतावमानतो मोहात् स पच्युर्नात संशयः।
स्थिति शिलास्थावरः अपरं गच्छतीति जंगम इत्युच्यते।

शैवे - एकादश रुद्रसंहितायाम् -:

गृहं वा मठिकां वापि कारयित्वा यथाबलम्।
प्रदत्वा शिव भक्तेभ्य शिवलोकमवाप्नुयात्।

मोहूरसोत्तरे -:

लिंगीनान्तद्गृहं कार्यं महापुण्य जिगीषया।
संस्थाप्य स्थावरं लिंगं प्रसादे यद्भवेत् फलम्।
तत्फलं लभते विद्वान् मठे संस्थाप्य जंगमम्।
मठाग्रे तत्समं त्यक्त्वा सिंहाय दक्षिणे न्यसेत्।
आप्ये वृषं गजे सौम्ये ध्वजायां पूर्वतास्थितम्।
विपुलं वा प्रकर्तव्यं कर्तुरिच्छावशेन तु।
चतुरश्रैरश्रैर्भक्तै मध्यन्त्यक्त्वा पदन्ततः।
ग्रहाणां स्वेच्छया न्यास सौम्ये वाथ विनिर्गतः।
एकभौम द्विभौमं वा त्रिभौमं वा यथा सुखम्।
दीर्घशालाग्रहं न्यासं यथायोग्यं निवेशयेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पूर्वोक्तमन्तरं सार्धं तस्याल्यर्धं यथा तथा।
मण्डिकैकतयं कार्यं पट्टशाला च कृञ्जिका।
भ्रमयः पूर्वमुद्दिष्टा वित्ताभावे कुटी मता।
।किरणे- चतुरश्रन्तु देवानां द्विजानामपि सम्मतम्।
क्षत्रियाणान्तथा प्रोक्तमन्यतोऽयताश्रकम्।
हीनोक्तश्रेष्ठजातीनां हर्वोच्चनप्रोक्तं विपर्ययात्।
आयाद्यं पूर्ववत्प्रोक्तमायाधिक्यं शिवप्रदम्।
यजमानस्य नक्षत्रे चानुकूल्यान्यथा भवेत्।
तथा परीक्ष्य कर्तव्यं नामनक्षत्रकन्तु वा।
आरंभकाले त्वेतेषां पृथक् पृथगिहोच्यते।
शस्तं ह्यरण्य शालाख्यं हीनश्चोक्ता तु शालया।
सुक्षेत्रं पूर्वया हीनं शालाया वृद्धिदं मतम्।
चुल्लि दक्षिणया हीनं शालाचार्य विनाशनम्।
यत्स्यादपरया हीनं वक्षाध्नं तत्सुतान्तकृत्।
सिद्धार्थं तद्भवेच्चतुष्कं याम्यापरयुतं यदि।
पश्चिमोत्तरसंयुक्तं यमसूर्यन्तु मृत्युदम्।
उदक्पूर्वयुतं गेहन्दण्डाख्यं दण्डकारकम्।
पूर्वयाम्य युतं गेहे - यानाख्यं कलहप्रदम्।
पूर्वापरयुतं गेहं चुल्लिनामार्थनाशकृत्।
दक्षिणोत्तरशालैकं कालसंज्ञं विरोधकृत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मोहशरोत्तरे-:

समसूतं सुसंस्थानं वास्तु पूजापुरस्सरम्।
देवालय स्तम्भेदेन वास्तु पूजाद्वि विद्यम्।

किरणे श्रूयते। तद्यथा-:

यद्वास्तु पूजितञ्चात प्रासादगृहकल्पने।
ऽकाशीति पदं स्यात् चतुष्षष्टिपदं ततः।
अयं देवालये प्रोक्तो द्वितीयमन्दिरे मतः।

चिन्त्यविश्वसादाख्ये-:

150a स्थण्डिलं विधिना कृत्वा चतुष्षष्टिपदान्वितम्।
वास्तु होमञ्च कर्तव्यं प्रतिष्ठादौ विशेषतः।

तत्रैव पदात्मक पीठाख्य मध्ये ब्राह्मणमितर पदेषु लोकपालान्यजेत्। यथा कामिके-:

कण्ठसूत द्वयेनैव संयुक्तं पीठमिष्यते।
पूर्वोक्तास्तु सुराये च पदस्थास्ते प्रकीर्तिताः।
ऽशतपदं मठादीनान्तच ग्रामादि योग्यकम्।
शतौ वाथ दिवा वापि गृहदेवालयादिषु।
देवालये च ग्रामादौ शिवविप्रो विशिष्यते।
स्वगृहे तनु शैवास्तु महावान्तरशैवकाः।

वास्तु होममिति शेषः। मोहशरोत्तरे-:

मठं संशुध्य वस्तादौ तस्मिन्यागे कृते सति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत्प्रतिष्ठा प्रकर्तव्या ध्वजारोहण पूर्विकाः।
वेश्म न्यास त्रिभागं स्यात्तत्पादेन द्विती।
तृतीयमर्धभागेन दण्डमानमुदाहृतम्।
ध्वजान्वितं समादाय प्रोक्षयास्त्रेण पटावृतम्।
शिवतत्व विभागेन त्रितत्वन्तत्व पान्यसेत्।
अस्त्राण्यस्त्रन्ततो विद्वान् सन्निधौ होममाचरेत्।
मन्दिरे च यथा न्यासस्तं वक्ष्ये हं शतक्रतोः।
म · रेविन्यसेत्तत्वं शक्तिं विन्यस्य धारिकाम्।
(आत्मतत्वमयो भागे त्रितत्वन्तत्वपान्यसेत्।
अस्त्राण्यस्त्रं ततो विद्वान् संन्निधौ होममाचरेत्।
मन्दिरे च यथा न्यास*)
आत्मतत्वमयो भागे ब्रह्माण्डावधि विन्यसेत्।
विद्यातत्वन्यसेन्मध्ये शुद्धितत्व पदानुगम्।
तदूर्ध्वे शिवतत्वं स्यात्तच्छुद्धविद्यावसानिकम्।
एवं सर्वत्र विधिवद्विधानं पूजितां व्रजेत्।
शुभरत्नं समासाद्य विन्यसेद्ध्वजमादरात्।
मन्दिरं स्नापयेत्पश्चात् फलाद्यैश्शुभवस्तुभिः।
काष्ठका तृणनिर्वृत्ते मठे न्यासोत कथ्यते।
कंवेषु पार्थिवन्तत्वं तृणेष्वापन्नियोजयेत्।
तैजसं बन्धने योज्य दण्डकेषु च वायवम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्थूणासु व्योमतत्वन्तु शिवं सांगं पुनन्यसेत ।
धनधान्यादि संपूर्णं मठं कृत्वा गुरूत्तमे ।
शिववत्पूजिते तस्मै दत्वा वोधै स्समर्पयेत ।
गुरूणां स्थापनं कृत्वा भिक्षा वृत्ति पुरस्सरम् ।
पुनर्देवालयं कुर्या त्तेषामीशार्चनाय च ।
देव द्रव्यं पृथक्कृत्वा देवकर्मसु योजयेत ।
इदञ्च देवालयमैशान्यामेव कुर्यात ।
तदसंभवे-: अनिषिद्धदेशे वा क्वापि कुर्यात । यथा शिवधर्मे-:
आग्न्याकार समायुक्त मैशान्या मीश्वरालयम् ।
प्रदेशासंभवे कुर्यात यत्र स्यात्संभवे भुवि ।
त्रिसन्धिमेक कालं वा पूजयेत भक्तित श्शिवम् ।
चिन्त्यविश्वे मठादीनां प्रवेशश्चाभिधीयते ।
मठादीनां मण्टपादि विधायाथ शिवकुंभञ्च तद्गतम् ।
विलिप्य गोमयेनैनं स बाह्याभ्यन्तरं मठम् ।
पुष्पस्रग्वस्त शोभाढ्यं कृत्वा तोरण भूषितम् ।
संबन्धुर्यजमानस्तु देशीदि कादि पुरस्सरम् ।
वस्त्रायुग्मावृतं स्कन्धे शिवकुंभन्द्विजन्मनः ।
वेदवाद्यै रवैर्दिव्यैर्मठं कृत्वा प्रदक्षिणम् ।
किञ्चिद्विलंब्य तस्याग्रे देशीकन्तापसान्वितम् ।
मठं प्रवेशयेत्कर्ता सुलग्ने कृतमंगल ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



चतुष्कुंभं न्यसेद्धीमान् वेदिकानामुदङ्मुखान्।
ब्राह्मणानाञ्च दानञ्च देवज्ञायविशेषतः।
शिल्पिनाञ्च ततो दद्याद्यथा विभव विस्तरम्।
पूजयेत्पूर्वतः कुंभा द्वारस्तु द्विकरमण्डले।
जगत्यां पादपीठे च जंघा चैव कपोलके।
भेदने च यथा संख्यं निवृत्यादि कला न्यसेत्।
हृदयेन समभ्यर्च्य दिक्पालकान्यपि।
व्यापत्थावात्य स्वसंज्ञाभिः पूजये ध्यान पूर्वकम्।
वह्नि गेहं समासाद्य तर्पयेद्वस्तु देवता।
निवृत्यादि कलाश्चापि द्वारपालांश्च मन्त्रकैः।
दत्वा दिक्बलिमाचम्य सकलीकृत विग्रहः।
मालूराम्रकापित्थैश्च बीजपूर फलैस्तथा।
बदरामल चार्ताकनारंगलि कुन्चादिभिः।
संस्नापयेत् कुंभजलैरुपरिष्टा मठालयम्।
विभूति स्थिति हेत्वर्थं सन्तानादि विवृद्धये।
कीर्त्यर्थं कीर्तयेन्नाम कर्तृनामांकितं मठम्।
डाकं मठं सुसंज्ञानां कुर्याद् दैशिकोत्तमः।
अतीतानी मठादीनि देवतायतनानि च।
लिंगादि पुष्करिण्यादि स्थापितान्यपि केनचित्।
पूर्व प्रतिष्ठा कर्तव्यम् सहस्र गुणितं फलम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जीर्णोद्धारे शतगुणं पालनात्तत्समं भवेत्।
लिंगानित्वत यावन्ति शिवधर्मोत्तरोक्तितः।
तत्प्रतिष्ठाविधानञ्च संक्षेपेण वदाम्यहम्।
यः कारयेन्मठरम्यं सुवेदिं सुस्थिरं पुरम्।
वेदिशब्देन पुरस्य परितो विदिता वेदाः।
पञ्चभौमा त्रिभौमं वा शिवज्ञानरतात्मनाम्।
गुहापवर्गैरुक्तं मैतस्थानसमान्वितम्।
शिवज्ञानरता शिवयोगिनः गुहा समाधिगृहम् अपवरगम्।
गर्भगृहम्। मैतस्थानम्। नीहारस्थानम्। वास्तु
वास्तुविद्या विभक्तञ्च प्रकारपरिवारितम्।
वास्तुविद्या विभक्त - - कमनीयादिशिल्पशास्त्र
प्रकारेण कृतपंक्तिकम्। तस्य वेदी द्विभक्ता च पर्यन्तस्तंभसंयुता। पर्येष्टका परिच्छन्नन्तत्सुरम्य समन्ततः।
विचित्रं पुरतः कुर्यात् दिश्याग्नेयां महानसम्।
धूमनिर्गमयोपेतं पूर्वस्सर्वत्र मण्टपम्।
गन्धपुष्पगृहं कुर्यात् गेशान्यां यागमण्टपम्।
भाण्डाकारन्तु कावेर्यां गोष्ठागारञ्च वायवे।
उदगात्रयश्च वारुण्यां वातायन समन्वितम्।
समित्कुशेन्धन स्थान मायुधानाञ्च नैरृते।
अभ्यागतालयं रम्यं सशय्यासन पादुकम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तोयाब्धि द्वीपसंभूत्यै युक्तदक्षिणतो भवेत्।

तथा। शिवधर्मे-

शिवस्य दक्षिणे कुर्यात् तद्भक्ताभ्यागतालयम्।

शिवधर्मोत्तरे- गृहान्तराणि सर्वाणि सजलैः कदली गृहैः।

पर्णवर्णैस्तु कुसुमैः शोभितानि प्रकल्पयेत्।

प्राकारन्त बहिर्दद्यात् पञ्चहस्ताच्च मानतः।

प्राकाराच्च बहिः कुर्यात् सर्व दिक्षु समन्ततः।

दिव्यं शिवाश्रमारामं नाना पुष्पोपशोभितम्।

150b इति कृत्वा बहिस्तस्य प्राकारं कल्पयेन्महत्।

कपाटगोपुरोपेतं परिघा पंशुसंयुतम्।

तृतीयाच्च पुरुदूर्ध्वं विद्यारण्यानमण्टपम्।

नवाक्षान्निर्गमोपेत चित्तं परिकल्पयेत्।

पद्मध्यं पञ्चमस्थानं शिवस्य वलभी गृहम्।

षड्हस्तमष्टदीर्घञ्च दारुपट्टादिनिर्मितम्।

तत्र मृद्दारुशैलं वा स्थापयेद्विधिवच्छिवम्।

सर्वविद्याविधातारं सर्वज्ञं लकुलीश्वरम्।

वृतं शिष्य प्रशिष्यैश्च व्याख्यानोद्यत पाणिनम्।

पद्मासनस्थं सुश्वेतं प्रसन्नवदनं गुरुम्।

एवं शिवाश्रमं कृत्वा भक्त्या वित्तानुसारतः।

तत्प्रतिष्ठान्ततः कुर्यात् पूजासंस्कारलक्षणम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्यादानोक्त विभवैश्शोभां कृत्वा मठाग्रतः।
पञ्चभिः पञ्चगव्यानां स्नाप्यैवान्यां शिवं क्रमात्।
स्नापयेद्गन्धतोयाद्यैः स्नाप्यवस्त्रेण मार्जयेत्।
सूर्यघोषैस्तमानीय स्थापयेत्पुष्प मण्टपे।
ततश्च दर्भपुष्पाद्यैः पूजयित्वाधिवासयेत्।
पवित्रे स्थापयेद्देव्यां पादादारभ्य पञ्चभिः।
ततस्सुगन्धिपुष्पाद्यैर्नित्यं भक्त्या शिवालयम्।
विधिञ्च पूजयेत् पुष्पै स्नानवर्ज्यं सुगन्धिभिः।
विन्यस्तं प्रणम्येवं गुरुं व्याख्यां प्रवर्तयेत्।
प्राङ्मुखो दङ्मुखो वापि पुण्याहान्तं शिवाग्रतः।
ततस्संपूजयेद्भक्त्या यजमानस्ववं गुरुः।
दक्षिणाभिर्विचित्राभिर्भोजनाद्यैर्विशेषतः।
निवेदयेत्ततः स्नानं सर्वेषां शिवयोगिनाम्।
सर्वोपकरणोपेतं प्रणिपत्य पुनः पुनः।
एवं यः कारयेद्दिव्यं श्रीमद्देवपुरं महत्।
सर्वदोष विनिर्मुक्तश्शिवलोके महीयते।

॥ इत्यात्मार्थ पूजापद्धत्यां मठ प्रतिष्ठाविधिः॥

—— ० ——

।चिन्त्यविश्वे-:

अथ वक्ष्ये विशेषेण विद्यापीठ प्रतिष्ठिकाम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



विद्या च द्विविधा प्रोक्ता संस्कृतान्यात्मिकं भवेत् ।
प्रासादे वा मठे वापि कुड्यदेशे गृहेपि वा ।
भक्तोक्तस्थानके वापि सर्व दिक्ष्वन्तरालके ।
विद्यास्थानञ्च कर्तव्यं विधिना नन्दिकेश्वर ।
अंगुलत्रयमारभ्य व्योमांगुलि विवृद्धितः ।
पञ्चविंशति मात्रान्तं भवेत्पुस्तक दैर्घ्यकम् ।
व्योमांशात्पादमध्या च अर्धमात्रावसावसानिकम् ।
प्रमाणन्तु विशाले स्यात् पक्षावलि युतन्तु वा ।

अंशुमति-:

आयुर्व्ययञ्च नक्षत्रं यो निवारांशकानि च ।
एतत्सर्वं समाख्यातं शुभं पुस्तकलक्षणम् ।

वीरतन्त्रे-: यजमानस्य त्वृक्षेण नक्षत्रञ्चानुकूलकम् ।
एवं परीक्ष्य बहुधा कर्तव्यं पुस्तकं परम् ।

सन्ताने-: कार्पास सूत्रं गृह्णीयात् रज्जुं कृत्वा विशेषतः ।
चतुर्विंशति सूत्रै स्तु मन्त्रमारज्जुरुच्यते ।
नव वस्त्रेण संवेष्ट्य मथवा रज्जुरुच्यते ।

योगजे-: उत्तमं हेमपात्रञ्च मध्यमं रौप्यपात्रकम् ।
ताम्रपात्रं तालपात्रं कन्यसन्निवेति कीर्तितम् ।

कामिके-: भूर्जत्वककुलसंभूतं श्रीताली दलमेव वा ।
तालपत्र संभूत पत्रं वा स्वर्णादिषु न विनिर्मितम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शैलदारुकृतं वापि लेखयेद् दक्षरैस्तुभैः। शैल शब्देन
कामशैलमुच्यते। चिन्त्यविश्वसादाख्ये-:
कामशैले च शैवादौ लेखयेद् दक्षरैस्तुभैः।
योगजे-: गजनीयध्वनीति च पिशाचनीयं स्तिथा।
अक्षराणि तथै वास्था द्वहाहानौ भद्रकाणि च।
गजनीत्यक्षराणी च रज्जुशीघ्र गति द्विपास्तुः।
तथैव कीर्तये चैव अश्वनीत्यक्षराणि च।
पिशाचनीत्यक्षराणि तथा विकल्पादवत्।
गजनीत्यक्षराणी च वश्येति प्रकीर्तितम्।
अश्वनीत्यक्षराणी च मध्यमान्त्विति कीर्तितम्।
पैशाचनीत्यक्षराणि कन्यसान्त्विति कीर्तितम्।
गजनीत्यक्षराणी च अश्वनीत्यक्षराणि च।
अन्योन्येनैव कलितं कलितं पैशाचनी तथा।
तदोषान्नैव कलितं कलितं प्राणनाशनम्।
। चिन्त्यविश्वसादाख्ये-:
मष्या वा धातुना वापि लिखेत् तूलिकयापि वा।
नाराचेनापि वा कुर्याद् देविकाखिद्य डाव वा।
शुभवारे सुनक्षत्रे सुलग्ने च प्रसंन धीः।
विप्राद्यदीक्षितैनैव शिवज्ञानं न लेखयेत्।
अदीक्षिता सकाशे तु नाध्येतव्यं विशेषतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नानादेशसमुद्भूतैरक्षरैः कृतिसंस्कृतैः ।
लेखयेद्विंशतिवर्गं त्रिंशत्पङ्क्त्यान्वितं शुभम् ।
पदशृङ्गादिभिस्सर्वैरसंकीर्णं परस्परम् ।

शिवधर्मोत्तरे —

चतुरश्रैस्समैश्शृङ्गैर्नातिस्थूलैर्नवा कृशैः ।
संपूर्णावयवैः स्निग्धैर्नातिविक्षिप्तसंहतैः ।
मात्रानुस्वारसंयोगह्रस्वदीर्घादिलक्षितैः ।
नन्दिनागरिकैर्वर्णैर्लेखयेच्छिवपुस्तकम् ।

वीरतन्त्रे —

बद्धपंक्तिं यथा कन्यैषा लेखयेत्पुस्तकं ततः ।
एवं लक्षणसंयुक्तं राजराष्ट्रविवर्धनम् ।
क्षीणाक्षरं चपतं तु घण्टया तालपत्रके ।

चिन्त्यविश्वे —

रुद्रशैव समायुक्तो लिखेद्वा पाठधारणम् ।
दीर्घकालेन जीर्णत्वा। छिद्रेव ज्ञानस्य पुस्तकम् ।

तथा शिवधर्मोत्तरे —

शिवज्ञानस्य कालेन विनष्टस्य प्रमादतः ।
ज्ञानातिरिक्तवर्णस्य मूढैर्दुर्लिखितस्य च ।
प्रमादाध्यातपाठस्य नाशितस्याल्पबुद्धिभिः ।
ज्ञानावलेपमानान्धैश्चाचार्यैश्शोधितस्य च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



न्यर्थैः पदैरुपेतस्य पुनरुक्तस्य चार्थतः।
पूर्वोत्तरविरुद्धस्य स्वसिद्धान्तविरोधिनः।
छन्दसादिविनष्टस्य शब्दार्थरहितस्य च।
इत्येवमादिभिर्दोषैरुपेतस्य क्वचित्क्वचित्।
151a यः करोति पुनस्तस्य संस्कारं पूर्ववद्गुरुः।
शिवविद्यार्थविद्धीमान् स विद्यापरमेश्वरः।
न चास्य पुण्यमाहात्म्यं वक्तुं शक्यं हि केनचित्।

योगजे— पुस्तकक्रमेणोक्तं वाणीपीठं ततोच्यते।
रूपयोश्चैव चोक्तानि वाणीपीठस्य कर्तनम्।
चतुर्विंशदंगुलन्दीर्घन्तुर्यन्तुर्यन्तरर्धकम्।
तदेव सुषिराणि स्यात् कार्पासं तन्तुरज्जुना।
वाणीपीठस्य भद्रस्य आधारशक्ति देवता।

वीरतन्त्रे—

शिवाग्रे मण्टपं कुर्यादीशाने दक्षिणेपि वा।
मण्टपं तु त्रिधा कृत्वा मध्ये वेदीं प्रकल्पयेत्।
वेदिपार्श्वे तु परितः पञ्चकुण्डानि कारयेत्।
मण्टपान्ते रहिते भागे शालिना स्थण्डिलं कुरु।
अथांकुरार्पणं कुर्यात् पञ्चाहेति त्र्यहेपि वा।
सुशुद्धे देशउत्थाप्य बालिकां स्थापयेत्ततः।
तत्तदागमबीजेन शायये त्वयनोपरि।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तदुक्तमत मन्त्रोद्धार प्रकरणे -

आगमानान्तु बीजानि प्रवक्ष्याम्यनु पूर्वशः।
द्वितीयस्यादि संयुक्तं द्वितीय स्वरभूषितम्।
सप्तमस्य द्वितीयन्तु बिन्दुनाद समान्वितम्।
कामिकाक्षरमेवोक्तं योगजञ्च शृणुष्वथ।
सप्तमस्यादि संयुक्तं ह्यकादश समान्वितम्।
बिन्दुनाद समायुक्तं योगजाक्षरमुच्यते।
इत्यादीनि च तत्रैव बोद्धव्यं देशिकोत्तमः।
तस्य ब्रह्म समाख्याता दीर्घाद्यंशानि चोच्यते।
आद्यक्षरसमायुक्तं मनुस्वारसमान्वितम्।
सप्तमांगमिति प्रोक्तं सर्वेषाञ्च विधीयते।
वस्त्रेण वेष्टयेत्तत्र पुस्तकञ्च विशेषतः।
दर्पणे चैव विप्रेन्द्र ह्येवमेव क्रमेण तु।
कामिके -: आसनाद्यं शिवे यद्वा मूर्तिमूर्तीश संयुतम्।
शिवभेदे शिवः पूज्यो रुद्रभेदे स एव हि।
मध्यमे शिव कुम्भन्तु पार्श्वयोर्वर्द्धनी द्वयम्।
द्वयोरेकं पूज्य स्याद्विघ्नेशान्बहिरावृतान्।
संपूज्य गन्धपुष्पाद्यैर्होमं प्राग्वत्समर्चयेत्।
समिदाज्य तिलोपेतं हविषौ च समान्वितम्।
पवेनाष्टोत्तरशतं हुत्वा पूर्णां समाचरेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वीरतन्त्रे-: ततः प्रभाते सुविमले विमले पूर्णान्तं होममाचरेत्।
तत्तदागममूलेन प्रोक्षयेद्दर्भवारिभिः।
संनिधौ दर्पणे तस्य अभिषेकन्तु कारयेत्।

कामिके-: संप्राप्य दक्षिणः कुर्यात् मन्त्रन्यासं गुरूत्तमः।
मध्यमे तु शिवं न्यस्त्वा देवीं पादुकया न्यसेत्।

वीरतन्त्रे-: हविर्निवेदयेत्पश्चात् तांबूलन्दापयेत्ततः।
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः।
ब्राह्मणान् भोजयेत्तत्र सप्तकन्यांश्च भोजयेत्।
अदीक्षितानां श्रोतव्यं न देयं यस्य कस्यचित्।
एवं यः कुरुते मर्त्यः शिवसायुज्यमाप्नुयात्।

॥ इत्यात्मार्थ पूजापद्धत्यां विद्यापीठस्थापनाविधिः॥

---

॥ अथ ऋषिप्रतिष्ठाविधिरुच्यते ॥

ऋषीणां स्थापनं वक्ष्ये अंशुमत्युक्तमार्गतः।
शान्त्यर्थं पुष्टिकश्चैव आयुरारोग्यवर्द्धनम्।
विद्यालांगन्धनं सौख्यं ऋषीणां स्थापनात्परम्।
ऋषयो द्वादशाख्याता ऋषयस्सप्त एव वा।
वसिष्ठः काश्यपश्चैव भरद्वाजस्य गौतमः।
भृगुरत्रिः क्रतुश्चैव जमदग्निः प्रचेतसः।
विश्वामितश्च दुर्वासा ईशानो ऋषयः क्रमात्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



एते द्वादशनाम्ना च एकत्र स्थापनं क्रमात् ।
अथवा ऋषयस्सप्त काश्यपाद्याः क्रमेण तु ।
काश्यपः कौशिकश्चैव पराशरश्चाङ्गिरस्स्तथा ।
भरद्वाजोऽत्रि भृगुश्च ...ङ्गस्च रोमशस्सप्तमस्तथा ।
अथवा पौराणिकन्नाम ऋषयः प्राप्तिकालतः ।
तत्तन्नाम्ना ऋषीणान्तु तत्र तत्र प्रतिष्ठितम् ।
प्रासादपूर्वदिग्भागे दक्षिणे चोत्तरेऽपि वा ।
ऐशान्ये पावके वापि मण्टपं चतुरश्रकम् ।
विकारस्तंभसंयुक्तं चतुस्तोरण भूषितम् ।
विचित्रमण्टपे रम्ये वितानोपरि शोभिते ।
दिग्ध्वजैः पुष्पमालाभि र्धूपदीपैस्समन्वितम् ।
तन्मध्ये कल्पये द्वेदिं विधिवत्कारयेत् बुधः ।
पवनञ्चैक कन्थानि शासनं ।विदितस्य च ।
चतुरश्रञ्चतुर्दिक्षु ।विदिक्षु च विवृत्तकम् ।
एवं मण्टपनिर्माणमंकुरादीनि पूर्ववत् ।
शैलजं लोहजञ्चैव सौवर्णं रजतन्तथा ।
ऋषीणान्तत्प्रमाणन्तु कारयेल्लक्षणोक्तवत् ।
नेत्र द्वय वृते ऋक्षे कारये दृष्टि मोक्षणम् ।
शिल्पिकर्मावसाने तु बेरशुद्धिं समाचरेत् ।
जलाधिवासनं कृत्वा मण्टपाराधनं क्रमात् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वेद्यूर्ध्वे स्थण्डिलं कल्प्य पद्ममष्टदलं लिखेत ।
परितः कलशां स्थाप्य गन्धतोयेन पूरयेत ।
सकूर्चान् पल्लवोपेतान् नालिकेर फलैर्युतान् ।
सवस्त्रान् सपिधानांश्च स्थानामध्यक्षरैर्युतान् ।
जलादुत्थाप्य बिंबानि मण्टपन्तु प्रवेशयेत ।
रक्षाबन्धन्ततः कृत्वा शयनं कल्पयेद्बुधः ।
अग्न्याधानादिकं सर्वं पूर्वोक्त विधिमाचरेत ।
सकलीकरणं कृत्वा मन्त्रान्यासादिकं कुरु ।
मण्टपन्तु प्रविश्याथ द्वारादीन् कलशान् न्यसेत ।
ततो होमं प्रकर्तव्यं पूर्णान्तं सम्यगाचरेत ।
धामप्रदक्षिणं कृत्वा सूक्तन्यासादिकं शृणु ।
कुंभानुद्धृत्य शिरसा बिंबानुत्थाप्य मन्त्रवित ।
स्वस्तिमन्त्रं जपित्वा तु सर्वालंकारसंयुतम ।
धामप्रदक्षिणं कृत्वा स्थण्डिले विन्यसेद्बुधः ।
151b बिन्दुनादसमायुक्तं मुनीनां मन्त्रमुद्धरेत ।
तत्तन्मन्त्रसमायुक्तं जपन्यासं समाचरेत ।
कुंभान् बीजं समादाय यत्तन्मूर्ति हृदि न्यसेत ।
तत्तत्कुंभस्थ तोयैश्च स्नापयेत्तदनन्तरम ।
मन्त्रपुष्पन्तदन्ते तु मन्त्राणाञ्च निवेदयेत ।
महानैवेद्यकञ्चाथ धूपदीप समाचरेत ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवं यः कुरुते मर्त्य स्स पुण्यां गतिमाप्नुयात् ।

॥ इत्यात्मार्थ पूजापद्धत्यां प्रतिबिम्बस्थापनविधिः ॥

---

अथ शिवभक्तप्रतिष्ठाविधिरुच्यते ।

नाना सिद्धान्तवाक्यानि समालोक्य यथा मतिः ।

शिवभक्तप्रतिष्ठाञ्च तल्लक्षण समान्वितम् ।

कामिके - वक्ष्यामि शिवभक्तानां प्रतिष्ठाभोग मोक्षदाम् ।

ब्राह्मणा क्षत्रिया वैश्याश्शूद्रा वाप्यन्तरालजाः ।

स्त्रियो विद्युन्नतवर्ष्ठैवा गणिकाक्तो नृपोथवा ।

शिवभक्तसमोपेता ज्जीवन्तो वा मृतस्तु वा ।

सर्वेषां प्रकृतिं कृत्वा प्रतिष्ठाप्य समर्चयेत् ।

तत भक्ताद्ग्राह यत्नतः

शिवाधिष्ठित देहस्तु मरणं याति यो नरः ।

स नरश्शिव शिव स्यात् सर्व पापै बहिष्कृतः ।

कामिके - तदर्थं शिवलिंगं वा प्र - - - शिवस्य तु ।

स्कन्दनन्द्यादिरूपं वा मृत प्रकृतिकन्तु वा ।

आर्यादायादि संयुक्तं शिलाद्यैरुक्त वस्तुभिः ।

लिंगञ्चेत्प्रतिमा चेद्वा लिंगवेरोक्त वर्त्मना ।

मानतायोश्च संग्राह्य हर्म्य गर्भगृहा तथा ।

द्वारपादोच्चमानो द्वा मानांगुल वशेन तु ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



षड्वर्गादि प्रभेदेन कर्तुर्मानांगुलेन वा।
हर्म्यादिमानं नवधा कृते स्यादुत्तमादिकम्।
त्र्यंगुलाद्व्यंगुलाद्वा पञ्चविंशांगुलान्तकम्।
मानमेतत्समाख्यातं जात्याद्यायैर्वा समन्वितम्।

अजिते- ये सारूप्यन्तराप्ताप्तास्ते प्रोक्त रुद्रकिंकराः।
तेषां रूपं प्रकर्तव्यं मदीयं चिह्नमाश्रितम्।

भीमसंहितायाम्-
सौवर्णं राजतं वापि ताम्रं वा शैलजन्तु वा।
अथवा मृण्मयं वापि भित्ति चित्र पटन्तु वा।
सर्वलक्षण संयुक्तमष्टतालेन कारयेत्।

तथा चिन्त्यविश्वे-
अष्टतालेन मानेन प्रतिकृत्यां विधीयते।

मानसारे- भक्ताश्चतुर्विधः प्रोक्तस्तद्दशात्मानमुच्यते।
केवलज्ञानसंयुक्तं सालोक्यमिति निश्चयः।
शुद्धज्ञानसमायुक्तसारूप्य परमार्थ वित्।
उत्तमं दशतालेन सायुज्याङ्गं प्रकल्पयेत्।
एवं क्रमेण भक्तानां तालमानं प्रकीर्तितम्।

काश्यपे- सर्वेषाञ्चैव भक्तानां ~~तालमानं प्रकीर्तितम्~~। एवं चातुर्विध्यं भवेत्।
मध्यमं दशतालेन सारूप्यं मानयेत्सुधीः।
अधमं दशतालेन सामीप्याकृति निर्मिताः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



उत्तमं नवतालेन सालोक्यांगं प्रकल्पयेत्।

इत्येवं क्रमेण भक्तानां तालमानं प्रकीर्तितम्।

काश्यपे :- सर्वेषाञ्चैव भक्तानां पदं चातुर्विधं भवेत्।

सालोक्यञ्चैव सामीप्यं सारूप्यञ्च तथैव च।

सायुज्य पदवीं विप्र चतुर्भेदमुदाहृतम्।

पुरुषो वा स्त्रियो वाथ तेषु यत्पदमाश्रिताः।

तत्तत्पदानुकूल्यन्तु प्रतिमां कारयेद्बुधः।

स्वजाति चिह्न संयुक्तास्सालोक्य पदमाश्रिता।

तथा सामीप्य देवाश्च मम चिह्नाकृतस्तु वा।

मम चिह्नाकृतिर्युक्ता रूपावै द्विपदाश्रिताः।

चिन्त्यविश्वे :-

पद्मसिंहासनाकादि वाहनादौ स्थितन्तु वा।

आयताश्रस्तु विस्तारं सर्वलक्षण संयुतम्।

मण्डी जटी बन्धकेशी शिखी वा मकुटान्वितम्।

क्षत्रियश्चेद् द्विधातव्यं सर्वभूषणभूषितम्।

यथेष्टायुध संयुक्तं नमस्कारेण वा युतम्।

स्त्रियश्चेदनुरूपैश्च भूषणैर्भूषयेत्पुनः।

कामिके :- गायको नृत्तयुक्तो वा भूलको वा यथेष्टकः।

मध्वादिहस्त क्रियाताति प्रतिमोक्त प्रकारतः।

कामिके :- शैवाः पाशुपताश्चैव महाव्रतधरांश्चये।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लाकुला भैरवाश्चैव येनमार्गेण दीक्षिताः।
तेषान्तेनैव मार्गेण स्थापनाद्यं विधीयताम्।
शिवसिद्धान्तमार्गेण सर्वेषां स्थापना पुरा।
स्वतः प्रधानसांगश्च द्विविधं स्थापनं परम्।
ग्रामादौ वा नदीतीरे पुष्करिण्यास्तटेपि वा।
वने चोपवने वापि सर्वतो वा मनोहरे।
स्थानेनान्यत्र कर्तव्यं स्वप्रधानस्य मन्दिरम्।
देवालयान्तः स्सालादौ मालिका मण्टपादिषु।
परिवारविहीनं यत् कल्पितां-श्चांग मिष्यते।

कामिके-: त्रिहस्तन्तु समारभ्य द्विहस्त विवर्धनात्।
एकविंशति हस्तान्तं विमानव्यास इष्यते।
आयामोत्सेधगर्भाद्यं मण्टपाद्यं तथा परम्।
सालाञ्च गोपुरं गण्यं स्सकुदाय निरीक्षयेत्।
आद्येष्टका विधानञ्च गर्भसंस्थापनं तथा।
मूर्द्धेष्टका विधानञ्च प्रागवदेव समीरितम्।
एवं लक्षणसमाख्यातं प्रतिष्ठाविधिरुच्यते।

श्रीमत्संहितायाम्-:
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने।
शुभवारादि संयुक्ते स्थापनं सम्यगाचरेत्।
वास्तु होमन्ततः कुर्यात् प्राक् कुण्डे वेदिकान्तरे।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पर्याग्निकरणं कुर्यात् पुण्याहप्रोक्षणं कुरु।
प्रागुक्तविधिना पूर्वं कारयेदंकुरार्पणम्।
रक्तव्यासं प्रकर्तव्यं प्रोक्षयेन्मन्त्रवारिणा।
सर्वालंकारसंयुक्तं मण्डपे मण्डले ततः।
स्थण्डिलं वेदिकामध्ये कृत्वा द्रोणाष्टशालिभिः।
तदर्द्धैस्तण्डुलैश्चैव तदर्द्धैश्च तिलैरपि।
अंबुजं लेखयेन्मध्ये दर्भैश्चैव परिस्तरेत्।
कामिके- संकल्प्य प्रणवं पीठं तदूर्ध्वे प्रतिमान्यसेत्।
श्रीमत्संहितायाम्-
तर्तोक्षिमोक्षणं कुर्यात् पक्षांक्षी संयुते दिने।
152a हेमसूचि प्रहाराभ्यां स्थापकस्तक्षमैस्सह।
आचार्यो मन्त्रमुच्चार्य क्रियामेनां समाचरेत्।
तर्पयेन्मधुसर्पिर्भ्यां विद्वान्सौवर्ण दुर्वयः।
मद्याज्यं पूरितं पात्रं द्वयं तस्य द प्रदर्शयेत्।
श्रीमत्संहितायाम्-
नेत्रमन्त्रमनुस्मृत्य दर्शयेत् गलविशेषतः।
शिवमन्त्रमनुस्मृत्य शिवभक्ता प्रदर्शयेत्।
अष्टमृत्सलिलेनैव स्थापयेद्धृदयेन तु।
सर्वालंकारसंयुक्तं कुयात ग्राम प्रदक्षिणम्।
जलाधिवासनं कुर्यात् पूर्ववद्देशिकोत्तमः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



धामस्य पुरतः कुर्यात् मण्टपञ्चतुरस्रकम् ।

अजितेभक्त प्रतिष्ठा प्रकरणे -:

श्रेष्ठमध्य कनिष्ठान्तु मुनीञ्जतादि हस्तकैः ।
आधिवासा - - कुर्वीत मण्टपं कुण्डवेदिकाम् ।
प्रकाराण्यन्तरे देशे यत्रापि सुदेशिकैः ।
विकरस्तंभसंयुक्ते मण्टपे नवधा भजेत् ।
तत्र मध्य पदे वेदी विस्तारार्द्ध समुत्च्छ्रिते ।
तस्याश्च परितो दिक्षु कुण्डानि विधिना ततः ।
चत्वारि कारयित्वा - - - मात्र प्रमाणतः ।
चतुरश्राणि सर्वाणि प्राच्या - मकन्तु वा हरे ।
उद्वास्य शिल्पिनं पश्चा ज्ञोमयेनोपलेपयेत् ।
प्रोक्षयेच्छिवतोयेन - - रान् भोजयेत्ततः ।
ठटट्टेष्टन्तु ततोद्वास्य पुनः पुण्याहमाचरेत् ।
प्रागुक्तविधिना सम्यक् मण्टपन्तु विक्ष्लपयेत् ।

कामिके -:

भान्वादि गुरुपर्यन्तमर्चनोक्त विधानतः ।
अग्न्यधानादिकं सर्वं आग्निकार्योक्तिमाचरेत् ।
वेद्यूर्ध्वे पञ्चशयनं कल्पयेच्चाण्डजातिकम् ।
आधारश्च विमानञ्च धमार्थञ्च चतुर्थकम् ।
संकल्प्यमानुपं पीठं प्रणवेन प्रकल्पयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



स्नानवेद्यां न्यसेद्बिंबं जलादेरपि निर्मितम् ।
पीठे संस्थाप्य ~~बे~~ बेरन्तु प्रागुक्तविधिना गुरु कुरु ।
वस्त्रेणावेष्ट्य गन्धाद्यैर्माल्याद्यैरुपभूषयेत् ।
बन्ध प्रतिसरं बेरं शयनोपरि विन्यसेत् ।
शिरस्थोत्तरे भागे कुंभ प्राधान्यकं न्यसेत् ।
अष्टितोष्ठ घटान्वस्त्र हेमवस्त्र विभूषितान् ।
तन्मध्ये विन्यसान्मन्त्रान् स्तद्विधानमिहोच्यते ।
सान्तमाद्यस्वरोपेतं बिन्दुयुक्तं यथा भवेत् ।
आत्मा मन्त्र समाख्यातो हंसशब्दोथवा मतम् ।
सान्तानैव तु मन्त्रेण ब्रह्मांगानि प्रकल्पयेत् ।
विद्यांगानि च वातस्या दाख्या द्यर्णस्तथा मनुः ।
ह्रींकारस्त्री प्रतिष्ठाया तेन ब्रह्मांग कल्पना ।
स्वपत्नी सहिता यत्र प्रतिष्ठा प्रविधीयते ।
प्रधान घटसौम्ये तु भार्यार्थन्तु घटान्यसेत् ।
पत्नी द्वयञ्चे द्वामे पि वर्द्धनीमपरान्यसेत् ।
बाह्यतश्चेत्करा ग्रह्या बहवः पार्श्वयोः द्वयोः ।
स्त्री प्रतिष्ठासु सर्वासु वर्द्धन्या संप्रकीर्तिता ।
पृथिव्या दानि भूतानि मनोहंकारबुद्धयः ।
परिवारघटे पूज्या अष्टौ वा वसवो मतः ।
अत्र क्रमः । ओं हां पृथिवीतत्वाय नमः । ओं हां जलतत्वाय

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नमः। ओं हां वायुतत्वाय नमः। ओं हां आकाशतत्वाय नमः
ओं हां मनस्तत्वाय नमः। ओं हां अहंकारतत्वाय नमः।
ओं हां बुद्धितत्वाय नमः। इत्यभ्यर्चयेत। यद्वा वसुं
प्रपूजयेत।

स्तीणान्दिशस्तु पूर्वस्मात देवताः परिकीर्तिताः।
पुरुषे लोकपालान्वा पूर्वाद्यष्टघटेषु च।
संपूज्य गन्धपुष्पाद्यैस्तत्व तत्वेश्वरान् न्यसेत।
आत्मविद्या शिवाख्यन्तु तत्वत्रयमुदीरितम।
आत्मानमन्तरात्मानं परमात्मानमेव च।
तत्वत्रयाधिपत्वेन क्रमेण विनिवेशयेत।

ओं हां आत्मतत्वाय नमः। ओं हीं विद्यातत्वाय नमः। ओं हूं
शिवतत्वाय नमः। ओं हां आत्मतत्वाधिपतये आत्मने नमः।
ओं हीं विद्यातत्वाधिपतये अन्तरात्मने नमः। ओं हूं
शिवतत्वाधिपतये परमात्मने नमः। स्तीणामप्येवमेव स्यात
क्ष्मादयो मूर्तयो मतः। अष्टौ वा पञ्चपक्षे तु क्ष्मादयः पञ्च
एव हि। इंद्रादि मूर्तिपाः पक्षे नित्याद्यास्तु मूर्तिपाः।

तत्र ब्रह्माणि वा न्यस्य तत्र मूर्तिं हृदि न्यसेत।

अजितेयद्वा

प्रागादिषु मनो बुद्धिरहंकारक्रमेण तु।
चित्तञ्चापि यजेद्धीमान नमस्कारान्त संयुतम।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अकारादिक्षकारान्तं न्यसेन्मूर्धादिकं क्रमात्।

अत क्रमः— ओं हां श्री कण्ठाय नमः। ओं हां ललाटे। ओं अनन्ताय नमः। दक्षनेत्रे ओं इं सूक्ष्माय नमः। वामनेत्रे। ओं ईं त्रिमूर्तये नमः। दक्षकर्णे। ओं उं महेश्वराय नमः। वामकर्णे ओं ऊं अंध्रीश्व - - दक्षघ्राणे। ओं ऋं भूभारभृतये नमः। वामघ्राणे। ओं ॠं अतिथीश्वराय नमः। दक्षगण्डे। ओं ऌं स्थाणवे नमः। वामगण्डे। ओं ॡं हराय नमः। ~~तालुमध्ये ओं हं महासेनाय नमः। दक्षबाहौ। ओं क उत्तरोष्ठे। ओं डां वौण्डीशाय नमः। वामकर्णे। ओं ऊं अंध्रीश्वराय नमः।~~

उत्तरोष्ठे। ओं डां वौण्डीशाय नमः। अधरोष्ठे। ओं डों भूतये नमः। ऊर्ध्वदन्तेषु ओं ओं सद्योजाताय नमः। अधो दन्तेषु ओं औं अनुग्रहेश्वराय नमः। तालुमूले। ओं अं क्रूराय नमः। तालुमध्ये। ओं हो महासेनाय नमः। दक्षबाहौ ओं कं क्रोडीशाय नमः। कोर्परे ओं खं चण्डाय नमः। मणिबन्धे ओं गं पञ्चान्तकाय नमः। करतले ओं घं शिवोत्तमाय नमः। कराग्रे। ओं ङं एकरुद्राय नमः वामबाहौ। ओं चं कूर्माय नमः। ओं कोर्परे- जानुनी ओं ठं लांगलिने नमः। जंघाग्रे ओं दं दारकाय नमः। पादतले। ओं मं अर्धनारीश्वराय नमः। पादाग्रे-ओं णं

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अमागन्ताय नमः। वामोरौ। ओं तं आषाढाय नमः। जानुनी। ओं थं दाण्डिने नमः। जंघाग्रे। ओं दं अत्रये नमः। पादतले। ओं धं ईशानाय नमः। पादाग्रे - ओं नं मेषाय नमः। दक्षपार्श्वे। ओं पं लोहिताय नमः। वामपार्श्वे ओं फं शिखिने नमः। पृष्ठभागे। ओं बं छगरण्डाय नमः। नाभ्यधः। ओं भं। द्विरण्डाय नमः। नाभौ। ओं मं महाकालाय नमः। तस्योर्ध्वे। त्वगादि सप्तधातुषु। ओं यं बालिने नमः। ओं रं भुजंगेशाय नमः। ओं लं पिनाकिने नमः। ओं वं खड्गीशाय नमः। ओं शं बकाय नमः। ओं षं श्वेताय नमः। ओं सं भृगवे नमः। हृदि। ओं हं लकुलीश्वराय नमः। गुददेशे- ओं लं शिवाय नमः। लिंगे ओं क्षं संवर्तकाय नमः।

जीवन्यासं स्वमन्त्रेण न्यस्त्वंगानि च विन्यसेत्।
संपूज्य गन्धपुष्पाद्यैर्वस्त्रेणाच्छाद्य वर्मणा।
ततः - र्यं गत्वा होमकर्म समारभेत्।
प्रागवच्च कुण्डसंस्कार शिवाग्न्याधानमेव च।
तन्मध्ये भक्तमावाह्य सांगं संपूज्य तर्पयेत्।
समिदाज्य चरुं लाजान् स्तिलैर्द्रव्याणि मूर्तिपैः।
पलाशोदुंबराश्व - - - - - श्वादिषु क्रमात्।
शमीखदिरमाधूर-श्रीवृत्याग्नि कोणगाः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रधानेपि पलाशस्य शतं वार्द्धं तदर्धकम् ।
हुत्वा पूर्णान्ततो दत्वा तत्वात्वेश्वरान् प्रति ।
मूर्तिमूर्तीश्वरोपेतं प्रत्येकञ्चाहुति नवम् ।
विबोध्य स्थापने - पीठे रत्नादिन्यास संयुतः ।
कृत्वा घोराणुना होमं निशायाधं शतद्विजाः ।
स्पृष्ट्वा मूर्द्धादि पादान्तं शान्तिं तोयेन सेचयेत् ।
ततश्चान्तर्बलिं बाह्यं बलिं दत्वा शुचिर्गुरुः ।
रात्रिशेषं व्यपोत्याथ प्रभाते मूर्तिपैस्सह ।
स्नात्वा समाप्य सन्ध्यान्तु कृतनित्यो गुरूत्तमः ।
द्वार द्वाराधिपानिष्ट्वा कृतकुंभार्चनो गुरुः ।
संपूज्य कुण्डं वह्निञ्च पूर्णान्दत्वा यथा विधि ।

श्रीमत्संहितायाम्-:

शय त बिंबमुत्थाप्य वस्त्रानि व्यपोह्य च ।
वेद्याञ्चोत्तर दिग्भागे स्थापयेत्पलकोपरि ।
स्थापयेद्धृदयेनैव कुर्याद्धृत शिरोर्पणम् ।

कामिके-:

अंगन्यासं यथा पूर्वं स्था - रे परिकल्पयेत् ।
आसनं प्रणवं कृत्वा मूर्तिं स्थाणुं प्रकल्पिताम् ।
मातृकञ्च ततो न्यस्त्वा जीवन्यासं समाचरेत् ।

श्रीमत्संहितायाम्-: कुंभानुद्धृत्य शिरसे बाह्ये सप्तप्रदक्षिणम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कुर्या। द्विव पुरोभागे स्थण्डिले स्थापयेत्क्रमात् ।
कुंभाद्बीजं समादाय प्रतिमां हृदि विन्यसेत् ।
तत्कुंभोदकश्चैव तत्तत्स्थाने भिषेचयेत् ।
तद्वत्स्थोदकेनैव स्नापयेद्धृदयेन तु ।
स्नपनं कारयेदन्ते यदेकुम्भादिभिस्सदा ।
प्रभूतहविषं दत्वा तांबूलं धूपदीपकैः ।
भक्तजन्मदिने वापि तज्जन्मादिनेऽपि च
मासे प्रत्युत्सवं कुर्यात् वैभवस्यानुसारतः ।
ध्वजोभिवृषभं कुर्यात् शिववच्छोत्सवं भवेत् ।
उत्सवं कारयेत्पश्चात् यथा वित्तानुसारतः ।
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ।
शिवभक्तं प्रतिष्ठाञ्च यः कुर्यान्नरपुंगवः ।
तस्य श्री विजयो वाच अन्ते सायुज्यमाप्नुयात् ।
॥ इत्यात्मार्थ पूजापद्धत्यां शिवभक्त प्रतिष्ठाविधिः ॥

॥ अथ पुष्करिणी प्रतिष्ठाविधिः ॥

तत्र वास्तु पूजार्थः। दक्षिणोत्तरेषु पूर्वपश्चिमेषु द्वादशसूत्रेषु प्रसारितेषु एकविंशत्युत्तरशत पदं स्थानीयाख्यं पदं भवति। तत्र ईशानकोण त्रिपदभोक्तारमीशानम्। ओं ईशानाय नमः इति प्रथममभ्यर्च्य तत्समीपस्थम्। एकपदभोक्तारम्। ओं पर्जन्याय नमः। (ओं प्रदगाय नमः। ओं अतिथये नमः॥)

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ओं जयन्ताय नमः। ओं आदित्याय नमः। ओं सत्यकाय नक्षत्राय नमः। ओं भृगाय नमः। इत्थमभ्यर्च्य नैरृत्यकोण त्रिपदे।
ओं निर्ऋत्यै नमः। ह्येकपदभोक्तारः। ओं दौवारिकाय नमः।
ओं सुग्रीवाय नमः। ओं पुष्पदन्ताय नमः। ओं वरुणाय नमः। ओं असुराय नमः। ओं शोषाय नमः। ओं रोगाय नमः। वायुकोण त्रिपदे। ओं वायवे नमः। ह्येकपदभोक्तारः।
ओं नागाय नमः। ओं मुख्याय नमः। ओं भ[...]टाय नमः।
ओं सोमाय नमः। ओं भृगाय नमः। ओं अतिथये नमः।
इत्थं द्वात्रिंशद्देवान्संपूज्य अनन्तरं अन्तर्द्विपादि पाधिपान
ओं आपाय नमः। ओं आ[...] नमः। ओं सावित्रे नमः।
ओं इन्द्राय नमः। ओं इन्द्रजयाय नमः। ओं रुद्राय नमः।
ओं रुद्रजयाय नमः। ह्येवमीशानादिक्रमेण प्रत्येकं द्विपाधिपान अष्टौ देवान संपूजयेत् अनन्तरं दशपदाधिपान ओं मरीचये नमः।
ओं सावित्रे नमः। ओं इन्द्राय नमः। ओं इन्द्रजयाय नमः।
ओं रुद्राय नमः। ओं रुद्रजयाय नमः। ह्येवमीशानादिक्रमेण प्रत्येकान्द्विप- षष्ट्याविंशति पदाधिपमर्चयेत्। अनन्तरम्।

बाह्ये चरक्यादीनष्टानपि पूजयेत्। ह्येतत्पूजनं पुष्करिण्या वारुण्यान्दिशि निर्मितमण्टपे कार्यम्। यथा। चिन्त्यविश्वसारे

पुष्करिण्या प्रतिष्ठान्तु वृक्षा संक्षेपतः शृणु।
तत्रादौ पूजयेद्वास्तुं वेदास्रे रुद्रभाजिते।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कोणेषु त्रिपदा पूज्या ईशाग्नि पितृवायवः।
द्वाकें पदमारूढा पर्जन्याद्या यथा क्रमम्।
153 आपाद्याः करकोष्ठस्था मरीच्याद्या दीशान्तगाः।
ब्रह्मा मध्य प्रदेशे तु पञ्चविंशति कोष्ठके।
यदेष्टास्तु प्रतिष्ठायां स्मारण्यां मण्टपे शुभे।
परिग्राहीन क्रमद्वे प्रारंभेत यथा विधि।
ततो मूर्त्यंगसंयुक्त निजनाम्ना ध्रुवादिना।
अष्टपत्रे सिताम्भोजे कालाग्नेर्मध्यतो यजेत्।
हाटकेशे बिलेशान्त बलानाथ महोदरम्।
महाब्धिं कलशाम्बोधिं विरूपाक्षञ्च पूजयेत्।
पूर्वपत्रक्षमादीनाशौ करीश्वरमन्ततः।
अनन्तादींस्ततो गर्ते कार्कोटान्तान्निजाणुभिः।
यज्ञमण्टपबाह्ये तु पूजयेत् परविक्रममुखानं।
गृहान्तोकाधिनाथांश्चरो पुंनागाष्टकन्तथा।
ततानन्तं महापद्मन्तक्षण कुलिकान्तकयः।
शंखञ्च वासुकिं पद्मकार्कोटञ्चाष्टमं न्यसेत्।
ध्वजां पूर्वादितः कृत्वा न्यसेत्तस्यां वद्ध्वोबाधिः।
फणीन्द्राश्शिरमत्स्याद्यो महार्षिष्टंध्विका इति।
फणि निमरु ऋक्षाम मलोम केशम मत्स्याद्यो यान्नागाणि।
महावाटा ७लीकंभी यष्ट आतिमधु आंद्रिका ५मुवकंनकाप.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्रमठः पञ्चरत्नानि रसगन्धांबु पंकजम्।

अर्घ्यांबु पञ्चगव्यञ्च पुष्करिण्यां परिक्षिपेत्।

वक्ता द्विगुणं पादहीनमर्धेन यादिकम्।

हृद्यां लोचनसंयुक्ता सालसुन्दरिकादिकजाम्।

स्नापयित्वा समभ्यर्च्य ध्वजवत्कुर्य निस्वनैः।

अनुभमनुना मध्ये निक्षिपे दक्षियष्टिकाम्।

ओं सहस्रभोग-चूडाय विश्वाधारस्थिताय च। ओं हूं

हूं फट् अनन्तनागाय नागाधिंपतये नमः।

अभ्युक्ष्यास्त्रांबुना पाशु पतास्त्रेणाधिवासयेत्।

क्षुरिकायावतार्याथ क्षिपेद्धामेन वारिणी।

शैव्यपादं समादाय कपिल · · · संगतः।

यजमानं स्त्रेतस्यां गुरुपाशपतञ्जपेत्।

तत्र सन्तारणा देवी तीर्णा वैतरणी नदी।

शतं साष्टमघोरेण हुत्वा सन्तर्प्य वारुणम्।

देवेशं वामदेवस्यारञ्चं चरुन्तेनैव साधयेत्।

चरुणा शिवमन्त्रेण दद्यात्पूर्णाहुतिं गुरुः।

गौरीयं गुरवे देवा वस्त्रादीं भूषणानि च।

अमुमेव विधिं कुर्यात् गुरुर्वापी तटाकयोः।

॥ इत्यात्मार्थपूजा पद्धत्यां पुष्करिण्यादि प्रतिष्ठा विधिः॥

—— ० ——

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथ कूपाद्यारुण्यमण्टपमध्ये दक्षिणोत्तर पूर्व पश्चिमेषु तयोदश सूत्रेषु प्रसारितेषु चतुश्चत्वारिंशदधिकशतपदे दीक्षिकारव्ये ईशानकोणे ईशानपदे तद्द्वाक्पदाधिपान् षट्देवान् संपूज्य तदनु सार्धद्विपदाधिपं । इति । ईशान्तमभ्यर्च्य ततस्त्वापादीन् द्विपदाधिपानष्टौ । ततो मरीच्यांश्चतुरश्र प्रत्येकन्द्वादश पदाधिपानभ्यर्च्य षट्त्रिंशत् पदाधिपं ब्रह्माणं मध्ये पूजयेत् । बाह्ये चरत्यादीन् अष्टावपि पूजयेत् । तथा । चिन्त्याविश्वसादारव्ये । प्रतिष्ठा कूपविषये वक्ष्यते नान्दिकेश्वर

वास्तुदेवं समभ्यर्च्य मण्डलेरविभाजिते ।
ईशा रवाग्निभृगश्चैव पितरौ मरुदिति ।
ईशादीशान्तकोणेषु सार्ध । द्विपदनायकाः ।
पर्जन्याद्यस्तु पदिकाः पूर्ववान्नान्दिकेश्वर ।
आपाद्याः पादयुग्मं वा भवेयेव विशेषतः ।
भानुभागौ मरीचाद्या ब्रह्मा षट्त्रिंशदंशकाः ।
द्वारत्वाद्या बहिः पूज्या स्कन्दाद्या अपि पूर्ववत् ।
स्वतन्त्रविहितैर्मन्त्रैर्हुत्वा तदनन्तरम् ।
पूर्वकाद्यादरिद्रश्च स्वभूपक्षे यजेत्क्रमात् ।
कूपस्य वारुणे भागे मण्टपेव समर्चयेत् ।
पूर्वोदितविधानेन शैत्यानागाष्टकायुतम् ।
हुत्वा तेभ्यो बलिन्दत्वा कूपेरत्नादि निक्षिपेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रोक्षयेदंबुना शान्त्यै यजमानन्ततो गुरुः।
गुरुं सन्तोषयेत्कर्ता गो हिरण्याम्बरादिभिः।
भोजनादि ततो दद्यात् यथा सामर्थ्यमार्थिनाम्।
खातानामपि सर्वेषां विधिः कार्या तु कूपवत्।
क्षेपणं वपनं यच्च सव्यासव्यनुसम्मतम्।
यद्वा - कूपसंस्थापनं वक्ष्ये सूक्ष्मे ... न्तोक्तवर्त्मना।
उत्तरायण काले तु शुक्लपक्षे शुभे दिने।
सुवारे सुमुहूर्ते च स्थापनं सम्यगाचरेत्।
तद्दिनात्पूर्वदिवसेत्वधिवासनमारभेत्।
मण्टपं समलंकृत्य पुण्याहं वाचयेत् ... ः।
शालिभिः स्थण्डिलं कृत्वा लाजैः पुष्पैः परिस्तरेत्।
नवकुंभान् समादाय क्षालयेदस्त्रमन्त्रतः।
ससूत्रान् सापिधानांश्चैव सवस्त्रान्वारि पूरितान्।
फलपल्लवसंयुक्तान् हेमकूर्च समवि - ।
नैरृति कुंभे तु अर्चयेच्च सरस्वतीम्।
कर्कटं वारुणे कुंभे सिन्धुतीर्थं समुच्चरेत्।
नद्या वायव्य कुंभे तु गोदावरीं समर्चयेत्।
सौम्ये च पद्मपुष्पन्तु कुंभे कावेरीञ्च समर्चयेत्।
उत्पलंत्वीशकुंभे तु ताम्रपर्णीं समर्चयेत्।
तत स्वनाममन्त्रेण चार्चयेद्देविकोत्तमः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



पञ्चमृत्पञ्चगव्यैश्च कूपमध्ये विनिक्षिपेत्।
अग्निकार्योक्तमार्गेण चाग्निकार्यं समाचरेत।
समिदाज्यान्नलाजैश्च हुनेदष्टोत्तरं शतम्।
सद्यादिवक्त्रपर्यन्तं क्रमेणैव तु हूयते।
वारुणोक्तमनुं जप्त्वा मूलमन्त्रशतञ्जपेत्।
आपो वा येति मन्त्रेण अष्टोत्तरशतञ्जपेत्।
एवं रात्रौ प्रकर्तव्यं प्रभाते स्नानमाचरेत।
सकलीकरणं कृत्वा कुंभवह्निं समर्चयेत्।
153b जयादिरभ्याधानञ्च क्रमात्प्रस्तुतं हुनेत्।
पश्चादग्निं विसृज्याथ कुंभमध्ये तु योजयेत्।
नैवेद्यं दापयेद्भक्त्या धूपदीपादिकन्ददेत्।
पश्चात् कुण्डान्समुत्सृज्य सर्वालंकारसंयुतम्।
धामप्रदक्षिणं कृत्वा कूपस्थानं समाचरेत।
पुण्याहं वाचयेद्धीमान् शुद्धेरुत्थेति मन्त्रतः।
कूपमध्ये तु संप्रोक्ष्य अस्त्रेणैव समर्चयेत।
कुंभोदकेन संस्नाप्य आपोवायेति मन्त्रतः।
~~कूपतोयन्तु संग्राह्य~~ गंगादि सर्वकलशैः स्नापयेत्तत्स्वनामतः।
अर्चयेद्गन्धपुष्पाद्यैः धूपदीपादिकन्ददेत।
कूर्मादि रष्टद्रव्याणि कूपमध्ये विनिक्षिपेत।
वज्रादि पद्मपर्यन्तं बलन्दद्यात्स्वनामतः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



कूपतोयन्तु संग्राह्य सर्वभक्तेषु दापयेत् ।
आचार्यं पूजयेत्पश्चात् वस्त्रहेमांगुलीयकैः ।
दावं यः कुरुते मर्त्यस्सपुण्यांगतिमाप्नुयात् ।
॥ इत्यात्मार्थपूजापद्धत्यां कूपप्रतिष्ठा विधिः ॥

—— ० ——

अथ वक्ष्ये विशेषेण वृक्षाणाञ्च प्रतिष्ठितम् ।
जुहुयात्सर्पिषा चैव तिथिस्सम्यक् समाहितम् ।
आरोमोद्यानयो वृक्षा नेन्द्रदुक् कृतमण्टपे ।
स्नपनं पूजनं न्यासं स्वेन स्वेनाणुना चरेत् ।
वृक्षादि देवता प्रीत्यै दद्यात्पूर्णाहुतिं गुरुः ।
कर्ता सन्तोषयेत्पश्चात् आचार्यं ब्राह्मणानपि ।
बन्धुमित्रादिदीनांश्च भोजये तोषयेदपि ।
स्वस्ति वाचनकं कुर्यात् पुण्याहं वाचयेद्गुरुः ।
तद्वृक्षार्चनाविधानं अंशुमति स्पष्टमुक्तम् । तद्यथा
लिंगोद्भवञ्च तद्वृक्षं श्रूयतां रविसत्तम ।
आयुरारोग्यमैश्वर्यं विजयं श्री कीर्तिवर्द्धनम् ।
सर्वरोगविनाशार्थं सर्वाभिष्टफलप्रदम् ।
वृक्षस्य चोत्सवश्चैव वल्मीकस्योद्भवन्तथा ।
लिंगोद्भवञ्च तद्वृक्षे तन्मूले शिवमर्चयेत् ।
प्रासादपूर्व दिग्भागे दक्षिणे चोत्तरेपि वा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ईशान्येवा प्रकर्तव्यं पुण्यस्थानं प्रकल्पयेत् ।
अथवा दिव्य वृक्षान्तु तत्स्थाने तु प्रपूजयेत् ।
प्रासादे मण्टपे वापि कूटाकारमथापि वा ।
पूर्वोक्त विधिमार्गेण कारये द्देशिकोत्तमः ।
तन्मूलेपि रसंस्थाप्य युगास्रं वृत्तमेव च ।
पीठन्नालसमायुक्त पूर्ववत्कारयेद्बुधः ।
प्रतिष्ठा विधिप्रकारेण कारयेन्तु विचक्षणः ।
अक्षिमोक्षणमेवन्तु ग्रामप्रदक्षिणं विना ।
शेषकर्मन्तु सर्वेषु प्रतिष्ठा विधिरुच्यते ।
अर्चनान्द्विविधश्चैव भोगमोक्ष फलप्रदम् ।
तद्रूपमद्ध्यमेभ्यर्च्य पाद्यमाचमनन्ददेत् ।
सन्ध्यां प्रतिसमभ्यर्च्य पञ्चांगेनैव देशिकः ।
स्नानं वस्त्रञ्च गन्धञ्च पुष्पं नैवेद्यमेव च ।
पञ्चोपचारमेवन्तु पूजयेन्तु विशेषतः ।
धूपदीपसमायुक्तं नृत्तान्ते तु समाचरेत् ।
तद्वृक्ष फलमूलादि तद्राष्ट्रमभिवर्द्धये ।
यत्फलं पद्ममेवञ्च भूमौ तु पतितं तथा ।
तन्मूलेन च नैवेद्यं आपूपादि निवेदिता ।
सर्वोपचारः कर्तव्यः पूजये द्देशिकोत्तमः ।
तद्वृक्ष फलहीनन्तु तद्राष्ट्रे कलहो भवेत् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्वृक्षां शुष्कमेवन्तु नृपस्य मरणं भवेत्।
एवं फलश्रुतिं कृत्वा शिवलोके महीयते।
दिव्यवृक्षार्चनं वल्मीकस्यार्चनन्तथा।
एवं यः कुरुते मर्त्यस्सपुण्यां गतिमाप्नुयात्
इत्यात्मार्थपूजापद्धत्यां दिव्यवृक्षप्रतिष्ठाविधिः।

—— ० ——

॥ अथात्मार्थजीर्णोद्धारः ॥

आत्मार्थलिंगजीर्णश्चे-तद्विधानं स्वयंभुवे प्रतिपादितम्। तद्यथा—:

अथवान्य प्रकारेण शुभर्चादिषु कथ्यते। बाणलिंगादिषु कथ्यते।

बाणलिंगादिजीर्णेषु पीठेत्छिन्ने तथैव च।
आत्मन्युद्वास्य विधिवत् कुंभादौ वा यथा विधि।
शकलानि परित्यज्य यथा स्वर्णेन कारयेत्।
रजतेनाथ ताम्रेण शिलया दारुणाथ वा।
यथा पूर्वन्तु संस्थाप्य यथा पूर्वान्नियोजयेत्।
अष्टबन्धविजीर्णे तु बाणलिंगे विशेषतः।
स्वर्णेन रजतेनैव अष्टबन्धन्तु कारयेत्।
स्थले कुंभादौ पूर्ववद्योज्य कर्मान्ते योजयेत्छिवम्।
स्नपनं शान्तिहोमञ्च प्रायश्चित्तार्थमस्त्रजापकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T 171



प्रभूत हविषश्चैव कृत्वा सन्तोषयेच्छिवम ।

॥ इत्यात्मार्थपूजापद्धत्यां आत्मार्थजीर्णोद्धार विधिः ॥

—— ० ——

मायास्वधारव्य शकवत्सर डव याते श्री व्याघ्रपुर्व सति वैद्यविदारव्य शिष्यः नैमित्तिकं खलु तदात्मवचानकार्यदात्मार्थ पूजनविधावखिलागमोक्यम ॥

॥ इत्यात्मार्थ पूजा पद्धतिस्समाप्तः ॥

॥ हरः ओं शुभमस्तु ॥

॥ श्रीमद्दाविश्वा मणि गुरुभ्यो नमः । श्रीमत्षण्मुख गुरवे नमः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वन्दे कल्कक विघ्नेशं वाञ्छितार्थ प्रसिद्धये ।
वरदं सर्वभक्तानां वल्लभा वल्लभं प्रभुम् ।
श्रीमदभ्र सभानाथं व्याघ्रपाच्चैव पूजितम् ।
आनन्दरूपिणीं शक्तिं भजाम्यानन्दसिद्धये ।
क्रियाकाण्ड प्रवृत्तांश्च सान्तानिक गुरून्नपि ।
वेदज्ञानमुनेर्ज्ञान मोक्षदं साधुसद्गुरुम् ।
आगमानामनन्तत्वादवलोकितुमक्षमात् ।
प्रतिबोधाय दीक्षादर्श इहोच्यते ।

कारणे-: अतः परं प्रवक्ष्यामि शिवदीक्षा विधिक्रमम् ।
नराणां मोक्षसिद्ध्यर्थं सर्वपापहरं परम् ।
सर्वरोगविनाशार्थं धनधान्य समृद्धिदम् ।

तथा सर्वज्ञानोत्तरे-:

अतः परं प्रवक्ष्यामि अप्रबुद्धस्य देहिनः ।
सर्वतत्वनिबद्धस्य सर्वधर्ममयस्य तु ।
पशुधर्म विमुक्तस्य अनादिमलदूषितः ।
शृणुष्वैवं सर्वपापहरं परान्दीक्षां शिवसायुज्यदां शिवम् ।

षट्सहस्रिकायाम् -:

दीक्षया श्रावणे योग्यो दीक्षया पूजने क्षमः ।
दीक्षयाश्रम धर्मास्तु प्रवर्तन्ते यथार्थतः ।
दीक्षया प्राप्यते ज्ञानं दीक्षया सिद्धिभाक् भवेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मुक्तिदानेन वै दीक्षा ज्ञानदाच्चान्तरंगिणी ।
शिवदीक्षाधिशुद्धार्थे सर्वत्रैवाधिकारिणः ।
नास्ति दीक्षासमन्तीर्थं नास्तिदीक्षासमं तपः ।
नास्ति दीक्षासमो धर्मो नास्ति दीक्षासमो गुरु: गुणः।
नास्ति दीक्षासमं ज्ञानं नास्ति दीक्षा समा स्मृतिः।
नास्ति दीक्षासमं श्रेयो नास्ति दीक्षासमं कुलम् ।
वाक्यनानाशतश्चापि दीक्षाज्ञानक्रिया तथा ।
योगचर्यादि चत्वारि तेषां शंवद्धाद्ध्रुवम् ।

पौष्करे-:

मन्त्रौषधबलैर्यद्वत् संनिरोधाविषस्य तु ।
तथा यत्सर्वपाश्चानां संनिरोधस्तु दीक्षया ।

सर्वज्ञानोत्तरे-:

विषापहारं कुरुते ध्यानबीजबलैर्यथा ।
कुरुते पागविश्लेषं तथाचार्यश्शिवाध्वरे ।
दह्यते धाम्यमानाण्डाकु नायन्तु यथा बलम् ।
तथाचार्यो दहेत् पुंसां पाशबद्धन्तु दीक्षया ।
परारव्ये-: धर्माधर्मक्षयकरी दीक्षेयं पारमेश्वरी ।
ज्ञानतो योगतश्चैव चर्यातश्च न मुच्यते ।
दीक्षयाचाग्रमुक्तिस्तु सर्वेषां प्राणिनामिह ।
तस्मात्तु शिवसामर्थ्यान्मुक्तिस्सर्वत्रसिद्ध्यति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अस्मात्प्रविततात् बन्धात् परसंस्था निरोधनात् ।
दीक्षैव मोचयत्यूर्ध्वं शैवन्धाम नयत्यपि ।

तथा स्कान्दे भृगुशापप्रकरणे-:

नात्राश्रमकृतः कश्चित् उत्कर्षो विद्यते नृणाम् ।
परान्दीक्षां विना शैवीं बन्धत्रय विमोचिनीम् ।
तस्मान्मुक्तेर्दीक्षयैव नाश्रमैर्नास्य कर्मभिः ।

स्कान्दे कौशिकखण्डे-:

अध्वशुद्धिं विना येन वै च मुक्तिमिच्छन्ति मानवाः ।
अदण्डपाणिश्चाध्वस्तु गन्तुमारंभते हठात् ।
यथा द्रोणि विहीनाहि तर्तुमिच्छन्ति सागरम् ।
अध्वशुद्धिं विहीनो हि तथा मुक्तिं समीहते ।
किमत्र बहुनोक्तेन भूयो भूयो वदामि च ।
षडध्वशुद्धियुक्तानां मुक्तिर्नेति न चान्यथा ।

काशीखण्डे-:

पञ्चक्रोशीकृतः काश्यां स तु निर्वाणदीक्षितः ।
नामापि गृह्णतां प्राश्यां सदैवास्ते न संशयः ।

वामनपुराणे वासुदेवं प्रत्युपमन्युः-

अहं कथं विध्यामि सर्वपापविशोधनम् ।
संस्कारं परमं पुण्यं शिवेन परिभाषितम् ।
सम्यक्कृताधिकारी स्यात् पूजादिषु नरो यतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



संस्कारः कथ्यते तेन षडध्वपरिशोधनम् ।

वायुपुराणे उपमन्युकृष्णसंवादे-:

शिवागमेर्थ यत् ज्ञानन्तत्र तत् ज्ञानमुच्यते ।

शिवाश्रितानां कारुण्यात् श्रेयसां मोक्षसाधनम् ।

कृष्णः- इदानीं श्रोतुमिच्छामि शिवसंस्कारमुत्तमम् ।

~~मन्त्रसंग~~ मन्त्रसंग्रहणे किञ्चित् सूचितं न प्रविस्तरम् ।

वराहपुराणे मुक्तिमत् प्रतिरीश्वरः

दैवी पाशुपती दीक्षा योगः पाशुपतास्त्विह ।

तस्माद्वेदमर्गाच्चैयदन्यामिह जायते ।

सद्रूपं कर्मविशेषं रौद्रकर्म विवर्जितम् ।

अत एव ब्रह्मादयस्सर्वे पि दीक्षिता श्रूयन्ते ।

यथा रौरवे-:

पतयस्स - ना प्रोक्ता ब्रह्मविष्णिवन्द्रसंज्ञिताः ।

तेषामत्यन्तमैश्वर्यं विधेशानांमहात्मनाम् ।

तद्योगमीत्सन्तस्तेषां षारव्यमभ्ययुः ।

विद्याराजाधिराजेशास्तेत्यन्तं निरपेक्षिणः ।

जरामरणसंसार बन्धभेद विचक्षणाः ।

कुण्डमण्डल दीक्षाभि यजनैज्यापरिग्रहैः ।

विद्याव्रतोपश्चैव मन्त्रतन्त्राग निस्रतैः ।

दिव्यैरनुग्रहश्चान्यै रुद्रत्वा च भासिभिः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तेषामनुग्रहं चक्रे मन्त्रमन्त्रेश्वरा शिवाः।
पितामहश्चापितेभ्यो वाच्य महोदयम।
शैवपरमनिर्वाण कारणं ज्ञानमुत्तमम।
ऋषिभ्यो विबुधेभ्यश्च यथाक्रमपितृभ्यश्च यथाक्रमम।
प्रयच्छन्ति महातन्त्रं तन्त्रराजं महात्मनाम।
पितामहनियोगाश्च ऋषयः छिन्नसंशयः।
दीक्षा विधिविधानज्ञाः गनुजेभ्यः प्रचक्षते।
शिवेन्दुकिरणादेतत सूत्रमात्रविनिस्सृतम।
पाशौघतिमिरण्डानां प्रकाशकरणं परम।
निश्वासे- ईश्वरी- कोचित- कस्मिन् वृताम देव
दीक्षिदा देवदानवाः।
ऋषिविद्याधरास्सिद्धा गन्धर्वाप्सरसः प्रभो।
यक्षराक्षसभूताश्च पिशाचोरगकिं नराः।
गुह्यकाश्च महादेव क्रूराश्चैव विनाशकाः।
स्वान्तेन दीक्षिता येन देवस्यास्य ध्रुवं भवेत।
तदहं श्रोतुमिच्छामि भगवन् ईश्वरः।
विजये तु समाख्यातं तस्मिन्ब्रह्मा तु दीक्षितः।
161b निश्वासे तु समाख्यातं नन्द्रो यत्र दीक्षितः।
अतः कुबेरवरुणा यमश्चैवाश्विनावपि।
गणाश्चैव महाभाग रुद्राश्चैव तु दीक्षिताः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सिद्धविद्याधरास्तत्र तथा स्वायंभुवेति च।
नामद्वय समाख्यातं दक्षाद्या यत्र दीक्षिताः।
प्रजानां पतयश्चैव तथा ब्रह्म सुताश्च ये।
दीक्षिताश्च नियुक्ताश्च असुराश्चैव सन्ततम्।
-द राक्षस गन्धर्वाः पिशाचोरगा किंनराः।
गरुडाद्या द्विजाश्चैव ये च लोकेषु संस्थिताः।
पञ्चधा भेद भिन्नस्तु आग्नेये येव दीक्षिताः।
मातरो यक्षगुहाश्चैव ये च विघ्नाद्ये गणाः।
किरणे हि समाख्याता आदित्यो यत्र दीक्षिताः।
मन्त्रजापेन सिद्धास्तु सर्वेषां साधकास्थिताः।
मकुटे पि समाख्यातो निदान क्षेत्र वासिभिः।
गलान्तं मन्त्रिकल्पैश्च ऋषिभिस्सेविता सदा।
तथा शैवपुराणे ओम संहितायाम्-
लब्ध्वा भवतरवाकाश्च शैवीन्दीक्षां द्विते सुताः।
शिवलिंगार्चनैकान्ता जाता स्तिपुरवासिनः।
शिवपूजा कृतस्तेषां पत्यश्च पतिदेवताः।
दीक्षोत्तरे दीक्षा प्रकारः-
संयोजनं सज्जननं भोगभोजनमेव च।
पाशच्छेदे स्तथोद्धारो दीक्षाकर्माणि पञ्चधा।
तथा मृगेन्द्रे-: पाशानां समाधिकारणां भेदनं श्रुत्यसंभवात्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दीक्षापरमविश्लेषः पाशच्छेदे निरोधनम् ।
पशशुद्धमलं मुक्ति व्यक्तेः परमनिष्कृतिः ।
पाशसंघात शक्ति संशोधिनिष्कृतम् ।
विधायभासयेद्धाम पाकविच्छित्तिवर्त्मना ।

इत्याद्यागमपुराणवचनाभ्यां दीक्षायामोक्षं न तु वैदिक संस्कारेण तथा देव्यामते-:

यत्राचारविचारोस्ति दीक्षितानां शिवागमे ।
वैश्चवन्ते वैदिका मन्त्रास्तथान्या वैदिकी क्रिया ।
यत्रैव वैदिका मन्त्रा प्रधानं ब्राह्मणस्य तु ।
न तच्छैवोदितं शास्त्रन्तत्प्रोक्ता ऋषिभाषितम् ।
तत्रासक्तानरा मूढा क्लिश्यन्ते द्वैतवादिनः ।
तेतु संस्कारिणो दृष्टा दुष्टा पशुत्वान्मलिनो यतः ।
यत्र नो वैदिका मन्त्रा स्संस्कारस्य प्रमाणतः ।
वर्णानां संस्कृतानाञ्च विशेषो नोपलभ्यते ।
शिवज्ञानस्य प्राधान्यं शिवतत्वस्य निभ्रमः ।
शिवाश्रमागतं ज्ञानं तच्छास्त्रं शिवसम्मतम् ।

तथा चिन्त्यविश्वे-:

चत्वारिंशन्तु संस्कारा विप्राद्यैरप्यनुष्ठिताः ।
प्रथमं स्वांगनायास्तु गर्भाधानमनन्तरम् ।
पुंसवनञ्च सीमन्तं विष्णोर्बलिमनन्तरम् ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जातकर्मन्तथा नामकरणन्निष्क्रामणन्तथा ।
अन्नप्राशनकञ्चैव प्रवासगमनन्तथा ।
वैदेवं ततोत्सर्गं पञ्चत्वेकप संस्कृतिः ।
परायणञ्च गोदानं स्नानमुद्वाहकन्तथा ।
अष्टादशशरीरस्य संस्कारास्समुदीरिताः ।
देवयज्ञः पितृयज्ञो भूतयज्ञस्तथैव च ।
मनुष्यं ब्रह्मयज्ञश्च महा यज्ञाः प्रकीर्तिताः ।
स्थालीपाकश्चाग्रायणश्चैत्रश्चाश्वयुजं तथा ।
अष्टकापर्वणञ्चैव सप्तैते पाकयज्ञकाः ।
अग्न्याधेयञ्च दर्शञ्च पौर्णमास्यं तथैव च ।
आग्रायणाष्टकञ्चैवं चातुर्मास्यमनन्तरम ।
निरूढपशुबन्धश्च सौत्रामणिरथान्तकम ।
हविर्यज्ञाश्च सप्तैते सोमसंस्था तथैव च ।
अग्निष्टोमोत्यग्निष्टोम इत्यष्टोषोडशकस्तथा ।
वाजपेयोतिरात्राणि आप्तोर्यामममतः परम ।
सोमसंस्था इति प्रोक्तास्सप्तयज्ञा मनीषिभिः ।
चत्वारिंशन्तुसंस्कारा वैदिकाः क्रमतः क्रियाः ।
कृतवतोत्युक्तमार्गेण दीक्षया मोक्ष भव हि ।

सर्वज्ञानोत्तरे -:

रससिद्धे यथा ताम्रं हेमत्वं प्रतिपद्यते ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तथात्मा ज्ञानसंबन्धात् शिवत्वं प्रतिपद्यते ।

शैवे० — एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ।
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ।
भिन्ने देहे शिवो भूत्वा शिवधर्मसमान्वितः ।
शिवानन्दमनुप्राप्य अविभागाय कल्पते ।
यथा समुद्रमासाद्य नदी भ्रष्टाम्बु वाहिनी ।
क्षारतोयत्वमापाति तत्प्रभावान्महोदधेः ।
एवं वै भिन्नदेहात्मा शिवमेवाधिगच्छति ।
सरित्समुद्रसंयोगात् विभागो नैव जायते ।

इति वामदेवात्मज वेदज्ञानविरचित दीक्षादर्श उपोद्घात -
विधिः ॥

---

शैवलक्षणम्

अत्र दीक्षा शैवाचाराधीनत्वात् शैवलक्षणमत्रो-
च्यते । तथा वीरतन्त्रे —:

शैवास्सप्तविधा ज्ञेयास्तेषां भेदं शृणुष्व च ।
अनादिशैवः प्रथमो आदिशैवो द्वितीयकः ।
तृतीयन्तु महाशैव चतुर्थस्त्वानु शैवकः ।
पञ्चमो वान्तरश्शैव षष्ठः प्रवर उच्यते ।
सप्तमस्त्वान्त्यशैवश्च शैवानां भेद ईरितः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अनादिशैव स्साशैवश्चादिशैव। स्त्रीव द्विजः।
विप्रश्चैव महाशैवः क्षत्रियो वैश्य एव च।
अनुशैवस्समाख्यात श्शूद्रश्चैवान्तरस्मृतः।
स्वर्णाम्बष्ठमध्यस्थ कुलालः पारशवस्तथा।
प्रवराश्चैव संप्रोक्ता अन्त्यशैवमथोच्यते।
इतोन्यजातयो यास्तु अन्त्यशैवास्तु ते स्मृताः।
सवर्णादिस्वरूपश्च उत्तरत्र प्रदर्शितः।

तत्रावधार्यतां कामिके-:

सर्वानुग्राहकः प्रोक्त स्सान्तानिक गुरु स्मृतः।
सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः।
शिवेनतत्कुलोत्थास्तु श्शैवास्सन्तानिका द्विजाः।
आदिशैवास्तु ते ज्ञेयास्सर्वानुग्राहका स्मृताः।
आदिशैवकुले जातः श्रेष्ठस्स्यात् स्थापनादिषु।
दीक्षितास्सर्वमर्त्यानां प्रतिष्ठायामथोत्सवे।
स्नपने प्रोक्षणेन्यत्र च्छायायाश्च नाभिषेचने।
व्याख्यानादौ शास्त्रस्य स्वार्थैवाथ परार्थके।

कारणे-:

शिवेन दीक्षिताश्चैव शिवब्राह्मण उच्यते।
162a सन्ताने-: आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकर्म।
अन्यथा कारयेद्यस्तु अभिचाराय चैव हि।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सुप्रभेदे-:

विवाहमष्टधा प्रोक्तं शिवेन परमात्मना।
तेषां पूर्व चतुष्कन्तु ब्राह्मणस्य महात्मना।
कर्तव्यमासुरं वापि त्रीणि चान्यानि वर्जयेत्।
सुशीलां रूपसंपन्नां कुलजां बन्धवान्विताम्।
असगोत्रां हि कुशलां वधूं संग्राह्य बुद्धिमान्।

तथा कामिके-:

समानगोत्रप्रवरां ज्ञात्वा संबन्धमाचरेत्।
समानगोत्रप्रवरां कन्यां वृणुयात्सदा।
ऊढा चेद्भगिनी वद्धा मातृवत्परिरक्षयेत्।
तस्याश्च रक्षणं कार्यमाहाराच्छादनादिभिः।
विवाहदोषशुद्ध्यर्थं व्रतञ्चान्द्रायणं चरेत्।
तया सह प्रमोदेन संयोगाद्यं कृतं यदि।
प्रायश्चित्तं तदा तस्यान्तद्विधानमिहोच्यते।
सकृत्तागमने कुर्यात्तेन चान्द्रायणञ्चरेत्।
सहस्रं घोरमन्तन्तु विवाहे द्विसहस्रकम्।
इत्यादि तत्र विस्तरेण प्रतिपादित प्रदर्शितम्।

तत्रावधार्यताम्। तथा वीरतन्त्रे-

सगोत्रे च संबन्धं न कर्तव्यं कदाचन।
तत्रापि जायमानास्तु तत्कुलं स्यान्न बाध्यते।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तेषां ऋषीणां विप्रो विप्रेन्द्रजातानाञ्च पुनःपुनः।
शिवाद्विजानां दीक्षाञ्च न कुर्वीत कदाचन।
उपनीतं समाध्यन्ते मण्डले पूजयेच्छिवम्।
स्नपनं चांगशुध्यर्थं कारयेत्तु शिवाद्विजान्।
दीप्ते- शैवं पाशुपतञ्चैव कापालं लाकुलं तथा।
तन्त्रभेदमहं वक्ष्ये शैवादिनां यथाक्रमम्।
कामिकं योगजं चिन्त्यं कारणन्त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रञ्च अंशुमान्सुप्रभेदकम्।
वीरसिंहञ्च निश्वासं स्वायंभुवमथानलम्।
रौरवं वीरभद्रञ्च मकुटं विजयन्तथा।
चन्द्रज्ञानञ्च बिंबञ्च प्रोद्गीताललितं तथा।
सिद्धं सन्तानं सर्वोक्तं वातुलन्तन्त्रमेव च।
किरणं पारमेशञ्च अष्टाविंशति संख्यया।
शैवभेदं समाख्यातं शृणु पाशुपतं तथा।
प्राजापत्यं पाशुपतं प्रवृद्धं पद्मसंहिताम्।
वासिष्ठं काश्यपं कल्पं वाराहं भार्गवान्तरम्।
प्रफुल्लवासवञ्चैव वायुप्रोक्तं तथैव च।
वारुणं बाहुतस्पत्यं पारमेशञ्च षोडश।
माया पाशुपतं प्रोक्तं कापालं शृणु सुव्रत।
पञ्चार्द्धञ्च पुराकल्पं शिवगुह्यप्रमाणकम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सूक्ष्मादर्शनञ्चैव पद्मं कनकशैलकम् ।
निरुक्तञ्चैव सुप्रापं सिद्धार्थं हि चतुर्दश ।
कापालमेव माख्यातं लाकुलं शृणु चानल ।
लाकुलञ्च महाविद्यां क्रियाकालगुणोत्तरम् ।
वरहंसञ्च कौमारं विश्वसारोत्तरन्तथा ।
संवर्तलिंगकल्पञ्च नवधा भेद उच्यते ।
एते चतुर्विभेदेषु यथा येनैव दीक्षितः ।
तेनैव स्थापनादीनि तन्त्रेण समाचरेत् ।
तथा कारणे –
एतेषु शैवभेदेषु यदा येनैव दीक्षिताः ।
तन्त्रेण तेन कर्तव्या स्थापनादि क्रियास्तथा ।
वीरतन्त्रे एतेषामपि तन्त्राणां एकैकस्य तु संकरः ।
तन्त्रसंकरमेवोक्तं न कुर्यात्तन्त्रसंकरम् ।
तन्त्रसंकरदोषेण राजराष्ट्रं विनश्यति ।
अष्टाविंशति भेदेन शैवभेदो विधीयते ।
एतेषां संकरञ्चैव नदोषाय प्रकल्पते ।
कारणे – प्रारब्धं येन तन्त्रेण तत्तन्त्रेण समाचरेत् ।
नोक्तञ्चेदन्य तन्त्रेण तत्सर्वां च समाचरेत् ।
अनुक्तमविरुद्धञ्च तद्ग्राह्यं संहितान्तरात् ।
एकत्र वर्तमानायां क्रियायां कारणं किल ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



साचान्येन कृतं यत्तु तत्स्यादाचार्य संकरम् ।
वैगुण्याकरणस्यैव विरोधे सति यत्र तु ।
सा क्रिया तस्य शिष्येण कर्तव्यं तेन शास्त्रतः ।
अथान्येन कृतश्चेत्तु कर्तृणाशो न संशयः ।

सुप्रभेदे-

सिद्धान्तं सर्वसारं हि तन्त्रं शुद्धं शिवं स्मृतम् ।
वामञ्च दक्षिणञ्चैव मिश्रकञ्च त्रिधा अमी ।
शैव बाह्यास्समाख्यातास्ते तु शैवैः प्रपूजिताः ।

षट्सहस्रिकायाम्-

कालकापालकादीनां सर्वसंख्यान्तरेषु च ।
शैवस्सर्वाधिकारि तु न शैवमी कथञ्चन ।
शैवमूला ह्यागमस्तु श्रुतयश्च विशेषतः ।

तथा मकुटे-

शैवस्सर्वाधिकारी स्यात् स्वकीये चापरत्र च
अन्येषां स्वस्वतन्त्रेषु विद्यतेत्वाधिकारिता ।

इति श्रीमद्व्याघ्रपुरनिवासि वामदेवात्मजवेदज्ञानि
विरचित दीक्षादर्शे शैवलक्षण विधिः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



॥ अथाचार्यलक्षणविधिरुच्यते ॥

आचार्य लक्षणम् — श्रीमत्संहितायाम् —:

आचार्य लक्षणं ज्ञेयं आदितस्सर्व कारणम् ।
आचार्यमूलं सर्वं हि स्थापनादि च कर्म च ।
तस्मात्तल्लक्षणं पूर्वं प्रेक्षितव्यं विशेषतः ।
यदा लक्षण हीनेन स्थापनेनाग्रबुद्धिना ।
~~तेन कर्मकृतं चेत्तु तत्स्यादाचार्यसंकरम् ।~~
~~वैगुण्या करमस्यैव~~
तेन कर्मकृतश्चेत्तु तत्र देशाद्युपद्रवः ।
तस्मात्तल्लक्षणयुक्तेन कारयेत्पूजनादिकम् ।
आचार्येण प्रसन्नेन विशिष्टेन विशेषतः ।
आचार्यस्य विशिष्टस्य लक्षणानि शुभानि च ।
सर्वेष्वागमेष्वेवं कीर्त्यते कीर्तिकारणात् ।

चिन्त्यविश्वे —:

निर्वाणदीक्षितश्शिष्यो गुरुसंसृष्टि योगिकः ।
परार्थलिंगपूजाया अधिकारो न विद्यते ।

कारणे —: कुमारी हिमवन्मध्य पूतं कृष्णमृगोद्भवम् ।
जातस्तत्रादि देवस्य आचार्यवर उच्यते ।

तथा सर्वज्ञानोत्तरे —:

कृष्णवर्णमृगो यास्मिन् देवो सञ्चरते.. ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्देशा याज्ञिकं विद्यात् यत्रद्विप्रैरधिष्ठितः।
यत्र विप्रास्सदाचारा यतयश्च तपोधनाः।
सन्ति देवास्तथा देवा पुण्य देवान्तरादिशेत्।
तद्देशकुल संभूत आचार्यास्शास्त्रसम्मताः।

तथा कामिके-:

आर्यावर्तोद्भवश्श्रीमान् सर्वलक्षणसंमितः।
यत्रविप्रास्सदाचारा यतयश्च तपोधनाः।
सन्ति वेदास्तथा वेदा आर्यावर्त इति स्मृताः।

सर्वज्ञानोत्तरे-:

तद्देशा याज्ञिकं विद्यात् यत्रविप्रैरनुष्ठितम्।

ज्ञानरत्नावल्यां—

गंगारवो महीतापि गौतमी च सरस्वती।
यमुना कृष्णवेणी च कावेरी गण्डकी तथा।
गौतमी सरयुस्सिन्धु द्विविकेति चतुर्दश।
पुण्य नद्यस्तु विज्ञेयास्सर्व लोक हिता नहाः।
महद्भिर्मुनिभिस्संख्या याज्ञिकैश्च नवोधनैः।
वालिंगैस्स्वयंभूतैर्मुनिदेव प्रकीर्णकैः।
तत्तीरं संभवा देशा पुण्य देशामतास्सताम्।

सुप्रभेदे-:

आदिशैव कुलोद्भूता पञ्चगोत्र संस्थिताः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वशास्त्रार्थतत्वज्ञश्शिवज्ञान विशारदः।
शिवसिद्धान्त तत्वज्ञ शिवाग्नि गुरु पूजकः।
- - षोडशाब्दादूर्ध्वं वयस्सप्ततिरुच्यते।
क्रियादिज्ञानपर्यन्त मेकतन्त्रे सुनिश्चितः।
क्रियापादे तु निपुणश्चर्यापादे तु वर्तितः।
योगपाद कृताभ्यासो ज्ञानपादानुरञ्जकः।

मतंगे-: तन्त्रेस्वासनास्त्रय श्चकर्मज्ञः कृततत्परः।
अनुज्ञाताभिषिक्ताश्च तेत्वनुग्राहिका स्मृताः।

तथा पराख्ये-:

अतराद्वि क्रियोपेतो त्रैवर्ण उत्तमो गुरुः।
श्रद्धधान श्शुचिर्दक्षस्ती दीक्षा दीक्षितस्सुधीः।
शास्त्राधिकारी ~~कन्द~~ तत्व ज्ञस्तदुत्तर विधान वित्।
षडध्व कर्मनिपुणश्चण्डयागविधौ वरः।
अभिषेक विधानज्ञस्ता न शूलाग्निकर्मवित्।

सन्ताने-:

शिवागमज्ञो मतिमान् शिवपूजापरायणः।
शिवध्यानपरो नित्यं शिवशास्त्रविशारदः।
चतुर्वेदैः षडंगैश्च धर्मशास्त्रपुराणगः।
न्यायमीमांस शास्त्रज्ञो विद्यास्थान-चतुर्दश।
भाष्यं-चत्वार गवन्तु तथाष्टादश संज्ञितम्।

— —

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



योगशास्त्राणि सर्वाणि वेदान्तं ज्योतिषं तथा।
चतुष्षष्टिकलाश्चैव षट्कर्माणि तथैव च।
आ - र्वेदोथ सामुद्र्यं सोमसिद्धान्तमेव च।
केवलं लाकुलञ्चैव पाञ्चरात्रं तथैव च।
ऽतत्सिद्धान्तमार्गञ्च ज्ञात्वा वैदेशिको भवेत्।
कामिके-: संप्रदाय विशुद्धात्मा गुरुपुत्रः प्रशंसितः।
लिंगादिक्षमवेत्ता च विभक्त ... ।
कामिकादि शिवज्ञानसिद्धियुक्तो विशारदः।
मतंगे-: हेयोपादेय तत्वज्ञस्तदर्थे तु व्यवस्थितः।
क्रियावानिपुणश्चैव वीतरागो व्यमत्सरः।
वरतत्वे समायुक्तश्शिवशासनतत्परः।
सर्वशास्त्रार्थकुशलः पशुशास्त्रपराङ्मुखः।
शिवशास्त्रैकचिन्तात्मा सर्वप्राणहिते रतः।
वास्तु विद्याकृताभ्यासश्शाल्योद्धारविशारदः।
सर्वाचारसमायुक्तस्तपस्वजनवत्सलः।
रौरवे -: ब्राह्मणः पुण्यदेशोत्थस्संपूर्णावयवश्शुचिः।
पदवाक्य प्रमाणज्ञस्संहिता पारगो गुरुः।
लक्षाध्यायी गुरुश्रेष्ठो भुक्तिमुक्ति फलप्रदः।
मध्यमस्तु तदर्थज्ञस्तत्पादज्ञो धमो भवेत्।
संहिता पारगो वाथ लक्षाध्याय्युपदेशा गुरु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



संहितास्याच्चतुष्पाद युक्ता कामिकपूर्विका।

तथा किरणव्याख्याने रामकण्ठाचार्येणाप्युक्तम् -

पादानां प्रविभागेन चतुर्णां नामधेयतः।

सिद्धिः प्रदर्श्यते यस्मिन् संहिता साभिधीयते।

चिन्त्यविश्वे -:

ज्ञानयोगक्रियाचर्या सम्यगाचारयेद्यतः।

तस्मादाचार्य इत्युक्तस्सर्वभूतहितार्थे।

आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यतः।

स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते।

तथा निश्वासे -:

स्वयमाचरते यस्मादाचारन्दर्शयेति च।

उच्यते वि हि शास्त्राणि आचार्यस्तेन पस्यते।

कालोत्तरे -:

सर्वलक्षणहीनोपि शिवशास्त्रार्थविद्गुरुः।

स्थापनादिषु सम्प्रोक्तश्शिवशास्त्रेषु षण्मुख।

सर्वलक्षणसंपन्नश्शिवशास्त्रं न विन्दति।

न योगी न व्रतस्नातो नाचार्य उच्यते।

निश्वासे -:

आचार्यो मन्त्रतन्त्रज्ञ ऊहापोहविशारदः।

श्रुतिस्मृतावभिज्ञश्च जितक्रोधो जितेन्द्रियः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



सर्वक्लेश सहो धीरो मन्त्रतन्त्र महा हृदः।
मन्त्रकल्पसु वेत्ता च प्रायश्चित्तविशारदः।
एवं बोधयते नित्यं शौचाचार पदेशतः।
सर्वलक्षण हीनोपि ज्ञानवान् गुरुरिष्यते।

देविकालोत्तरे-:

सर्वलक्षणहीनोपि ज्ञानवान्गुरुरिष्यते।
वर्णावर्ण विचारोयः स नरः पातकी भवेत्।
शिवशास्त्रैकचित्तात्मा परशास्त्र पराङ्मुखः।
अनुग्रहैकचित्तस्तु विनीतात्मा विमत्सरः।
प्रतिष्ठा कर्मवित्प्राज्ञो दीक्षाकर्मसुपेशलः।
शिव सद्भाव तत्वज्ञस्स एव स्थापकस्मृतः।

वीरतन्त्रे-:

लिंगस्थापन योग्यत्वात् स्थापको नाम उच्यते।
आचार्यश्शिव एवाह शिव आचार्य उच्यते।
अभेदं यो विजानाति स वर्णाद्भिन्न उच्यते।

तथा कामिके-:

आचार्यश्शिव एव स्यादनयोरन्तरन्नहि।
यः पश्येदनयोर्भेदं सो यो गतिमाप्नुयात्।

निश्वासे-: उभयोरन्तरं नास्ति देशिकस्य शिवस्य तु।
सर्वोकार वि ध्य सनादोस्य निष्कलः।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्मिन्सर्वाणि विद्यन्ते सर्वैव च परशिवः।
सर्वविद्यासु संपूर्णस्सर्वविद्यार्थकोविदः।
आचार्यस्य च मन्त्रस्य शिवज्ञानस्य शिवस्य च।
नानात्वं नैव कुर्वन्ति अनन्तेश्चादयशिवाः।
सर्वे मन्त्रात्मका देवा सर्वे मन्त्रात्मकाश्शिवाः।
शिवात्मकेनमन्त्रेण शिवयागे तु पूजयेत्।
अप्राप्य शिवभावं पठन्तश्शैव संहिताम्।
अज्ञात्वा कुरुते दीक्षां शिष्याचार्यौ व्रजत्यधः।
अविदित्वा स्वयं सम्यग् क्रियां यः कुरुते भिषक्।
163a आतुरो दुःखमाप्नोति वैद्योपि न फलं लभेत्।
ज्ञानविज्ञानकुशलस्सर्वावस्थांगतोपि यः।
स मोचयति पाशेभ्यो ज्ञाननिर्धूतकिल्बिषः।

तथा क्रिया कर्मकाण्डे-:

सद्देशप्रभवस्सुमूर्तिरमलज्ञानक्रिया तत्परः।
क्षान्तस्सत्कुलजो विरुद्धहृदयस्सिद्धान्तवेदी गृही।
भेदज्ञश्च षडध्वनामपि तथा दीक्षा प्रतिष्ठा विधौ
सिद्धस्सैद्ध्यनपेक्षक शिवमय ध्यानो गुरुश्शोच्यते।

अत्राधिकारिनिरूपणत्व विधिरुच्यते-विप्रादीनां दशानां गुरुत्वमुक्तम्। तथा चिन्त्यविश्वे-:

विप्रादिषु यजुर्वेद मण्डलेमादिषट्सु च।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



एतेषां दशजातीनां आचार्यत्वं विधीयते

तथा कामिके-:

चत्वारो ब्राह्मणाद्याश्च अनुलोमाश्च ये मताः।

सर्वज्ञानोत्तरे-:

ब्रह्मक्षत्रियविट्-श्रेष्ठा दीक्षामध्यास्तु पादजाः।
त्रिवर्णिकात्क्रमात् मर्त्यं अधमास्त्वन्यजातिनाम्।
दीक्षानैव विधातव्यः कुर्याच्चेल्लोभितो गुरुः।
नरकं यात्यनेनैव दीक्षितो न फलं लभेत।

चिन्त्यविश्वे-:

नवखण्डेषु सर्वेषु भारतेषु येन च।
जातिभेदमिदं कल्प्यमन्यदेशेषु नास्तितत्।
तस्मात् षट्कल्पनामात्रं जातिभेदमिति क्रमम्।
उच्चनीचक्रमादत्र जातिभेदश्च कल्पितम्।

सुप्रभेदे-:

सवर्णप्रथमं विद्यात् अंबष्ठद्वितीयक्रमम्।
पारशैवस्तृतीयस्तु जायन्ते ब्राह्मणोद्भवाः।
मङ्गुरूत्युग्रनामा च जायेते तौ नृपस्य तु।
वैश्यस्य चूचूको ज्ञेयो अनुलोमाश्षडेव तु।
संप्राप्य विधिना विप्रो रक्तकन्यां समन्त्रकम्।
तत्र जातस्सवर्णस्तु अनुलोमेषु पूजितः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तत् ब्राह्मणस्तु संयोगो वैकर्मा-चथर्वण स्मृतः।
वीतस्त्री विप्रसंयोगादंबष्ठो नाम उच्यते।

।चिन्त्यविश्वे -:

द्विजोनोपनितं कुर्यान्नित्यं कर्मसु तत्परः।
सवर्णश्च नियोगेन भिषक् कुर्यान्ततः परम्।
विप्रस्य शूद्रकन्यायां जातः पारशवः स्मृतः।
कुलशास्त्रोक्तमार्गेण भद्रकाळीं समर्चयेत्।
गृहेस्हे परान्हे तु भिक्षान्देहीति वादयेत्।
ऽवं समाचरेन्नित्यं यावदामरणान्तिकम्।
नृपस्य वैश्यकन्यायां जातो मद्गुकरुच्यते।
नृपभाण्डा न कर्तव्यं वैश्यं प्रत्युपजीवनम्।
नृपस्य शूद्रकन्यायां जातश्चोग्र इति स्मृतः।
विप्रक्षत्रियविट्शूद्र शुश्रूषां कारयेत्सदा।
नृपाज्ञया तु दण्ड्येत दण्डयेदविचारतः।

सुप्रभेदे-:

कृष्णायां वीतसंयोगाज्जातश्चूचुकऽव च।
शाककाष्ठतृणादीनि वन्यजातीव वृत्तिकाः।
ब्राह्मणाक्षत्रिया वैश्याश्शूद्राश्शुद्धकुलोद्भवाः।
आचार्यास्ते तु विज्ञेया नान्येषान्तु कदाचन।

तत्रैव जातिनिर्णये -:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ब्राह्मणा क्षत्रिया वैश्या श्शूद्राश्चैवं प्रकीर्तिताः।
इतेषाञ्च कुर्वाणानामाचार्यत्वे नियोजयेत्।

सर्वज्ञानोत्तरे-:

ब्राह्मणः क्षत्रियो वैश्य श्शूद्रा श्शूद्रास्तु साधकाः।
सर्वस्यादानुपूर्व्येण आचार्यत्वं विधानतः।

परारव्ये-:

सर्ववर्णानतो विप्रः क्षत्रियस्तित्रयं गुरुः।
वैश्य श्शूद्रद्वयश्चैव दीक्षयेदक्रियार्थ वित्।
ब्राह्मणस्सर्व जातीनां सदानुग्राहक स्मृतः।
स्वजाति पूर्वमाचार्यास्त्रय श्शेषा नृपादयः।
त्रिषु वर्णेषु ये युक्तास्ते च तद्वर्णिनो मताः।
दीक्षा कार्या तु सर्वेषां तद्भक्तविषयोगिनाम्।
त्रयाणामपि वर्णानां न तु श्शूद्रान्त्य जातिषु।
इतत्परारव्योक्त वचनमसत् श्शूद्रविषयमेव।

तथोक्तं वायव्य संहितायां-:

असच्छूद्रान्त्य जातीनां पतितानां विशेषतः।
तथा संकरजातीनां नाध्वशुद्धिर्विधीयते।
तेत्यकृतिमभावाश्चेत् शिव परम कारणे।
पादोदक प्रदानाद्यैः कुर्यात्पाशविशोधनम्।
अत्रानुलोमजातये युक्ता ये वा द्विजातिषु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तेषामव्व विशुध्यादि कार्यमात्र कुलोचितम् ।

सुप्रभेदे -:

अमद्यपास्तु ये शूद्रा शैवाचार्यक्रियादराः ।
शिवभक्ताश्च ये तेषां दीक्षा कार्यान्यथा नहि ।

तथा पराख्ये च -:

अमद्यपः कुलीनश्च नित्यं धर्म परायणः ।
शूद्रक्षत्रियवत् ज्ञेयः शेषा निन्द्यास्ततो ऽधमाः ।

वायव्य संहितायाम् -:

शिवशास्त्र समायुक्ताः पशुशास्त्रपराङ्मुखाः ।
ब्राह्मणादि चतुर्वर्णा आचार्यास्तु प्रकीर्तिताः ।

कालोत्तरे -:

दीक्षा क्रियावति प्रोक्ता ब्राह्मणादि चतुष्टये ।
संस्पर्शात्कारुकादीनां हौत्रीन्तु परिवर्जयेत् ।
गवश्चानुग्रहः कार्यश्चतुर्भिरपि दैशिकैः ।

कामिके -:

इत्येवं कथिता प्रोक्ता सर्वपाप प्रमोचिनी ।
चत्वारो विद्या अनुलोमाश्च ये मताः ।
न्यायजामूढजात्यां वा दीक्षायामधिकारिणः ।
अन्त्यजानां न हौत्री स्यात् किंतु दीक्षां तु चाक्षुषी ।

किरणे गरुडः -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मध्ये वर्ण-चतुष्कस्य गुरुत्वं कस्यचिद्वद।

ईश्वरः — चतुर्णामपि वर्णानां आचार्यत्वमिहोच्यते।
ब्राह्मणादि चतुष्कस्य द्विजोनुग्रहको मतः।
त्रयाणां क्षत्रियो द्वयोर्वैश्यश्शूद्रस्स्वयोनितः।
अनुग्रहस्स्वभार्यादेर्यो यथा परिवर्जयेत्।
एवञ्चानुग्रहः कार्यश्चतुर्भिरपि देशिकैः।
निरपेक्षा यतो मन्त्रो यथा तद्भावना तथा।
यथा स्थितेन भावेन मन्त्राः कुर्वन्त्यनुग्रहम्।
यतस्तेनान्त्यजस्यापि किन्तु दीक्षातु मानसी।
कारुकाणाञ्च संस्पर्शान्न हौत्रीं परिकल्पयेत्।
ज्ञात्वा तेषां परं भक्तिं नेत्राच्चोदनमाचरेत्।

सूतसंहितायाम् —
अन्येषामपि सर्वेषां नराणामपि पुंगव।
एतानेव तदन्दृष्ट्वा प्रणामस्तस्य कीर्तितः।

वातुले —
अन्त्यजातिस्तु सर्वेषां स्थूपिं दृष्ट्वा समाचरेत्।

अंशुमति — स्थूललिंगं विमानञ्च सूक्ष्मलिंगं सदाशिवम्।
बलिपीठं भद्रलिंगञ्च लिंगत्रयमिहोच्यते।

सूक्ष्मे — देहं प्रासादमित्युक्तं देहीलिंगमिति स्मृतम्।
उभयोरन्तरं नास्ति तस्मादित्थं प्रभावयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



व्याप्य व्यापकरूपेण लिङ्गमेव विमानकम् ।
हेमादिस्थूपिपर्यन्तं शिवरूपमिति स्मृतम् ।

किरणे - सर्वपापविनाशाय भजेद्देवं शिवालयम् ।

मतङ्गे - लिङ्गं माहेश्वरं प्रीत्या नमस्कारेण येऽर्च्य ।
व्रजन्ति नराः शूद्रास्तेऽपि षड्गणेश्वराः ।
रमन्ति विविधैर्भोगैः प्राप्य स्थानमुमापतेः ।
शिववत् शिवभक्तास्तु द्रष्टव्या श्रीवकांक्षिभिः ।
संस्थितास्च शिवैर्मन्त्रैर्गुरूणां शिवमूर्तिना ।
सर्वे समानधर्माणस्तथाव्येवोच्यते विधिः ।

अत्र प्रकृतमुच्यते कामिके-

सर्वदेवार्चने विप्रस्त्वादिशैवो गुरुर्मतः ।
विप्राद्यस्त्रयो वर्णा दीक्षायां स्थापनेऽपि च ।
ब्राह्मणः क्षत्रियादीनां क्षत्रियश्शूद्रवैश्ययोः ।
वैश्यश्शूद्रस्य दीक्षायां स्वस्वजातावपीष्यते ।

तथा बहुसहस्रिकायाम्-

चतुर्णामपि वर्णानां आचार्यत्वमिहोदितम् ।
सर्वेषाञ्चैव वर्णानां द्विजोऽनुग्राहको मतः ।
त्रयाणां क्षत्रियो द्वाभ्यां वैश्यश्शूद्रस्स्वयोनिजे ।
एवञ्चानुग्रहः कार्यश्चतुर्भिरपि देशिकैः ।

विप्रादेः त्रयाणामाचार्यत्वं चललिङ्गप्रतिष्ठायामधिकारोस्तीति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रुद्रो नैष्ठिकश्चेत् बाणलिंग प्रतिष्ठायामधिकारि कामिके-

स्वार्थेष्टौ चललिंगस्य प्रतिष्ठायां तथास्त्विमे ।
रुद्रोऽपि रुद्रदीक्षायां स्वार्थे चललिंगके ।
बाणलिंगेक्षणे वापि स्थापको यदि नैष्ठिकः ।
सनाद्याखिलमन्त्रेषु शिवज्ञाने विशेषतः ।
रुद्रस्यापि गृहस्थस्य नित्येष्टावेव योग्यता ।
अत्रापि नादरहितै मन्त्रैरेव प्रकीर्तिताः ।

केचिन्नादशब्दस्य प्रणवमिति वदन्ति तदयुक्तम्-हकारस्य नाद इति श्रूयते । तथा कारणे

नादो हकारमित्युक्तं नादाद्यन्तु सकारकम् ।
क्रूराक्षरो क्षकारस्यात् कलार्णन्तु मकारमिति ।
तथा मन्त्र नैकण्ठकैरप्युक्तम् ।

गगनं मकुटव सर्वं व्योममाया शिवान्तं नभसि लकुल लक्षं पञ्चधं प्राणघोषम् । शिव हृदयमपि हृद्बीज-नादाख्यमाहुश्शिव मनुभुवनेशो निंबरं लिंगमाहुः ॥

कामिके भिषेकत्वयोग्योयं किं पुन स्थानादिषु । अत्र रुद्रस्य गृहस्थस्याभिषेक निषेधः । आचार्याभिषेक प्रसंगे- महापुरस्य सौम्यायामभिषिञ्चेत् द्विजानथ ।

पूर्वायां क्षत्रियां ब्रह्मन वैश्यानान्तु यमस्य तु ।
रुद्रांस्तु पश्चिमेशायां सर्वा ऐशेदिक् स्थितान् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



एवं प्रकथितो ब्रह्मन् पौष्करे पारमेश्वरे ।

तथा कालोत्तरे-:

अभिषिक्तोऽयमेवं हि ब्राह्मणः क्षत्रियोऽथवा ।
वैश्यो वाप्यथ शूद्रो वा प्रतिष्ठाद्यधिकारिणः ।
एतेषु न विकल्पोऽयं कर्तव्यं स्यान्मनीषिभिः ।
श्रावयेति तथाध्यापयेत प्रतिपत्तिं समाविशेत ।

इति गृहस्थस्य शूद्रस्याभिषेक प्रतिपादनात् न चास्य वचनस्य नैष्ठिकविषयशूद्रत्व मास्त्विति वाच्यम् ।

चतुर्णामपि वर्णानां लिंगिनां गृहिणामपि ।
आचार्यत्वं शिवे नास्ति सिद्धान्ते प्रतिपादित-

मित्यादिवचनैस्सर्ववर्णेष्वपि ब्रह्मचारि गृहस्थयोर्गुरुत्व-प्रतिपादकैर्विरोधात् । तस्मादेवं विधबहुवचनास्य नैष्ठिकेनुसारेण कामिकस्थगृहस्थशूद्राभिषेकनिषेध-वचनन्तस्य स्थापनानिषेधप्रतिपादकस्य तदेतयदि कैमुदिकन्यायेन साधकमित्यवश्यमभ्युपेयम् । ननु चतुर्णामपि वर्णानां गुरुत्वं तदनुपपन्नम् । ब्राह्मणस्यैवा-चार्यत्व प्रतिपादकवचनादुपालंभात् । यथा मेरुतन्त्रे-:

अत्र किञ्चिद्विशेषोऽस्ति क्षत्रियो वैश्य शूद्रकात् ।
एतेषु सर्वदादेपि दीक्षां नैव समारभेत चरेत् ।
क्षत्रियेण दीक्षिताः केचित् केचिद्वैश्येन दीक्षिताः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



केचिच्छूद्रेण देवेशि दीक्षिताश्च यमालयम् ।
गत्वा जन्मशतं कोटिं विशन्ति नरके ध्रुवम् ।
तस्माद्वेदा विरुद्धस्याददीक्षां विप्रस्य कारयेत् ।

मोक्षकारिकायाम् -:

साधकत्वे तु दीक्षायां चतुर्णां वर्णिनामिह ।
अधिकारो गुरुत्वे तु ब्राह्मणस्यैव कीर्तितः ।

स्वायंभुवे -:

अथाचार्यवरश्रीमान् अग्रजन्मा सुपेशलः ।

मृगेन्द्रे -: द्विजाग्र्यं पुण्यदेशजमिति । अथ चतुर्णां वर्णानां गुरुत्वमिति चेन्मैव मेवानि वचनानि ब्राह्मणस्य गुरुत्वे मुख्यत्व प्रतिपादकानि नेतरवर्णगुरुत्व निषेधपराणि । न-चतुर्हि क्षत्रियादिसकाशाददीक्षितस्य निरयगामित्वश्रवणं कथमिति वाच्यम् - तस्यापि वचनस्य विप्रासंभवे इतरसकाशाददीक्षानिषेधपरत्वं निकृष्टवर्णादुत्कृष्टवर्णस्य दीक्षानिषेधपरत्वं वा अन्यथा सर्ववर्णवर्णानां स्व-वर्णानुपूर्व्येणाचार्यसंभव प्रतिपादकवचनानामप्रामाण्य प्रसंगात्तस्मादुभयवचनप्रामाण्यं व्यत्यया ब्राह्मणस्य सर्वस्य स्ववर्णेष्वपि मुख्य गुरुत्वम् - क्षत्रियादीनामपि ब्राह्मणासंभवे स्ववर्णानुपूर्व्येणाचार्यत्वमित्यपि व्यव-स्थवस्था सर्वैरभ्युपेयेति ज्ञावमेव सर्वपद्धतिकृद्भिराचार्यै

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



रपि व्यवस्थाप्य प्रतिपादितः। किरणे-:

सर्वानुग्राहकः प्रोक्तः शिवः परमकारणः।
द्विजादयस्तु ये वर्णा न्यूनाधिकतया स्थिताः।
संस्कारोपि यद्देवात् फलमेवं न किं भवेत्।
संस्कारो वामतस्तेषां न्यूनाधिकतया कथम्।

भगवान्- न जातेर्न शरीरस्य संस्कारः प्राणिनो मतः।
यदि जाते स्सचैकस्मिन् दीक्षा - - -

16 Ma प्रासन्तेन न जातेस्स्वकलत्वान्न ततो मृतः।
चिन्मात्रानुग्रहः प्रोक्तस्सर्वानुग्राहकाच्छिवः।

आश्रमचतुष्के ब्रह्मचारी गृहस्थाश्रमयो र्गुरुत्वं न वान-
प्रस्थ सन्यासिनोः। तदुक्तं सर्वज्ञानोत्तरे-:

द्वावेवाश्रमिणौ गृहस्थब्रह्मचारिणौ।
लोकानुग्रहकर्तारौ परिव्राट्तापसौ नहि।

तथा कालोत्तरे-:

गृहस्थस्सर्ववर्णेषु श्रेष्ठो गुरुरुदाहृतः।
नैष्ठिकस्त्वधमो ज्ञेयो भौतिकस्तु विशेषतः।
वानप्रस्थयतीनान्तु गुरुत्वं नेष्यते सदा।

षट्सहस्रिकायाम्-:

शृणुषण्मुख तत्वेन भोगमोक्षौ यथास्थितम्।
ब्रह्मचारी गृहस्थश्च - - देशिकोत्तमः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



दीक्षा प्रतिष्ठयोरेतौ भवावप्यधिकारिणः।
किन्तु मोक्षैक युक्तानां विभूति र्विमुखात्मनाम्।
ब्रह्मचारी गुरुर्ज्ञेयो गृहस्थश्चाद्विधास्त्विह।
पूर्ववर्णाश्रमाणां हि स्वेस्वे कर्माणि तिष्ठताम्।
उपायन तत्वज्ञानानाम्मोक्षस्साधारणस्मृतः।
यतीनान्तु यदर्थन्तु गृहस्थैरथ मातृके।
गृहस्थ एव तैरेव धाज्ञार्थिभिरुपासते।
गृहस्थादितरेषान्तु नास्ति भोगाधिकारिता।
तस्माद्गृही गुरु कार्यो भोगमोक्षाभयार्थिभिः।
तथा सन्ताने –:
गृहस्थश्चोत्तमो विद्यात् ब्रह्मचारी यथा भवेत्।
क्रियादिज्ञानपर्यन्तमेकतन्त्रे दृढव्रतः शुचिः।
कश्मीरतन्त्रे –:
रक्तवर्णमयन्देहमुत्तमं श्याममध्यमम्।
सर्वकृष्णमयन्देहन्त्वधमे गुरू नहि क्षणात्।
सुप्रभेदे –:
गृहस्थश्चोत्तमो ज्ञेयो भौतिकब्रह्मचार्यपि।
वीरतन्त्रे –: गृहस्थश्चोत्तमं विद्यादथवा ब्रह्मचारिणम्।
सान्तानिकगृही श्रेष्ठो गृहस्थस्तदभावतः।
भौतिके ब्रह्मचारी वा दैविको गृहमेधिनाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



नैष्ठिको नैष्ठिकेषु स्यात् भुक्तिमुक्ते क्रमान्मतः।

किरणे सान्तानिकलक्षणमुक्तम्।

यस्तु पूर्वाश्रमस्थोपि संस्कृतश्शिवदीक्षया।
सन्तानमप्यसन्तानमर्पयन्त्यधिकारिणी।
सपूर्वापरसन्तान धर्मभावभयान्तकः।
सान्तानिक गुरुः प्रोक्तः गृहस्थो देशिकोत्तमः।
गृहस्थं चोत्तमं विद्यादथवा ब्रह्मचारिणम्।
गृहस्थो देशिकश्रेष्ठो भोगमोक्षप्रसिद्धये।

कामिके-: सृष्ट्यनन्तरकाले ये दीक्षिताः कौशिकादयः।
शिवेन तत्कुलोत्था स्युश्शैवास्सान्तानिकास्त्विति।
सान्तानिको गुरुश्रेष्ठो गृहस्थस्तदभावतः।
भौतिको ब्रह्मचारी वा देशिको गृहमेधिनाम्।
नैष्ठिको नैष्ठिकेषु स्यात् भुक्तिमुक्ते क्रमान्मतः।
भुक्तिमुक्ति प्रसिद्ध्यर्थं गृहस्थो गुरुरिष्यते।
सर्वानुग्राहकः प्रोक्त स्सान्तानिकगुरुस्सदा।
अनुलोमक्रमाद्वा स्यात् प्रतिलोमस्तु नेष्यते।

चिन्त्यविश्वे-:

नैष्ठिको नैष्ठिकांश्चैवं गृहस्थान्दीक्षयेद्गुरुः।
भौतुकस्तु गृहस्थांश्च नान्यो दीक्षां समाचरेत्।

शैवसन्यासदीपिकायाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



भावद्रव्यस्य सत्यागे तेन सन्यासिनो यदा ।
दीक्षास्थापनयोस्तस्मादेते नैवाधिकारिणः ।
तथापि गुरवो ज्ञेयास्सन्यस्तानां प्रदर्शने ।

क्रियासारपद्धत्याम् –:

ततो यो नैष्ठिकाचार्य स्वस्वजातिपुरस्सरान् ।
मुमुक्षूनपि सन्यास्तु दीक्षायेदाविलाविताम् ।
दीक्षां करोति कृपया जन्तूनां भुक्तिमुक्तये ।
गुरुरेवं विधः स्यातादिशिववत्पूजयेत्सदा ।
दीक्षाप्रतिष्ठा यत्किञ्चि तेन पाल्यं प्रयत्नतः ।
दीक्षोपदेशकृद्यस्मात् गुरुभिस्तत्र प्रकीर्तितः ।
व्याख्यानं कुरुते पुंसां देशिकस्तेन लभ्यते ।
व्याख्या पूजा प्रतिष्ठादि करोति भाविनां सदा ।
आचार्यः कथ्यते परशिव्योपदेशातः ।
इत्येवं त्रिविधं प्रोक्तं आचार्यत्वमिहाध्वतः ।

चिन्त्यविश्वे –:

रक्तमयं देह उत्तमं श्याममध्यमम् ।
सर्वकृष्णमयं देहं नयेद्दूरेणं च दाणात् ।

विशेषउक्तस्तथया –:

विप्रादिषु चतुर्ष्वेवमनुलोमादिषट्सु च ।
एतेषां दशजातीनां आचार्यत्वं विधीयते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



लोकानुष्ठानवशान्तत्तज्जातिभेदश्च निर्दिशेत् ।
जात्या चारेण मान्येषां वचनस्य च गौरवात् ।
शैवे तत्त्वन्यजातीनां अभिषेकं न कारयेत् ।
पतितानान्यवेक्ष्यैव शिवाग्नि न विधीयतः ।
तस्माद्यतेश्च कर्तव्यं शैवमार्गे विशेषतः ।
आचार्याणाञ्च वै यतीनां किञ्चिदन्तरम् ।
परहंस यतीनाञ्च तपस्सन्यासिनाञ्चये ।
अनयो रग्निकार्येषु योग्यत्वं न विधीयते ।
होमं विना तयोरेवमभिषेकं विधीयते ।

इति श्री व्याघ्रपुरनिवासि वामदेवात्मज वेदज्ञानविरचित दीक्षादर्शे आचार्यलक्षणविधिः ॥

—— ० ——

॥ अथ वर्ज्यगुरुलक्षण विधिरुच्यते ॥

वर्ज्यगुरु लक्षणम् तथा चिन्त्यविश्वे श्री नन्दिकेश्वरः-:

भगवन्देव देवेश किंनामाचार्य लक्षणम् ।
वदस्वलोकरक्षार्थमस्माकञ्च विशेषतः ।

ईश्वरः कामिके-:

कामिकादि शिवज्ञानं वेदार्थज्ञानमेव च ।
समं यो मन्यते मोहात्तं प्रयत्नेन वर्जयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



~~प्रयत्नेन वर्जयेन्तु~~ देवलश्च स्तथाङ्गष्ठमपोह विवर्जितम्।
समानगोत्रसंबन्धं कुसुमाक्षञ्च वर्जयेत्।
परिवेत्ता परिवित्ता च देवलञ्च पुनर्भवम्।
अभक्ष्य भक्षणञ्चैव कुण्डश्चर्मांकुरन्तथा।
... वांगमदत्तञ्च आरूढपतनं तथा।
अलसं प्रक्षालनं चैव व्रात्यं वेश्यापतिं तथा।
असत्शास्त्रपरं क्लीबं शवित्तं सूतकं तथा।
असब्बसानिर्नपारदारिकं च बलीपतिम्।
चित्रकं गायकञ्चैव ... कञ्च विवर्जयेत्।
अन्यायेन बिव ... हारिणं तद्दूषितम्।
अल्पविद्या मात्रिकं विरूपञ्च विवर्जयेत्।
गुर्वाज्ञालंघनं चापि परिशेषविचारकः।
अन्धं काणञ्च पंकुञ्च तथा दन्तुरमेव च।
16 मb काणं केकरविंकञ्च भूश्मश्रुञ्च कूर्चजम्।
महोदरं बृहत्कुक्षिं प्रतीवक्तं विवर्जयेत्।

चिन्त्यविश्वे -:

विज्ञानदीक्षाक्रम रहितो गुरुभक्तिविवर्जितः।
ईर्ष्याभिलापी च सर्वद्रव्याभिलाषितः।
गुरुशुश्रूषणाहीनो गुरुनिन्दासमान्वितः।
गुरोरिष्टकारी च ज्येष्ठन्मन्त्रसमानकः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



क्रोधलोभजलोन्मेष .. शून्य डंभवेपकः ।
अन्यतो हिंसकोलुब्धस्तेयो मूर्खोपवादकः ।
चपलं कश्कै दुष्टक्षुद्रकर्मपरिग्रही ।
अहं कारिधूकृतघ्नश्च समयाचारदूषकः ।
ज्ञानयोगविनिर्मुक्तक्षय कुष्ठादिरोगवान् ।
.. र्तको विषयासक्तो दुर्बोलः कै .. था ।
चोराज्ञानी च दुर्मार्गी भक्षको दुर्मुखस्तथा ।
स्वयंभुवा वनष्टव्रताश्च वर्ज्यास्ते तथोक्तम् ।
शिवदीक्षा विधानस्तु शास्त्रवान् तीव्रपावकः ।
शिवादीन् पूजयेन्नित्यं स्वमू .. स्त्रलायम् ।
अन्यलिंगं परित्यज्य .. गं सर्वमाश्रयेत् ।
सपुनर्भूरिति विज्ञेयस्तज्जाता कौलिका मता ।
तवतो गुरवो ज्ञेयौ वध्या द्यावाचारपालकाः ।
आचार्यान्तु परिभ्रष्टा स्त्याज्यास्ते भग्नन्नालिंगकाः ।
भग्नव्रता समु .. ासौ भस्मांकुरस्मृतः ।
.ज्जाता .न्निराज्ञेया स्तज्जाताः कौडिका स्मृताः ।
दीक्षास्थापनयोरेते सन्त्याज्याश्शुभकांक्षिभिः ।
ऽतैः प्रतिष्ठितं लिंगं भुक्तिमुक्त्योरसाधनम् ।
ऽवमादिगुणैर्युक्तो न पूज्यो हि महीतले ।
अस्यैवाचार्य नामत्वमाभिषेकं न कारयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रमादादभिषेकन्तु कृतश्चेद्दोषभाग्भवेत् ।

सुप्रभेदे-: ईदृशान्वर्जयित्वा तु सर्वकर्म बहिष्कृतः ।

यदि मोहेन कुर्वीत सान्निध्यं न कदाचन ।

वीरतन्त्रे-:

गतैस्तु लक्षणैर्हीनः पूर्णांगो मुक्तिपादपि ।

इति व्याघ्रपुरनिवासि वामदेवात्मजवेदज्ञान विरचित दीक्षादर्शे वर्ज्यगुरुलक्षण विधिः ॥

---

॥ अथ शिष्य लक्षणमुच्यते ॥

तथा चिन्त्यविश्वे-:

अथ वक्ष्ये विशेषेण शिष्याणाञ्चैव लक्षणम् ।

शिष्य लक्षणम् अहिंसासत्यमस्तेय क्रोधलोभाविवर्जितः ।

सहिष्णुस्सर्जितस्त-तत्सर्वक्लेश विवर्जितः ।

तथोक्तं पौष्करे-:

परेषु दुःखानुत्पादो हिंसाद्रोहशतैरपि ।

सा न हिंसेति विज्ञेया सा हिंसा शास्त्रचोदिता ।

आत्मतो भीतितो वापि नातथ्यं सत्यमुच्यते ।

इत्यादि तत्र द्रष्टव्यम् । श्रीमद्रौरवे-:

ब्राह्मणो व्रत संपन्नो क्षत्रिये धर्मपारके ।

वैश्ये च सत्क्रिया युक्ते शूद्रे शुश्रूषणान्विते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुरुदीक्षां प्रकुर्वीत शास्त्रदृष्टेन कर्मणा।

तदुक्तं पौष्करे-:

नोपवास तीर्थानां श्रुताध्ययनयोरपि।

श्रद्धया करणं पुंसां शुश्रूषा परिकीर्तितः।

कारणे-: चातुर्वर्णोत्पन्नान् शिष्यान् तथा चैवानुलोमजान्।

सुप्रभेदे च-:

अनुलोमाश्च षट् प्रोक्ताः प्रतिलोमास्त्रयस्मृताः।

सूतश्च मागधश्चैव आयोगश्च प्रयत्नतः।

चिन्त्यविश्वे-:

ब्राह्मणादि-चतुर्णान्तु रोगान् ज्ञात्वा चिकित्सयेत्-

सेनापत्यं चमूनाञ्च कुर्यादाजीव संयुताः।

एते पञ्च कुले जाता दीक्षायामुत्तमा भवेत्।

सवर्णादत उत्पन्ना पञ्चैवा ते नुलोमकाः।

एते दीक्षाविधौ तत्र मध्यमास्ते विशेषतः।

चतुर्दशञ्च संप्रोक्ता अनुलोमकसंकरी।

कुल कुंभकारो दीक्षायामपरोधमः।

वृथा पुत्राश्च दशका दीक्षा यामधमाधमाः।

उत्तमानाञ्च मध्यास्तु पञ्चपञ्चाधमामनुः।

अधमाधमकाश्चापि दश प्रोक्ता विशेषतः।

चतुस्त्रिंशञ्च ये मता कुल संबान्धिनस्तथा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



हीनाचारयुताश्चापि क्रूरकर्मयुता अपि ।
हीनवृत्तियुता येपि दीक्षायां वर्जयेद्गुरुः ।
दीक्षाद्यबीजातीनां अकल्पेन च भस्मना ।
त्रिपुण्ड्रांकितदेहाश्च रुद्राक्षपरिधारणे ।
अमन्त्रकास्स्वयं पश्चात् शिवदीक्षायुतान् परान्
लिंगिनश्च सदा भक्त्या दूरतः प्रणमादिकान् ।
कृत्वा शिवालयाद्यश्च स्वस्वजात्यनुसारतः ।
यथोचितन्तथा कुर्यान्तेन स्वर्गमवाप्नुयात् ।
पश्चात् जन्मौ तु संजातो दीक्षया मोक्षमाप्नुयुः ।
दीक्षितो विधिना लिंगी नैष्ठिकोपि विशेषतः ।
तस्य जाते तु संबन्धो नास्त्येव नन्दिकेश्वर
भौतिकस्य विशेषेण लोकाचारसमन्वयात् ।
पूर्वजात्यनुगर्तव्यमितिशास्त्रस्य निश्चयः ।
विभक्तिविश्वासमद्रोहं गुर्वाज्ञापालनस्थितः ।
श्रद्धाशान्तिक्षमासत्यं तथा शौचं तपश्रुतः ।
कृतज्ञाया च दशकं यस्य शिष्यस्य विद्यते ।
स शिष्याणां प्रधानश्च नास्त्येते ते प्रधानकाः ।
भक्तियुक्तश्च शिष्यश्च न दीक्षयति चेद्गुरुः ।
शिष्यज्ञानकृतं पापं गुरोर्भवति निश्चयः ।
तस्मात्सर्वप्रयत्नेन गुणान्सर्वान् परीक्षयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



परीक्ष्य बहुधा शिष्यमुत्तमं नीचकर्मभिः।
नीचञ्चोत्तमकर्मेण ततो दीक्षां समाचरेत।
अल्पदोषगुणाधिक्ये सममेवञ्चैवदीक्षयेत।
अब्द शुश्रूषणान्ते तु वृणीयाद्देशिकोत्तमः।

सुप्रभेदेच-:

शिष्यान् संवत्सरात् पूर्वान् परीक्ष्य च गुणागुणौ।
गुणयुक्तास्तु संग्राह्याः गुणहीनान्विवर्जयेत।

शिष्योपि गुरुं परीक्ष्यात गृह्णीयात्तथा।

अथानद प्रयोगेण नायम लभ्यते।
वत्सरादपिशिष्येण सोन्यं गुरुमुपाश्रयेत।
गुरुमन्यं प्रधानोपि यमन्येत पौर्विकमिति

इत्यादि वचनं ज्ञानदीक्षाविषयःसामान्यन्तत्वक्षोर्ऽ कालं विभज्य सर्वज्ञानोत्तरे प्रतिपादितम्। तद्यथा-:

त्रि चतुः पञ्चभिर्विप्रक्षत्रियो षड्वाष्टभिः।
अष्टाभिर्नवाभिर्वैश्यः शूद्रे विंशति दापयेत।
दीक्षाकालेऽत्वमीमांसा ज्ञानं दाने विचारयेत।

पौष्करे-:

ब्राह्मणः क्षत्रियो वैश्याश्शूद्राश्चैव यतस्तथा।
जलान्धबधिरामूका दीक्षाशक्त्या प्रचोदिता।

मृगेन्द्रे-: दीक्षाञ्च - - - कास्तन्त्रे ये शिवार्पितचेतसः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

~~1233.~~
1307.

165a संत्संगनिरताश्शूरा असंत्संगवरात् मुखाः।
ब्रह्मचर्याभिरताश्शान्ताः कालेन सुपरीक्षिताः।
अक्रोधावव्यचपला श्रद्दधानाजितेन्द्रियाः।
तेनग्राह्यास्सदाशूद्राः स्वाचारपरिरक्षिताः।

काश्मीरतन्त्रे–:

यश्च मुण्डीजटाधारी ब्रह्मचारव्रतास्थितः।
तत्रवेदागमैर्युक्तमदीक्षाकर्मसमाचरेत्।

चिन्त्यविश्वे–:

व्याख्यानञ्च प्रतिष्ठाञ्च मण्डलं शिष्यसंग्रहम्।
गुर्वाज्ञया प्रकर्तव्यं गकग्रामपथेयदि।
दीक्षामात्रेण शिष्योपि सर्वदोषविवर्जितः।
यश्चेपश्चाद्दोषसमुत्पन्नं मनोवाक्कायकर्मभिः।
व्यसनादिभिरस्यैवन्तत्सर्वं गुरवे पुनः।
विज्ञाप्यसर्वदोषञ्च वन्दयेद्देशिकोत्तमम्।
प्रायश्चित्तविधानञ्च गुरुः पश्चादुदीरयेत्।
असन्निधौ गुरोरेव कर्तव्यं ज्येष्ठसन्निधौ।
प्रायश्चित्ताद्भवेच्छुद्धिश्शुचित्वान्मोक्षमाप्नुयात्।

सिद्धान्तशेखरे–:

बहुश्रमाक्रिया निष्ठस्तपोदान क्रियापरः।
गुरुं परीक्षयेत् शिष्यो बहुधास्य कर्मभिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

1304.
1305

तत्र दंपत्या दीक्षाविषये देविकालोत्तरे
विशेष उक्तः। तथा
देवशदीक्षितः पूर्वं कनीयांश्चामरेश्वर।
दीक्षितश्चेत्प्रकर्तव्यो भवता परमेश्वरा।
शृणु देवि ससंस्कारोत्याधिकादधिको भवेत्।
शिवदीक्षा गुरुः कार्या ह्येकस्मिन् भर्तृभार्ययोः।
अर्धाङ्गजायाशरीरैश्च वार्यैर्वाक्यैस्तथात्मनोः।
प्रसिद्धेस्सहभावस्य दंपती सहदीक्षयेत्।
पितरम्मातरञ्चैव भ्रातरञ्च तथैव च।
अनुज्ञाप्यो वरारोहे पत्नीञ्च भगिनीन्तथा।
जामातृपितृपत्न्याद्या योग्यास्स्यु मोक्षकांक्षिभिः।
दीक्षाकर्तव्या शिवो यस्मात् कार्यन्न पुनता।
असंख्येयं इदं वाक्यमधुनाभिलक्षितम्।
शिवे समयी समस्थस्य ज्येष्ठायं पूर्वदीक्षितः।
पुत्रकः पुत्रकस्यापि साधकस्साधकस्य च।
गुरोरपि गुरुः प्रोक्तस्समयोक्ति निदर्शनात्।
संस्कारादधिकाज्ज्येष्ठो व्यतीनां शिवशासने।
न तु जातिवयो वृद्धा विद्याज्येष्ठत्वकारणम्।
विद्यमानो शिरो ज्येष्ठे अभिषिक्ते कनीयसा।
गुरोरन्यगुरुणा वापि कैश्चेत्पश्चात्प्रतीक्षते।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अन्योन्य गौरवन्तश्च कर्तव्यं वन्दनं विना ।

तथा सर्वज्ञानोत्तरे-ः

दीक्षाभिषेक ज्येष्ठेन कनिष्ठस्य कदाचन ।
तपोविद्याधिपस्यापि कर्तव्यं नाभिवादनम् ।

मतंगे-ः शिवत् शिवभक्तास्तु द्रष्टव्याः शिवकांक्षिभिः ।
संस्कृताश्च शिवैर्मन्त्रै गुणानां मूर्तिमूर्तिना ।
वागीशीगर्भसंभूता सर्वे प्राप्तवरानराः ।
यथोक्तशिव संस्कार पवित्रीकृतमूर्तयः ।
सर्वे समानधर्माणः तथापेषो व्यते विधिः ।
गुरोरव्यग्रत स्तेषामेव मानसं यथानुक्रमं शुश्रूषा
वन्दनानि चात्र तु कार्याणि अन्योन्यसंहृष्टैराचक्षुषाविषये
गुरोः ॥ इति दीक्षादर्शे शिष्यलक्षण विधिः ॥

---

॥ अथ शक्तिनिपातलक्षणमुच्यते ॥

यथोक्तलक्षण शिष्यं प्राप्त शक्तिनिपाततारतम्येन तत्तच्चिन्हं ज्ञात्वा तदनुगुण्येन दीक्षां विदध्यात् । तथा सिद्धान्तशेखरे-ः

शक्तिपात
लक्षणम्

शक्तिपातविभेदानां लक्षणं वक्ष्यतेधुना ।
अधर्मधर्मयो स्साम्येजाते शक्तिपातवशो ।
ज्ञानात्मिका पराशक्ते श्शंभोर्यस्मिन्निपातिता ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तस्यैव क्रियते दीक्षा समुक्तो नात्र संशयः।
तत्पातलक्षणं वक्ष्ये तारतम्येन देहिनाम्।
देहपातस्तथा कर्म परमानन्दहर्षणः।
स्वेदो रोमाञ्च इत्येतच्छक्तिपातस्य लक्षणः।

यथा- भास्करस्य प्रभा सद्यो मेघजालैर्निवारितः।
तद्वत् ज्ञानात्मिका शक्तिः पाशजालैस्समाहतः।
पक्वपाशेषु सुव्यक्ता पतितेत्युपचर्यते।

पौष्करे- समत्वं कर्मणां नात्र निमित्तं तदनुग्रहे।
परिपाको मलस्यैव किन्त्वनुग्रहकारणम्।
सर्वत्र कर्मसाम्यस्य यद्यनुग्रहहेतुता।
विज्ञानकेवलानान्तु भवेत्कथमनुग्रहः।
सकलानाञ्च सर्वत्र कर्मसाम्यं न कारणम्।

किरणे गरुडः।
शक्तिपातात्कृते दीक्षा निपातो न वित्वतः।
नवसमवेतत्वात् सर्वदेव स्थिता पशोः।

भगवान्- उपचारेण शब्दानां प्रवृत्तिरिव दृश्यते।
यथा पुमान्विमुक्तोपि नित्योत्युक्तो विनेश्वरः।
पाशच्छेदो यथा प्रोक्तो मन्त्रराट् भगवान् शिवः।
एवं शक्तिनिपातोपि भक्तः प्रोक्त इहागमे।
निपातो यद्वस्तुनः सहसा भवेत्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तद्वत् शक्तिनिपातोऽपि स प्रोक्तो भवभयप्रदः।
तस्मादन्यत्र साम्येवा तदात्मा देशिकं प्रति।

पौष्करे-:

वैराग्यं जायते क्षिप्रं संसारादुःखसागरात्।
दिदृक्षा जायते शंभोः पादपङ्कजयोरपि।
कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा।
कोवा दर्शयिता शंभोरिति संजायते मतिः।
एवं संसारतो ऽस्तमनुगृह्णाति चेश्वरः।

मृगेन्द्रे-: अनेनाप्यनुमितिमिशिष्ट हेतोस्थूलधियापि।
ईषदर्थानिवृत्ते तु शेषकत्वे तमःपते।
भवन्त्येतानि किञ्चिद्विशेषेषु देहिनाम्।

पौष्करे-:

शिष्याणां शक्तिपातार्थं परीक्ष्याशिवशासने।
अभक्तमद्विजं क्रूरं निर्भयं वा क्रियाच्युतम्।
दीक्षामदाज्ञाहन्त्येषामित्याज्ञा परमेश्वरे।
दीक्षयैव मोचयेत्पाशात् शिवत्वञ्च ददात्यणोः।

तथा विद्यापुराणे-:

गुणाढ्यः कृशदोषो वा शिवभक्तः प्रशस्यते
अशेषगुणसंपन्नो नत्वभक्तः कदाचन।
म्लेच्छोपि शिवभक्तो यस्सोऽनुग्राह्यो न संशयः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



165b

विप्रोऽपि लक्षणैर्युक्तो न दीक्षाभववर्जितः।
शिवे भक्तिं दृढं यस्य गुरौनित्यं क्रियासु च।
शिवज्ञानाभ्यासने नित्यं विततीन्ववधा स्थितौ।
अनन्यनिरतस्वास्या दीक्षानान्यस्य शस्यते।
शरीरद्रव्यसंविज्ञानमून् वाचः कर्मगणानणून्।
गुरूर्ध्वेन्धारयेद्यस्तु सोत्र संस्कारमर्हति।

पौष्करे-: शकस्य दीक्षाकर्तव्या द्वयोर्वाथ विशेषतः।
अत ऊर्ध्वं न कर्तव्यं कर्तव्यं नरकं ध्रुवम्।

निश्वासे-:

अप्राप्य शिवसद्भावं पठन्तो शिवसंहिताम्।
अज्ञात्वा कुरुते दीक्षां शिष्याचार्यौ व्रजत्यधः।

स्वायंभुवे-:

अज्ञात्वा शिव सद्भावं ये दीक्षां कर्तुमुद्यताः।
वृथा परिश्रमस्तेषामित्यध्वा वात्र वर्ण्यते।

तथा वायव्य संहितायाम्-:

तत्वव्याप्तिमविज्ञाय शुद्धिवाञ्छकस्य -- च्छति।
विप्रलंभकरस्तद्रो नालं प्रापयितुं फलम्।
वृथा परिश्रमस्तस्य निरयाय च केवलम्।

कालोत्तरे-:

अज्ञात्वालयभागौ तु ये दीक्षां कुरुते गुरुः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आचार्यस्सह शिष्यस्तु नरके रौरवे पचेत् ।
देशिकस्तु प्रयत्नास्तु ज्ञात्वा दीक्षा समाचरेत् ।
अज्ञात्वा शास्त्रसद्भावं ज्ञानतत्व समुच्चयम् ।
दीक्षां करोति यो मोहात् पश्चात्तापं करोति चेत् ।
पञ्चलक्षं जपेद्घोरं यदिवाञ्छति शोभनम् ।
इति दीक्षार्थौ शक्तिनिपात निरूपण-
विधिः ॥

---

॥ अथ दीक्षाभेद उच्यते ॥

मृगेन्द्रे-: यथेष्टसाधनन्दीक्षा परमेशमुखोद्गता ।
निगद्यते समासेन द्वित्वादर्थस्य सा द्विधा ।
भौतिकी नैष्ठिकी चैव सावान्तरविभेदतः ।
सापेक्षा निरपेक्षान्या थालोकाशिवधर्मिणः ।

स्वायंभुवे-: दीक्षाशब्दस्य निर्वचनमुच्यते ।
कारणं सिद्धिदं मुक्ते यावद्द्व्यक्षरार्थमुच्यते ।
दीयते ज्ञानसद्भावं क्षीयते कर्मवासना ।
दानक्षपणयोगाच्च दीक्षाशुद्धि कृदात्मनः ।

तथा चिन्त्यविश्वे-: ~~तद्यथा~~-:
दीयते ज्ञानसद्भावं क्षीयते च मलत्रयम् ।
तथा दीक्षासमाख्याता ज्ञानन्दत्वामलापहम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



गुरुणा चैव सर्वेषां मुख्या दीक्षा गुरुस्मृता ।

साधार निराधारभेदाद्विज्ञानाकलानान्दीक्षाभेदः

प्रतिपादितः- चिन्त्यविश्वे तद्यथा-:

अनुग्राह्यास्त्रय स्मारते विज्ञानप्रलयाकलौ ।

तृतीयस्सकलश्चैव आद्योपि मलमात्रकः ।

मलकर्मसमायुक्तः प्रलयाकल एव च ।

सकलश्च निवृत्यादि कलावृत्यन्त गोचरः ।

तेषां क्रियावती दीक्षा द्विविधा नन्दिकेश्वर ः ।

साधारा च निराधारा साधारा सकलस्य तु ।

निराधाराद्वयान्येषामेव दीक्षामयोदिता ।

आचार्यनिरपेक्षयेण तीव्रशक्त्यानुशंभुना ।

या क्रिया क्रियते साधु निराधारेति कीर्तिता ।

गुरुमूलं समास्थाय मत प्रतिभेद वा ।

भक्त्या शंभुश्च कुरुते या क्रिया साधिकारिणी ः

चतुर्विधा क्रिया दीक्षा सबीजा बीजवर्जिता ।

अधिकारेणसंयुक्तात्यन्या निरधिकारिणी ।

सबीजा समया चार संयुक्ता न नृणां भवेत् ।

वरुणपद्धत्याम्-:

सबीजा द्विविधा भिन्ना प्रथमा शिवधर्मिणी ।

साधकाचार्ययोस्सत्ता देशकालादिभेदतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



धर्माधर्मात्मकं कर्म प्रागागामिविचित्रकम्।
सञ्चिन्त्यशोध्यते यत्र सैवोक्ता शिवधर्मिणी।
अधर्ममातृकाशुद्धा द्वितीया लोकधर्मिणी।
नित्यमात्राधिकारित्वात् समर्थानथ पुत्रकैः।
दक्षानिराधिकारैव नैमित्तेनाधिकारिणी।
साधकाचार्ययोर्नित्यं नैमित्तिकञ्चकर्मसु।
सर्वत्रैवाधिकारित्वात् साधितश्चैव सातयोः।
द्वेधा निर्वाणदीक्षा च लौकिकी शिवधर्मिणी।
शिखाच्छेदो न यत्रास्ति दीक्षा सा लोकधर्मिणी।
ऋषीणां लौकिकी नेयं लिंगिनां शिवधर्मिणी।
शिखाखण्डेनसंयुक्ता दीक्षा सा शिवधर्मिणी।

इतरा द्वैव धर्मिणि भौतिकनैष्ठिकभेदेन द्वैविध्यं सिद्धान्तशेखरे —: तद्यथा -:

भौतिकं नैष्ठिकञ्चेति द्विविधा सा शिवधर्मिणी।
व्रतमोक्षसमायुक्ता भौतिकेति निगद्यते।
शरीरपातपर्यन्त व्रती सा नैष्ठिकी मता।

अस्याभिप्रायः - दीक्षां तु किञ्चित्कालं व्रतमनुष्ठाय
शास्त्रोक्त विधिनैवास्य मनोव्यापारमात्रोर्थो व्रत
समाप्तु सा भौतिकी। आदेहपातं ब्रह्मचर्यमनुष्ठान या
सा दीक्षा नैष्ठिकी। वरुण पद्धत्याम् —:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अथ सबीजदीक्षाया द्विधा भेदो निगद्यते।
सद्यो निर्वाणदायित्वाच्चिरान्निर्वाणदा परा।
प्रारब्धसञ्चिता- ऽगामिके- कर्मकालं विशोध्यते।
यथात्यन्तविरक्तानां सद्योनिर्वाणदा सदा।
प्रारब्धकर्मणां भोधं भोगं यथा सा मुक्तिमन्तक्षरा।
यान्ती बलाद्दयश्चैव स्वच्छो निर्वाणदा भवेत्।
यथा क्रियावती तत्र कुण्डलमण्डलपूर्विका।
मनोव्यापारमात्रोर्था या सा ज्ञानवती मता।
सा चानेकविधा प्रोक्ता तत्प्रपञ्चोयमुच्यते।
चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा।
शास्त्रञ्च योगदीक्षा च हौत्रीत्यादिरनेकधा।
चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यं समीक्षते।
पाशबन्धविमोक्षाय दीक्षेयञ्चाक्षुषी मता।
निधाय दक्षिणे हस्ते शंभुं मन्त्राङ्ग संयुतम्।
निधाय शिष्यशिरसि स्पर्शदीक्षा भवेदियम्।
166a तत्वे चित्तं समास्थाय प्रहितान्तरतेजसा।
गुरुरुच्चारयेन्मन्त्रान्मन्त्रदीक्षा समाहृतम्।
योगेन योगदीक्षा स्यात् प्रदानाद्योगजा भवेत्।
अग्निकार्यवती हौत्री शैवदीक्षा निरूपिता।
उच्चरेद्वचसा मन्त्रान् सा दीक्षा वाचिकी तथा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



शिवशास्त्रप्रदानेन नास्ति दीक्षा समाहृता ।

चिन्त्ये -

अथभक्ति समायुक्तं शिवानुध्यानकांक्षिणम् ।
परीक्ष्य च मलं शिष्यं विलोक्य कृपया गुरुः ।
दीक्षा कार्यं प्रकुर्वीत कृतनित्यक्रियो मतः ।
विनश्यत्यन्धकारन्तु यथा सूर्यस्य सन्निधौ ।
गुरु दीक्षणादेव सर्वपापात्प्रमुच्यते ।
गुरुर्यं स्पृश्यति हस्तेन यं यं पश्यति चक्षुषा ।
शिवं भवति तत्सर्वं शिवादेव प्रसादतः ।
न लिप्यते मलेनैव पद्मपत्रमिवांभसा ।
तस्मा द्गुरु शिवः प्रोक्तो गुरुशक्तिर्मनोन्मनी ।
दीक्षाशतसहस्रान्तु पापानां कृतवानपि ।
शिवज्ञानमलब्धश्चेत् ज्ञानयात्रां समाश्रयेत् ।
ज्ञानहीनं गुरुं प्राप्य कुतो मुक्तिमवाप्यसि ।
भिन्ननावाश्रितस्त्वब्धे यथा पारन्नगच्छति ।
तस्मात्सर्वप्रयत्नेन संश्रयेत् ज्ञानपारगः ।
मधुलब्धे यथा भृंगो पुष्पात्पुष्पन्तरं वने ।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ।
तल्लब्धं स्वं विसृजेद्द्विभ्योध्यधः पतितस्य यः ।

मतंगे - शिवशक्तिकरैः स्पृष्ट्वा विनीता प्रियवादिनी ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अक्रोधी नो पचापं च दृढध्यानो जितेन्द्रियः।
तेन कृतात्मा स्सदा क्रूरा स्वाचारपरिपालकाः।
अन्यथा नाधिकारोस्ति दीक्ष्यदीक्षकयोरपि।

तथा वामदेव शिवागमे-:

शांभवी चैव शाक्ती च मान्त्री चेति शिवागमे।
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना।
गुरोरालोकमात्रेण स्पर्शात्संभाषणादपि।
सद्यस्संजायते प्राज्ञ पाशोपक्षयकारिणी।
सा दीक्षा शांभवी प्रोक्ता सा पुनर्भिद्यते द्विधा।
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः।
ययास्यान्निर्वृतिस्सद्यस्सैव तीव्रतरा मता।
तीव्रा तु तीव्रोरत्यन्तं पुंसः पाशविशोधकी।
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु।
गुरुणा योगमार्गेण क्रियते ज्ञान चक्षुषा।
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्विका।
मन्दमन्दतरोद्देशात्कर्तव्या गुरुणा बहिः।
शक्तिपातानुसारेण शिष्योनुग्रहमर्हति।

पौष्करे-:

तद्योग्यतानुसारेण करुणया गर्भया दृशा।
पुनाति साधिकारेण यं वापि परमेश्वरः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



अनुग्राह्यविनेये तथानुग्राहकस्य च।
कारुण्ये सति वः कर्तव्या तयोर्योगस्सुदुर्लभः।

अस्या दीक्षायाममलनिवृत्त शिवत्वप्राप्तिरेव फलं भवति। तदुक्तं तत्रैव-

दीक्षैव मोचयेत्पाशान्शिवत्वञ्च ददात्यणोः।

तथा रौरवे-

एवं शैवाद्वरं प्राप्य दीक्षामन्त्रसमुद्भवम्।
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः।
भिन्ने देहे शिवो भूत्वा शिवधर्मैस्समन्वितः।
शिवधर्ममनुप्राप्य त्वविभागाय कल्पते।
यथा समुद्रमासाद्य नदी मृष्टांबुवाहिनी।
क्षारतोयत्वमायाति तत्प्रभावान्महोदधेः।
एवं वै भिन्नदेहात्मा शिवमेवाधिगच्छति।
सरित्समुद्रसंयोगाद्विभागेनैव जायते।
तस्माच्छिवाध्वरे रूपकल्पनास्वच्छवर्णता।

तद्यथा-

निगूढास्तत्र तिष्ठन्ति काष्ठे वह्निर्यथा तथा।
तद्भेदस्तु यथा वह्नि मण्डकस्य वशात्स्फुटम्।
स्वस्वरूपं विजानाति भास्वरं यत्सा निर्मलम्।
अन्धकास्त्विह वै शिवस्स्वयमेव सदाशिवः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



आचार्यतनुमास्थाय सदाचानुग्रहे स्थितः।
मन्त्रमण्डनवत् ज्ञेयं अध्वा चाध्वराग्निर्यथा।
वागीशी योनिर्विज्ञेया धूमा ज्ञेया मयादिकृत्।
आत्मावै वह्निवत् प्रोक्तो साधकस्तु पराशिवः।
मलकर्म कलाद्यैस्तु निर्मुक्तो विगतक्लमः।
तत्रस्थोऽपि न बाध्येत यतोऽतीव सुनिर्मलः।
रसविद्धसमायोगात्ताम्रं कालिकया यतः।
विशोधितन्तु तत्वशो हेमत्वं प्रतिपद्यते।
न भूयस्ताम्रतां याति तथात्मा च कथञ्चन।
रसस्वमन्त्र शक्तिस्तु क्रिया ज्ञेया तु वह्निवत्।
तत्वज्ञश्च शिवो देवी आचार्य तनुविग्रहः।
आत्मावै हेमवत् ज्ञेयो मलो ज्ञेयस्तु कालिका।
मन्त्र द्रव्यक्रिया योगात् चाद्याधारे यथा शिवे।
गुरुणा तत्रविदुषा यस्माद्वै निर्मलः कृतः।
न भूयोमलतां याति शिवत्वं यातिनिर्मलः।

वातुले-:

रसविद्धं यथा ताम्रं न भूयस्ताम्रतां व्रजेत्।
ज्ञानसिद्धस्तथा देही न भूयः पशुतां व्रजेत्।
विमुक्तं प्राकृतं भावं तेनैवाधिकृतः पुमान्।
ज्ञातज्ञानो गुरुर्ब्रह्मा मर्त्यलोकपरिस्थितः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



ब्रह्महत्याश्वमेधाद्यैः पुण्यपापैर्न लिप्यते।

॥ इति दीक्षादर्शे दीक्षाभेदनिरूपणविधिः॥

---

॥ अथ दीक्षादेशनिरूपणविधिरुच्यते ॥

दीक्षादेश विधिः तथ्यथा— स्वायंभुवे

अथ यागप्रसिद्ध्यर्थं ब्रह्मावर्तादिकं भवेत्।

देशं श्रुतसंतुष्टं समितं पुष्पोदकोत्तरम्।

. . . भागान्तं वर्णानामनुपद्रवम्।

मृत्कुशाद्योषधीगाढं नास्तिकानामनिन्दकम्।

कारणे— सह्येवा पारियात्रे च महेन्द्रे मलयेऽपि च।

पुण्यनद्यब्धतीरे वा संगमे वा विशेषतः।

क्षीरवृक्षसमीपे तु पुष्पोद्यानेऽथवा पुनः।

तथा— चिन्त्यविश्वे—

महेन्द्रमलये सह्ये वारियात्रे हिमालये।

विन्ध्येच मन्दरे चैव श्रीगिरौ शिवपर्वते।

गंगातीरे च कालिन्द्यौ नर्मदा तुंगभद्रके।

सरस्वत्यां पयस्विन्यां कावेरि कन्यका तटे।

वाराणस्यादि पुण्येषु क्षेत्रदेशेषु वा पुनः।

समुद्रकायां नद्यायां तीरे रुद्रे महाह्रदे।

पुष्पोद्यानेऽथवानित्यं क्षीरवृक्षसमीपगे।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



प्रासादे च मठे चैव श्रोत्रियस्य गृहेऽथवा ।
रुद्रदेवो मनोरम्ये मृत्स्नाधिकतले समे ।

स्वायंभुवे -:

महेन्द्रे मलये सह्ये श्रीशैले हिमवद्गिरौ ।
पारियात्रां बुधे विन्ध्ये वृद्धिमांच क्षपर्वते ।
गंगायां यमुनायाञ्च तयोरन्तर डाव च ।
सरस्वत्यां दृष्टवत्यां गोदावर्यां गयां निधौ ।
नर्मदायां कृष्णवेण्यां सिन्धौ पञ्चनदे तथा ।
तुंगभद्रोपकण्ठे च चन्द्रभागोपकण्ठके ।
पुण्यायतनतीर्थेषु नदीनां संगमेषु च ।
भवने वने गोष्ठे श्रीपुरे क्षीर · · के ।
ब्रह्मकुण्डे कदंबे च गुरोस्समनिशोभने ।
देवालये विशेषेण दक्षिण द्वारि वेश्मनि ।
कुन्दवृक्षस्य मूले च दीक्षास्थानं प्रकल्पयेत् ।

। ... : देवालये मठे चैव गुरावेश्य गृहे तथा ।
दीक्षास्थानन्तु कर्तव्यं मण्डपं विधिपूर्वकम् ।

काश्मीरतन्त्रे -:

पुण्यक्षेत्रे शिवक्षेत्रे सदादीक्षा प्रशस्यते ।

तथोक्तं क्रियाकरणमण्डनपद्धतौ -

उद्यानेषु शिवालयेषु सरितां तीरेषु पद्मालये

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



काञ्च्यां व्याघ्रपुरे पयोधिपरिधे जप्ते श्व -
पर्वते - गोष्ठे वापि गुरोर्गृहे स्वभवने श्रीकालहस्तीश्वरे
गोकर्णे बहुपावने तनुभृतां दीक्षास्थलं शस्यते ।

मतंगे - शिवालयस्थ भूमयः प्रवरावने ।

सरित् गंगा महापुण्या कालिन्दी चाप्यनिन्दिता ।
सरस्वती नर्मदा च चतस्रस्सरितो वराः ।
आर्यावर्तोद्भवावास्ता स्वयञ्चैव महार्णवः ।
गंगायमुनयोर्मध्ये दीक्षाक्षेत्रमनुत्तमम् ।
सरित्संगमस्थास्ता उद्यानं सामनोरमः ।
विमलं स्रू सरित्श्रेष्ठ यत्र वा नलिनी शुभा ।
येभ्यो ऽभ्यो स्येकतमं भद्रमथवा यन्मनोरमम् ।

आलयादौ स्थानविशेष उक्तः - कामिके -

हर्म्याग्रे मण्डपं कुर्या द्यागगृहञ्च पार्श्वयोः ।
अन्तरे वा प्रकर्तव्यं चतुरश्रं यथा भवेत् ।

गृहादि विषये तदग्रे द्वारोत्सेधमानान्तरन्त्यक्त्वा तद्बाह्यप्रदेशे दशहस्तमानेन यागार्थमण्टपं कुर्यात् । तथा ज्ञानरत्नावल्याम् -

द्वारोच्छ्रयान्तरन्त्यक्त्वा गृहलिंगे गृहाग्रतः ।
दशहस्तप्रमाणेन मण्टपं कारयेत्सुधीः ।
ऽतदेवात्मार्थलिंगप्रतिष्ठायां मण्डपं कार्यम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



मतंगे -: प्राच्योदकं भवेद्भद्रं याम्यां गिरिवरं शुभम ।
क्षतं दूर्वादिभिर्नद्धं कुशबिल्वोपबृंहितम ।
ग्राह्यं त्वविदानित्वं सुपरीक्ष्य यथाक्रमम ।
स्मृतौ वर्ज्य देशमुक्तम -:
~~सिन्धु सौवीर सौराष्ट्रं त्यक्त्वा तद्बाह्य प्रदेशे दश-~~
~~हस्तमानेन यागार्थमण्डपं कुर्यात - तथा ज्ञानरत्नावल्याम~~
~~द्वारोद्धृत्य त्वरन्त्यक्त्वा स्वलिंगे गृहगत ।~~
~~दशहस्तप्रमाणेन मण्टपं कारयेत~~
सिन्धु सौवीरं राष्ट्रं तथा वासिनः ।
कों कण वंग कलिंगान्श्च गत्वा संस्कारमर्हति ।
अथ भूपरिग्रहणार्थं प्रवेश बलिरुच्यते । कामिके -:
भूपरिग्रहं
नवभागं धरां कृत्वा ब्रह्मस्थानादि तत्क्रमात ।
नवादिषु बलिन्दद्यान्मन्त्रेणानेन वास्तुवित ।
इमे भूमौ वसन्तोत्र भूतपैशाच राक्षसाः ।
स्वेच्छगच्छन्त्विमां भूमिभागमिह वासिने ।
दध्या ज्या धूपसंयुक्तं रन्यैस्तेषां बलिं क्षिपेत ।
इति विशेषं शिव . . . निर्माण स्थापना दीपिकाया-
मत्स्यादि: प्रपञ्चितन्तत्तवात्र लोक्यताम ।
अतः परं प्रवक्ष्यामि महीतल विशोधनम ।
तस्याः परीक्षाविज्ञानं परिग्रहणमेव च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



जलतीरसमीपस्थां शुद्धां भूमिं परीक्षयेत्।
हस्तमानं पुरा खात्वा पूरिताप्याधिका शुभा।
समं मध्यमा ज्ञेया कनिष्ठाया न पूरिता।
यस्यवर्णस्सयोगन्धवशोभिना स च विद्यते।
भूमिसंशोधनं कृत्वा क्षेत्रजननं कुरु।
जनिते तु शिवक्षेत्रे वस्त्वाद्वै भूपरिग्रहः।

तथा निश्वासे —

द्रव्याः परीक्षणञ्चैव तथा भूमि परिग्रहः।
साधकस्याभिषेके तु आचार्याणान्तथैव च।

मृगेन्द्रे — विधिना वक्ष्यमाणेन कृत्वा भूमेः परिग्रहः।
पुण्ये नद्ये सामितपुष्प कुशवारिसमन्विते।
देशे वर्णानुगां भूमिं प्रागीशे दिग्भवां भजेत्।

यस्य ब्राह्मणादिवर्णस्य यादृक् वक्ष्यमाणं तत्तदेव-वर्णानुगमिति तत्रैवोक्तं —

हिमसृक् कालनीलाभं मधुनादि रसोत्तमम्।
घृतादिदेशाकृन्मध्य गन्धिनां सुप्ररोहिणम्।

यथा संख्यं ब्राह्मणादीनां हिमरुधि धहरिताल श्यामवर्णां कषायाम्लकरकरसां घृतरक्तगोमयसिरा-गन्धाञ्च भुवं परिग्रहेत्। डावञ्च प्रोक्तं भ्रमरस-गन्धास्सर्वा एव ब्राह्मणभूमयोग्राह्याः। आज्या वर्ज्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



तिस्रो क्षत्रियस्य पञ्च श्चा वैश्यस्य शूद्रस्य निधाय
शिलाभूमिश्च कीर्तिताः। कारणे-
क्षेत्रस्तदति वक्षादुर्वी कथितास्त्वानुलोमिनाम्।
निश्वास कारिकायाम्-
विप्रस्य तिस्रो राजस्य उभे विशेष एका शूद्रस्य
नियमा शिलाभूमिश्च कीर्तिताः।
यष्ठा तु दैवदेवेशि हुनेदष्टशतं क्रमात्।
बलिस्तत्रैव दातव्य दिशीकेब महात्मना।
भूम्याः परिग्रहा त्येव तव देवि उदाहृतः।
उक्तवर्णा संभवे प्रायाश्चित्तौ वर्णानापादयेत्।
तथोक्तम्-
ब्राह्मणादि चतुष्कस्य वर्णाभावे तदीश्वरैः।
सहस्राधिक होमेन वर्णापादनमाचरेत्।
स्वायंभुवे-
भूमिन्तत्र परीक्ष्येत निम्नोन्नतविवर्जिताः।
अनूषरा समाक्लिन्ना मृदा कर्दम वालुका
167a तुषकेशास्थिरहितां भस्मांगारविवर्जिताम्।
दुष्टशल्याविनिर्मुक्तां स्निग्धांभास्वतीं शुभाम्।
शूर्पाद्याकृति निर्मुक्तां प्रागुदक्प्लवनाम्महीम्।
शोधितां करशांखेन करखातपरीक्षिताम्।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE



वर्णावर्णाद्यविकल्पां महीं कामफलप्रदाम् ।
मनः प्रतिकशन्मुख्यां सिद्धेवापि यथोदिताम् ।

सुप्रभेदे-:

शुभाशुभनिमित्तानि तस्मिन् काले परीक्षयेत् ।
शुभे तु प्रास्थिते यावादशुभे तु निवृत्तयेत् ।
अशुभेत्वाग्निमास्तीर्य शिवेनैव शतं हुनेत् ।

निश्वासे-:

पापे वा पतिं विद्यात् शुभे दशुभमादिशेत् ।
शयनानामनादृत्य कुरुते कर्म मानतः ।
धर्माणि प्रतिघातानि विघ्नात्यापि भवन्ति च ।
तस्मात्सर्वेषु कार्येषु शकुनं प्रति पूजयेत् । ॥
अथ वर्ज्यभूमि विधिरुच्यते ।

सन्ताने-:

वर्ज्य भूमिः वल्मीकाण्डञ्च औषध्यं क्रमिदुष्टञ्च वर्जयेत् ।

सर्वज्ञानोत्तरे-: केशास्थिकण्टकादीनां गर्तोपरविवर्जिताम् ।
सर्पवल्मीकनिर्मुक्तां भस्मांगार तुषोक्षताम् ।

कामिके-: क्रमिदुष्टान्तु पाराभ्यां वल्मीकाद्यञ्च वर्जयेत् ।
शंकुस्थापन विधिरुच्यते-: पौष्करे-:
भुवः परिग्रहार्थन्तु शंकुसप्ताणि वेशयेत् ।

अंशुमति-: मानं निश्चित्य तत्पूर्वे निखने तत्परिग्रहाम् ।

Center for Shaiva Studies, Pondicherry Collection